
भारतीय-ज्योतिषशास्त्रस्येतिहासः



विषय संख्या ______ आगत नं० ______

लेखक लोकमणि पाठक:

शीर्षक ______

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

पुस्तकालय

गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

वर्ग संख्या.........   आगत संख्या 114861

पुस्तक-विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३०वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए अन्यथा ५० पैसे प्रति दिन के हिसाब से विलम्ब दण्ड लगेगा।

॥ श्रीः ॥

चौखम्बा सुरभारती ग्रन्थमाला
१७९

भारतीय-
ज्योतिषशास्त्रस्येतिहासः

(A History of Indian Astrology)

प्रणेता
आचार्यलोकमणिदाहालः

चौखम्बा सुरभारती प्रकाशन
वाराणसी

प्रकाशक

चौखम्बा सुरभारती प्रकाशन

(भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक)

के० ३७/११७, गोपालमन्दिर लेन

पो० बा० नं० ११२९, वाराणसी २२१००१

दूरभाष : ५७२१४

प्रथम संस्करण १९९०

मूल्य ६०–००

अन्य प्राप्तिस्थान

चौखम्बा संस्कृत प्रतिष्ठान

३८ यू. ए., बंगलो रोड, जवाहरनगर

पो० बा० नं० २११३

दिल्ली ११०००७

दूरभाष : २३६३९१

*

प्रधान वितरक

चौखम्बा विद्याभवन

चौक (बनारस स्टेट बैंक भवन के पीछे)

पो० बा० नं० १०६९, वाराणसी २२१००१

दूरभाष : ६३०७६

मुद्रक

श्रीजी मुद्रणालय

वाराणसी

द्वित्राः शब्दाः

ज्योतिषशास्त्रेतिहासग्रन्थः प्रस्तुतोऽस्ति पाठकानां समक्षम्। ज्योतिषं हि शास्त्रं श्रुतिसम्मतं तदङ्गत्वेन सम्मतञ्च। संहिताकालादारभ्य साम्प्रतिककालपर्यन्तमनवरतरूपेण पल्लवितं पुष्पितञ्च ज्योतिषशास्त्रं हि लघुकायेऽस्मिन् ग्रन्थे नैव समग्रत्वेन सन्निवेशयितुं शक्यते, तथापि यावदेव सम्भूतं तावदेवाऽत्र सन्निवेशितम्। ग्रन्थेऽस्मिन् सन्ति द्वादशप्रकरणानि, यत्र हि मुख्यरूपेण वैदिकसंहिताकाले ज्योतिषस्वरूपं वेदाङ्गत्वेन ज्योतिषं सिद्धान्तज्योतिषं संहिताभागः जातकस्कन्धः ज्योतिर्विदां परिचयश्च वर्णिताः। ग्रन्थोऽयं सामान्यपाठकानुद्दिश्य प्रणीतः। यद्यनेन विदुषामपि काचित्सेवा सम्भवेत् तदस्माकं सौभाग्यमेव भवेत्।

ग्रन्थस्यास्य प्रणयने ये हि खलु ग्रन्थाः प्रयुक्तास्तत्तद्ग्रन्थप्रणेतृभ्यो सन्त्वनेके प्रणामाः विशेषतस्तेभ्यो यैः खलु ज्योतिषेतिहासविषये महान्तं श्रमं कृतवन्तः। तदतिरिक्तमपि अमूल्यपरामर्शपुस्तकादिप्रदानेन ग्रन्थस्यास्य प्रणयने साहाय्यं कृतवन्तः श्रीमन्तः पद्मनाभत्रिपाठिमहोदयाः सिद्धान्तज्योतिषाचार्याः विशेषेण सश्रद्धं प्रणम्यन्ते।

एतदप्युच्यते सविनयमन्ते—

'ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्तु ते किमपि तान् प्रति नैष यत्नः।'

किन्तु,

यत्नस्त्वयं खलु कृतेऽल्पधियां जनानां
सज्ज्योतिषार्णवनिमग्नपरायणानाम्॥'

इति शम्।

काशी
श्रावणपौर्णमासी, सं० २०४७

विदुषां वशंवदः
लोकमणिदाहालः

विषयसूची

॥ श्रीः ॥

भारतीय–
ज्योतिषशास्त्रस्येतिहासः

मङ्गलाचरणम्

सिद्धान्त-संहिता-होरारूपस्कन्धत्रयात्मने ।
नमो ज्योतिःस्वरूपाय निगमागमचक्षुषे ॥ १ ॥
मूलं यस्यास्ति गणितं पाटीबीजग्रहाश्रितम् ।
यस्यास्ति शाखा वितता होराताजिकभेदतः ।
फलानि संहिता यस्य क्रियाकालनिदेशिका ।
जयत्यशेषप्रतिभूर्ज्योतिःशास्त्रमहीरुहः ॥
नत्वा परं महान्तं लोकमणिरितीह पर्शुरामसुतः ।
ध्यात्वा गुरोश्च पादौ ज्योतिषशास्त्रेतिहासमातनुते ॥

प्राक्कथनम्

संस्कृतवाङ्मयं हि विश्ववाङ्मयसमुदाये मूर्द्धन्यमिति न सम्भवति कस्याऽपि विमतिः। अस्य हि विस्तृतं सुसमृद्धञ्च सर्वाङ्गपूर्णं कलेवरं सर्वानपि विस्मापयतीति नैवात्युक्तिः। अत्रत्यो हि शाश्वतः सार्वभौमश्च ज्ञाननिधिरनादिकालादारभ्य साम्प्रतिकयुगपर्यन्तमपि अनवरतरूपेणोपचीयमानो दृश्यते। वाङ्मयमिदमेवादाय—'यन्नेहाऽस्ति न चान्यत्र यदिहास्ति न तत्क्वचित्' इत्युक्तिश्चरितार्था दृश्यते। 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इत्यादिकर्मप्रवृत्त्युपदेशपरमन्त्राश्च यद्येकत्र सन्त्यत्र तथैवापरत्र 'अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' इतिप्रभृतिनिवृत्त्युपदेशपरवचनान्यपि लभ्यन्तेऽत्रैव। अनेन सिध्यति यदस्य वाङ्मयस्य मूलतो द्वौ भागौ—अविद्या विद्या चेति। अविद्याऽपरेत्युच्यते विज्ञानशब्देनाऽपि ज्ञायते यदा विद्या पराशब्देन ज्ञानशब्देनाऽपि ज्ञायते। पुरुषार्थसिद्धिरेवाऽस्य वाङ्मयस्य चरमं लक्ष्यम्। पुरुषार्थश्च चतुर्विधो धर्मार्थकाममोक्षभेदेन। तत्र धर्मो हि बुद्धेर्विषयः सदसद्विवेकलक्षणः। अर्थश्च शरीरविषयो व्यवहारलक्षणः। कामो हि मनसो विषयो भोगलक्षणः। मोक्षस्तु आत्मनो विषयः चरमनिवृत्तिलक्षणः। एषां हि यथायोग्यप्रवृत्तिनिवृत्त्युपदेशप्रतिपादनवैलक्षण्यमेवाऽस्य वैशिष्ट्यम्। उक्तञ्च—

'धर्मार्थकामाः सममेव सेव्या यो ह्येकभक्तः स नरो जघन्यः' इति । धर्मानुरोधेनार्थस्यार्थस्यानुरोधेन कामस्य मोक्षानुरोधेन सर्वेषामुपयोग एवास्य परमः सन्देशः । तेन जनस्य मोक्ष एव चरमो लक्ष्यः । किन्तु स तु तुरीयः पादः । पादत्रयमतिक्रम्यैव तत्र गन्तुं शक्यते । धर्मा अनुष्ठेया अर्थाश्चोपार्जनीयाः कामाश्च सेव्यास्तत एव मोक्षे रतिः सम्भवतीति तदनुरोधेन मानवजीवनमपि ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसंन्यासावस्थाभेदेन चतुर्धैव विभक्तमस्ति । आपञ्चविंशतेर्ब्रह्मचारी भवति प्रवृत्तिनिवृत्तिज्ञानादिकमुपार्जयति । स्नातश्च स गृहस्थाश्रमं प्रविशति विविधैर्भोगैरिन्द्रियाणि सन्तर्पयति यथायोगमापञ्चपञ्चाशत्तमात् । तृप्तेन्द्रियश्च स वानप्रस्थं प्रविशति चरति च विविधं तपो विषयान्मनोनिवर्तनायापञ्चसप्ततेः । विषयव्यावृत्तात्मा स संन्यासमधिगच्छति त्यक्तसर्वपरिग्रहो यावज्जीवं त्यक्तकलेवरश्च परमेशानमाप्नोतीति सुव्यवस्थापिता जीवनचर्याऽत्र । तदित्थं सर्वाङ्गपूर्णं वाङ्मयमिदं निवृत्तिमार्गमात्रोपदेशकमकर्मण्याधिवक्तृ च यदि कश्चिन्मन्यते स देवानां प्रिय एव । न केवलमत्र पुरुषार्थसिद्धिरेव वर्णिताऽपितु तत्तन्मार्गव्याख्यातॄणि शास्त्राण्यपि प्रथितानि सन्ति । समस्तमपि वाङ्मयं मूलतश्चत्वारो वेदास्तस्य षडङ्गानि पुराणं न्यायो मीमांसा धर्मशास्त्रञ्चेति चतुर्दशधा विभक्तमस्ति । तेषाञ्च शाखाः प्रशाखाश्च सहस्रधा विभक्ता व्याख्याताश्च सन्ति । मूलतश्चत्वारो वेदाश्चतस्रो मूलसंहिता वा ऋग्यजुःसामाथर्वाख्याः । तत्रापि ऋच एवैकविंशतिः शाखाः यजुषः शुक्लभागे पञ्चदश कृष्णभागे षडशीतिरिति एकोत्तरशतं शाखाः । सहस्रवर्त्मा सामवेदः । अथर्वश्च नवविध इति । एतासां शाखानां प्रत्येकं ब्राह्मणग्रन्था आरण्यकानि उपनिषदश्चेति को नाम ताः परिगणयितुं प्रभवति । मूलसंहितानां प्रत्येकं पुनरुपवेदाः क्रमेण आयुर्धनुर्गान्धवार्थाख्याः । तत्रापि सर्वेषामेव प्रत्येकं शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गानि । एषामपि सन्त्यनेकान्युपाङ्गानि असङ्ख्येयानि । शास्त्राणि च प्रत्येकं कतिपयस्वविभागेषु विभक्तानि भवन्ति यथा ज्योतिषं हि शास्त्रं सिद्धान्तसंहिताहोराख्येषु त्रिषु स्कन्धेषु विभक्तमस्ति ।

इत्थं हि प्रवृत्तिनिवृत्तिमार्गनिर्देशनपरं हि वाङ्मयमिदं कलेवरेण गुणेन च सर्वाण्यतिशेते इति न प्रामादिकम् ।

ज्योतिषशास्त्रम्

वेदस्य हि षट्स्वङ्गेषु ज्योतिषमन्यतममिति तूक्तमेव । ज्योतिषं हि वेदस्य चक्षुष्ट्वेन स्मर्यते । यथा हि तस्य शिक्षा घ्राणं व्याकरणं मुखं छन्दःपादौ च । यथोक्तं भास्कराचार्यैः—

'वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते ।
संयुतोऽपीतरैः कर्णनासादिभिः चक्षुषाङ्गेन हीनो न किञ्चित्करः ॥' इति ।

अपरिमिते गगनमण्डले यानि हि तेजोमयानि बिम्बानि दृश्यन्ते तानि सर्वाण्येव समष्टया ज्योतिःशब्देनोच्यन्ते । तेष्वपि यानि हि सदैकरूपगतीनि तानि नक्षत्रशब्देन ज्ञायन्ते, प्रतिदिनं भिन्नभिन्नगतीनि तु ग्रहशब्देन । तेष्वपि पुनः केचिदमृतमयकिरणाः, केचिद्विषमयकिरणाः, केचिदुभयमिश्रकिरणाः केचित्तूभयधर्महीनरश्मयश्च स्मृताः । एवंविधनक्षत्रग्रहतारकादिज्योतिःपिण्डानां स्थितिगतिप्रभावादिवर्णनपरं शास्त्रमेव ज्योतिषपदेनाभिधीयते ज्योतींषि अस्य सन्ति विवेचनीयत्वेनेति (ज्योतिःशब्दान्मत्वर्थीयेऽचि (अर्श आदित्वात्) व्युत्पत्त्या ।) तदधिकृत्य कृतो ग्रन्थो ज्यौतिषः सूर्यसिद्धान्तादिः । तदधीते तद्वेद वा ज्यौतिषिकः (क्रतूक्थादित्वात् ठक्) ज्यौतिषो वा (पक्षेऽण्) । ज्योतिषमस्यास्तीति ज्योतिषी एवमेव ज्यौतिषी च । केचित्तु ज्योतींषि अधिकृत्य कृतो ग्रन्थः इति व्युत्पत्तिमाश्रित्य शास्त्रमपि ज्यौतिषपदेनाभिदधति । किन्तु नासौ पक्षः साधुः । यतो हि अण्प्रत्ययस्तु ग्रन्थविशेषमादायैव भवति न तु शास्त्रमात्रम् । शास्त्रग्रन्थयोर्भेदस्तु स्पष्ट एव । यथोक्तं विषयानुशासनमात्रं शास्त्रमाचार्यविशेषकर्तृको निश्चितशब्दानुपूर्वीको ग्रन्थ इति । यथा हि पाणिनिः सूत्रकारो न तु व्याकरणकारः, सूत्रस्य ग्रन्थरूपत्वाद्व्याकरणस्य तु शास्त्ररूपत्वात् । केचित्तु ज्योतिर्विद्यारूपेऽर्थे ज्योतिषमिति शब्दं रूढमपि मन्यन्ते । यच्च ज्योतिषशब्दाद्रूढात्स्वार्थेऽणि ज्यौतिषमिति वदन्ति तदपि निरर्थकशिरोवेदनैव । वस्तुतस्तु शास्त्रमिदं ज्योतिषं ज्योतिर्विषयकम् । न केवलमिदं व्युत्पत्त्यैवापितु लगधमारभ्य कमलाकरभट्टपर्यन्तं ये खल्वाकरग्रन्थाः प्रणीतास्तत्र तत्र शास्त्रमिदं ज्योतिषशब्देनैव व्यवहृतं दृश्यते इति तज्ज्ञा वदन्ति ।

शास्त्रस्यास्य पृथक् शास्त्रत्वेनाविर्भावोऽपि शास्त्रान्तरसमकालिक एव । कथ्यते हि वैदिकसंहितासु तत्र तत्रोपवर्णितं ज्योतिषविषयमादाय लगधनाम्ना मुनिना प्रणीतो वेदाङ्गज्योतिषाख्यो ग्रन्थ एव विषयेऽस्मिन् प्रथम इति । ज्योतिषशास्त्रप्रवर्तकत्वेन तत्र तत्र सूर्यादयोऽष्टादश ऋषयः स्मर्यन्ते । ग्रन्थकर्तृषु शास्त्रेऽस्मिन् लगधात्परम् आर्यभट-लल्ल-ब्रह्मगुप्त-वराहमिहिर-श्रीपति-भास्कराचार्य-मुनीश्वर-ज्ञानराज-कमलाकरभट्टाः प्राधान्येन स्मर्यन्ते श्रीधर-वटेश्वर-मुञ्जालादयश्च । नवीनेषु नीलाम्बर-बापूदेव-सुधाकर-शङ्करबालकृष्ण-योगेशचन्द्र-केतकर-आप्टेप्रभृतयो विद्वांसः परिगण्यन्ते गणकत्वेन ।

शास्त्रमिदं सिद्धान्त-संहिता-होराभेदेन त्रिषु स्कन्धेषु विभक्तमिति त्रिस्कन्धज्योतिषशब्देनापि ज्ञायते । तत्राद्यो गणितशब्देनाऽप्यभिधीयते । स्कन्धोऽयमपि ग्रहगणित-पाटीगणित-बीजगणितभेदेन त्रिविधः । ब्रह्मा वसिष्ठः सोमः सूर्यश्चे-

त्यस्य प्रवर्तकत्वेन स्मृता आचार्याः अनन्तरमार्यभट-ब्रह्मगुप्त-वराहमिहिर-भास्कराचार्य-कमलाकरप्रभृतयः। आर्षः सूर्यसिद्धान्तः आर्यभटस्य आर्यभटीयं, ब्रह्मगुप्तस्य ब्राह्मस्फुटसिद्धान्तः, वराहमिहिरस्य पञ्चसिद्धान्तिका, भास्कराचार्यस्य सिद्धान्तशिरोमणिः कमलाकरस्य सिद्धान्ततत्त्वविवेकश्च स्कन्धस्यास्य मान्या ग्रन्थाः। संहितास्कन्धः कालचक्रं विवृणोति मुहूर्तादि। आर्षत्वेन बार्हस्पत्य-काश्यप-नारदसंहिताः सम्प्रति दृश्यन्ते, यद्यपि वहव ऋषयः संहितायाः कर्तृत्वेन स्मृता दृश्यन्ते तत्र तत्र। वराहमिहिरस्य बृहत्संहिता विषयेऽस्मिन् प्रामाणिको ग्रन्थः। होरास्कन्धस्तु जातकताजिकभेदेन द्विधा विभक्तोऽस्ति। अयमेव फलितज्योतिषनाम्नाऽपि व्यवह्रियते। वराहमिहिरस्य बृहज्जातकम्, नीलकण्ठस्य ताजिकनीलकण्ठी च विषयेऽस्मिन् प्रामाणिकौ ग्रन्थौ।

तदिदं शास्त्रं व्यवहारशास्त्रत्वेन समाद्रियते जनैः। व्यवहारेऽस्योपयोगो बहुमुखः। ग्रहाणां कालावस्थागत्यादिनिर्देशेन कर्मसम्पादननिमित्तकमुहूर्तादि-कथनेन शुभाशुभफलकथनेन चेदं शास्त्रं जनान् प्रत्यक्षमेवोपकरोतीति। शास्त्रदृष्ट्या व्यवहारदृष्ट्या चोपयोगित्वेनैवेदं वेदाङ्गेषु मूर्द्धन्यत्वेन स्मर्यते। यथोक्तं लगधमुनिनाऽपि—

'यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम्॥' इति।

मुहूर्तज्ञानं दिग्ज्ञानं तिथिवारादिज्ञानञ्च ज्योतिषशास्त्रादेव येन विना व्यवहार एव न सिध्यतीति स्पष्टमेवापरिहार्यताऽस्य व्यवहारे। तेनैवोक्तं स्यात्—

'प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यस्य साक्षिणौ।' इति।

वेदनिर्गतमपि शास्त्रमिदं स्वातन्त्र्यमप्यधिकरोति येनाऽस्य शास्त्रत्वमक्षुण्णं वर्तते। ग्रहणविषये ग्रहस्थितिविषये पृथ्वीस्वरूपगतिविषये चास्य मौलिका अपि सिद्धान्ताः।

तदिदं शास्त्रोपकारकं जगद्व्यवहारप्रवर्तकञ्च ज्योतिषाख्यं शास्त्रम्। ग्रहादिगतिस्थितिप्रभावादिशासनादस्य शास्त्रत्वमक्षुण्णमिति।

ज्योतिषशास्त्रविकासः

ज्योतिषशास्त्रमपि शास्त्रान्तरवत्कतिपया अवस्थाः अतिक्रम्य साम्प्रतिकामवस्थां प्राप्तं दृश्यते। जिज्ञासा हि मानवस्य मौलिकप्रवृत्तिष्वन्यतमा। यथा हि स भोक्तुमिच्छति, पातुमिच्छति, स्वप्तुमिच्छति, आत्मानं प्रकटयितुमिच्छति

तथैव स स्वं परञ्च ज्ञातुमिच्छति। जिज्ञासैव ज्ञानस्याविष्कारिणी। ग्रहनक्षत्र-विषयकजिज्ञासैव ज्योतिषशास्त्रस्याविर्भावे हेतुः। व्यवहारान्तरे पशुवदपि मानवोऽनादिकालादेव दिवस-रात्रि-अयनादिविषये स्वल्पमपि जानाति स्म। स हि सूर्याचन्द्रमसौ तारा ग्रहान् नक्षत्राणि दृष्ट्वा कामं तेषां वैशिष्ट्यं नैव जानाति स्म, तथापि तदवस्थितिमादाय यत्किञ्चिदपि चिन्तनमवश्यमेव करोति स्म। तदेव चिन्तनमनुभवोपचितं वैदिकसंहितासु प्रस्फुटितं दृश्यते पश्चाच्च नवनवानुभवसंयोजनपूर्वकं लौकिकग्रन्थेष्वपि। तेन हि ज्योतिषशास्त्रस्य विकासः पञ्चसु अवस्थासु विभक्तो दृश्यते—प्राग्वैदिककालः, वैदिकसंहिताकालः, वेदाङ्ग-कालः, सिद्धान्तकालः आधुनिककालश्चेति अथवा अज्ञातकालः, आदिकालः, पूर्वमध्यमकालः, उत्तरमध्यमकालः आधुनिककालश्चेति। अस्य हि प्राग्वैदिक-कालोऽज्ञातकालो वा नितान्तमेवाज्ञातोऽस्माभिः। वैदिकसंहितासु यादृशं ज्योतिषस्य स्वरूपं द्रष्टुं लभ्यते तदाधारेण वयमनुमातुं प्रभवामो यत्तत्पूर्वमपि ज्योतिषस्य यत्किञ्चिदपि स्वरूपं सुनिश्चितमासीदिति। वैदिककालश्चास्य ऋग्वेद-कालादारभ्य लगधकालपर्यन्तं चलति। यद्यपि वेदानामपौरुषेयत्वादनादिनि-धनत्वं सर्वैः स्वीक्रियते तथापि वयमत्र तेषां सङ्ग्रहेण प्रयोजनं गृह्णीमः। तेन ऋग्वैदिककालस्तदैव यदा या हि ऋचः सम्प्रति लभ्यन्ते तासां सङ्ग्रहकाल एव न तु प्रणयनप्रवचनकालः। लगधस्य वेदाङ्गज्योतिषमारभ्यास्य पूर्वमध्यमकाल उदेति चलति च आर्यभटस्य आर्यभटीयाविर्भावपर्यन्तम्। सिद्धान्तानां स्थिरी-करणं ज्योतिषस्य त्रिपु स्कन्धेषु स्पष्टतया विभाजनं पञ्चाङ्गाविर्भावश्चास्य कालस्य वैशिष्ट्यानि। आर्यभटस्य आर्यभटीयमारभ्य कमलाकरस्य सिद्धान्त-तत्त्वविवेकपर्यन्तं चलति उत्तरार्द्धोऽस्य आर्यभट-ब्रह्मगुप्त-वराहमिहिर-भास्करा-चार्य-कमलाकरभट्टाः कालस्यास्य ख्यातयशस्काः ज्योतिर्विदः।

ततश्चोदेति आधुनिककालोऽस्य। चापीयत्रिकोणगणितकारो नीलाम्बरः, सरलत्रिकोणमितेः प्रणेता बापूदेवः, गणकतरङ्गिणीप्रभृतिग्रन्थानां प्रणेता सुधाकरः ज्योतिशास्त्रेतिहासस्य प्रणेता शङ्करबालकृष्णश्च कालस्यास्य लब्ध-प्रतिष्ठा ज्योतिर्विदः।

कमलाकरभट्टपर्यन्तमपि आर्यभटीया प्राचीना रीतिरेवानुसृता दृश्यते। वराह-मिहिरो ज्योतिषे यावनप्रभावं स्वीकरोति। तेन च त्रय एव स्कन्धा ज्योतिषस्य स्वलेखनीविषयीकृताः। यथा उत्तरमध्यमकाले यावनगणकैः सह भारतीय-गणकानां सम्मेलनेन ज्योतिषशास्त्रे नवीनता प्रविष्टा तथैव आरवगणक-सम्पर्केण च। ताजिकं हि तेषामेव प्रभावफलमत्र। नीलाम्बरादारभ्य आङ्गल-सम्पर्केण गणिते नवीना परिपाटी प्रविष्टा। परिचिन्तनमपि किञ्चिन्मौलिकं सञ्जातं तथापि सुदृढमूला भारतीयपद्धतिर्न कथमपि स्वकीयवैशिट्यं तु

विहातुं प्रभवति । कालप्रभावस्तु तत्रापि सक्रिय एव तथापि । अत्रापीदं स्मर्यते—

'पुङ्खानुपुङ्खविषयेक्षणतत्परोऽपि ब्रह्मावलोकनधियं न जहाति योगी ।
सङ्गीतनृत्यलयतालवशङ्गताऽपि मौलिस्थकुम्भपरिरक्षणधीर्नटीव ।।
वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ।।'

ज्योतिषशास्त्रविषयः

सामान्यतो ज्योतिषं हि सिद्धान्तसंहिताहोराभेदेन त्रिस्कन्धमुच्यते तथैव तत्र कैरलिः शकुनश्चेति द्वौ भेदो संयोज्येदं पञ्चस्कन्धमप्युच्यते । यथोक्तम्—

'पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः ।
कैरलिः शकुनश्चैव···· ···· ···· ···· ···· ···· ।।' इति ।

सामान्यतो हि ज्योतिषशास्त्रं हि कालविधानशास्त्रमित्येवास्य प्रतिपाद्यविषयोऽपि काल एव अर्थात् काल एवात्र स्वावयवेषु विभज्योच्यते इति । तस्य चाध्ययनं पञ्चधा विभागं कृत्वा कृतमत्र सिद्धान्त-संहिता-होरा-केरलि-शकुन-भेदेनेति । यथाऽऽह वराहमिहिरः—

'ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कात्स्न्योंपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ।
स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराऽन्योऽङ्गविनिमयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।
वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः ।
होरागतं विस्तरशश्च जन्म यात्राविवाहैः सह पूर्वमुक्तम् ।।' इति ।

तदित्थं हि ज्योतिषशास्त्रस्य त्रयो मुख्यविभागाः—तन्त्रं, संहिता होरा च ।

तन्त्रं हि सिद्धान्तापरपर्यायम् । इदं हि गणितशब्देनाप्यभिधीयते । तन्त्रं हि ग्रहगतिसम्बद्धम् । मध्यगतिः तिथिनक्षत्रच्छेदः स्फुटगतिः त्रिप्रश्नः चन्द्रार्कग्रहणे उदयास्तमयौ शृङ्गोन्नतिः समागमः ताराग्रहसंयोगश्च तन्त्रस्य विवेच्यविषयाः । गतौ ग्रहाणां वक्रत्वमनुवक्रत्वञ्च विवेच्यते । यथोक्तम्—

'त्रुट्यादिप्रलयान्तकालगणना मानप्रभेदः क्रमा-
च्चारश्च द्युषदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।
भूधिष्ण्यग्रहसंस्थितैश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः ।।' इति ।

होरास्कन्धो हि जातकसम्बद्धः। यथोक्तं—पितामह-नारद-वसिष्ठ-कश्यपादि-सुनिर्मितं ज्योतिःशास्त्रैकस्कन्धरूपं जन्मनानाविधफलादेशफलकं वेदचक्षूरूपं द्विजामध्ययनीयं शास्त्रं होराशब्दवाच्यमिति । आद्यन्तवर्णलोपाद् होराशास्त्रं भवत्यहोरात्रात् । तत्प्रतिबद्धः सर्वो ग्रहभगणश्चिन्त्यते तेन होरेति । अत्र राशिप्रभेदः ग्रहयोनिः आधानं जन्म मूलादिनक्षत्रविवेकः संवत्सरादिफलं मास-फलं ग्रहस्थितिफलं ग्रहदृष्टिफलम् अरिष्टविचारः आयुर्दायः राजादियोगाश्च होरास्कन्धे विवेच्यन्ते । ताजिकमस्यापरो भेदः । ताजिकमिति तात्कालिकम् । ताजिके हि प्रचलितवर्षफलमादिश्यते । उक्तमेव—

'जातकोदितदशाफलं यतः स्थूलकालफलदं स्फुटं नृणाम् ।
तत्र न स्फुरति देवविन्मतिस्तद् ब्रुवेऽब्दफलमादि ताजिकात् ॥' इति ।

स्कन्धोऽयं जातकप्रश्नमुहूर्तनिमित्तेतिचतुरङ्गैरुपबृंहितः । संहिताऽस्य तृतीयः स्कन्धः । यत्र हि कात्स्न्येन ज्योतिःशास्त्रवर्णनं सा संहिता । स्कन्धोऽयं भौतिकफलितज्योतिषपदेनाऽप्यभिधीयते । वस्तुतस्तु सर्वेषामेव स्कन्धानां सङ्क्षेपेण विवेचनाद्धि संहितायाः संहितात्वम् । तेनैवोक्तं संहितापारगो दैवचिन्तको भवतीति । अत्र हि सांवत्सरसूत्रं ग्रहचारः ग्रहयुतिः वर्षफलं शृङ्गाटकं गर्भविवेकः उल्काविवेकः प्रतिवर्षकृत्यं लक्षणानि वास्तु वृक्षायुर्वेदः शकुनविचारः तिथ्यादिफलं ग्रहगोचरश्चैवमाद्या विवेचनीयविषयाः ।

तेन हि सत्यमेवोच्यते ज्योतिषशास्त्रमनेकभेदविषयमिति ।

सिद्धान्तस्कन्धमाश्रित्य आर्यभटस्य 'आर्यभटीयम्' प्रथमो लौकिकग्रन्थः । होराभागे तु वराहमिहिरस्य बृहज्जातकमेवाद्यः पृथग्ग्रन्थः । संहिताभागेऽपि तस्यैव बृहत्संहितैव प्रथमः पृथग्ग्रन्थः । सूर्यसिद्धान्त-नारदसंहिता-काश्यप-संहिताद्या ग्रन्थास्तु आर्षत्वेन प्रसिद्धाः । अथात्र कतिपये सम्बद्धग्रन्था उपस्था-प्यन्ते साधकसौकर्याय ।

सिद्धान्तस्कन्धे	होरास्कन्धे	संहितास्कन्धे
सूर्यसिद्धान्तः (आर्षः)	बृहज्जातकम् (वराहमिहिरस्य)	गर्गसंहिता (आर्षः)
आर्यभटीयम् (आर्यभटस्य)	होरारत्नम् (बलभद्रस्य)	वसिष्ठसंहिता (,,)
शिष्यधीवृद्धिदतन्त्रम् (लल्लस्य)	जातकपारिजातः (वैद्यनाथस्य)	भृगुसंहिता (,,)
पञ्चसिद्धान्तिका (वराहमिहिरस्य)	ताजिकनीलकण्ठी (नीलकण्ठस्य)	कश्यपसंहिता (,,)
ब्राह्मस्फुटसिद्धान्तः (ब्रह्मगुप्तस्य)	भावकुतूहलम् (जीवनाथस्य)	नारदसंहिता (,,)
		बृहत्संहिता (वराहमिहिरस्य)
		लघुपाराशरी (आर्षः)

सिद्धान्तस्कन्धे

राजमृगाङ्कम् (भोजस्य)
सिद्धान्तशेखरः (श्रीपतेः)
करणप्रकाशः (ब्रह्मदेवस्य)
भास्वती (शतानन्दस्य)
सिद्धान्तशिरोमणिः (भास्करस्य)
सिद्धान्तदर्पणः (नीलकण्ठस्य)
ग्रहलाघवम् (गणेशदैवज्ञस्य)
सिद्धान्ततत्त्वविवेकः (कमलाकरस्य)

पाटीगणिते

लीलावती (भास्करस्य)

बीजगणिते

चापीयत्रिकोणगणितम् (नीलाम्बरस्य)
सरलत्रिकोणमितिः

होरास्कन्धे

जातकालङ्कारः (गणेशस्य)
जातकपद्धतिः (केशवस्य)

संहितास्कन्धे

सारावली (कल्याणवर्मणः)
रमलनवरत्नम् (परमसुखस्य)
मुहूर्तमार्तण्डः (नारायणस्य)
मुहूर्तचिन्तामणिः (रामस्य)
नरपतिजयचर्यास्वरोदयः (नरपतेः)

स्फुटग्रन्थाः

गणकतरङ्गिणी (सुधाकरस्य)
भारतीयज्योतिषम् (शङ्करबालकृष्णस्य) (म० हि०)
भारतीयज्योतिषेतिहासः (गोरक्षप्रसादस्य) (हि०)
हिन्दूगणितशास्त्रेतिहासः ( ) (हि०)
भारतीयज्योतिषम् (नेमिचन्द्रस्य) (हि०)
संस्कृतशास्त्रेतिहासः (बलदेवस्य) (हि०)

ज्योतिषशास्त्रस्योत्पत्तिः

संस्कृतवाङ्मयान्तरस्येव ज्योतिषशास्त्रस्योत्पत्तिरपि ब्रह्मण एवाभूदिति सर्वथा विश्वस्यते । ब्रह्मा हि पितामहोऽस्य जगतः यज्ञसाधननिमित्तं चतुर्भ्यो मुखेभ्यश्चतुर एव वेदान् प्रावोचत् । तेन हि वेदानां यज्ञात्मकत्वम् । ते च यज्ञाः कालाश्रयेणैव सिद्ध्यन्ति इति तत्सिद्ध्यर्थं ब्रह्मा कालावबोधकं ज्योतिषशास्त्रं

विनिर्माय नारदाय प्रोवाच। नारदश्च शास्त्रस्यास्य महत्त्वमङ्गीकृत्य लोके प्रवर्तयामासेदम्। मतान्तरानुसारेणेदं शास्त्रं प्रथमं सूर्येण मयासुराय प्रोक्तम्। ततश्च जगति प्रवर्तितमिति।

कश्यपसंहितानुसारेण ज्योतिःशास्त्रप्रवर्तका अष्टादश आचार्याः ते च यथा—

'सूर्यः पितामहो व्यासो वसिष्ठोऽत्रिः पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः॥
रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशाश्चैते ज्योतिःशास्त्रप्रवर्तकाः॥' इति।

पराशरस्तु तानित्थं गणयति—

'विश्वसृङ् नारदो व्यासो वसिष्ठोऽत्रिः पराशरः।
लोमशो यवनः सूर्यश्च्यवनः कश्यपो भृगुः॥
पुलस्त्यो मनुराचार्यः पौलिशः शौनकोऽङ्गिराः।
गर्गो मरीचिरित्येते ज्ञेया ज्योतिःप्रवर्तकाः॥' इति।

नारदस्त्वथ तानित्थमाह—

'ब्रह्माचार्यो वसिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ।
मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः॥
च्यवनो यवनो गर्गः कश्यपश्च पराशरः।
अष्टादशैते गम्भीराः ज्योतिःशास्त्रप्रवर्तकाः॥' इति।

इदश्चाग्रे कथितम्—

'यज्ञाध्ययनसङ्क्रान्तिग्रहषोडशकर्मणाम्।
प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयात्॥
विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्धयति।
तस्माज्जगद्धितायेदं ब्रह्मणा रचितं पुरा॥
तं विलोक्याथ तत्सूनुर्नारदो मुनिसत्तमः।
उक्त्वा स्कन्धद्वयं पूर्वं संहितास्कन्धमुत्तमम्॥
वक्ष्ये शुभाशुभफलज्ञप्तये देहधारिणाम्।
होरास्कन्धस्य शास्त्रस्य व्यवहारप्रसिद्धये॥'

तदित्थं हि ब्रह्मणा प्रवर्तितं शास्त्रं हि ब्रह्मा नारदाय सोमः शौनकाय नारायणो वसिष्ठाय रामेशाय च वसिष्ठो माण्डव्यवामदेवाभ्यां व्यासः स्वशिष्याय सूर्यो मयाय पुलस्त्याचार्यगर्गात्रिरोमकाः स्वस्वशिष्येभ्यः पराशरो मैत्रेयाय च प्रोक्तवन्त इति। बृहत्संहितायामुक्तम्—

'मुनिविरचितमिदमिति यच्चिरन्तनं साधु न मनुजग्रथितम् ।
तुल्येऽर्थेऽक्षरभेदादमन्त्रके का विशेषोक्तिः ॥' इति ।

व्याख्यातीदं भट्टोत्पलः मुनिभिर्ब्रह्मादिभिरिति । पुनस्तत्रैवोक्तम्—

'आब्रह्मादिविनिःसृतमालोक्य ग्रन्थविस्तरं क्रमशः ।
क्रियमाणकमेवैतत् समासतोऽतो ममोत्साहः ॥' इति ।

यथाऽऽह गर्गाचार्योऽपि—

'स्वयं स्वयम्भुवा सृष्टं चक्षुर्भूतं द्विजन्मनाम् ।
वेदाङ्गं ज्योतिषं ब्रह्मपरं यज्ञहितावहम् ।
मया स्वयम्भुवः प्राप्तं क्रियाकालप्रसाधनम् ॥' इति ।

अनेन ज्ञायते यद्धि स्वनिर्मितं शास्त्रमिदं ब्रह्मा नारदगर्गप्रभृतीनृषीन् प्रोवाचेति ।

निष्कर्षमेतेषामेतदेव यच्छास्त्रमिदं प्रथमं ब्रह्मणा यज्ञप्रवर्तनाय सृष्टम् । तच्च शिष्यपरम्परा बुधैर्गृहीतम् । तदेव आर्यभटेन प्रकाशितं वराहमिहिरेण विवेचितञ्च । तेनैव वराहमिहिरः कथयति—

'प्रथममुनिकथितमवितथमवलोक्य ग्रन्थविस्तरस्यार्थम् ।
नातिलघुविपुलरचनाभिरुद्यतः स्पष्टमभिधातुम् ॥' इति ।

प्राग्वैदिकवैदिककाले ज्योतिषस्य स्वरूपम्

प्राग्वैदिककालो हि वेदमन्त्रसङ्ग्रहादपि प्राचीनतरः कालः । न स ह्यस्माकं ज्ञानविषयः । तदा ज्योतिषशास्त्रस्य तु का वार्ताऽपितु तद्योनेर्वेदस्यैव किं स्वरूपमासीदित्यपि अनुमातुं वयं नैव प्रभवामः । एतावदेव तद्विषये वक्तुं पार्यते यत्तदाऽपि ज्योतिषविषये स्वल्पमपि ज्ञानमवश्यमेवाऽऽसीद्यस्य यथायथं वा विकसितं रूपं वेदमन्त्रेषु दृश्यते । 'अग्निः पूर्वेभिः ऋषिभिरीड्यो नूतनैरिह' 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः' 'इति शुश्रूम धीराणां ये नस्तद्व्याचचक्षिरे' इत्यादिकथनैरेतत्सिध्यति । सम्प्रत्यपि ग्रामीणजना दिगवबोधाय ध्रुवादिनक्षत्राणां समयज्ञानाय रात्रौ कृत्तिकानां साहाय्यं गृह्णन्ति । दिवा तु ते सूर्यगतिमधीत्य समयज्ञानं कुर्वन्ति सुदिने । सम्भवत्येतदज्ञातयुगस्यैवावशिष्टम् । ऋग्वेदे 'देवानां पूर्वे युगेऽसतः सदजायत । देवानां युगे प्रथमेऽसतः सदजायत' इति यत्कथितं यच्च 'यः पश्यादुत्तरे युगे' इत्यप्युक्तं तस्यायमेवाशयो भवितुमर्हति यद्वैदिकसंहितापूर्ववर्तिकालेऽपि काचन विशिष्टा सभ्यताऽऽसीदिति ।

वेदा हि नैव निश्चयेन ज्योतिषशास्त्रमात्रमुद्दिश्य प्रवृत्ताः। तेन तत्र नैतादृशः प्रसङ्गो येन ज्योतिषशास्त्रं व्याख्यातं स्यात्। तथापि इतरविषयप्रसङ्ग-वशाज्ज्योतिषविषयेऽपि यत्किञ्चिदुक्तं तेनैतज्ज्ञायते यत्तदाऽपि शास्त्रेऽस्मिन् मानवीयं ज्ञानं समृद्धमासीत्। तत्र तत्र गगनमण्डलं सूर्याचन्द्रमसौ नक्षत्राणि ताराः ऋतून् मासान् दिवसाँश्चादाय मनोहारि चमत्कारि वर्णनं समुपलभ्यते। प्रकरणेऽस्मिन् वेदशब्देन कात्यायनप्रतिज्ञासूत्रमनुसृत्य तस्य संहिता-ब्राह्मणभागौ गृहीतौ, मन्त्रब्राह्मणयोर्वेदनामधेयमित्युक्तेः।

आकाशमधिकृत्य तत्रोक्तं यद्यः स आकाशः स आदित्य एव। एतस्मिन्नु-दिते सर्वमिदमाकाशते। इन्द्र एव स इति। तेन हि आकाशते द्योतते इत्या-काशः। तत्र पृथिव्या उपरिष्टादन्तरिक्षस्य तदुपरिष्टाद् दिवः प्रतिष्ठा वर्णिता। दिवि मेघस्यान्तरिक्षे वायोश्च स्थितिरपि वर्णितो दृश्यते। यथा—

'नमोस्तु रुद्रेभ्यो ये दिवि येषां वर्षमिषवः।' (यजुः० १६।६४)

'नमोस्तु रुद्रेभ्यो येऽन्तरिक्षे येषां वात इषवः।' (यजुः० १६।६५)

एवमेव द्यावापृथिवीविषये तत्रोक्तम्—

'यदा वै द्यावापृथिवी संज्ञानाथेऽथ वर्षति।' (शत० ब्रा० १।८।३।१२)

'प्राणोदानौ वै द्यावापृथिवी।' (शत० १४।२।२।३६)

'इमौ वै लोकौ रेतः सिञ्चाविमौ ह्येव लोकौ रेतः सिञ्चत इतो वा अयमूर्ध्वं रेतः सिञ्चति धूमं साऽमुत्र वृष्टिर्भवति तामसावभुतौ वृष्टिं तदिमा अन्तरेण प्रजायन्ते।' (शत० ७।४।२।२२)

ऋग्वेदेऽप्युक्तम्—

'तिस्रो द्यावः सवितुर्द्वा उपस्था एका यमस्य भुवने विराषाट्।
आणि न रथ्यममृताधितस्थुः।' (१।३५।६)

विराजमधिकृत्य तत्रोक्तम्—

'नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकानकल्पयन्॥' (ऋ० १०।९०।१४)

'चन्द्रमा मनसो जातश्चक्षोः सूर्योऽअजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत॥' (ऋ० १०।९०।१३)

ऐतरेयब्राह्मणे उक्तम्—

'द्यौरन्तरिक्षे प्रतिष्ठिताऽन्तरिक्षं पृथिव्याम्।' (११।६)

एवमेव तत्र तत्र संवत्सरमासर्तुपक्षाहोरात्रसूर्यचन्द्रादिविषयेऽपि सुनिपुणं वर्णितं दृश्यते। तत्र तत्र युगादिविषये च चर्चा लभ्यते। यथा हि—

'देवानां पूर्वे युगे सतः सदजायत।' (ऋ० १०।७२।२)

'तदूचुषे मानुषेमा युगानि।' (ऋ० १।१०३।४)

'विश्वे ये मानुषा युगा यान्ति मर्त्यं रिषः।' (ऋ० ५।५२।४)

'पर्जन्या नाहुषा युगा।' (ऋ० ५।७३।३)

'दीर्घतमा मामतेयो जुजुर्वानि दशमे युगे।' (ऋ० १।१५८।६)

'युगे युगे विदध्यम्।' (ऋ० ६।८।५)

'या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा।' (ऋ० १९।९७।१)

'मानुषा युगाः।' (वा० १२।१११)

मन्त्रभागेष्वेतेषु युगशब्दः कालविशेषवाचकत्वेन प्रयुक्तो दृश्यते। देवयुग-मानुषयुगयोरन्तरमपि तत्र निर्दिष्टं लभ्यते। 'पूर्वे युगे' 'उत्तरे युगे' इत्यादि-कथने युगशब्देन निश्चितकालमान एव निर्दिष्टोऽस्ति। यत्र कुत्र युगशब्दः कल्पार्थेऽपि प्रयुक्त इव प्रतिभाति। 'त्रियुगं पुरा' इत्यत्र युगशब्दः सत्यत्रेता-द्वापरावबोधक एव। वैदिकमन्त्रेषु यत्र तत्र युगभेदत्वेन कृतादिशब्दानामपि प्रयोगो दृश्यते। यथा वाजसनेयीयसंहितायाम्—

'अक्षराजाय कितवं कृतायादिनवदर्शं त्रेतायै कल्पिनं द्वापरायाधि-कल्पिनं····।' (३०।१८)

एवमेव तैत्तिरीयसंहितायां युगमानत्वेन कृतत्रेताद्वापरशब्दानां प्रयोगो दृश्यते। (४।३।३)

तैत्तिरीयब्राह्मणेऽप्युक्तम्—

'कृताय सभाविनं त्रेताया आदिनवदर्शं द्वापराय बहिः सदं कलये सभास्थाणुम्।' (३।४।१)

तथैव ऐतरेयब्राह्मणेऽपि यथा—

'कलिः शयानो भवति सञ्जिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति कृतं सम्पद्यते चरन्॥
चरैवेति चरैवेति।' (३३।१५)

पुनश्च तैत्तिरीयब्राह्मणे—

'ये वै चत्वारः स्तोमाः कृतं तत्। अथ ये पञ्च कलिः सः। तस्माच्च-तुष्टोमः।' (१।५।११)

ऋग्वेदादौ युगावयवत्वेन संवत्सरादयोऽप्युल्लिखिताः। यथोक्तं वेदाङ्ग-ज्योतिषे पाञ्चसंवत्सरं युगमिति तस्य बीजं वेदेषु दृश्यते। यथा हि—

'संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव।
ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम्॥'
(ऋ० ७।१०३।७)

तथैव वाजसनेयसंहितायाम्—

'....संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्कद्वरीं वत्सराय विजर्जरीं संवत्सराय पलिक्नीम्.... ।' (३०।१५)

एवमेव तैत्तिरीयब्राह्मणेऽप्युक्तम्—

'अग्निर्वा संवत्सरः आदित्यः परिवत्सरः चन्द्रमा इदावत्सरः वायुरनुवत्सरः ।' (१।४।१०)

'संवत्सराय पर्यायिणीं परिवत्सरायाविजातामिदावत्सरायापस्कद्वरीं इद्वत्सरायातीत्वरीं वत्सराय विजर्जरां संवत्सराय पलिक्नीम् ।' (३।४।१)

'संवत्सरोऽसि परिवत्सरोऽसि इदावत्सरोऽसि इदुवत्सरोऽसि इद्वत्सरोऽसि वत्सरोऽसि ।' (३।१०।४)

इत्थं हि माध्यन्दिनीये पञ्चानां तैत्तिरीये षण्णामन्यत्र चतुर्णामेव नामोल्लेखो दृश्यते ।

कालवाचकत्वेन वर्षशब्दः शतपथब्राह्मणादौ प्रयुक्तो दृश्यते (१-९-३-१०)। ऋग्वेदे हि ऋतुवाचकशरत्प्रभृतिशब्दा अपि वर्षवाचकत्वेन प्रयुक्ता दृश्यन्ते । गोपथब्राह्मणे (६।१७) वर्षार्थे हायनशब्दः शुक्लयजुर्वेदे समशब्दः प्रयुक्तो दृश्यते । यथा—

'तेषां श्रीर्मयि कल्पतामस्मिन् लोके शतं समाः ।' (१९।४६)

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।' (४०।२)

एवम् ऋग्वेदेऽपि (१०।८५।५) समशब्दः संवत्सरार्थे प्रयुक्तः । एवमेवैतरेयब्राह्मणेऽपि । (४।१७।५) ।

एवमेव ऋतुविषयेऽपि वैदिकसाहित्ये बहूक्तमस्ति । तैत्तिरीयसंहितायामुक्तं यत्संवत्सरे षडृतवो भवन्ति द्वादश मासाश्च । यदा कदा त्रयोदशाऽपि । यथा—

'षड्रात्रिर्दीक्षितः स्यात् षड् वा ऋतवः संवत्सरः.... ।
द्वादशरात्रीर्दीक्षितस्याद् द्वादश मासाः संवत्सरः.... ।
त्रयोदशरात्रीर्दीक्षितः स्यात् त्रयोदश मासाः संवत्सरः.... ।
चतुर्विंशतिरर्धमासाः संवत्सरः...मासं दीक्षितः स्याद्यो मासः स संवत्सरः ।' (५।६।७)

एवञ्च तत्रैव षडृतवो द्वादश मासाश्च नाम्नाऽपि परिगणिता दृश्यन्ते । यथा तैत्तिरीये—

'मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्च....संसर्पोऽस्यंहस्पत्याय त्वा ।' (१।४।१४)

तत्र संसर्पो मलमासः अंहस्पतिः क्षयमास इति माधवः । एवमेव—

मधुश्च माधवश्च वासन्तिकावृतू शुक्रश्च शुचिश्च ग्रैष्मावृतू नभश्च नभस्यश्च

वार्षिकावृतू इषश्चोर्जश्च शरदावृतू सहश्च सहस्यश्च हैमन्तिकावृतू तपश्च तपस्यश्च शैशिरावृतू ।' (४।४।११)

तथैव ऋग्वेदेऽपि उक्तम्—

'वेदमासो धृतव्रतो द्वादश प्रजावतः ।
वेदा य उपजायते ।' (१।२५।८)

'द्वादशारं न हि तज्जराय वर्षति चक्रं परिद्यामृतस्य । आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ।' (१।१६४।११)

'द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत तस्मिन् साकं त्रिशता न शङ्कवोऽर्पिता षष्टिर्न चलाचलासः ।' (१।१६४।४८)

संवत्सरं ह्येकं चक्रं तस्य हि द्वादश प्रधयश्चैत्रादयः त्रीणि नभ्यानि चैत्रादारभ्य मासचतुष्करूपाणि चार्तुर्मास्यत्रिकमिति । तस्य हि त्रिशतं षष्टिश्च शङ्कवः दिवसाः चला अचलाश्च रात्रयस्तावत्य एवेति सप्तशतं विंशतिश्च ता इति । तैत्तिरीयसंहितायां स्पष्टमेवोक्तम्—

'तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावतीः संवत्सरस्य रात्रयः ।' (७।५।१) ।

वाजसनेयसंहितायामपि त्रयोदशमासा नाम्ना गणिताः । यथा—

'उपयामगृहीतोऽसि मधवे त्वोपयामगृहीतोऽसि माधवाय त्वोपयामगृहीतोऽसि शुक्राय त्वोपयामगृहीतोऽसि शुचये त्वोपयामगृहीतोऽसि नभसे त्वोपयामगृहीतोऽपि नमस्याय त्वोपयामगृहीतोऽसीषे त्वोपयामगृहीतोऽस्मूर्जे त्वोपयामगृहीतोऽसि सहसे त्वोपयामगृहीतोऽसि सहस्याय त्वोपयामगृहीतोऽसि तपसे त्वोपयामगृहीतोऽसि तपस्याय त्वोपयामगृहीतोऽस्यंहसस्पतये त्वा ।' (७।३०)

एवमेव—

'संसर्पाय स्वाहा चन्द्राय स्वाहा ज्योतिषे स्वाहा मलिम्लुचाय स्वाहा दिवापतये स्वाहा ।'

'मधवे स्वाहा माधवाय स्वाहा शुक्राय स्वाहा शुचये स्वाहा नभसे स्वाहा नभस्याय स्वाहेषाय स्वाहोर्जाय स्वाहा सहसे स्वाहा सहस्याय स्वाहा तपसे स्वाहा तपस्याय स्वाहांऽहसस्पतये स्वाहा ।' (२२।३०–३१) ।

अनेनैतत्सिध्यति यद्वैदिकसंहिताकाले द्वादशमासात्मकं सौरवर्षं प्रचलितमासीत् यत्र षष्टयधिकत्रिशतदिनानि परिगणितान्यासन् । सूर्योदयादारभ्य सूर्योदयान्तरपर्यन्तकाल एव तत्र दिवसपदेन गृहीतोऽनुमीयते । मासस्तु तदा चान्द्र एवाऽऽसीत् । तद्गणनाक्रमश्च चन्द्रमसः पूर्णत्वाधारेण । तस्य द्विःपूर्णत्वाभ्यन्तरवर्ती काल एव मासः । तथैव ऋतूनामेकः परिक्रमावधिरेव वर्षम् । ऋतूनां हि सूर्यो योनिः । (चन्द्रमा हि किञ्चिदूनसार्धदिनद्वयमेकराशौ तिष्ठति ।

तेन हि सार्द्धैकोनत्रिंशद्दिनमितो हि चान्द्रो मासः चतुःपञ्चाशदधिकत्रिशतदिनमितो हि चान्द्रवर्षः। ऋतूनां हि एकादशदिनाधिकचान्द्रवर्षसमकालावधौ एका परिक्रमा पूर्णा भवति। तेन हि चान्द्रवर्षे ३५४ दिनानि सौरवर्षे तु ३६५ दिनानि भवन्ति।) चान्द्रसौरवर्षसमीकरणार्यैव त्रयोदशतमो मासोऽपि तत्र परिकल्पितः। तेनैवोक्तम्—'रविणा लङ्घितो मासश्चान्द्रो ख्यातो मलिम्लुचः' इति। 'मासद्वये यदाऽप्येकराशि सङ्क्रमेतादित्यस्तत्राद्यो मलिम्लुचः शुद्धोऽन्यः' इति च। वेदे हि अधिमासस्य कृते संसर्पः अंहस्पतिश्च शब्दौ पर्यायवाचकत्वेन प्रयुक्तौ। यदा कस्यचिन्मासस्य क्षयस्तदा हि द्वावधिकमासौ भवतः। तयोराद्यः संसर्पोऽपरोंऽहस्पतिरिति परम्परा। तेनैवोक्तं स्याद्—'असङ्क्रान्तिर्द्विसङ्क्रान्ती संसर्पांहस्पती समावि'ति। शङ्करबालकृष्णो निर्दिशति यत्तदा चान्द्रसौरवर्षातिरिक्तं सावनवर्षोऽपि प्रचलित आसीत्। सावनशब्दो हि सवनसम्बद्धः। सूर्योदयादारभ्य सूर्योदयान्तराभ्यन्तरवर्ती काल एव सावनदिनसंज्ञितः। अत एव सावनशब्दोऽहोरात्रोपलक्षकः। अहोरात्रसाध्य एकः सोमयागोऽहःशब्देनाभिधीयते। तादृशानामहर्विशेषाणां गणः षडहः षडहेन पञ्चकेनैको मासः। तादृशैर्द्वादशभिर्मासैः साध्यं संवत्सरसत्रमिति माधवाचार्यः स्पष्टयति। तदित्थं सावनवर्षे ३६० दिनानि भवन्ति, यदुक्तम्—'तस्य त्रीणि च शतानि षष्टिश्च स्तोत्रीयास्तावती संवत्सरस्य रात्रयः' इति। (तै० सं० ७।५।१) किञ्च चान्द्रमाने हि मासे २९½ दिनान्येव भवन्ति ५९ दिनैर्मासद्वयम्। सावनमासद्वये ६० दिनानि भवन्ति। अतस्तयोः समीकरणाय 'षडहैर्मासात्सम्पाद्याहरुत्सृजन्ति' (तै० सं० ७।५।६) इति। उत्सर्गिणामयनसत्रे एकदिवसोत्सर्गविधिरुक्तः स्यात्। अन्यथा तत्र वर्षे एकः षडहोऽधिको भवेत्। अनेनैतत्पर्यवस्यति यद्वैदिकसंहिताकाले सावनचान्द्रसौरवर्षाणां प्रचलनमासीत्। तत्र यज्ञादिकृत्ये सावनो वर्षो नित्यनैमित्तिककृत्यसम्पादने चान्द्रो वर्ष इतरव्यवहारे सौरो वर्षः प्रयुक्त आसीत्। सावनवर्षे एकषडहत्यागेन चान्द्रो वर्षस्तत्र एकोनषडहद्वययोगेन सौरो वाऽऽर्तवो वर्षः सम्पद्यते। वेदेषु नाक्षत्रबार्हस्पत्यवर्षविषये नैव किञ्चिदुक्तं लभ्यत इति शङ्करबालकृष्णमहोदयमतम्। किन्तु 'नक्षत्राणि संवत्सरस्य प्रतिष्ठा' (तै० ब्रा० ३।११।१।१३) इति वचनात्तदा नाक्षत्रवर्षोऽपि प्रचलित आसीदिति ज्ञायते। नक्षत्राणि सप्तविंशतिस्तेन द्वादशगुणितेन नाक्षत्रे वर्षे ३२४ दिनान्येव भवन्ति। तेषामष्टाविंशतिसङ्ख्ययाऽपि तत्र ३३६ दिनान्येव भवन्ति।

वैदिकसाहित्ये अयनविषयेऽपि बहूक्तं दृश्यते। शतपथब्राह्मणे हि वसन्तग्रीष्मवर्षासु सूर्यस्योदगावर्तनं देवेषु स्थितिः शरद्धेमन्तशिशिरेषु तस्य दक्षिणावर्तनं पितृष्ववस्थितिश्चोक्ता (२।१।३।१-४)। तथैव तैत्तिरीयसंहितायामपि—'तस्यादित्यः षण्मासो दक्षिणेनेति षडुत्तरेण।' (६।५।३) इति

उक्तम्। यदा हि सूर्यो विषुवद्वृत्तस्योत्तरतस्तदोत्तरायणं यदा तु दक्षिणतस्तदा दक्षिणायनमित्यस्य सारम्। उत्तरायणमेव देवानां दिनं यदा दक्षिणायनं तेषां रात्रिरिति। उभयमादाय देवानामेकं दिनम्। अयनशब्दो हि वेदे गृहपर्यायत्वेन प्रयुक्तो दृश्यते। यथा—'अपामिदं न्ययनं समुद्रस्य निवेशनम्' (ऋ० १०।१४२।७) 'आयने ते परायणे दूर्वा रोहन्तु पुष्पिणीः' (१०।१४२।८) किन्तु वाजसनेयीये स्थित्यर्थेऽपि दृश्यते; यथा—'नान्यः पन्था विद्यतेऽयनाय' (३१।१८), एवमेव गत्यर्थे कौषीतकिब्राह्मणेऽपि (६।१५)। एतावताऽपि एतत्तु स्पष्टमेव यद्वैदिकसाहित्येऽयनगणना तु साधु विदिताऽऽसीत् किन्तु तदुपक्रमणमादाय नैव किञ्चित्स्पष्टम्। शतपथब्राह्मणानुसारेण उत्तरायणे वसन्तग्रीष्मवर्षा ऋतवो भवन्ति दक्षिणायने तु शरद्धेमन्तशिशिराः। सम्प्रति तूत्तरायणे शिशिरवसन्तग्रीष्मा एव गृह्यन्ते वर्षाशरद्धेमन्ता दक्षिणायने। शतपथब्राह्मणस्य—'एषा ह वा संवत्सरस्य प्रथमा रात्रिर्यत् फाल्गुनी पौर्णमासी' (६।२।१८)। 'आत्मा वै संवत्सरस्य विषुवानङ्गानि मासाः' (१२।२।३।६)। 'अथ ह वा एष महासुपर्ण एव यत्संवत्सरः। तस्य यान् पुरस्ताद्विषुवतः षण्मासानुपयन्ति सोऽन्यतरः पक्षोऽथ यान् यद्युपरिष्टात् सोऽन्यतर आत्मा विषुवान्' (१२।२।३।७)। 'संवत्सरो वाव विवर्तोऽष्टाचत्वारिंशः षड्विंशतिरर्धमासाः स त्रयोदश मासाः सप्तर्तवो द्वे अहोरात्रे' (८।४।१।२५)। 'चतुर्विंशत्यर्धमासो वै संवत्सरः। संवत्सरो····तस्य चतुर्विंशतिरर्धमासाः षड्तवो द्वेऽहोरात्रे।' (८।४।१।२२)। 'तस्य वसन्त एव द्वारं····' (११।६।१।१९)।' संवत्सर एवाग्निस्तस्य वसन्तः शिरो ग्रीष्मो दक्षिणः पक्षो वर्षा उत्तरः शरदृतुर्मध्यमात्मा हेमन्तशिशिरावृतू पुच्छम्····' (१०।४।५।२) इत्याद्युक्तं, यच्च—'एषा वै प्रथमा रात्रिः संवत्सत्स्य यदुत्तरे फल्गुनी' (१।१।२।९)। 'एषा वै जघन्या रात्रिः संवत्सरस्य यत्पूर्वे फल्गुनी' (१।१।२।९) इति तैत्तरीयब्राह्मणेऽप्युक्तं तेन सिध्यति यत्संवत्सरस्य विषुवद्द्वयं तस्य च वसन्तोदये प्रारम्भः फाल्गुनी (उत्तरा) तस्य मुखं पूर्वाफाल्गुनी तु पुच्छमिति। 'तस्य तदेव द्वारं यदमावास्या चन्द्रमा एव द्वारपिधानः' (श० ब्रा० ११।१।१।१) इति च।

वैदिकसाहित्ये न हि कुत्रापि स्पष्टतयोल्लिखितं यदयनपरिवर्तनं कदारभ्य भवतीति। कदाऽऽरभ्य संवत्सरः प्रवर्तते इत्यपि नैव तत्र स्पष्टं प्रमाणम्। शतपथब्राह्मणे एतावदेव निर्दिष्टं यदुत्तरायणे वसन्तग्रीष्मवर्षर्तवो दक्षिणायने शरद्धेमन्तशिशिरर्तव इति। किन्तु वसन्तर्तुः कदाऽऽरभ्य प्रवर्तत इति तत्र नैव स्पष्टतयोक्तम्। तैत्तिरीयब्राह्मणानुसारेण उत्तराफाल्गुनी हि संवत्सरस्य मुखं पूर्वा च पुच्छमिति। एतदनुसारेण फाल्गुनपौर्णमासीमभितः संवत्सरारम्भोऽनुमितः। वराहमिहिराचार्यः स्मरति—

'आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठायाम् ।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ॥
साम्प्रतमयनं सवितुः कर्कटाद्यं मृगादितश्चान्यत् ।
उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः ॥
दूरस्थचिह्नभेदादुदयेऽस्तमयेऽपि सहस्रांशोः ।
छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति ॥' इति ।

(बृ० सं० ३।१-३)

पराशरतन्त्रे उक्तम्—

'श्रविष्ठाद्यात्पौष्णान्तं चरतः शिशिरः वसन्तः पौष्णान्ताद्रोहिण्यन्तम् । सौम्याद्यात् सार्पार्द्धं ग्रीष्मः । प्रावृट् सार्पार्द्धाद्धस्तान्तम् । चित्राद्यादिन्द्रान्तं शरद् हेमन्तो ज्येष्ठार्द्धाद् वैष्णवान्तमि'ति ।

वालगङ्गाधरादिभिर्वैदिके युगे मृगशिरोनक्षत्रे वासन्तं विषुवद्दिनं तत्पृष्ठवर्तिन्यष्टमे नक्षत्रे पूर्वभाद्रपदायां मार्गशीर्षे मासि उत्तरायणारम्भश्चानुमितः ।

पश्चाद्वर्तिनि साहित्ये तु कृत्तिकायां वासन्तं समरात्रमनुराधायां शारदं समरात्रं धनिष्ठादावुत्तरायणारम्भो वर्षारम्भश्च आश्लेषार्द्धाद् दक्षिणायनारम्भश्च निर्दिष्टः । सामान्यतः एतदनुसारेण उत्तरायणारम्भस्य समयः फाल्गुने पतति । फाल्गुनपौर्णमासीमारभ्य नववर्षः प्रवर्तते इति पक्ष एवास्याशयः । उत्तरायणे वसन्तग्रीष्मवर्षाणां या स्थितिरुक्ता शतपथे तेन तदैव वसन्तारम्भोऽपि ।

वराहमिहिरकाले तु अश्विन्यादौ वासन्तविषुवद्दिनं चित्रायां शारदं विषुवद्दिनमुत्तराषाढानक्षत्रे उत्तरायणारम्भः पुनर्वसौ दक्षिणायनारम्भश्च ।

साम्प्रतिककाले तु पूर्वभाद्रपदायां वासन्तं विषुवद्दिनं हस्तर्क्षे शारदं समरात्रं पूर्वाषाढायामुत्तरायणमार्द्रायां दक्षिणायनञ्चेति अयनपरिवर्तनस्थितयो हि चतस्रो दृश्यन्ते । तथाभवने हि तस्य पश्चिमाभिमुखं शनैर्गमनमेव हेतुः । तदिदं वयमेकत्र स्थापयित्वा पश्यामोऽध्ययनसौकर्याय ।

स्थितिः	समरात्रम्		अयनारम्भः	
	वासन्तं	शारदम्	औत्तरं	दाक्षिणम्
प्रथमा	मृगशिरसि	मूले	पूर्वभाद्रपदायाम्	उत्तरफाल्गुन्याम्
द्वितीया	कृत्तिकायाम्	अनुराधायाम्	धनिष्ठादौ	आश्लेषार्द्धे
तृतीया	अश्विन्यादौ	चित्रायाम्	उत्तराषाढायाम्	पुनर्वसौ
चतुर्थी	पूर्वभाद्रपदायाम्	हस्ते	पूर्वाषाढायाम्	आर्द्रायाम्

(सर्वत्र सूर्ये प्राप्ते इति योज्यम्)

ऋतुमधिकृत्य वैदिकसाहित्ये यत्र कुत्र पञ्चैवर्तवः प्रोक्ता अन्यत्र षडपि क्वचित्तु सप्ताऽपि। तेषां पञ्चविधत्वं हेमन्तशिशिरयोरेकीकरणेनेति माधवाचार्यः सप्तविधत्वञ्च संसर्पमादायेति। ऋग्वेदे प्रायः त्रय एवर्तवः प्रोक्ताः वसन्तो ग्रीष्मः शरच्च। यथा—'वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः' (१०। ९०।६)। अन्यत्र प्रावृषो हेमन्तस्याऽप्युल्लेखो दृश्यते तत्र। अन्यत्र वेदेषु प्रायः षडेवर्तवः प्रोक्ताः। ऋतूनां हि ऋग्वेदे त्रयाणामेवोल्लेखस्यानन्तरवर्तिवैदिकसाहित्ये षण्णामेवोल्लेखस्य चार्याणा पश्चिमतः पूर्वम्प्रति प्रस्थानं हेतुरिति केचिद्वदन्ति यथा त्सेमरः। वयं तु तत्कार्यापेक्षयेति ब्रूमः। यथा हि होमकर्मणि आज्यत्वेन वसन्त इध्मत्वेन ग्रीष्मो हविष्ट्वेन शरत् स्मृतः। तत्र तावतामेव प्रयोजनमासीत्। अन्यत्र स्पष्टमेवर्तूनां षाड्विध्यं प्रतिपादितं दृश्यते। यत्रापि तत्रर्तवो वर्णितास्तत्र तेषां वसन्तस्य प्राथम्येनोल्लेखो दृश्यते शिशिरस्यान्तिमत्वेन यत्र कुत्र हेमन्तोऽपि चरमत्वेन। वसन्तस्य मुख्यत्वे पृथग्विधानमपि लभ्यते। यथा तैत्तिरीयब्राह्मणे—

'मुखं वा एतदृतूनां यद्वसन्तः' (१।१।२।६-७)। तत्रैव संवत्सरो हि पक्षित्वेनोपवर्णितो यस्य 'वसन्तो हि शिरो ग्रीष्मो दक्षिणपक्षः शरदुत्तरपक्षः वर्षापुच्छं हेमन्तो मध्यमिति। (तै० ब्रा० ३।१०।४।१)

वसन्तः
|
शरद्—हेमन्तः—ग्रीष्मः
|
वर्षा

ऋतुस्थितेः सूर्यावलम्बनत्वेन सौरमासतिथीनामनिश्चयेन च कस्यर्तोः कदाऽऽरम्भो भवतीति दुःष्करमेव निश्चयेन वक्तुम्। अत एव तैत्तिरीयसंहितायामुक्तम्—

'उभयतो मुखमृतुपात्रं भवति को हि तद्वेद यदृतूनां मुखम्' (६।१।३)। शङ्करबालकृष्णो निर्दिशति यद्येकस्मिन् वर्षे सौरमासस्यारम्भः पौर्णमास्यां भवति तदागामिवर्षे तस्य शुक्लद्वादश्यामेवोपक्रमस्तदग्रिमवर्षे तु कृष्णाष्टमीमभित एव। नैतावन्मात्रमपितु तेषां सौरमासैः सह सम्बन्धोऽपि यत्किञ्चिदनियत एव। स्थलभेदेनाऽपि ऋत्वारम्भे पञ्चषदिनानामन्तरं भवति। तेनैव शतपथब्राह्मणे चातुर्मास्येन यज्ञेन ऋतुसन्धीनां व्यवस्थापनमुक्तम्।

एवमेव संवत्सरस्यावयवत्वेन मासानां द्वादशविधत्वं त्रयोदशविधत्वञ्चोक्तं वैदिकसाहित्ये। मासानां हि तत्र मधु-माधव-शुक्र-शुचि-नभो-नभस्य-इष-ऊर्ज-सह-सहस्य-तपः-तपस्येति द्वादशमासाः संसर्पो वांहस्पतिश्च त्रयोदशतमो मास

इति मासानां संज्ञा। शतपथब्राह्मणेऽग्न्याधानप्रसङ्गे वैशाखनाम्नाऽपि माधवमासो हि कथितो दृश्यते। तैत्तिरीयब्राह्मणे (३।१०।१) चतुर्विंशत्यर्द्धमासानां नामान्यपि इत्थं स्मृतानि—

'पवित्रन् पवयिष्यन् पूतो मेध्यः। यशो यशस्वानायुरमृतः। जीवो जीविष्यन्त्स्वर्गो लोकः। सहस्वान् सहीयानोजस्वान् सहमानः। जयन्नभिजयन्त्सुद्रविणो द्रविणोदाः। आर्द्रपवित्रो हरिकेशो मोदः प्रमोदः।' तत्र द्वादशमासानां त्रयोदशतमस्य च नामान्तराण्यप्युक्तानि। यथा—

'अरुणोऽरुणरजाः पुण्डरीको विश्वजिदभिजित्।
आर्द्रः पिन्वमानोन्नवान् रसवानिरावान्।
सर्वौषधः सम्भरो महस्वान्॥' (३।१०।१)

अरुणः अरुणरजाः पुण्डरीकः विश्वजित् अभिजित् आर्द्रः पिन्वमानः उन्नवान् रसवान् इरावान् सर्वौषधः सम्भरः महस्वान् इति। सम्भवति महस्वानिति अधिमाससंज्ञेति।

तत्र ऋतुत्रैविध्यमप्युक्तं दृश्यते। यथा—

'अग्निः ऋतुः सूर्यः ऋतुश्चन्द्रमा ऋतुः।' (३।१०।१)। यद्यप्यस्य कोऽभिप्राय इति न सम्यग्ज्ञातं तथाप्यनुमानतः वसन्तग्रीष्मौ आग्नेयौ वर्षाशरदौ सौरौ हेमन्तशिशिरौ चान्द्रावित्यस्याशयेन भाव्यमिति। शतपथब्राह्मणेऽपि हेमन्तस्य चान्द्रत्वमुक्तं दृश्यते। स्पष्टमेव यन्मध्वादिसंज्ञाऽरुणादिसंज्ञा वा ऋतुसम्बद्धा न तु नाक्षत्रा। चैत्रादिसंज्ञा तु नक्षत्रसम्बद्धत्वेन, यथा—चित्रायुक्ता पौर्णमासी चैत्री तन्मासश्च चैत्रः साऽस्मिन् पौर्णमासीति। चन्द्रमा हि प्रायो नियमिते एव नक्षत्रे पूर्णो भवतीति तथा नामकरणे हेतुरत्र। अयमपि प्रायोवाद एव, वस्तुतस्तु दृश्यन्ते तत्राऽप्यपवादाः। यथा २०४६ वैक्रमाब्देषु—

मासाः	चै.	वै.	ज्ये.	आ.	श्रा.	भा.	आ.	का.	मा.	पौ.	मा.	फा.
पौर्णमास्यां नक्षत्राणि	स्वा.	अ.	मू.	उ.	ध.	पू.	रे.	कृ.	मृ.	पु.	आ.	उ.

तथास्थितावयमेव हेतुर्यत्क्रान्तिवृत्ततो नक्षत्राणां दूरत्वं तु सदासमानमेव किन्तु चन्द्रमा हि नैव क्रान्तिवृत्तमेवाश्रित्य चलति अपितु ततः कदाचिदुत्तरतः कदाचित्तु दक्षिणतोऽपि किञ्चिद् दूरमेव चलति। तस्य हि कक्षं क्रान्तिवृत्तं द्विः पारं करोति। उभे छेदनबिन्दू चन्द्रपात इति ज्ञायेते। यदि चन्द्रपातस्य स्थैर्यं स्यात्तदा तु चन्द्रस्य पूर्णत्वं सदैव समाने एव नक्षत्रे स्यात्, किन्तु पातस्यापि गतिर्भवति यस्य हि १८½ वर्षेषु भगणः पूर्णो भवति। तेन चन्द्रः कदाचित्तु रोहिणीं पूर्णत आच्छादयति, कदाचित्तु तयोरेकादशांशेनान्तरमपि भवति। तेन हि चन्द्रमा यदि एकस्मिन् मासे एकस्मिन् नक्षत्रे पूर्णो भवति द्वितीयस्मिन् मासे

तु ततो द्वितीयस्मिन् वा तृतीये नक्षत्रे एव पूर्णो भवति । प्रत्यब्दश्च तस्य तदेव पूर्णत्वमपि तथैव भिद्यते । यथा—

वर्षाणि	२०३१	२०३२	२०३३	२०३४	२०३५	२०३६	२०३७	२०३८	२०३९
चैत्रपौर्णमास्यां नक्षत्राणि	चि.	स्वा.	चि.	ह.	स्वा.	चि.	ह.	चि.	चि.

तेन हि नक्षत्रसम्बन्धेन माससंज्ञाऽपि प्रायोवृत्त्यैव । मधुमाधवादिसंज्ञाऽपि चन्द्रसम्बन्धेनैव मासानां पूर्णिमान्तत्वादमान्तत्वाद्वा । एतेन नैतदवधेयं यद्वेदसंहिताकाले सौरमासस्य ज्ञानमेव नासीदिति । यदा हि सौरो वर्षो गण्यते स्म तदा सौरमासानामपि गणनाऽवश्यमेव स्यात् । सम्भवति मधुमाधवादिनामानि सूर्यचन्द्रोभयसम्बन्धेनैव प्रवर्तितानि स्युः ।

शङ्करबालकृष्णो निर्दिशति यन्न हि वेदे मेषादिराशिचक्रस्योल्लेखो लभ्यते । मासानां पूर्णिमान्तत्वेनोल्लेखात्तत्सम्भवत्यपि । पूर्णो मासो यस्यमिति पौर्णमासी । तैत्तिरीयसंहितायाम्—

'अमावास्यया मासान् सम्पाद्याहरुत्सृजन्ति अमावास्यया हि मासान् सम्पश्यन्ति । पौर्णमास्यां मासान् समपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान् सम्पश्यन्ति ।' (७।५।६।१)

तैत्तिरीयब्राह्मणे 'पूर्वपक्षे देवान् व्यसृज्यन्त अपरपक्षमन्वसुराः ततो देवा अभवन् परासुराः' । (२।२।३।१) । 'पूर्वपक्षाश्चितयः । अपरपक्षां पुरीषम्' (३।१०।४।१) इत्यादिकथनेन पूर्वाऽपर इति पक्षभेदस्तु दृश्यते किन्तु पक्षावबोधकत्वेन शुक्लकृष्णशब्दौ हि वेदेषु नैव प्रयुक्ताविति शङ्करबालकृष्णः । पूर्वपक्षे देवसृष्टिरपरपक्षे आसुरसृष्टिरिति कथनेन शुक्लस्य पूर्वपक्षत्वमनुमातुं शक्यते तच्च अमान्तमासमाने एव सम्भवति । पूर्णिमान्तमासमाने तु कृष्णपक्षस्यैव पूर्वत्वम् । नवो नवो भवति जायमान इति पूर्वपक्षादिमभिप्रेत्याह्वाम्' (निरुक्तम् ११।६) इति कथनेन कृष्णपक्षस्य पूर्वपक्षत्वं सिध्यति । अमान्तमाने पूर्णिमा मध्ये पतति ततो न सिध्यति तस्य पौर्णमासीत्वमिति पूर्णिमान्तमान एव बहुभिर्गृह्यते । शतपथब्राह्मणेऽप्युक्तम्—

'एष एव पूर्णिमा यच्चन्द्रमा एतस्य ह्यनुपूरणं पौर्णमासीत्याचक्षतेऽथैष एव दर्शो य एष तपति ददृशे इव ह्येषः ।' (११।२।४।२)

सौरमासस्येव सौरदिनस्याऽपि वैदिकसाहित्ये समुल्लेखो न लभ्यते, किन्तु तत्र सावनदिनस्योल्लेखस्तु यत्र तत्र दृश्यते । तैत्तिरीयब्राह्मणे तेषां नामान्यप्युक्तानि दिनानां रात्रीणाञ्च । पूर्वपक्षस्याह्नां नामानि यथा—

'संज्ञानं विज्ञानं प्रज्ञानं जानदभिजानत् । सङ्कल्पमानं प्रकल्पमानमुपकल्पमानमुपक्लृप्तं क्लृप्तम् । श्रेयोवसीय आयत्सम्भूतं भूतम् ।' (३।१०।१।१)

पूर्वपक्षस्य रात्रीणां नामानि यथा—

'दर्शा दृष्टा दर्शना विश्वरूपा सुदर्शना । अप्यायमाना प्यायमाना सुनृतेतरा । आपूर्यमाणा पूर्यमाणा पूरयन्ती पूर्णा पौर्णमासी ।' (३।१०।१।१)

'संज्ञानं विज्ञानं दर्शा दृष्टेति पूर्वपक्षस्याहोरात्राणां नामधेयानि' इति कथनेन दर्शादिपौर्णमास्यन्तसंज्ञया शुक्लपक्षस्य पूर्वपक्षत्वं सिध्यति ।

अपरपक्षस्याहोरात्राणां नामानि यथा—

'प्रष्टुतं विष्टुतं संस्तुतं कल्याणं विश्वरूपम् । शुक्रममृतं तेजस्वि तेजः समृद्धम् । अरुणं भानुमन्मरीचियदनभितपत्तपस्वत् ।' (३।१०।१।२)

'सुता सुन्वन्ती प्रसुता सूयनामाऽभिपूयमाणा । पीतिः प्रपा सम्पा तृप्तिस्तर्पयन्ती । कान्ता काम्या कामजाताऽऽयुष्मती कामदुघा' । इति ।

(३।१०।१।२-३)

अत्रेदमवधेयं यदत्र अमावास्या पौर्णमासी च रात्रिविशेषस्यैव संज्ञा न तु तिथिविशेषस्यैव ।

शङ्करबालकृष्णो निर्दिशति यच्चान्द्रमासस्य त्रिंशत्तमभागरूपेण सूर्याचन्द्रमसोर्द्वादशांशान्तरभवने यावान्कालोऽपेक्ष्यते तदर्थे वा तिथिशब्दो न हि वेदेषु प्रयुक्तो दृश्यते । बह्वृचब्राह्मणे उक्तम्—

'या पर्यस्तमियादभ्युदियादिति सा तिथिः' । इति ।

अर्थाद्यस्यां चन्द्रमा उदेत्यस्तमेति च सा तिथिरिति । चन्द्रमसो हि उदयादुदयान्तरपर्यन्तमेकसावनदिनात्प्राय एकमुहूर्तमितः कालोऽधिक आवश्यकः । एकस्मिश्चान्द्रमासे एकोनत्रिंशन्मितास्त्रिंशन्मिता वा सूर्योदया भवन्ति किन्तु चन्द्रोदयास्तु अष्टाविंशतिमिता एकोनत्रिंशन्मिता वा । तेन हि चान्द्रमासे उपर्युक्तलक्षणानुसारेण न कदापि त्रिंशत्तिथयः सम्भवन्ति । सम्भवत्यनेनैव हेतुना नाऽस्य प्रचारोऽन्यत्र वैदिकसाहित्ये वाऽस्याभिप्राय एव तदितरः । तैत्तिरीयब्राह्मणे—

'चन्द्रमा वै पञ्चदशः । एष हि पञ्चदश्यामपक्षीयते । पञ्चदश्यामापूर्यते ।
(१।५।१०)

इति कथने प्रयुक्तेन पञ्चदशीशब्देन प्रतिपदादीनामन्यासामपि तिथीनां गणनायाः सम्भावना दृश्यते तत्र । सामविधानब्राह्मणे कृष्णचतुर्दश्याः (२।६), कृष्णपञ्चम्याः (२।८) शुक्लचतुर्दश्याश्च (३।३) समुल्लेखो लभ्यते । एतदप्यनुमीयते यत्प्रतिपदादिशब्दा आदौ रात्रिवाचका एवासन् पश्चाच्च तिथिनिमित्तं प्रयुक्ता इति । एवमेव वेदेषु अष्टकाशब्दस्य प्रयोगोऽपि दृश्यते । यथा—

'द्वादश पौर्णमास्यः । द्वादशाष्टकाः । द्वादशामावास्याः ।'
(तै० ब्रा० १।५।१२)

'पौर्णमास्यष्टकामावास्याः ।' (तै० ब्रा० ३।११।१।१९)

'प्राजापत्यमेतदहर्यदष्टका । पर्वतत्संवत्सरस्य यदष्टका ।'

(श० ब्रा० ६।२।२।२३-२४)

अत्र हि अष्टकानां द्वादशसङ्ख्यया तस्याश्च पौर्णमास्यनन्तरोल्लेखाच्च कृष्णपक्षाष्टम्य एव सूचिता इत्यनुमीयते । पौर्णमास्यनन्तरमष्टमे दिनेऽष्टका भवतीत्यस्याशय इति । तत्र एकाष्टकानिर्देशोऽपि दृश्यते, या हि सम्भवतः फाल्गुनकृष्णाष्टमीं सम्भवति । सा हि नववर्षस्य प्रथमाऽष्टकेति ।

एवमेव तत्र व्यष्टकाया अपि उल्लेखो दृश्यते । यथा—

'पौर्णमास्यां पूर्वमहर्भवति व्यष्टकायामुत्तरम् ।

अमावास्यायां पूर्वमहर्भवति उदृष्ट उत्तरम् ॥' (तै० ब्रा० १।८।१०।२)

एवमेव ताण्ड्यब्राह्मणेऽपि (१।८।११।८) । फलतः कृष्णप्रतिपदैव व्यष्टका शुक्ला तु उदृष्ट इति । वस्तुतस्तु एकचन्द्रकलावृद्धिक्षयान्यतरावच्छिन्नकालस्तिथिः । तस्याश्चैककलावृद्ध्यवच्छिनत्वे शुक्लत्वं क्षयावच्छिनत्वे कृष्णत्वम् । क्षयश्च तस्या देवपानेन । यथोक्तम्—

'यत्त्वा देव प्रपिबन्ति तत आप्यायते पुनः ।
वायुः सोमस्य रक्षिता समानां मास आकृतिः ॥' (ऋ १०।८५।५)

'यमादित्या अंशुमाप्याययन्ति यमक्षितमक्षितयः पिबन्ति ।' (तै० सं० २।४।१४) स्पष्टमेतदत्र यदादित्यो हि द्वादशात्मकश्चन्द्रकलां बिभर्ति पूर्णायाञ्च तस्यां पुनराददाति चेति । उक्तमेव तैत्तिरीयसंहितायाम्—

'सूर्यरश्मिश्चन्द्रमा गन्धर्वः ।' (३।४।७।१)

तथैव ऐतरेयब्राह्मणेऽपि—

'चन्द्रमा अमावास्यायामादित्यमनुप्रविशति..........आदित्याद्वै चन्द्रमा जायते ।' (४०।५)

शतपथब्राह्मणेऽप्युक्तम्—

'सोऽमावास्यायां रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते ।' (१४।४।३।२२)

'एष वै सोमो राजा देवानामन्नं यच्चन्द्रमाः स एवैष एतां रात्रिं पुरस्तान्न पश्चाद्ददृशे तदिमं लोकमागच्छति स इहैवापश्चौषधीश्च प्रविशति स वै देवानां वस्वन्नं ह्येषा तद्यदेष एता रात्रिमिहामावसति तस्मादमावास्या नाम ।'

(१।६।४।५)

अमावास्या हि दर्शः पौर्णमासी तु पर्वः । तत्रापि अनुमतिराकाभेदेन पौर्णमास्या द्वैविध्यं सिनीवालीकुहूभेदेनामावास्यायाः ।

यथोक्तं गोपथब्राह्मणे—

'या पूर्वा पौर्णमासी सानुमतिर्योत्तरा सा राका या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूरिति ।' (६।१०)

अस्यायमाशयो यत्कलैकहीना अनुमतिः पूर्णे चन्द्रे तु राका दृष्टेन्दुः सिनीवाली नष्टेन्दुः कुहूरिति । ऋग्वेदेऽपि—'राकामहं सुहवां सुष्टुती हवे शृणोतु नः·· ····' (२।३२।४) 'सरस्वती बृहद्दिवोत राका' (५।४२।१२) 'तस्यै विश्पत्न्यै हविः सिनीवाल्यै जुहोतन' (२।३२।७) 'सिनीवालि पृथुष्टुके या देवानामसि स्वसा' (२।३२।६) इति । यो हि राकासिनीवालीशब्दप्रयोगः स च देवपत्नीपरक इति नैरुक्ताः, तिथिविशेषपरक इति याज्ञिकाः । (निरुक्तम् ११।३१)।

यद्यपि सूर्याचन्द्रमसोर्गतिविषये वेदेषु नैव किञ्चित्स्पष्टमुक्तं लभ्यते किन्तु दर्शपौर्णमास्योः सन्धौ यजेत सन्धिमभितो यजेत इत्यादिवचनाच्च तद्विषयकं ज्ञानं प्रतिभाति । गतिज्ञानं विना पर्वप्रतिपदोः सन्धिज्ञानमपि नैव सम्भवति ।

यद्यपि वासराणां सप्त नामानि वेदेषु नैव दृश्यन्ते तथापि तत्र वासरशब्दः प्रयुक्तो लभ्यते । यथा ऋग्वेदे—

'आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरम् ।
परो यदिध्यते दिवा ।' (८।६।३०)

दिनमानमधिकृत्य ऋग्वेदे उक्तं यत्सूर्यो हि दिनस्य दैर्घ्यं सम्पादयति । यथोक्तम्—

'सोम राजन् प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि' ।
(ऋ० ८।४८।७)

वेदेषु हि विषुवत उल्लेखो यत्र तत्र लभ्यते । विषुवान् हि संवत्सरस्य मध्ये पतति । यथैतरेयब्राह्मणे—

'एकविंशमेतदहरुपयन्ति विषुवन्तं मध्ये संवत्सरस्य' । (१८।१८)

'यथा वै पुरुष एष विषुवांस्तस्य यथा दक्षिणार्ध एव पूर्वार्द्धो विषुवतो यथोत्तरार्द्धं एवमुत्तरार्द्धो विषुवतस्तस्मादुत्तर इत्याचक्षते प्रबाहुः········शिर एव विषुवान् ।' (१८।२२)

यथा वा तैत्तिरीयब्राह्मणे—

'सन्ततिर्वा एते ग्रहाः । यत्परः सामानः । विषुवान् दिवा कीर्त्यः । यथा शालायै पक्षसी । एवं संवत्सरस्य पक्षसी ।' (१।२।३)

यदा हि दिनरात्रिमानस्य साम्यं तदैव विषुवद्दिनमिति तु वेदेषु स्पष्टतया नैवोक्तम् । वस्तुतस्तु संवत्सरस्य हि वासन्तशारदभेदेन द्वौ विषुवन्तौ किन्तु वासन्तविषुवति संवत्सरसत्रारम्भे द्वितीयो हि मध्ये पतति इति विषुवान् मध्ये संवत्सरस्य पततीत्युक्तम् ।

वैदिकसाहित्ये सूर्योदयादारभ्य सूर्यास्तपर्यन्तमहः पञ्चसु भागेषु विभक्तं दृश्यते । यथा—

'उतायातं सङ्गवे प्रातरह्नो मध्यन्दिन उदिता सूर्यस्य ।
दिवानक्तमवसा शन्तमेन नेदानीं पीतिरश्विना ततान ।'
(ऋ० ५।७६।३)

'पूर्वाह्णो वै देवानां मध्यन्दिनो मनुष्याणामपराह्णः पितॄणाम् ।'
(शत० २।४।२।८)

ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनाऽस्तमये महीयते । वेदैरशून्यस्त्रिभिरिति सूर्यः ।' (तै० ब्रा० ३।१२।९।१)

'देवस्य सवितुः प्रातः प्रसवः प्राणः । वरुणस्य सायमासवोपानः । यत्प्रतीचीनं प्रातस्तनात् । प्राचीनं सङ्गवात् । ततो देवा अग्निष्टोमं निरमिमत········ प्राचीनं मध्यन्दिनात्·······यत्प्रतीचीनं मध्यन्दिनात्प्राचीनमपराह्णात् । ········ भगस्यापराह्णः । ········। तस्मादपराह्णे कुमार्यो भगमिच्छमानाश्चरन्ति ।········ प्राचीनं सायात् ।' (तै० ब्रा० १।५।३)

इत्थं हि दिवसस्य **प्रातः-सङ्गव-मध्याह्न-अपराह्ण-साय**भेदात् पञ्च भागास्तत्र तत्र निर्दिष्टाः । प्रयोजनानुसारं यत्र तत्र दिवसस्य त्रयो विभागाश्चत्वारो वाऽपि कृता अपि दृश्यन्ते । पश्चाद्वर्तिधार्मिकसाहित्येषु तु यथा दक्षस्मृत्यादौ दिवसो ह्यष्टधा विभाजितो दृश्यते । मूलतस्तु दिवसस्य चत्वार एव भागाः पूर्वाह्ण-मध्याह्नापराह्ण-सायाह्नभेदात् । प्रकरणेऽस्मिन् सूर्यस्योदयास्तमयावच्छिन्नः काल एव दिवसः । तदुदयात्प्राक्प्रातःकालः । यथाकालं कृत्यान्यपि विभक्तानि सन्ति; यथा प्रातर्होमादिकर्म पूर्वाह्णे; देवपूजनादिकं मध्याह्ने, पितृकर्म अपराह्णे, भोजनादि सायाह्ने सायन्तनकृत्यानीति ।

दिनमानस्य त्रिंशत्तमो भागो मुहूर्तः । मुहूर्तविषयेऽपि वैदिकसाहित्ये तत्र तत्र चिन्तितं दृश्यते । यथा हि—

'रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः ।
प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः ।' (ऋ० ३।३३।५)
'त्रिर्यद्दिवः परि मुहूर्तमागात् ।' (ऋ० ३।३५।८)

'अथ यच्चतुर्विंशतिमात्मनोऽकुरुत । तस्माच्चतुर्विंशत्यर्द्धमासः । संवत्सरः स एतैश्चतुर्विंशत्या त्रिंशदिष्टकैरात्मभिन्नं व्यभवत् स पञ्चदशाहन्नो रूपाण्यपश्यदात्मनस्तन्वो मुहूर्तांल्लोकम्पृणाः पञ्चदशैव रात्रेस्तद्यन्मुहुः त्रायन्ते तस्मान्मुहूर्ताः । अथ यत् क्षुद्राः सन्त इमाँल्लोकानापूरयन्ति तस्माल्लोकम्पृणाः ।'
(शत० १०।४।२।१८)

'स मुहूर्तेन मुहूर्तेनैवाशीतिमाप्नोन्मुहूर्तेन मुहूर्तेनाशीतिः समयद्यत ।'
(शत० १०।४।२।२५)

'.........तदनु पञ्चदश मुहूर्तान्मुहूर्तानिनु पञ्चदशाशीतिः ।'
(शत० १०।४।२।२७)

'अथ या लोकम्पृणा मुहूर्तलोकास्ता मुहूर्तानामेव साप्तिः क्रियते मुहूर्तानां प्रतिमा ता दश च सहस्राण्यष्टौ च शतानि भवन्त्येतावन्तो हि संवत्सरस्य मुहूर्ताः' । (शत० १०।४।३।२०)

(अहोरात्रस्य त्रिशन्मुहूर्तास्तेषां ३६० सङ्ख्यया गुणने १०८०० मिता सङ्ख्यया भवति) ।

तैत्तितीयब्राह्मणे मुहूर्तानां नामान्यप्युक्तानि । यथा—

'चित्तं केतुर्दाता प्रदाता सविता प्रसविताऽभिशास्तानुमन्तेति । एष एव तेह्नो मुहूर्ताः । एष रात्रेः ।' (३।१०।९)

चित्रः केतुः प्रभानाभान्त्सम्मान् । ज्योतिष्मांस्तेजस्वानातपस्तपन्निमित्तयन् । रोचनो रोचमानः शोभनः शोभमानः कल्याणः ।' (३।१०।१)

एवमेव तत्र प्रतिमुहूर्तानामप्युल्लेखो लभ्यते वेदेपु । यथा—

'अथ यदाह इदानीं तदानीमिति एष एव तत् । एष एव ते मुहूर्तानां मुहूर्ताः ।' (तै० ब्रा० ३।१०।९।९)

'इदानीं तदानीमेतर्हि क्षिप्रमजिरम् । आशुर्निमेषः क्षणो द्रवन्नतिद्रवन् । त्वरंस्त्वरमाण आशुरशीयान् जवः ।' (तै० ब्रा० ३।१०।१।४)

इत्थं हि वेदेषु युगसंवत्सरमासार्द्धमासाहोरात्रमुहूर्तप्रतिमुहूर्तादिभेदेन समयो विभक्तो दृश्यते ।

ऋग्वेदे तदनन्तरवर्तिवैदिकसाहित्ये च तारार्थे नक्षत्रविशेषार्थे च नक्षत्र-शब्दो बहुधा प्रयुक्तो दृश्यते । तत्र ऋग्वेदे यथा—

'अपत्ये तायवो यथा नक्षत्रा यन्त्यकुभिः.........सूराय विश्वचक्षसे ।'
(१।५०।२)

'धीरात्वस्य महिना जनूंषि विपस्तस्तम्भ रोदसी चिदुर्वी । प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ।' (७।८६।१)

'अभिश्यावं न कृशनेभिरश्वं नक्षत्रेभिः पितरो द्यामर्पिशन् ।
रात्र्यां तमो अदधुर्ज्योतिरहन् बृहस्पतिर्भिनदद्रिं विददगाः ।' (१०।६८।११)

'सोमेनादित्या बलिनः सोमेन पृथिवी मही ।
अथो **नक्षत्राणा**मेषामुपस्थे सोम आहितः ।' (१०।८५।२)

काममनन्तरवर्तिमन्त्रेषु नक्षत्रशब्दस्तारासामान्यमेव जनयेत्किन्तु प्रकृते तु स्पष्टमेव चान्द्रनक्षत्रमभिसूचितमेव । एवमेव तिष्यस्योल्लेखो यथा—

'युष्मादत्तस्य मरुतो विचेतसो रायः स्याम रथ्यो वयस्वतः ।
न यो युच्छति तिष्यो यथा दिवो स्मेरारन्त मरुतः सहस्रिणम् ।'
(ऋ० ५।५४।१३)

'········कृशानुमस्तॄन् तिष्यं सधस्य········।' (ऋ० १०।६०।८)

चित्राया उल्लेखो यथा--

'अस्थुरु चित्रा उषसः पुरस्तात्···· ।' (ऋ० ४।५१।२)

एवमेव हि—

'सूर्याया वहतुः प्रागात् सविता यमवासृजत् ।'
अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते ।' (ऋ० १०।८५।१३)

स्पष्टमेव मघानक्षत्रे हि गावो नीयन्ते फाल्गुन्योः परिणीयते कन्येति । सैव यथाऽथर्ववेदे—

'मघासु हन्यन्ते गावः फल्गुनीषु व्यूह्यते ।' (१४।१।१३)

वाजसनेयीये यथा—

'द्यौस्ते पृथिव्यन्तरिक्षं वायुश्छिद्रं पृणातु ते ।
सूर्यस्ते नक्षत्रैः सह लोक कृणोतु साधु या ।।' (१९।४३)

' ' सूर्याय स्वाहा चन्द्राय स्वाहा नक्षत्राय स्वाहा··· ।' (२२।२९)

'नक्षत्रेभ्य किर्मिरं चन्द्रमसे किलालं···· ।' (३०।२१)

लुर्डविगत्सिमरप्रभृतयो विपश्चितः 'चतुस्त्रिंशद्वाजिनो देवबन्धोः' (ऋ० १।१६२।१८) इत्यत्र चतुस्त्रिंशदिति सप्तग्रहैः सप्तविंशतिनक्षत्रैश्चेति व्याख्यान्ति । तस्य च 'चतुस्त्रिंशता पुरुधा विचष्टे सरूपेण ज्योतिषा विव्रतेन (ऋ० १०।५५।३) इति कथनेन भवति पुष्टिश्च ।

माध्यन्दिनीये स्पष्टमेव चन्द्रमसो नक्षत्रैः सह सम्बन्धोऽभिहितः । यथोक्तम्—

'सुषुम्णः सूर्यरश्मिश्चन्द्रमागन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ।'
(१८।४०)

तत्रैव '····वातो वा मनो वा गन्धर्वाः सप्तविंशतिः····' (९।७) इति नक्षत्राणां सङ्ख्याऽपि निर्दिष्टाऽस्ति । शतपथब्राह्मणे नक्षत्रचन्द्रमसोः सम्बन्धमधिकृत्योक्तम्—

'अभ्रं पुरीषम् । चन्द्रमा आहुतयो नक्षत्राणि समिधो यच्चन्द्रमा नक्षत्रे वसत्याहुतिस्तत्समिधि वसत्येतदु वा आहुतेरन्नमेषा प्रतिष्ठा तस्मादाहुतिर्न क्षीयत एतद्ध्यस्या अन्नमेषां प्रतिष्ठा····' ।
(१०।५।४।१७)

एवमेव तत्र नक्षत्राणां सङ्ख्या सप्तविंशतिरुक्तोपनक्षत्राणाञ्च यथा—

'नक्षत्राणि ह त्वेवैषोऽग्निश्चितः । तानि वा एतानि सप्तविंशतिर्नक्षत्राणि

सप्तविंशतिः सप्तविंशतिर्ह्योपनक्षत्राणि एकैकं नक्षत्रमनूपतिष्ठन्ते तानि च सप्त च शतानि विंशतिश्चाधिषट्त्रिंशत्ततो यानि सप्त च शतानि च विंशतिश्चेष्टका एव ताः षष्टिश्च त्रीणि च शतानि परिश्रितः षष्टिश्च त्रीणि च शतानि यजुष्मत्योऽथ यान्यधिषट्त्रिंशतस त्रयोदशो मासः स आत्मा त्रिंशदात्मा प्रतिष्ठा द्वे प्राणाः द्वे शिर एव षट्त्रिंश्यौ···· ।' (१०।५।४।५) ।

एवमेव तैत्तिरीयसंहितायामपि नक्षत्राणि सप्तविंशतिरेवोक्तानि (४।४। १०।१-३) । किन्तु अन्यत्राष्टाविंशतिरपि (७।१।२।२) । तैत्तिरीये ब्राह्मणे अष्टाविंशतितमत्वेनाभिजित उल्लेखोऽपि दृश्यते । तैत्तिरीयसंहितायां नक्षत्र-तारकाणां भेदः स्पष्टतयोल्लिखितः । यथा—

अश्वस्य मेध्यस्य शिरः सूर्यः चक्षुर्वातिः प्राणश्चन्द्रमाः श्रोत्रं दिशः प्राणा अवान्तरदिशः पशवोऽहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः सन्धानान्यृतवोऽङ्गानि संवत्सर आत्मा रश्मयः केशा नक्षत्राणि रूपं तारका अस्थीनि नमो मासानि···· ।'

इत्थं हि वेदेषु नक्षत्रविषये बहूक्तमस्ति । तत्रैकत्रनक्षत्राणि सूर्यसम्बन्ध-तश्चन्द्रसम्बन्धतः स्वतन्त्रतया च वर्णितानि दृश्यन्ते । सूर्यसम्बद्धत्वेन नक्षत्र-शब्दः कामं तारासामान्यमर्थं बोधयतु नाम किन्तु चन्द्रसम्बद्धनक्षत्रं तु निश्चयमेव साम्प्रतिकमेवार्थं बोधयतीति 'मेध्यस्याश्वस्य····नक्षत्राणि रूपं तारका अस्थीनि···· ।' इति (तै० सं०) वचनादेव सिध्यति । तेषां तत्र सङ्ख्या-क्वचित्सप्तविंशतिरन्यत्राष्टाविंशतिरप्युक्ताः क्वचित्तु त्रयस्त्रिंशदपि । तेषामष्टा-विंशतिविधत्वं तु अभिजितमादायैव । अभिजिद्धि नक्षत्रान्तरापेक्षयाऽनुज्ज्वलमत एव स्वल्पप्रभावमिति तत्र तत्रोपेक्षितमपि सम्भवति । सूर्यो हि एकस्मिन्नक्षत्रे $13\frac{1}{3}$ दिनानि यावत्तिष्ठतीति नक्षत्रापेक्षया सौरवर्षे ($13\frac{1}{3} \times २७ = ३६०$) षष्टिश्च त्रिशतं दिनानि भवन्ति । यद्धि सावनवर्षेण सह संवादि । शतपथ-ब्राह्मणे अग्निचयनप्रक्रियायां नक्षत्रसङ्ख्यया इष्टकायोजनमुक्तम् (१०।५। ४।५) । तत्र ७५६ सङ्ख्याऽभीष्टा । सा च सप्तविंशतिनक्षत्राणि सप्तविंशति उपनक्षत्राणि सप्तविंशत्याः सप्तविंशत्या गुणने (२७ × २७) ७२९ सङ्ख्या भवति तत्र नवोने (सम्भवति नवानां हि नक्षत्राणामुपनक्षत्राणामतथाप्रभावित्वं तेनेयमूनीकरणव्यवस्था) ७२० सङ्ख्या भवति तत्र अधिमासस्य षट्त्रिंशद्दिन-योजने पूरिता भवति ।

न केवलं नक्षत्रविषये एवापितु उपनक्षत्रविषयेऽपि तत्र प्रतिपादितं दृश्यते । शतपथब्राह्मणे उक्तं यत्प्रतिनक्षत्रमेकैकमुपनक्षत्रमनूपतिष्ठते (१०।५।४।५) । कृत्तिका-मघा-आश्लेषा-ऽनुराधा-ऽषाढा-श्रविष्ठा-प्रोष्ठपद-अपभरणीनां बहुवचने पुनर्वसु-फल्गुनी-विशाखाऽश्वयुज्-शब्दानां द्विवचने प्रयोगश्च तत्तन्नक्षत्राणामुप-

नक्षत्रस्यावस्थितिं सूचयन्ति। तैत्तिरीयसंहितायां (४।४।५१) कृत्तिकासु यानि सप्त उपनक्षत्राणि तेषां नामान्यपि निर्दिष्टानि अम्बा दुला नितत्नी अभ्रयन्ती मेघयन्ती वर्धयन्ती चुपुणीका चेति। तैत्तिरीयब्राह्मणे (१।५।२।७) नक्षत्राणि द्विधा विभक्तानि देवनक्षत्राणि यमनक्षत्राणि। कृत्तिकातो विशाखा-पर्यन्तानि देवनक्षत्राणि अनुराधातोऽपभरणीपर्यन्तानि यमनक्षत्राणि।

नक्षत्रावस्थितिविषयेऽपि तत्र निर्दिष्टं लभ्यते। शतपथब्राह्मणे उक्तं यत्कृत्तिकाः प्राच्या दिशो न च्यवन्ते नक्षत्रान्तराणि तु च्यवन्ते एवेति। यथोक्तम्—

'कृतिकास्वग्नीऽआदधीत। एता वाऽअग्निनक्षत्रं यत्कृत्तिकाः.... ॥ १ ॥ एता ह वै प्राच्यै दिशो न च्यवन्ते। सर्वाणि ह वाऽन्यानि नक्षत्राणि प्राच्यै दिशश्च्यवन्ते ....।' (३।१।२।१-३)

वैदिकसाहित्ये नक्षत्राणां देवता अपि निर्दिष्टाः सन्ति। यथोक्तं तैत्तिरीय-संहितायाम्—

कृत्तिकानक्षत्रमग्निर्देवताग्नेरुचस्थ प्रजायतेधीतुः सोमस्यर्चे त्वा रूचे त्वा भासे त्वा ज्योतिषे त्वा रोहिणीनक्षत्रं प्रजापतिर्देवता मृगशीर्षं नक्षत्रं सोमो देवतार्द्रानक्षत्रं रुद्रो देवता पुनर्वसूनक्षत्रमदितिर्देवता तिष्यो नक्षत्रं बृहस्पति-र्देवताश्लेषा नक्षत्रं सर्पा देवता मघा नक्षत्रं पितरो देवता फल्गुनी नक्षत्रमर्यमा देवता फल्गुनी नक्षत्रं भगो देवता हस्तो नक्षत्रं सवितादेवता चित्रानक्षत्रमिन्द्रो देवता स्वाती नक्षत्रं वायुर्देवता विशाखे नक्षत्रमिन्द्राग्नीदेवतानुराधा नक्षत्रं मित्रो देवता रोहिणी नक्षत्रमिन्द्रो देवता विचृत्तौ नक्षत्रं पितरो देवताषाढानक्षत्र-मापो देवताषाढा नक्षत्रं विश्वेदेवा देवता श्रोणा नक्षत्रं विष्णुर्देवता श्रविष्ठा नक्षत्रं वसवो देवता शतभिषङ्नक्षत्रमिन्द्रो देवता प्रोष्ठपदानक्षत्रमज एकपाद्देवता प्रोष्ठपदा नक्षत्रमहिर्बुध्नियो देवता रेवती नक्षत्रं पूषा देवताऽश्वयुजौ नक्षत्र-मश्विनौ देवतापभरणीनक्षत्रं यमो देवता पूर्णापश्चाद्यन्ते देवा अदधुः।' (४।४।१०)

एवमेव तैत्तिरीयब्राह्मणे—

'अग्ने कृत्तिकाः। शुक्रं परस्ताज्ज्योतिरवस्तात्। प्रजायते रोहिणी। आपः परस्तादोषधयोधस्तात्। सोमस्येन्वका विततानि। परस्तात् वयन्तोवस्तात्। रुद्रस्य बाहू। मृगयवः परस्ताद्विसारोऽवस्तात्। आदित्यै पुनर्वसू। वातः परदार्द्रमवस्तात्। बृहस्पतेस्तिष्यः। जुह्वतः परस्ताद्यजमाना अवस्तात्। सर्पाणामश्रेषाः। अभ्यागच्छन्तः परस्तादभ्यानृत्यन्तोवस्तात्। पितृणां मघाः। रुदन्तः परस्तादपभ्रंशोवस्तात्। अर्यम्णः पूर्वे फल्गुनी। जाया परस्ता-दृषभोवस्तात्। भगस्योत्तरे। वहतवः परस्ताद्वहमाना अवस्तात्। देवस्य सवितुर्हस्तः। प्रसवः परस्तात्सनिरवस्तात्। इन्द्रस्य चित्रा। ऋतं परस्ता-

त्सत्सर्त्यमवस्तात् । वायोर्निष्टचा व्रततिः । परस्तादसिद्धिरवस्तात् । इन्द्राग्नियोर्विशाखे । युगानि परस्तात् कृषमाणा अवस्तात् । मित्रस्यानूराधाः । अभ्यारोहत्परस्तादभ्यारूढमवस्तात् । इन्द्रस्य रोहिणी । श्रृणत्परस्तात्प्रतिश्रृणदवस्तात् । निर्ऋत्यै मूलवर्हणी । प्रतिमज्जन्तः परस्तात्प्रतिश्रृणन्तोवस्तात् । अपां पूर्वा अषाढाः । वर्चः परस्तात्समितिरवस्तात् । विश्वेषां देवानामुत्तराः । अभिजयत्परस्तादभिजितमवस्तात् । विष्णोः श्रोणा । पृच्छमानाः परस्तात्पन्था अवस्तात् । वसूनां श्रविष्ठाः । भूतं परस्ताद्भूतिरवस्तात् । इन्द्रस्य शतभिषक् । विश्वव्यचाः परस्ताद्विश्वक्षितिरवस्तात् । अजस्यैकपदः पूर्वे प्रोष्ठपदाः । वैश्वानरं परस्ताद्वैश्वावसवमवस्तात् । अहेर्बुध्नियस्योत्तरे । अभिषिञ्चन्तः परस्तादभिश्रृण्वन्तोवस्तात् । पूष्णो रेवती गावः परस्तात् वत्सा अवस्तात् । अश्विनोश्वयुजौ । ग्रामः परस्तात्सेनावस्तात् । यमस्यापभरणीः । अपकर्षन्तः परस्तादपवहन्तोवस्तात् । पूर्णा पश्चाद्यत्ते देवा अदधुः ।'

(१।५।१) ।

यद्यपि नक्षत्रमादाय माससंज्ञाऽपि वैदिकसाहित्ये प्रवर्तिताऽऽसीदेव यथा वैशाखः (शत० ११।१।७), फाल्गुनः (पञ्च० ५।९।८), चैत्रः (कौषी० १९।३), तैष्यः (कौषी० १९।३), माघः (शत० १३।८,१।४) इत्यादि तथाऽपि नास्य सार्वत्रिकः प्रयोगो लभ्यते तत्र तत्र ।

वैदिकसाहित्ये सर्वत्र नक्षत्रगणना कृत्तिकात एव कृता दृश्यते । एतेनानुमीयते यत्तदा (विशेषतो ब्राह्मणग्रन्थसम्पादनकाले) वसन्तसङ्क्रान्तिस्तदैव सम्पद्यते स्म यदा हि सूर्योऽपभरणीतः कृत्तिकाः प्रविशति स्म । वराहमिहिरयुगे सा सूर्यस्य रेवतीतोऽश्विनीप्रवेशे एव । सम्प्रति तु सा सूर्ये पूर्वभाद्रपदायां प्रविष्टे सति भवति । ब्राह्मणयुगतः पूर्वं सा सूर्ये मृगशिरसि प्रविष्टे भवति स्म । तेन हि वैदिकसंहिताकालस्य नक्षत्रसूची मृगशिरस्तः ब्राह्मणयुगीननक्षत्रसूची कृत्तिकातः वराहमिहिरयुगीननक्षत्रसूची अश्विनीतः प्रारब्धा दृश्यते । साम्प्रतिकनक्षत्रसूची तु पूर्वाभाद्रपदातः प्रारभते यद्धि गणकैरवधेयम् । सम्प्रत्यपि याऽश्विन्यादिसूची प्रस्तूयते नक्षत्राणां सा गतानुगतिकत्वेनैव गणकानाम् । तत्राप्ययनांशसमावेशे तु धनिष्ठात एव सा सिध्यति । वेबरमहोदयो निर्दिशति यत्कृत्तिकायां वसन्तसङ्क्रान्त्या घटनं विक्रमतस्तृतीयसहस्राब्दीपूर्वमभितः सम्भवतीति । तिलकमहोदयानुसारं तु विक्रमतः ६०००-४००० वर्षपूर्वं शीतसङ्क्रान्तिश्चैत्रपूर्णिमायामासीत् ४०००-२५०० वर्षपूर्वं फाल्गुनपौर्णमास्यामेव । तैत्तिरीयसंहिताकाले २३२५ वर्षपूर्वं तु माघपूर्णिमायाम् । (सम्प्रति तु सा पौषपूर्णिमामभितः पतति यथा २०४६ वैक्रमाब्दे सा माघकृष्णचतुर्थ्यां

घटिताऽस्ति ।) कौषीतकीब्राह्मणे (१९।२।३) शीतसङ्क्रान्त्या माघस्यामावास्यां घटनमुक्तम् । शतपथब्राह्मणे तु स्पष्टमेवोक्तम्—

तद्वै वसन्त एवाभ्यारभेत । वसन्तो वै ब्राह्मणस्यर्तुर्य उ वैकश्च यजते ब्राह्मणाभूयेवैव यजते तस्माद्वसन्त एवाभ्यारभेत । सा याऽसौ फाल्गुनी पौर्णमासी भवति ।' (१३।४।१।३–४)

तैत्तिरीयसंहितायां तु (७।४।८।१) पञ्चविंशब्राह्मणे (५।९) च वर्षारम्भत्वेन चैत्रपूर्णिमा स्मृता ।

गृह्यसूत्रादौ महाभारते च नक्षत्राणां गणना श्रवणादितः कृताऽस्ति वर्षारम्भश्च वृश्चिकसङ्क्रान्तितो यतो हि मार्ग आग्रहायणः ।

नक्षत्रशब्दस्य व्युत्पत्तिमादाय शतपथब्राह्मणे उक्तं यद् न क्षीयत इति तन्नक्षत्रमिति । तैत्तिरीयब्राह्मणे तु 'नक्षत्राणि अभूवन्निति तदेव नक्षत्रत्वम् इति' (२।७।१८।३) । एवमेव शतपथब्राह्मणेऽपि—'यानि वैतानि क्षत्त्राण्यभूवन्न वैतानि क्षत्त्राण्यभूवन्निति । तद्वै नक्षत्राणां नक्षत्रत्वम्' । (१।२।२।१९) । पुनश्च तैत्तिरीये ब्राह्मणे—'यो ह वा इह यजते अमुं स लोकं नक्षते । तन्नक्षत्राणां नक्षत्रत्वम्' । (१।५।२।५) । गोपथब्राह्मणे यथा—'तन्नक्षत्राणां नक्षत्रत्वं यन्न क्षियन्ति' (३।१।८) । एवमेव—'नक्षत्राणि वै जनयो ये हि जनाः पुण्यकृतः स्वर्गं लोकं यन्ति तेषामेतानि ज्योतींषि ।' (शत० ६।५।४।८)

'देवगृहा वै नक्षत्राणि ।' (तै० ब्रा० १।५।२।६)

'यानि वा पृथिव्याश्चित्राणि तानि नक्षत्राणि ।' (तै० ब्रा० १।५।२।६)

'यथैवासौ सूर्य एव तेषामेवोद्यन्नेव वीर्यं क्षत्रमादत्त ।' (शत० २।१।२।१८)

'सप्तविंशतिर्नक्षत्राणि ।' (ताण्ड्य० २३।२३।३)

तानि वा एतानि सप्तविंशतिर्नक्षत्राणि सप्तविंशतिः सप्तविंशतिर्ह्योपनक्षत्राणि एकैकं नक्षत्रमनूपतिष्ठन्ते ।

ब्राह्मणे वा अष्टाविंशो नक्षत्राणाम् ।' (तै० ब्रा० १।५।३।४)

'यावन्त्येतानि नक्षत्राणि तावन्तो लोमगर्ता यावन्तो लोमगर्ता तावन्तः सहस्रसंवत्सरस्य मुहूर्ताः ।' (शत० १०।४।४।२)

'कृत्तिकाः प्रथमम् । विशाखे उत्तमम् । तानि देवनक्षत्राणि ।' (तै० ब्रा० १।५।२।७)

'यानि देवनक्षत्राणि तानि दक्षिणेन परि यन्ति ।'(तै० ब्रा० १।५।२।७)

'एकं द्वे त्रीणि चत्वारीति वा अन्यानि नक्षत्राणि अथैता एव भूयिष्ठा यत्कृत्तिकाः ।' (शत० २।१।२।२)

'अनुराधाः प्रथमम् । अपभरणीरुत्तमम् । तानि यमनक्षत्राणि ।' (तै० ब्रा० १।५।२।७)

'तस्मात् सोमो राजा सर्वाणि नक्षत्राण्युपैति ।' (शत०)
'नक्षत्राणि संवत्सरस्य प्रतिष्ठाः ।' (तै० ब्रा० ३।११।१।३)
'नक्षत्राणि वा एषा दिग् यदुदीची ।' (शत०)

वेदेषु या नक्षत्रसूची प्रदत्ता साऽत्र यथावदुद्ध्रियते—

सङ्ख्या	तैत्तिरीय-संहितायाम्	मैत्रायणी-संहितायाम्	काठक-संहितायाम्	अथर्व-संहितायाम्	तैत्तिरीय-ब्राह्मणे
१.	कृत्तिकाः	कृत्तिकाः	कृत्तिकाः	कृत्तिकाः	कृत्तिकाः
२.	रोहिणी	रोहिणी	रोहिणी	रोहिणी	रोहिणी
३.	मृगशीर्षम्	इन्वगा	इन्वका	मृगशिरस्	इन्वका
४.	आर्द्रा	बाहुः	बाहुः	आर्द्रा	बाहू
५.	पुनर्वसू	पुनर्वसुः	पुनर्वसुः	पुनर्वसुः	पुनर्वसुः
६.	तिष्यः	तिष्यः	तिष्यः	पुष्यः	तिष्यः
७.	आश्लेषाः	आश्लेषाः	आश्लेषाः	आश्लेषाः	आश्लेषाः
८.	मघाः	मघाः	मघाः	मघाः	मघाः
९.	फल्गुन्यौ	फल्गुन्यः	फल्गुन्यः	पूर्वे फल्गुन्यौ	पूर्वे फाल्गुन्यौ
१०.	फल्गुन्यौ	फल्गुन्यः	उत्तराः फ०	—	उत्तरे ,,
११.	हस्तः	हस्तः	हस्तौ	चित्राहस्तः	हस्तः
१२.	चित्रा	चित्रा	चित्रा	चित्रा	चित्रा
१३.	स्वातिः	निष्टयम्	निष्टया	स्वातिः	निष्टया
१४.	विशाखे	विशाखम्	विशाखा	विशाखा	विशाखे
१५.	अनुराधाः	अनुराधाः	अनुराधाः	अनुराधाः	अनुराधाः
१६.	रोहिणी	ज्येष्ठा	ज्येष्ठा	ज्येष्ठा	रोहिणी
१७.	विचृतौ	मूलम्	मूलः	मूलः	मूलबर्हिणी
१८.	अषाढाः	अषाढाः	अषाढाः	पूर्वाषाढे	पूर्वाषाढा
१९.	अषाढाः	अषाढाः	अषाढाः	उत्तराषाढे	उत्तराषाढा
२०.	—	अभिजित्	अभिजित्	अभिजित्	—
२१.	श्रोणा	श्रोणः	अश्वत्थः	श्रवणम्	श्रोणा
२२.	श्रविष्ठाः	श्रविष्ठाः	श्रविष्ठाः	श्रविष्ठाः	श्रविष्ठाः
२३.	शतभिषज्	शतभिषज्	शतभिषज्	शतभिषज्	शतभिषज्
२४.	प्रोष्ठपदाः	प्रोष्ठपदाः	प्रोष्ठपदाः	पूर्वा प्रोष्ठपदा	पूर्वप्रोष्ठपदे
२५.	प्रोष्ठपदाः	प्रोष्ठपदाः	प्रोष्ठपदाः	उत्तरा प्रोष्ठपदाः	उत्तरप्रोष्ठपदे
२६.	रेवती	रेवती	रेवती	रेवती	रेवती

२७.	अश्वयुजौ	अश्वयुजौ	अश्वयुजौ	अश्वयुजौ	अश्वयुजौ
२८.	अपभरण्यः	भरण्यः	अपभरण्यः	भरण्यः	अपभरण्यः

वेदेषु नक्षत्राणि शुभाशुभफलवत्त्वेनोपवर्णितानि तु सन्त्येव तथैव तेषां देव-यमनक्षत्ररूपेण विभागोऽपि दृश्यते। एवमेव तेषां सिद्धयसिद्धिकारकत्वेनापि प्रस्तुतिस्तत्र लभ्यते। यथा हि कृत्तिकास्वादधीत अर्जुन्योः पर्युह्यते इत्यादि। तिथिवाचकत्वेन नक्षत्रस्योपयोगोऽपि तत्र दृष्टः किन्तु प्रथेयं द्वादशनक्षत्रेष्वेव यथा मघायुक्तत्वेन माघी पौर्णमासी। एवमेव फाल्गुनी-चित्रा-विशाखा-ज्येष्ठा-अषाढा-श्रवण-भाद्रपदा-अश्विनी-कृत्तिका-मृगशिरः-पुष्यैश्च योगे तत्तत्पौर्णमासी। तत्र हि नक्षत्राणां न केवलं चन्द्रमसाऽपि तु सूर्येण सहाऽपि सम्बन्धो दर्शितो लभ्यते यथा हि सूर्ये रोहिणीतो मृगशिरसि प्रविष्टे वसन्तसङ्क्रान्तिरित्यादि संहिताकाले भरणीतः कृत्तिकां प्राप्ते सति ब्राह्मणकाले। नक्षत्राणां स्वातन्त्र्येणापि प्रयोगस्तत्र दृष्टः। यथा कृत्तिकास्वादधीतेत्यादि। तेषां चान्द्रत्वेन प्रयोगोऽपि यथा चन्द्रमा वै यस्मिन् नक्षत्रे वसतीत्यादि। नैतावन्मात्रमपि तु तेषां नामान्यपि अन्वर्थानि दृश्यन्ते येन तात्कालिकप्रतिभोत्कर्षो ध्वन्यते। यथा (सप्त उपनक्षत्रैः) कर्तितेवेति कृत्तिका। अन्यापेक्षया रोहितवर्णेन रोहिणी। मृगस्येव शिरो यस्येति मृगशिराः। आर्द्रवद्दृश्यते इति आर्द्रा ज्योतिराधिक्येन ताराद्वययोगाद् बाहुरपि। पुनर्वसुः प्रणष्टमपि तेजो यत्पुनरानयति यथा शतपथे—'पुनर्वस्वोः पुनराधेयमादधीतेति' (२।१।२।१०)। एवमेव वृहस्पतिर्हि पुनर्वसौ हुत्वा प्रणष्टं तेजः पुनराप्तवानिति अन्वर्थसंज्ञाऽस्य। पुष्णात्यसाविति पुष्यः तिष्णाति वा तिष्यः। आश्लिष्टा इव स्थितेर्नक्षत्राणामाश्लेषा। अनघा इति मघा पापनाशिनी। शुभ्रवर्णत्वेन अर्जुनी फल्गुनीयतेऽनेनेति फल्गुनी। चित्रत्वेन चित्रा। सुष्ठु अतति द्योतत इति स्वाती। विशिष्टा शाखा यस्य विशाखा उभयोरेव समानरूपकृतित्वात्। अनुराध्नोति एषेति अनुराधा शुभावहा। सर्वाधिकज्योतिष्ट्वेन ज्येष्ठा रोहितत्वाद्रोहिणी पुराणसंवत्सरसमापनं यत्रेति ज्येष्ठघ्नी प्रथमनक्षत्रत्वेन स्मृतत्वादपि ज्येष्ठा। कथ्यते हि पुरा काले सूर्ये ज्येष्ठायां प्राप्ते वसन्तसङ्क्रान्तिर्घटति स्म याऽधुना अश्विन्यां प्राप्ते घटति परम्परानुसारेण पूर्वभाद्रपदायां प्राप्ते घटति वस्तुतः सायनत्वे तु धनिष्ठायां प्राप्ते एव घटति। न षाढा अषाढा। अभितो जयति सर्वोत्कृष्टत्वेन वर्तत इत्यभिजित् (मै० सं० २।३।२०)। श्रवणवदाकृतिः श्रवणम्। हीरकवज्ज्योतिर्मयत्वाद् धनिष्ठा। शतानामसङ्ख्यरोगाणां भिषक् शामकः शतभिषा शतभिषग्वा। भद्रमेव भाद्रं पदं यस्या भाद्रपदा प्रोष्ठं पदं यस्याः प्रोष्ठपदा वा। रैयुक्ता रेवती धनसाधिका। अश्वाभ्यां युक्तेव अश्वयुजी। बिभर्त्येषेति भरणीः अपबिभर्तीति अपभरणी वा। एतेषां हि देवतालिङ्गवचनान्यपि सार्थकानि दृश्यते। यथा

कृत्तिकानां तेजोमयत्वादग्निर्देवता आह्लादकत्वात् स्त्रीत्वं द्व्यधिकतारकयुक्तत्वाद्बहुत्वम् । एवमेव प्रजापतिसोमसोमरुद्ररुद्रादितिबृहस्पतिसर्पपित्र्यर्यमार्यमभगभगसवितृ-इन्द्रादि-वायुरिद्राग्नि- मित्रेन्द्रपितृनिर्ऋतिनिर्ऋतिप्रजापति-अप्-अप्-विश्वदेवविश्वदेवब्रह्मविष्णुवसु - इन्द्रवरुण - अजैकपादजैकपादहिर्बुध्नाहिर्बुध्नपूषाश्वियमाः क्रमेण नक्षत्राणां देवताः । तत्र ईकार-आकारान्तानि यानि अश्वयुक्च स्त्रियाम् । मृगशीर्षमूलाभिजिन्नक्षत्राणि क्लीबे शेषाणि पुंसीति । कृत्तिका-इन्वका-आश्लेषा-मघा-अनुराधा-अषाढा-धनिष्ठा-प्रोष्ठपदभरणीनां बहुत्वमार्द्रा-फल्गुनी-विशाखाश्वयुजां द्वित्वमन्येषामेकत्वम् ।

वेदेषु हि नक्षत्रातिरिक्तमन्येषामपि तारकाणामुल्लेखो दृश्यते । यथा—

'अमी हि ऋक्षा निहितास उच्चा नक्तन्ददृशे कुहचिद्दिवेषु ।'

(ऋ० १।२४।१०)

'सप्तर्षीन् ह स्म वै पुरर्क्षा इत्याचक्षते ।' (शत० २।१।२।४)

'ऊर्ध्वं सप्तर्षीनुपतिष्ठस्व ।' (शत० १।५।५।१)

एवमन्यान्यपि वाक्यानि तारकान्तरास्तित्वसूचकानि तत्र तत्र सन्ति । यथा ऋग्वेदे—

'यौ ते स्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षौ नृचक्षसौ ।'

(१०।१४।११)

'दैवीं नावं स्वरित्रा···· ।' (१०।६३।१०)

ग्रहणविषयमधिकृत्यापि वेदेषु यत्र तत्र परिचर्या दृश्यते । यथा हि—

'यत्त्वा सूर्य स्वर्भानुस्तमसा विध्यदासुरः ।
अक्षेत्रविद्यया मुग्धो भुवनान्यदीधयुः ।
स्वभानोरध यदिन्द्रमाया अवो दिवो वर्तमाना अवाहन् ।
गूल्हं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाऽविन्ददत्रिः ।
मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो मियसा निगारीत् ।
त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा ।
ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन् ।
अत्रिः सूर्यस्य दिवि चक्षुरागात्स्वर्भानोरप माया अघुक्षत् ।
यं वै सूर्यं स्वर्भानुस्तमसाऽविध्यदासुरः ।
अत्र यस्तमन्वविन्दन्न ह्यन्ये अशक्नुवन् ॥' (ऋग्वेदे ५।४०।५९)

अत्र हि सूर्यस्य राहुणाऽऽच्छादनमुक्तम् । तस्य चात्रिणा प्रकाशनं जनेषु । चन्द्रमा हि अत्रेर्नेत्रसमुत्थत्वेन स्मर्यते 'अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः' इत्यादौ । तेन हि 'अत्रिः सूर्यस्य दिवि चक्षुरागात् स्वर्भानोरप माया अघुक्षत्' इति कथनेन चन्द्रपातस्य द्वितीयस्य सङ्केतोऽत्र लभ्यते । पश्चाद्वर्तिशास्त्रेषु

राहुकेतुशब्दो पर्यायत्वेन निर्विशेषमपि प्रयुक्तौ दृश्येते। अत्र हि खग्राससूर्यग्रहणस्य प्रसङ्गो दृश्यते यद्धि यदाकदैव घटते। सूर्यग्रहणं ह्यमावास्यायामेव भवति। ऐतरेयब्राह्मणे हि अमावास्यायां चन्द्रः सूर्यं प्रविशतीत्युक्तमपि दृश्यते। तेन हि सूर्यग्रहणं हि चन्द्रमसा सह सम्बद्धं भवतीति तदाऽपि ज्ञातमासीत्। 'स्वर्भानुस्तमसाऽविध्यदासुरः' इति कथनेन राहोस्तमसश्च पार्थक्यमपि तदा ज्ञातं सिध्यति। एवं हि ताण्ड्यब्राह्मणे (४।६।१३), गोपथब्राह्मणे (८।१९), शतपथब्राह्मणे (५।३।२।२) च ग्रहणस्योल्लेखो दृश्यते स्वानुकूल्येन। अत्रेदमवधेयं यद्वैदिकसाहित्यं हि न ज्योतिषशास्त्रम्। तत्तु सर्वमेव विषयं प्रसङ्गवशादेव गृह्णाति यज्ञेतरम्। तेन तदितरविषयस्य बीजमेव लभ्यते न तु तद्व्याख्यानमपि। अतो हि ग्रहणविषये तत्र सूक्ष्मदृष्टिर्नैवोपलभ्यते इति नाश्चर्यम्। मास्त्वपि तत्। तत्र सूर्यग्रहणस्योल्लेख एव तज्ज्ञत्वस्य प्रमाणम्।

ग्रहेषु सूर्याचन्द्रमसोस्तु वेदेषु बहुत्र चर्चा लभ्यते किन्तु ग्रहान्तरविषये न तद्रूपेण। तथाऽपि तेषामपि प्रसङ्गस्याभावो नैव। अथाऽत्र वेदेषु ग्रहत्वेन सूर्यादीनामुल्लेखो यत्र तत्प्रसङ्गः स्मर्यते। त्रयो हि देवा अग्निवायुसूर्याः। अग्निर्हि भूस्थानीयः अन्तरिक्षस्थानीयो वायुः द्युस्थानीयः सूर्यः। सूर्यो हि वायोः वायुश्चाग्नेर्घटकः यथोक्तमैतरेयब्राह्मणे—

'सवितारं यजति यत्सवितारं यजति तस्मादुत्तरतः पश्चादयं भूयिष्ठं पवमानः पवते सवितृप्रसूतो ह्येष एतत्पवते।' (२।७)। तारका हि ग्रहाश्च सूर्यादेव प्रकाशं लभन्ते। स हि ज्योतिषा याति। (ऋ० १०।३७।३) स हि जगतस्तस्थुषश्चात्मा (मित्रस्य वरुणस्याग्नेश्चक्षुः)। (ऋ० १।११५।१) तत्सूर्यस्य देवत्वं तन्महित्वम् (ऋ० १।११५।४) रात्रौ निवर्तमानस्य सूर्यस्य रश्मयस्तारकासु पतन्ति यतो हि ते द्योतमाना दृश्यन्ते (ऋ० १।३५।२)। सूर्यो हि कालविभाजकः। स हि ३६६ दिनात्मकसंवत्सरस्य निर्माता। स एवर्तूनामयनयोश्च कर्ता। (शतपथ० २।१।३।१-९)। स हि अत्ता। तस्य चन्द्रमा एवाहितयश्चन्द्रमसं ह्यादित्य आदधाति (शतपथ० २।६।२।३)। स हि स्वरूपः। स हि अर्कचक्षुः (तै० ब्रा० १।१।७।२)। स हि सर्वेषां देवानामात्मा (शत० १४।३।२।९) एष हि उद्यन् नक्षत्राणां वीर्यं क्षत्रमादत्ते (शत० २।१।२।१८) स हि वर्षति (शत० १४।२।१।२१) सूर्यस्य वा एको रश्मिर्वृष्टिवनिर्नाम येनेमाः सर्वाः प्रजा बिभर्ति। स हि सर्वं प्रीणाति। स एव संवत्सरः। एकोऽपि स आत्मानं बहुधोपस्थापयति। स एव ज्योतिषां ज्योतिः।

सूर्यस्येव चन्द्रमसोऽपि वेदेषु बहुत्रोल्लेखो दृश्यते। चन्द्रमा हि प्रतिनक्षत्रं वसति (शत०)। असौ भान्तः पञ्चदशः स च पञ्चदशाहान्यापूर्यते पञ्चदशा-

पक्षीयते (शत० ८।४।१।१०) चन्द्रमा सूर्यस्यान्नम् । (शत० ४।६।७।१२) अनामृतदेवयजननिधानेन चन्द्रमसि कृष्णम् । (शत० १।२।५।१८) एष ह्यमावास्यायामादित्यमनुप्रविशति (ऐ० ब्रा० ८।१८) । एष एवासुः (तै० ब्रा० २।५।७।३) । एषो हि सविता (गो० १।३३) । एष मनः । (शत० १०।३।३।७) । (एष वै रेतः ६।१।२।४) । एष एवान्नम् (शत० ८।२।३।११) । चन्द्रमा एव संवत्सरः ।

यद्यपि मङ्गलस्य बुधस्य नाम्ना वेदेपूल्लेखो नैव दृश्यते शनेश्च वृहस्पतेः सत्यपि देवविशेषत्वेनैव न त्वाकाशीयपिण्डत्वेन तथैव शुक्रस्य तेजोरूपमात्रेण न तु ग्रहत्वेन तथापि पण्डिता ऋग्वेदस्थे—

'अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीनानि वावृतुर्वित्तं मे अस्य रोदसी ॥'
(१।१०५।१०)

पञ्चोक्षण इति वाक्यांशं १०।५।५।३ 'गतं देवान्' इति वाक्यांशमादाय तत्र मङ्गलादिपञ्चग्रहाणामुल्लेखं मन्यन्ते । सामान्यतस्तु तत्र न तथा प्रतिभात्यस्माकम् । तथापि तत्र मध्ये दिव इति पदमवश्यमेव कमपि पञ्चावयवात्मकं पिण्डं तु सूचयत्येव ।

'आ रोदसी अपृणादोत मध्यं पञ्च देवान् ऋतुशः सप्त सप्त ।
चतुस्त्रिंशता पुरुधा विचष्टे सरूपेण ज्योतिषा विव्रतेन ।' (१०।५५।३)

अत्र चतुस्त्रिंशदिति सप्तविंशतिनक्षत्राणि सप्त ग्रहा इति । एवमेव—

'अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता ।
त्रितस्तद्वेदाप्त्यः स जाभित्वाय रेभति मे अस्य रोदसी ।'
(ऋ० १।१०५।९)

इत्यत्र यानि हि सप्त ज्योतींषि यत्र कथयितुर्भाग्यं निहितं तानि सप्त ग्रहा एव न तु सूर्यस्य रश्मयस्तेषां तु भाग्येन सह सम्बन्धाकथनात् । एवञ्च—

'चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युता वित्तं मे अस्य रोदसी ।'
(ऋ० १।१०५।१)

इत्यत्र विद्युता द्योतमाना हिरण्यनेमयः भौमाद्याः पञ्च ग्रहा एव । चन्द्रमा तु जलं प्रविष्टः सूर्यश्च दिवि । तेन यूयं पञ्चैव भाग्यस्य विधातार इति त एव स्तुताः ।

शङ्करबालकृष्णः प्रशस्यो यदा स कथयति यद्ब्राह्मे मुहूर्ते उत्थाय स्नानसन्ध्याहोमादिप्रातःकृत्यं सम्पादयन्तो मुनयः प्रतिविंशतिमासं नवमासावधि

पूर्वस्यां दिशि दृश्यमानं शुक्रं नैव जानन्ति स्मेति कथं प्रत्याय्यम् । शुक्रो हि बहुकालं पूर्वस्यां दिशि प्रातर्दृश्यते कदाचित् सायङ्काले पश्चिमायां दिशि च । ये हि खलु प्राङ्मुखः प्रातःसन्ध्यां पश्चिममुखश्च सायं सन्ध्यामुपासन्ते ते ततद्धरिदुपगतं ज्योतिष्मन्तं शुक्रमवश्यमेव जानन्ति स्मेति प्रत्येयस्तर्कः । तेनैवोक्तं—'स्यादसावादित्यः शुक्रः (शत० ९।४।२।२१), एष वै शुक्रो य एष तपति (शत० ४।३।१।२६), अत्रैव शुक्र आद्यो मन्थी (शत० ४।२।१।१३), तेजोऽसि शुक्रमस्यमृतमसि धाम नामासि प्रियन्देवानामनाधृष्टं देवयजनमसि इत्यादि । अनेन सिध्यति यद्वैदिकसाहित्ये भौमादिग्रहास्तेषां प्रभावश्च सुविज्ञात आसीदिति । शङ्करबालकृष्णमते स्ववैंद्यौ हि आश्विनेयौ शुक्रवृहस्पति एव । वृहस्पतेर्ग्रहत्वमादाय तु तत्र स्पष्टमेवोक्तं लभ्यते । यथा ऋग्वेदे—

'बृहस्पति प्रथमं जायमानो महो ज्योतिषः परमे व्योमन् ।' (४।५०।४)

एवमेव तैत्तिरीयब्राह्मणेऽपि—

'बृहस्पति प्रथमं जायमानो तिष्यं नक्षत्रमयिसम्बभूव ।' (३।१।१)

वृहस्पतेर्हि परमशरा १।३० भवन्ति । अतोऽस्य निकटयुतिः सप्तविंशतिनक्षत्रेपु केवलं पुष्यमघाविशाखानुराधाशतभिषारेवतीभिरेव सम्भवति तत्रापि पुष्येन सह तु क्वचित्तु तस्यैकत्वमेव सम्पद्यते । अत एवोक्तं स्याद्वृहस्पतिर्वै पुष्यजन्मेति ।

अथर्वसंहितायां (१९।९।१०) 'शन्नो ग्रहाश्चान्द्रमसाः शमादित्याश्च राहुणा' इति चन्द्रसम्वद्धत्वेन सूर्यसम्बद्धत्वेन च ग्रहाः स्मृताः सन्ति । बुधो हि सौमायनः प्रोक्तः (पं० ब्रा० २४।१८।६) शनिस्तु सौरः । सम्भवति तत्रैव तथैव स्मृतं स्यात् । तत्रैव (१९।९।७) 'उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचराः ग्रहाः' इति पुनश्च 'नक्षत्रमुल्काभिहतं शमस्तु' इति (१९।९।९) यत्कथितं तत्र बहूवचनान्तो ग्रहशब्दो निश्चयमेव सूर्यचन्द्रातिरिक्ताकाशीयपिण्डावबोधकः । ते च पञ्च देवाः । द्योतनाद्ग्रहाणामपि देवत्वम् ।

न केवलं ग्रहाणामेवापितु वैदिकसाहित्ये उल्काधूमकेतुप्रभृत्याकाशीयपिण्डानामपि समुल्लेखो दृश्यते । (अथर्व० १९।९।७।१०) ।

वेदेषु शुभाशुभकालविषयेऽपि चर्चा दृश्यते । यथोक्तं—'पुण्याह एव कुरुते' (तै० ब्रा० १।५।२) 'यः कामयेद् दुहितरं प्रिया स्यादिति तां निष्टयायां दद्यात्' (तै० ब्रा० १।५।२) इति ।

माध्यन्दिनीयसंहितायां 'प्रज्ञानाय नक्षत्रदर्शं (३०।१०), 'यादसे गणकम्' (३०।२०) इति पाठो दृश्यते । एतेन सिध्यति यत्तदा ज्योतिषशास्त्रमपि स्वातन्त्र्येण प्रवर्तितमासीत् ।

न केवलं कालचक्रस्यैवापितु गणितशास्त्रस्यापि बीजं वेदेषु लभन्ते विपश्चितः। तत्र हि अव्यक्तबीजगणितस्वरूपमपि दृश्यते वेदेषु। विशेषतो यजुर्वेदे यथा—

'एकया च दशभिश्च स्वभूते द्वाभ्यामिष्टये विंशतिश्च।
तिसृभिश्च वहसे त्रिंशता च नियुद्भिर्वायविह ता विमुञ्च॥' (२७।३३)

इत्यत्र वियोगक्रियायाः ऋग्वेदीये 'युवां देवास्त्रय एकादशासः' इति वाक्ये गुणनक्रियायाः। एकादशस्य त्रिभिर्गुणने त्रयस्त्रिंशत्सङ्ख्या लभ्यते तावत्सङ्ख्याका देवता सत्यस्य रहशे पुरस्तादिति। व्यक्तगणिते एकदशादिगणना यथा यजुर्वेदे माध्यन्दिनीये—

'इमा मे अग्न इष्टका धेनवः सन्त्वेका च दश च शतं च शतं च सहस्रञ्चा-युतञ्च नियुतञ्च प्रयुतञ्चार्बुदञ्च न्यर्बुदञ्च समुद्रश्च मध्यमञ्चान्तश्च परार्धश्चैता मे अग्न इष्टका धेनवः सन्त्वमुत्रामुष्मिल्लोके।' (१७।२)।

मे गाव एकैकं कृत्वा एकादश भूयाद्दशशतं भूयासुः शतं सहस्रं च। एवं क्रमेण परार्धपर्यन्तमिताः स्युरिति।

एकमेव बीजगणितस्यापि वेदेषु प्रयोगो दृश्यते। ये हि तद्यूनानप्रभावजं मन्यन्ते ते देवानां प्रिया एव। यथा हि—

'इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचं परमं व्योम।'
(१०।१३०।३)

वेदिं परितो भ्राम्यमाणा रेखा परिधिः ऊर्ध्वाधो व्यासः। इयमेव समस्तस्य जगतो नाभिः। अयं सोमो वृष्णः वृष्टिकारक इति।

'काऽऽसीत् प्रमा प्रतिमा किं निदानमाज्यं किमासीत्।
परिधिः क आसीत् प्र उगं किमुक्थं यद्देवा देवमयजन्त विश्वे।'
(यजुः २३।६२)

अत्र प्रमा = मापकः।

चलनकलननिर्देशो यथा याजुषे शुक्ले—

'एका च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मे एकादश च मे एकादश च मे त्रयोदश च मे त्रयोदश च मे पञ्चदश च मे पञ्चदश च मे सप्तदश च मे सप्तदश च मे एकोनविंशतिश्च मे एकोन-विंशतिश्च मे एकविंशतिश्च मे एकविंशतिश्च मे त्रयोविंशतिश्च मे त्रयोविंशतिश्च मे पञ्चविंशतिश्च मे पञ्चविंशतिश्च मे सप्तविंशतिश्च मे सप्तविंशतिश्च मे नव-विंशतिश्च मे नवविंशतिश्च मे एकत्रिंशच्च मे एकत्रिंशच्च मे त्रयस्त्रिंशच्च मे यज्ञेन कल्पन्ताम्।' (१८।२४)

'अस्य च प्रयोगदर्शनं यथा व्याख्यातं श्रीसर्वज्ञनारायणमहोदयैः—

अङ्काः ।	०	१	२	३	४	५	६	७	८	९
वर्गाः ।	०	१	४	९	१६	२५	३६	४९	६४	८१
अन्तरम् ।	०	१	३	५	७	९	११	१३	१५	१७

अङ्काः ।	१०	११	१२	१३	१४	१५	१६	१७
वर्गाः ।	१००	१२१	१४४	१६९	१९६	२२५	२५६	२८९
अन्तरम् ।	१९	२१	२३	२५	२७	२९	३१	३३

पूर्वोक्तमन्त्रस्योपपत्तिः गणितज्यौतिषद्वारेत्थं प्रदर्श्यते—

य = लघु इ य

$$\frac{\text{तार}}{\text{ताय}} = \text{य}^{-१}$$

$$\frac{\text{तार}^{२}}{\text{ताय}^{२}} = (-१)^{-२}$$

$$\frac{\text{तार}^{3}}{\text{ताय}^{3}} = २\text{य}^{-३}$$

$$\frac{\text{तार}^{४}}{\text{ताय}^{४}} = ३\text{य}^{-४}$$

$$\frac{\text{तार}^{\text{न}}}{\text{ताय}^{\text{न}}} = \frac{\text{न} - १\,(-१)\,\text{न} - १}{\text{य}^{\text{न}}}$$

अत एव न–१ = १-२-३-४-० (न – १) ।

$$y = \log^{n} yx$$

$$dy/du = \frac{1}{u} = x^{-1}$$

$$\therefore\ d^2y/du^2 = x(-1)u^2$$

$$\text{एवम्}\ d^2y/du^2 = \frac{(-1)\,(-2)\,(n-1)}{x\,n}$$

$$= \frac{(n-1)(-1)-n-1}{x\,n}$$

अनेन स्पष्टं प्रतिभाति यद्भारतीयानां वेदद्वारैव चलनकलनस्य (Calculus) ज्ञानमस्ति, न कस्माच्चिदन्यस्मादाय ।

त्रिकोणमितिरेखागणितादीनामुपयोगी वृत्तपरिधिः (३६०°) निम्नतन्त्रेणावगम्यते—

द्वाद्वश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः ॥

द्वादश (१२) परिधयः (राशयः) एकश्चन्द्रस्तिस्रो नाभिः ।

विद्वच्चरणारविन्देषु धृष्टता कृताऽहमल्पमतिः ।
त्रुटिमवलोक्य क्षम्यतां सुधार्यताञ्चेति ॥

इत्थं हि वेदानां संहिताभागे ब्राह्मणभागे च बहुविधा हि ज्योतिषविषयाः प्रसङ्गानुसारेण प्रतिपादिता दृश्यन्ते। तत्र हि कालचक्रस्य युगे कल्पे संवत्सरे मासेऽर्द्धमासेऽहोरात्रे च विभागः कृतः। अह्नश्च प्रातःपूर्वाह्णमध्याह्नापराह्ण-सायाह्नादिविभागश्च तत्रावश्यकतानुसारेण प्रदर्शितः। एवमेव सूर्यः सौर-परिवारग्रहाः पृथिवी अन्तरिक्षं द्यौश्च वर्णिताः। तत्रापि द्युस्थानीयस्य सूर्यस्य अन्तरिक्षस्थानीयस्य वायोः भूस्थानीयस्याग्नेश्च विषयाः यथावसरं प्रतिपादिताः। तत्रोक्तं सूर्यो हि परमं ज्योतिः। स हि सर्वं प्रीणाति प्रेरयति च। स एव वृष्टिकारकः। वेनादयस्तस्य ग्रहाः। वेनः शुक्र एव। सूर्यो हि ऋतूनां कारणम्। स हि क्रान्तिवृत्तेन चलति। तत एव तारकाः प्रकाशं लभन्ते जगच्च ज्योतिर्धर्मंञ्च। स एव कालचक्रस्य विभाजकः। स हि युगं प्रवर्तयति। सूर्यस्यैव षड्तवो भवन्ति। एकवसन्तसङ्क्रान्तितो द्वितीयपर्यायवसन्त-सङ्क्रान्तिप्रारम्भं यावत्संवत्सरः। संवत्सरस्य द्वादशभागाः मधुमाधवादयः। वसन्तग्रीष्मवर्षासु सूर्यो हि विषुवत उदक् चलति। स हि दैवः समयः। शरद्धेमन्तशिशिरेषु स दक्षिणमनुवर्तते। स हि पितॄणां समयः। प्रत्यृतुं द्वौ मासाविति षड्तूनां द्वादश मासाः। अधिमासोऽपि तस्यैव। स हि सौरचान्द्रवर्ष-समीकरणोपायः। मासस्य द्वौ पक्षौ पूर्वोऽपरश्च। पूर्णिमान्तमाने पूर्वः कृष्णः शुक्लोऽपरः। अमान्तमाने शुक्लः पूर्वः कृष्णोऽपरः। चन्द्रमा हि सूर्यरश्मिः। सह्यमावास्यायां सूर्यं प्रविशति पुनश्च ततो निःसृत्य याति प्रतिदिनं नियमित-गत्या। पौर्णमास्यां हि चन्द्रः सूर्याद्दूरतमं प्रदेशं प्राप्नोति स हि पुनश्च प्रत्या-वृत्य यदा हि सूर्यं प्रविशति तदाऽमावास्या भवति। चन्द्रो हि नक्षत्रपथेन याति। नक्षत्राणि मूलतः सप्तविंशतिः प्रत्येकमेकमुपनक्षत्रञ्च। नक्षत्रेषु तारकान्त-राण्यपि भवन्ति यथा कृत्तिकासु सप्त विशाखयोर्द्वे। चन्द्रमा हि यदा भचक्रं पूर्णतोऽतिक्राम्यति तदा चान्द्रो मासः पूर्णो भवति। सूर्यो हि चन्द्रमवलम्ब्य प्रवर्तते। चन्द्रो हि सोमः। सूर्ये हि चन्द्रपातान्तरितत्वेन ग्रहणं भवति। नक्षत्राणां ग्रहाणाञ्च शुभमशुभं वा फलं भवति। शुभे मुहूर्ते कृतं कर्म शुभमेव साधयति।

इत्थं हि कालचक्र-ग्रहण-खगोलादिविषया वेदेषु यथावसरं प्रतिपादिताः।

वेदाङ्गत्वेन ज्योतिषम्

प्राक्कथनम्

वेदाङ्गज्योतिषं हि द्विधा विचिन्त्यते वेदाङ्गत्वेन ज्योतिषं वेदाङ्गेषु। ज्योतिषञ्च। षड्वेदाङ्गानि शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषञ्च।

वेदोपकारकत्वाद्रामायणमहाभारतस्मृतिपुराणादीनामपि वेदाङ्गत्वम्। तानि हि वेदस्योपाङ्गत्वेन स्मृतानि। वेदानां सम्यगर्थावबोधकत्वमेव वेदाङ्गानां वेदाङ्गत्वम्। न हि वेदाङ्गानां ज्ञानमन्तरा वेदार्थः शक्यः सम्यक्तया प्रतिपत्तुम्। उक्तमेव—

'साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मस्योपदेशेन मन्त्रान् सम्प्रदुरुपदेशाय ग्लायन्तोऽवरेभ्यः बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च।'

तत्र शिक्ष्यते इति शिक्षा वर्णस्वराद्युच्चारणविधेरुपदेशिका। शिक्षायां हि वर्णस्वरमात्राबलसामसन्तानादिरुपदिश्यते यत्र वर्णः अकारादिः स्वरा उदात्तादिः मात्रा ह्रस्वादिः बलस्थानप्रयत्नौ सामनिषादादिः सन्तानो विकर्षणादिः। शिक्षाविषकग्रन्था हि सम्प्रति त्रिंशत्सङ्ख्याका उपलभ्यन्ते। तेष्वपि याज्ञवल्क्यशिक्षा पाणिनीयशिक्षा च प्राधान्येन गृह्येते।

श्रौतगृह्यधर्मसूत्राणां पारिभाषिकी संज्ञा कल्पशुल्वसूत्रस्य च। तत्रापि वेदोक्तयज्ञादिविवरणप्रतिपादकानि श्रौतसूत्राणि कात्यायनादिप्रणीतानि श्रुतिसम्मतगृहस्थकर्मप्रतिपादकानि गृह्यसूत्राणि पारस्करादिप्रणीतानि जीवनोपयोगिविषयनिर्देशपराणि धर्मसूत्राणि गौतमादिप्रणीतानि। शुल्वसूत्रं हि यज्ञवेदिकासम्बद्धम्।

प्रकृतिप्रत्ययविभागपुरस्सरं शब्दानुशासनं व्याकरणं पाणिन्यादि प्रणीतम्। पदविभागमन्त्रार्थदेवतानिरूपकं शास्त्रं निरुक्तम्। निरुच्यते इति निरुक्तं यास्कादिप्रणीतम्। रचनायां वर्णमात्रायतिप्रभृतिनियामकं शास्त्रं छन्दःशास्त्रं पिङ्गलादिप्रणीतम्। ज्योतिश्चक्रविषयप्रतिपादकं शास्त्रं ज्योतिषं लगधार्यभटादिप्रणीतम्। रामायणमहाभारतादिप्रसिद्धमेव। स्मृतिर्धर्मशास्त्रम्। इतिहासोपाख्यानसम्बद्धानि पुराणानि सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितादिवर्णनपराणि।

वेदाङ्गज्योतिषम्

अथ प्रथमं वेदाङ्गत्वेन ज्योतिषशास्त्रस्य विवरणमुपस्थाप्यते। वेदाङ्गत्वेन यज्ज्योतिषं तस्य हि लगधमुनेर्वेदाङ्गज्योतिषम्प्रधानो ग्रन्थः वसिष्ठकाश्यपपराशरगर्गनारदादिप्रोक्ता मौलिकाः संहिताग्रन्थाश्च वेदाङ्गज्योतिषस्य हि चत्वारो भेदाः ऋग्ज्योतिषं यजुर्ज्योतिषं सामज्योतिषमथर्ववेदज्योतिषञ्चेति। एतेषामुपदेष्टा हि लगधो नाम मुनिरुच्यते। ऋग्ज्योतिषे हि षट्त्रिंशत्कारिकाः सन्ति यदा यजुर्वेदज्योतिषे एकोनपञ्चाशत्सङ्ख्यका अथर्ववेदज्योतिषे तु द्विषष्ट्युत्तरैकशतमिताः कारिकाः सन्ति। एवमेव सूर्यप्रज्ञप्तिः चन्द्रप्रज्ञप्तिः ज्योतिष-

करण्डकं लघुवासिष्ठसिद्धान्तः रोमकसिद्धान्तः पोलिशसिद्धान्तः सूर्यसिद्धान्तश्च प्रसङ्गेऽस्मिन् स्मर्तव्या ग्रन्थाः ।

ऋग्वेदज्योतिषं हि लगधप्रणीतत्वेन प्रसिद्धम् । अत्र हि षट् त्रिंशत्कारिका लभ्यन्ते येषां सोमाकरकृता विस्तृता लघ्वी च द्वे व्याख्ये लभ्येते । विस्तृत-व्याख्यासमाप्तौ 'शेषकृतवेदाङ्गज्योतिषं समाप्तम्' इति लिखितमस्ति । कोऽसौ लगधः कश्चासौ सोमाकरः कोऽसौ शेषो वेति न किमपि श्रुतं वा दृष्टमस्ति न च तद्विषये क्वचिदपि किमपि लिखितं दृश्यते । ग्रन्थोऽयं लगधप्रोक्तं शेषाऽऽख्येन सङ्कलितमिति 'कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः' इति ग्रन्थस्यैव द्वितीयश्लोकांशतः सोमाकरव्याख्यावसानवाक्याच्च ज्ञायते । ग्रन्थस्यास्य सुधाकरप्रणीता व्याख्याऽपि लभ्यते । वस्तुतस्त्वस्य न केनापि पश्चाद्वर्तिना कृतिना समुल्लेखः कृतो दृश्यते । तथाप्यस्य महत्ता तु तावन्मात्रेण नैव हीयते । तस्यायमादिमौ श्लोकौ—

'पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् ।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥ १ ॥
प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम् ।
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः' ॥ २ ॥ इति ।

यस्य हि दिनर्तुमासायनानि अङ्गानि तादृशं पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिं कालं प्रणम्य सरस्वतीमभिवाद्य लगधस्य महात्मनः कालज्ञानं प्रवक्ष्यामीति । पञ्चसंवत्सराश्च यथा सोमाकरेण व्याख्याताः संवत्सरपरिवत्सरइदावत्सरानुवत्सरेद्वत्सराः क्रमश अग्न्यादित्यवायुचन्द्रमृत्यवस्तेषां देवताः । वाराह्यां तु ते अग्न्यादित्यचन्द्रप्रजापतिरुद्रनामभिः स्मृताः । पञ्चैव संवत्सरास्तैत्तिरीयेऽपि पठ्यन्ते । गर्गादयोऽपि तथैव जानन्ति । एवञ्च ऋग्वेदे (७।१०३।७) संवत्सर-परिवत्सरौ वाजसनेयीये (२७।४५) पञ्चैव तैत्तिरीयब्राह्मणे (१।४।१०) आद्याश्चत्वारः स्मृतास्तत्रान्यत्र पञ्चैव षडपि । पर्वगणानयनं यथा—

'निरेकं द्वादशार्धाब्दं द्विगुणं गतसंज्ञिकम् ।
षष्ठ्या षष्ठ्या युतं द्वाभ्यां पर्वणां राशिरुच्यते' ॥ ४ ॥

अत्र शङ्करबालकृष्णः द्वादशार्धाब्दमित्यस्य स्थाने द्वादशाभ्यस्तं गतसंज्ञिकमित्यस्य स्थाने गतसंयुतमिति पिपठिषति सौकर्याय । करणग्रन्थेषु अहर्गणस्येवात्र पर्वगणस्य विषयः । वर्तमानसंवत्सरसङ्ख्याया एकं वियुज्य शेषे द्वादशगुणिते गतमाससङ्ख्यां संयोज्य सङ्ख्या द्विसङ्ख्याया गुणिता कार्या । तस्याश्च षष्ठ्या प्रत्येकपर्याये उत्तरोत्तरं द्वियोगेन पर्वसङ्ख्या लभ्यते इति । उदगणनारम्भो यथा—

'स्वरार्कभेके सोमार्कौ यदा साकं सवासवौ ।
स्यात्तदादियुगं माघस्तप शुक्लो दिनत्यचः ॥ ५ ॥

(स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ ।
स्यात्तदादियुगं माघस्तपः शुक्लोऽयनं ह्युदक् ।)' (यजु० ३७)

यदा सोमार्कौ धनिष्ठां प्राप्य गगनमाक्रमेते तदा युग-माघमासशिशिरर्तु-शुक्लपक्षोदगयनानि आरभन्ते इति ।

अयनविमर्शो यथा—

'प्रपद्येते श्रविष्ठादो सूर्याच(चा)न्द्रमसावुदक् ।
सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा' ॥ ६ ॥

धनिष्ठारम्भे सूर्याचन्द्रमसौ उदक् चलतः आश्लेषार्धे दक्षिणं प्रति । सदा सूर्यो माघे उदञ्च श्रावणे दक्षिणं चलतीति । अमुमेवादाय वाराह्यामुक्तम्—

'आश्लेषार्द्धाद् दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम् ।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ॥
साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत् ।' इति ।

तल्लक्षणं यथा—

'घर्मवृद्धिरपां प्रस्थः क्षपाह्रास उदग्गतौ ।
दक्षिणे तौ विपर्यस्तौ षण्मुहूर्त्ययनेन तु' ॥ ७ ॥

घर्मो दिनम् । एकः प्रस्थ इति नाडिकाः । यथा वक्ष्यति सप्तदशतमपद्ये । कदा हि षण्मुहूर्तवृद्धिर्दिनमाने इत्यपेक्षायामाह—

'द्विगुणं सप्तमञ्चाहुरयनाद्यं त्रयोदश ।
चतुर्थं दशमञ्चैव द्विर्युग्माद्यं बहुलेप्यृतौ ॥ ८ ॥
(प्रथमं सप्तमञ्चाहुरयनाद्यं त्रयोदशम् ।)'

शुक्लस्य प्रतिपदा सप्तमी त्रयोदशी कृष्णस्य चतुर्थी दशमी चेति उदगयने एता एव दक्षिणायेन पञ्चसंवत्सरेषु क्रमेण सूर्यस्यायनाद्यास्तिथयः । तदित्थम्—

प्रतिपदासप्तम्यौ त्रयोदशीचतुर्थ्यौ दशमीप्रतिपदे सप्तमीत्रयोदश्यौ चतुर्थीदशम्यौ च क्रमेण अयनाद्यतिथयः । यथोक्तं गर्गाचार्यैरपि—

(१) 'यदा माघस्य शुक्लस्य प्रतिपद्युत्तरायणम् ।
सहोदयं श्रविष्ठाभिः सोमार्कौ प्रतिपद्यतः ॥
तदात्र नभसः शुक्लसप्तम्यां दक्षिणायनम् ।
सार्पार्धे कुरुते मुक्तिं चित्रायाश्च निशाकरे ॥
प्रथमः सोऽग्निदैवत्यो नाम्ना संवत्सरः स्मृतः ।

(२) यदा माघस्य शुक्लस्य त्रयोदश्यामुदग् रविः ॥
युक्ते चन्द्रमसा रौद्रे वासवं प्रतिपद्यते ।
चतुर्थ्यां नभसः कृष्णे तदाऽसौ दक्षिणायनम् ॥

सार्पार्धं कुरुते सूर्यस्त्वजयुक्ते निशाकरे ।
द्वितीयश्चार्करैवत्यः स नाम्ना परिवत्सरः ॥
(३) कृष्णे माघस्य दशमी वासवादौ दिवाकरः ।
उदीचीं दिशमातिष्ठन् मैत्रस्थेऽनुष्णतेजसि ॥
नभसश्च निवर्तेत शुक्लस्य प्रथमे तिथौ ।
चन्द्रार्काभ्यां सुयुक्ताभ्यां सार्पार्धं वायुदैवतम् ॥
तदा तृतीयं तं प्राहुरिदासंवत्सरं जनाः ।
(४) सप्तम्यां माघशुक्लस्य वासवादौ दिवाकरः ॥
अश्विनीसहिते सोमे यदाशामुत्तरं व्रजेत् ।
सोमे चाप्येनसंयुक्ते सार्पार्धस्थो दिवाकरः ॥
व्रजेद् याम्यां हि शुक्लस्य श्रावणस्य त्रयोदशीम् ।
चतुर्थमिन्दुदैवत्यमाहुश्चाथाऽनुवत्सरम् ॥
(५) फल्गुनीमुत्तरां प्राप्ते सोमे सूर्ये च वासवे ।
यदुत्तरायणं कृष्णचतुर्थ्यां तपसो भवेत् ॥
श्रावणस्य च कृष्णस्य सार्पार्धे दशमी पुनः ।
रोहिणीसहिते सोमे रवेः स्याद् दक्षिणायनम् ॥
इद्वत्सरः स विज्ञेयः पञ्चमो मृत्युदैवतः ॥
....

एवमेतद्विजानीयात् पञ्चवर्गस्य लक्षणम्' । (१–१६) ।

तदित्थं हि उत्तरदक्षिणायनारम्भस्य पञ्चैव स्थितयो भवन्तीति पञ्चसंवत्सरयुगस्याधिवादः । यथा हि—

संवत्सराः	उत्तरायणारम्भे			दक्षिणायनारम्भे		
	तिथयः	रविभानि	चन्द्रभानि	तिथयः	रविभानि	चन्द्रभानि
संवत्सरः	माघशुक्ल प्रतिपत्	धनिष्ठा	धनिष्ठा	श्रावणशु० सप्तमी	आश्लेषार्धा	चित्रा
परिवत्सरः	माघशुक्ल त्रयोदशी	धनिष्ठा	आर्द्रा	श्रावणशु० चतुर्थी	आश्लेषार्धा	पूर्वभाद्रपदा
इदावत्सरः	माघकृष्ण दशमी	धनिष्ठा	अनुराधा	श्रावणशु० प्रतिपत्	आश्लेषार्धा	आश्लेषा
अनुवत्सरः	माघशुक्ल सप्तमी	धनिष्ठा	अश्विनी	श्रावणशु० त्रयोदशी	आश्लेषार्धा	पूर्वाषाढा
इद्वत्सरः	माघकृष्ण चतुर्थी	धनिष्ठा	उत्तरा फाल्गुनी	श्रावणकृ० दशमी	आश्लेषार्धा	रोहिणी

अयनादिनक्षत्राणि यथा—

'वसु त्वष्टाभगोऽजश्च मित्रः सर्पाश्विनौ जलम् ।
धाता कश्चायनाद्याश्चार्धपञ्चनभस्त्वृतुः' ॥ ९ ॥

वसुः त्वष्टाभगः अजः मित्रः सर्पः अश्विनौ आपः धाता ब्रह्मा चेति देवता येषां तानि धनिष्ठाचित्रार्द्रापूर्वभाद्रपदाऽनुराधाऽश्लेषाऽश्वयुक्पूर्वाषाढोत्तरफाल्गुनी-रोहिणीनक्षत्राणि अयनादीनि । सार्धचतुर्नक्षत्राणि ऋतुः । तेनाऽस्य पाठेन **'अर्धोनपञ्चभं त्वृतुः'** इति भाव्यम् । ऋतौ हि द्वौ मासौ । तदवधौ सूर्यो हि तावन्त्येव नक्षत्राणि आक्राम्यति ($१३\frac{१}{३}+१३\frac{१}{३}+१३\frac{१}{३}+१३\frac{१}{३}+४\frac{१}{२}$) । अत्र क्रमेण धनिष्ठाचित्रयोः आर्द्रापूर्वभाद्रपदयोः अनुराधाश्लेषयोः अश्विनी-पूर्वाषाढयोः उत्तरफाल्गुनीरोहिण्योश्च चन्द्रेण युतिरिति ।

नक्षत्राणां नामानि यथा सङ्केतितानि—

'जौद्राघः खेश्वेहीरोषाचिन्मूषाज्यः सो(सू)माधानः ।
रेमृघ्रा(घा)जो(पो)जः तृ(कृ,ष्यो हर्ये(ज्ये)ष्ठा इत्यृक्षा लिङ्गैः' ॥ १४ ॥

अत्र हि जौ-द्रा-ग-खे-श्वे-हि-रो-षा-चित्-मू-ष-ष्य-सू-मा-धा-न-रे-मृ-घा-स्वा-प-ज-कृ-ष्य-ह-ज्ये-ष्ठावर्णैः क्रमेण अश्विनी-आर्द्रा-पूर्वफाल्गुनी-विशाखा-उत्तराषाढा-उत्तरभाद्रपदा-रोहिणी-आश्लेषा-चित्रा-मूल-शतभिषा-भरणी-पुनर्वसु-उत्तरफल्गुनी-अनुराधा-श्रवण-रेवती-मृगशीर्ष-मघा-स्वाती-पूर्वाषाढा-पूर्वभाद्रपदा-कृत्तिका-पुष्प-हस्त-ज्येष्ठा-धनिष्ठानक्षत्राणि सूचितानि । व्याख्येयं शङ्करबालकृष्ण-मनुधावति । तत्र जो इत्यश्वयुजौ द्रा इत्यार्द्रा ग इति भगस्तद्देवता पूर्वफाल्गुनी इत्यादि । अस्योपपत्तिश्च पर्वान्ते सूर्यस्य स्थितिमनुसृत्यैवेति शङ्करबालकृष्णः । पञ्चसंवत्सरात्मके युगे १२४ पर्वाणि भवन्ति संवत्सरे २४ परिवत्सरे २४ इदा-वत्सरे २४ अनुवत्सरे २४ इद्वत्सरे २६ सङ्ख्यया । तेन हि नक्षत्राणामपि तावन्त एवांशाः । युगे १८६० विधयो भवन्ति । तदवधौ सूर्यो हि पञ्चवारं भचक्रं परिक्राम्यति । तेन हि एकस्यां तिथौ नक्षत्रं हि $\frac{९}{१२४}$ भागं भुनक्ति । $\left(\frac{२७\times५}{१८६०}=\frac{९}{१२४}\right)$ विशेषज्ञानाय शङ्करबालकृष्णोऽध्येतव्यः ।

समयमानं यथा—

'कला दश च (स) विंशा स्याद् द्विमुहूर्तुस्तु नाडिके ।
द्वित्रिंशस्तत्कलानां तु षट्शती त्र्यधिकं भवेत्' ॥ १६ ॥

द्वित्रिंश इत्यस्य 'द्युत्रिंशत्' इति पाठान्तरम् । एकस्मिन् दिने त्रिंशन्मुहूर्ता ६०३ कलाश्च भवन्ति । नाडीद्वयेन मुहूर्तः ।

'नाडिके द्वे मुहूर्तस्तु पञ्चाशत्पलमाषकम् ।
माषकात्कुम्भको द्रोणः कुटपैर्वर्धते त्रिभिः' ॥ १७ ॥

('चतुर्भिराढकैर्द्रोणः' इत्यपि पाठः)—

'पञ्चाशत्पलम् आढकं चतुर्भिराढकैर्द्रोणः ।'

एवमेव—

'ससप्तकुम्भयुक्स्त्योन सूर्यार्घानि त्रयोदश ।
नवमानि च पञ्चाह्नः काष्ठाः पञ्चाक्षराः स्मृताः ॥ १८ ॥
श्रविष्ठाभ्यां गुणाभ्यस्तान् प्राग्विलग्नान् विनिर्दिशेत् ।
सूर्यान् मासान् षडभ्यस्तान् विद्याच्चान्द्रमसानृतून् ॥ १९ ॥
यदुत्तरस्यायनतोयनं स्याच्छेषं तु यद्दक्षिणतोऽयनस्य ।
तदेव षष्ठ्या द्विगुणं विभक्तं तद् द्वादशं स्याद् दिवसप्रभावम्' ॥ २२ ॥

विषुवानयनविधिर्यथा—

'विषुवं तद्गुणं द्वाभ्यां रूपहीनं तु षड्गुणम् ।
यल्लब्धं तानि पर्वाणि तथोर्ध्वं सा तिथिर्भवेत्' ॥ ३१ ॥

तथा कालस्वरूपं यथा—

'माघशुक्लप्रवृत्तस्तु पौषकृष्णसमापिनः ।
युगश्च पञ्चवर्षाणि कालज्ञानं प्रचक्षते' ॥ ३२ ॥

इत्थं हि ऋग्वेदज्योतिषस्य विषयः कालचक्रनिरूपणमेव । तत्र हि ग्रहाणां राशीनाञ्चोल्लेखो नैव लभ्यते ।

वेदाङ्गज्योतिषं कदा सङ्कलितमित्यपि अनुमानविषय एव । कालचक्रशास्त्रमिदं स्वकालविषये न किमपि वक्ति । इदं हि मोक्षमूलरमते विक्रमतः २५० वर्षपूर्वं वेवरमते ४५० वर्षपूर्वं ह्विटनीमते १२८० वर्षपूर्वं कोलब्रूकमते १३६० वर्षपूर्वं प्रणीतमिति विश्वस्यते । अस्य हि पुनर्वाचनलेखनादिकं यदा कदाऽपि सम्पन्नं स्यात् । तेनापि कालेन कथमपि विक्रमपूर्वसप्तमशतकानन्तरवर्तिना तु कदापि नैव भाव्यमेव महाभारतादावपि तस्य स्मरणात् । तत्कालीननक्षत्रगणनासम्पातगत्ययनचलनादीनामध्ययनेन स्पष्टमेवैतद्यदिदं शास्त्रं विक्रमतः १४०० वर्षपूर्वमेव प्रोक्तमासीदिति । कृत्तिकात एव नक्षत्रगणनया सिध्यत्यस्य प्रथमप्रवचनस्य ब्राह्मणसमकालीनत्वं तदनतिदूरानन्तरवर्तित्वं वा । अयमेव भारतीयज्योतिषस्य स्वतन्त्रः प्रथमो ग्रन्थः ।

तत्र हि प्रतिपादितमस्ति यत्सूर्यो पदाऽऽश्लेषार्धं भुनक्ति तदा दक्षिणायनस्य यदा च स श्रविष्ठामाक्राम्यति तदोत्तरायणारम्भ इति । यथा—

'प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक् ।
सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा' ॥ ६ ॥ इति ।

वराहमिहिरकाले (४२७ शके) तु उत्तराषाढायाः द्वितीयं पादमाक्रामतो-श्चन्द्रसूर्ययोरुत्तरायणं सूर्ये हि पुनर्वसोरन्तिमं पादं स्पृशति दक्षिणायनं प्रावर्त्ताताम् । यथोक्तं वाराह्याम्—

'साम्प्रतमयनं सवितुः मृगाद्यं कर्कटादितश्चान्यत्' । इति ।

साम्प्रतिककाले तु यदा सूर्याचन्द्रमसौ पूर्वाषाढावृत्तं स्पृशतस्तदोत्तरायणं यदा च सूर्यः आर्द्रां स्पृशति तदैव दक्षिणायनं प्रवर्तते । (शङ्करबालकृष्णस्य 'भारतीयज्योषिम्' हि० पृ० १२३; सारस्वती सुषमा सं० २००७ पृ० ३९ श्रीकृष्णमिश्रस्य लेखः) । अनेन सिध्यति यदयनारम्भः उत्तरोत्तरं पश्चादपसर्पतीति । सम्पातगतिर्वाऽयनचलनं प्रतिवर्षं पञ्चाशद्विकला भवति । यतो हि तदोत्तरायणं धनिष्ठारम्भे भवति स्म । तेन धनिष्ठायाः सायनो भागे ९ राशिरेवाऽऽसीत् । तस्य हि सूक्ष्मभागे १९४४ वैक्रमे यथा हि शङ्करबालकृष्णो निर्दिशति १०।१५।४८।२९ आसीत् । यो हि ९ राशितः ०।४५।४८ अधिकः । सम्पातस्य प्रतिवर्षं पञ्चाशद्विकलागत्या तथावृद्धौ ३२९७ मितवर्षाणि व्यतीतानि भवन्ति । तत्र १९४४ सङ्ख्याया वियोगे १३५३ वर्षाण्यवशिष्यन्ते । तेन हि विक्रमतः १३५३ वर्षपूर्वं हि धनिष्ठाया आरम्भे उत्तरायणमुपक्रान्तमासीत् । स एव वेदाङ्गज्योतिषस्य प्रथमप्रवचनकाल इति ।

कोलब्रूकमतानुसारेण ६२९ वैक्रमाब्दे उत्तराषाढायाः प्रथमचरणस्यान्त्यभागे उत्तरायणं घटते स्मेति । तदा रेवती सम्पाते आसीदिति । धनिष्ठारम्भोत्तराषाढाप्रथमचरणयोः ०।२३।२०।० अन्तरं भवति । सम्पातगत्याः प्रतिवर्षं पञ्चाशद्विकलामानेन तथान्तरे १६८० वर्षाणि लगन्ति । तेन हि (१६८०—६२९=१०५१ इति) विक्रमतः १०५१ वर्षपूर्वं तथा सम्पद्यत इति किन्तु विभागात्मकधनिष्ठारम्भस्थानाद्धनिष्ठायोगतारा ०।४।११।० अग्रे वर्तते । तथासम्पातगतिसिद्धये ३०० वर्षाणि व्यतियन्ति । कोलब्रूकमानं हि विभागात्मकधनिष्ठाधारित्वात्तत्र ३०० वर्षाणि त्रुटितानि सन्ति ।

याजुषज्योतिषम्

यजुर्वेदज्योतिषमपि ऋग्वेदज्योतिषसंवाद्येव । ग्रन्थेऽस्मिन् ४९ श्लोकाः सन्ति किन्तु तेषु ३० श्लोकाः किञ्चित्पाठान्तरेण सह ऋग्वेदज्योतिषादेव गृहीताः सन्ति । तेऽपि शब्दरचनादिदृष्टया भिन्ना इव प्रतिभान्ति ।

ऋग्वेदज्योतिषस्येव याजुषज्योतिषस्यापि प्रयोजनं तु पर्वज्ञानमेव । उक्तं यथा आर्चे—

'युगश्च पञ्चवर्षाणि कालज्ञानं प्रचक्ष्यते ।' इति । (३२)

युगनिरूपणं यथा—

'त्रिशत्यह्नां सषट् षष्टिरब्दः षड् ऋतवोऽयने ।
मासा द्वादश सूर्याः स्युरेतत्पञ्चगुणं युगम्' ॥ २७ ॥

वर्षे हि ३६६ दिनानि षड् ऋतवः द्वेऽयने द्वादश सौरमासा भवन्ति । एतेषामेव पञ्चसङ्ख्यया गुणने युगं भवति । तेन युगे (३६६×५=) १८३० दिनानि भवन्ति ऋतवस्त्रिंशत् दशायनानि ६० सौरमासाश्च । एवमेव १८३० सूर्योदयाः ६२ चन्द्रक्रमाश्च । तथैव १८३५ नक्षत्रोदयाः चन्द्रमसः १३४ अयनानि १२४ पर्वाणि ६७ पर्यायाश्च । अधिमासहेतुर्यथा—

'द्यूनं द्विषष्टिभागेन हेयं सूर्यात्सपार्वणम् ।
यत्कृतावुपजायेते मध्ये चान्ते चाधिमासकौ' ॥ ३७ ॥

सावनदिनमाने तस्य द्विषष्टितमभागवियोगेन यच्छिष्यते तत्तिथिः सावनमाने हि तस्यैव षष्टितमभागसंयोगेन सौरदिनम् । सौरदिनापेक्षया तिथेरल्पत्वेन युगस्य मध्ये चान्ते चाधिमासः । यथा हि—

$$\therefore १ \text{ तिथिः} = \frac{१८३०}{६२ \times ३०} ।$$

तदित्थं युगे—

सौरमासाः ६० चान्द्रमासाः ६२ अधिमासौ द्वौ सावनदिनानि १८३० तिथयः १८६० क्षयतिथयः ३० नाक्षत्रमासाः ६७ नक्षत्राणि १८०९ वृद्धनक्षत्राणि २१ भवन्ति । सावनदिनानि च क्रमेण ३५५ + ३५४ + ३८४ + ३५४ + ३८३ = १८३० । युगस्थितिर्हि प्रतियुगं समाना भवति । किन्तु उत्तरकालिकप्रवृत्तिर्न तथा दृश्यते ।

वेदाङ्गज्योतिषीये पञ्चाङ्गे चान्द्रमासापेक्षया सौरवर्षमाने अधिका अशुद्धयः सन्ति । वस्तुत इयं स्थूलपद्धतिरेव । वेदाङ्गज्योतिषे हि केवलं सूर्याचन्द्रमसोरेव गतयो व्याख्याता नान्येषां ग्रहाणाम् । तयोरपि तत्र मध्यममानमेव निर्दिष्टं न तु स्पष्टमानम् । वस्तुतस्तु मध्यमस्थित्यपेक्षया स्पष्टस्थितिः सूर्यस्य द्वाभ्यामंशाभ्यां चन्द्रस्य अष्टाभिरंशैश्च अग्रे पश्चाद्वा भवति । उभयोरन्तरमेव फलसंस्कार इत्युच्यते । किन्तु वेदाङ्गज्योतिषे स्पष्टगतिस्थितिविषये नैव किञ्चिदुक्तमिति सम्भवति तदाऽस्य ज्ञानमेव नाऽऽसीत्तथापि तदा ग्रहणस्य ज्ञानं त्वासीदेव । सूर्यस्य वा चन्द्रस्य एकपर्यायप्रदक्षिणोपक्रमानन्तरमपरपर्यायप्रदक्षिणारम्भे यः कालो व्यत्येति तस्य ज्ञानं विना एकपर्यायप्रदक्षिणासम्बद्धकालस्य दैनिकमध्यमगतेश्च ज्ञानं न सम्भवति । तेन तदापि कामं स्थूलरूपेणैव स्यादेतद्विषयकज्ञानमनुभूतमेवाऽऽसीत् । ऋग्वेदज्योतिषे संवत्सरवर्षशब्दौ प्रयुक्तौ दृश्यते याजुषे अब्दशब्दोऽपि । वेदाङ्गज्योतिषे अमान्तमानमेव सम्मतं दृश्यते न तु पूर्णिमान्त-

मानमपि । तेन हि शुक्लपक्षस्य पूर्वपक्षत्वं कृष्णस्यापरपक्षत्वम् । तत्र ह्यादि-नक्षत्रत्वेन धनिष्ठा ग्रहीताऽस्ति । नक्षत्राणां गणना तु कृत्तिकात एव कृताऽस्ति। तदा पूर्णाङ्कस्य परिकर्मचतुष्टयस्य योगान्तरहननभागरूपस्य तथा त्रैराशिकस्य च ज्ञानमासीत् भिन्नपरिकर्मचतुष्टयस्य च । अपवर्तनज्ञानञ्चैतत्सूचयति यत्तदा गणितस्य ज्ञानं समृद्धमासीत् । तदा तात्कालिकलग्नमपि ज्ञातमासीदिति 'श्रविष्ठाभ्यां गुणाभ्यस्तान् प्राग्विलग्नान् विनिर्दिशेत्' इति कथनतो ज्ञायते। क्रान्तिवृत्तस्य क्षितिजसंलग्नभाव एव तात्कालिकलग्नमित्युच्यते । तदा राशि-ज्ञानं क्रान्तिवृत्तं द्वादशधा विभज्य तदनुसारेण ग्रहस्थितिनिरूपणञ्च नैव दृश्यते। तत्र नक्षत्रमाश्रित्यैव सूर्याचन्द्रमसोः 'स्थितिर्निरूपिताऽस्ति । राशिज्ञानाभावेऽपि सौरमासस्य चान्द्रसौरमासयोः सम्बन्धस्य च तत्र स्पष्टतयोल्लेखोऽस्ति । ऋत्वा-रम्भतिथेरुल्लेखोऽपि तत्र दृश्यते । क्षेत्रविभागस्येव कालविभागस्य पद्धतिस्तत्रो-ल्लेखनीया दृश्यते । यथा हि सूर्यसिद्धान्तादौ विकलाकलांऽशराशिवृत्तपरिधिभिः कालविभागः कृतस्तथा वेदाज्योतिषे घटिकादिनमासवर्षैः । कर्मकाण्डे सम्प्रत्यपि घटिकामानमेव प्रयोगे दृश्यते । उभयत्र विकलापलयोः कलाघटिकयोरंशदिनयोः राशिमासयोः वृत्तपरिधिवर्षयोः समानमेव मानम् । तत्रोक्तं यन्नक्षत्रस्य ६१० कलाः भवन्ति तत्र चन्द्रो दिनावधौ ६०३ कलाश्चलति । ता एव दिनस्य कला इत्युच्यन्ते । अयं हि क्षेत्रानुरूपकालविभागः । १२४ पर्वभिः नक्षत्राणाम् १२४ अंशानां कल्पना हि कालविभागानुरूपं क्षेत्रविभाग एव ।

अथर्वज्योतिषम्

अथर्वज्योतिषं हि अनन्तरोक्ताभ्यां पृथक्प्रकृतिकम् । इदं हि फलितज्योतिषेन सम्बद्धम् । सन्त्यत्र १६२ श्लोका चतुर्दशप्रकरणानि च । इदं हि पितामहकाश्यप-संवादरूपम् । कालविभाजनं रौद्रसौम्यकर्मयोग्यनक्षत्राद्युल्लेखः करणादीनि चास्य प्रतिपाद्यविषयाः । तत्रोक्तम्—

'तिथिरेकगुणा प्रोक्ता नक्षत्रञ्च चतुर्गुणम् ।
वारश्चाष्टगुणः प्रोक्तः करणं षोडशान्वितम् ॥
द्वात्रिंशत् (२) योगस्तारा षष्टिसमन्विता ।
चन्द्रः शतगुणः प्रोक्तस्तस्माच्चन्द्रबलाबलम् ॥

समीक्ष्य चन्द्रस्य बलाबलानि ग्रहाः प्रयच्छन्ति शुभाशुभानि । न कृष्णपक्षे शशिनः प्रभावः............।'

तत्र ग्रहा यथा—

'आदित्यसोमौ भौमश्च तथा बुधबृहस्पती ।
भृगुः शनैश्चरश्चैव एते सप्त दिनाधिपाः ॥' इति ।

वस्तुतस्त्विदं संहिताग्रन्थ एव। तेनाऽत्र प्रसङ्गवशात्सिद्धान्तो होरा च समुपदर्शिताः सङ्क्षेपतः।

यद्यपि ग्रन्थोऽयमनन्तरोक्तग्रन्थद्वयापेक्षया नवीनस्तथापि तेनास्य प्राचीनत्वं न हीयते। अत्रापि मेषादिराशीनामुल्लेखो नैव दृश्यते इति राशिप्रचलनादस्य प्राग्वर्तित्वं स्पष्टमेव।

वेदाङ्गेषु ज्योतिषम्

एवमेव वेदाङ्गान्तरेषु कल्पव्याकरणनिरुक्तादिष्वपि प्रसङ्गवशाद् विषयोऽयं प्रपञ्चितो दृश्यते। कल्पसूत्रेषु यथा 'श्रावण्यां पौर्णमास्यां श्रवणकर्म' (आश्व० गृ० सू० २।१।१) इति। श्रौतसूत्रे (४।१२) मधुमाधवादिमासनाम गृहीतमस्ति। एवमेव तत्र (४।१२) षण्णामृतूनामुल्लेखो दृश्यते। वसन्ताद्धि तेषामारम्भः। मार्गशीर्ष्यां चतुर्दश्यां प्रत्यवरोहणमुक्तं गृह्यसूत्रे (३।२।१) हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः (गृ० सू० २।४।१) 'अध्यायोपाकरणं श्रावणस्य पञ्चम्याम्' (३।५)। बहुषु स्थलेषु अयनस्य विषुवस्य चोल्लेखो लभ्यते। तत्र ध्रुवारुन्धतीसप्तर्षीणामपि समुल्लेखो दृश्यते। यथा 'ध्रुवमरुन्धतीं सप्तर्षीनिति दृष्ट्वा वाचं विसृजेत्'। (गृ० सू० १।७।२२)। गृह्यसूत्रे (२।१०।३) अग्न्याधानार्थं नक्षत्राणि निर्दिष्टानि। तत्र उत्तरप्रोष्ठपदाफल्गुनीरोहिणीनक्षत्रेषु क्षेत्रस्य कर्षणं निर्दिष्टम्। 'तत्रोक्तं यदुपनयनादिकर्म कल्याणकारकनक्षत्रेषु कर्तव्यम्' (गृ० सू० १।४।१)।

पारस्करगृह्यसूत्रेऽपि तथैव ज्योतिषविषयकप्रसङ्गो लभ्यते। यथा—'मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकम्' (३।१२)। 'त्रिषु त्रिषु उत्तरादिषु स्वातौ मृगशिरसि रोहिण्याम्' (विवाहः) 'ज्येष्ठायां क्षेत्रकर्षणम्' (२।१६) 'मूलांशे प्रथमे पितुर्नेष्टो द्वितीये मातुस्तृतीये धनधान्यस्य चतुर्थे कुलशोकावहः स्वयं पुण्यभागी स्यात्' (१।२१)। एवमेव हिरण्यकेशीयादिसूत्रेष्वपि बहुधाज्योतिषप्रसङ्गो दृश्यते। बौधायनसूत्रे मीनमेषादिराशीनामुल्लेखोऽपि दृश्यते। एवमेवान्यान्यसूत्रेष्वपि न्यूनातिरिक्तं ज्योतिषप्रसङ्ग आपतितो दृश्यते।

एवं हि निरुक्तेऽपि। यथा—'सप्तऋषीणानि ज्योतींषि' (१०।२६)। एवमेव तत्र दिनरात्रिपक्षायनादीनामप्युल्लेखः। (१४।८–९) 'युगसहस्रान्तमहर्ब्रह्मणो विदुः रात्रिं युगसहस्रान्तां तेऽहोरात्रविदो जनाः' इति। (१४।४)।

पाणिनीये हि व्याकरणेऽपि प्रसङ्गवशाज्ज्योतिषशास्त्रविषय उल्लिखितो दृश्यते। यथा 'वर्षाल्लुक् च' (५।१।८८) 'दामहायनान्ताच्च' (४।१।२७) इत्यादौ वर्षहायनशब्दौ 'साऽस्मिन् पौर्णमासीति' (४।२।२१) 'लिङ्चोर्ध्वमौहूर्तिके' (३।३।९) 'पुष्यतिष्यौ नक्षत्रे' (३।१।११६) 'विभाषा फाल्गुनी-

श्रवणाकार्तिकीचैत्रीभ्यः' (४।२।२३) 'नक्षत्रेण युक्तः कालः' (४।२।३) 'कालेभ्यो भववत्' (४।२।३४) 'द्यावापृथिवी' (४।२।३२), 'छन्दसि पुनर्वस्वोरेकवचनम्' (१।२।६१) 'विशाखयोश्च' (१।२।६२) 'फाल्गुनीप्रोष्ठपदानाञ्च नक्षत्रे' (१।२।६०) 'विभाषाग्रहः' (३।१।४१) इत्यादौ तत्तच्छब्दाश्च।

एवं हि स्मृतिग्रन्थेषु ज्योतिषविषयकचर्चा बहुत्र लभ्यते, विशेषत आचाराध्यायेषु प्रायश्चित्तप्रसङ्गे च। विशेषतो धर्मशास्त्रग्रन्थत्वेन स्मृतिर्हि युगमानतिथिवारनक्षत्रयोगकरणलग्नमुहूर्तादिभिरेव सम्बद्धा तेषामेवाचारसम्पादने प्रयोगात्। मनुस्मृतावुक्तं—'यच्चत्वारीह युगानि सत्यत्रेताद्वापरकलिसंज्ञितानि। युगानां द्वादशसाहस्रैर्दैवयुगम् देवयुगानां सहस्रेण ब्रह्मण एकाहस्तावत्य एव रात्रयश्च। मनुष्याणां मासेन दैवोऽहोरात्रः पैत्रः वर्षेण तु दैवः दैवे युगसहस्रे द्वे ब्राह्मोऽहोरात्रो मनुष्याणां तु कल्प' इति। (मनु० १।६८–८६)।

याज्ञवल्क्यस्मृतौ हि नवानामेव ग्रहाणामुल्लेखो दृश्यते। यथा—

'सूर्यः सोमो महीपुत्रः सोमपुत्रो वृहस्पतिः।
शुक्रः शनैश्चरो राहुः केतुश्चैते ग्रहाः स्मृताः॥' (१।२९५)

एवमेव तत्र क्रान्तिवृत्तस्य द्वादशभागा अप्युक्ता (१।२१७)। नक्षत्रमधिकृत्य तत्रोक्तम्—'कृत्तिकादिभरण्यन्तम्' इति (१।२६८)। एवञ्च श्राद्धमुद्दिश्योक्तम्—

'अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम्।
द्रव्यं ब्राह्मणसम्पत्तिर्विषुवत्सूर्यसङ्क्रमः॥
व्यतीपातो गजच्छाया ग्रहणं चन्द्रसूर्ययोः'। इति। (१।२१७-२१८)

तत्र अष्टकाः हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीषु समरात्रिन्दिवः कालो विषुवत् सङ्क्रमः सूर्यस्य राशेः राश्यन्तरप्रवेश इति। ग्रहयुतिस्तत्फलमपि तत्र निर्दिष्टम्। (३।१७१)। एवं तत्र ज्योतिषसम्बद्धा अनेके विषयाः प्रसङ्गोपयोगिन उद्धृता दृश्यन्ते। ग्रहनक्षत्राणां शुभाशुभफलञ्च तत्र निर्दिष्टमशुभफलपरिहारोपायश्च। याज्ञवल्क्यस्मृतावपि मेषादिराशिनामानि नैव गृहीतानि दृश्यन्ते।

एवमेव स्मृत्यन्तरेष्वपि प्रसङ्गोपयोगित्वेन तत्र तत्र ज्योतिषविषयः समनूदितो दृश्यते।

महाभारते ज्योतिषम्

रामायणे महाभारतादावपि बहवो ज्योतिषसम्बद्धप्रसङ्गाः स्मृता दृश्यन्ते। रामायणे मुहूर्तादिकमधिकृत्य प्रासङ्गिकं वर्णनं लभ्यते। महाभारतं तु भारतीयपरम्परायाः विश्वकोष एव। तत्र ज्योतिषविषयोऽपि बहुत्र प्रस्तुतोऽस्ति यस्य सारमेवाऽत्रोपस्थाप्यते।

महाभारतस्य हि त्रीणि स्वरूपाण्यनुमीयन्ते प्रथमं जयो नामेतिहासः द्वितीयं भारतं नामाख्यानं तृतीयं तु महाभारतं लक्षश्लोकात्मकम्। अस्य वाचनान्यपि तावन्त्येव यत्र प्रथमं व्यासेन वैशम्पायनाय पाठितं द्वितीयं तु वैशम्पायनेन जनमेजयाय श्रावितं तृतीयं तु सौतिना शौनकादिभ्यः कथितम्। भगवान् पाणिनिस्तृतीयं स्वरूपमपि जानाति यथा हि तत्र सूत्रं 'महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु' (६।२।३८)। महाभारतस्य जयभागे चतुर्विंशति सहस्राणि पद्यान्यासन्। यथोक्तम्—

'चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम्।
उपाख्यानैर्विना तावद् भारतं प्रोच्यते बुधैः॥' (महा० १।१।७८)

महाभारतस्यायमेव भागः प्राचीनतमः। अस्य हि रचना न्यूनमपि पारीक्षिताज्जनमेजयात्प्रागेव सम्पन्ना आसीत्। परीक्षितस्य हि जन्म विक्रमतः १४१४ वर्षपूर्वं सञ्जातमासीदिति प्रमाणासिद्धम्। तेन हि पाण्डवानां समयः ततोऽपि अधिकमपि १५० वर्षान्तराले एवापतति। जयस्य प्रणयनं परीक्षित्काले सम्पन्नमिति तस्य जनमेजययज्ञे वाचनाऽज्ञायते। शौनकादीनां दीर्घसत्रं हि जनमेजयप्रपौत्रस्याधिसोमकृष्णस्य समये प्रवर्तितमासीत्।

महाभारतकाले ग्रहगतिज्ञानं समृद्धमासीत्। यथोक्तं शान्तिपर्वणि—

'अथ संवत्सराणाञ्च मासानाञ्च क्षयं तथा।
पक्षक्षयं तथा दृष्ट्वा दिवसानाञ्च सङ्क्षयम्॥' (३०१।४६-४७)

शङ्करबालकृष्णो निर्दिशति यत्संवत्सरक्षयो हि प्रायः ८५ वर्षानन्तरं घटते। महाभारते हि मेषादिद्वादशराशीनां विधिः क्रान्तिवृत्तस्य द्वादश विभागेन ग्रहस्थितिनिर्द्धारणपद्धतिर्वा नैव दृश्यते। न च मध्यमराशिभोगद्वारा संवत्सरविनिश्चयपद्धतिश्च तदासीत्। तदा द्वादशसंवत्सरपद्धतिः प्रचलिताऽनुमीयते। सा हि गुरोरुदयास्तमययोरवलम्बिता। तत्र हि पुनः पुनः संवत्सरक्षयावसर आपतति। स्पष्टगतेः सूक्ष्मज्ञानं विना क्षयमासो नैव ज्ञातुं शक्यते। तेन हि तदा गुरोः सूक्ष्ममध्यमगतेर्ज्ञानमवश्यमेवाऽऽसीत्।

तत्र हि धूमकेतोरुल्कापातादेश्चोल्लेखो बहुत्र दृश्यते। तदाऽपि वर्षायाः कारणं सूर्य एवेत्यपि ज्ञातमासीत्। यथोक्तम्—

'त्वमादायांशुभिस्तेजो निदाघे सर्वदेहिनाम्।
सर्वौषधिरसानाञ्च पुनर्वर्षासु मुञ्चसि॥' (वन० ४९।३)

तत्र हि सामुद्रस्योत्तरङ्गस्य चन्द्रमसा सह सम्बन्धः पृथ्व्याः गोलत्वं चन्द्रमसः पृष्ठस्यादृश्यत्वञ्चोक्तम्। यथा—

'यथा हिमवतः पार्श्वं पृष्ठं चन्द्रमसो यथा।
न दृष्टपूर्वं मनुजै.... .... ॥'

महाभारते हि ज्योतिषस्य सिद्धान्तस्कन्धापेक्षयाऽपि संहितास्कन्धस्य ज्ञानं समृद्धतरं दृश्यते । अथाऽत्र कानिचित्तत्सम्बद्धानि वचनान्युद्ध्रियन्ते । यथा—

'यतो वायुर्यतः सूर्यो यतो शुक्रस्ततो जयः ।' (शा० १००।२०)

'अद्यः पौष्ययोगमुपैति चन्द्रमाः । पाणिं कृष्णायास्त्वं गृहाणाद्य पूर्वम् ।' (आदि० १९८।५)

एवमेव संवत्सरादिज्ञानं यथा—

'अनुसंवत्सरं जाताः पाण्डवाः कुरुसत्तमाः ।
पाण्डुपुत्रा व्यराजन्त पञ्चसंवत्सरा इव ।।' (आदि० १३४।२४)

समयगणना यथा—

'तेषां कालातिरेकेण ज्योतिषाञ्च व्यतिक्रमात् ।
पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः ।।
एषामप्यधिका मासाः पञ्च च द्वादश क्षपाः ।
त्रयोदशानां वर्षाणामिति मे वर्तते मतिः ।।' (विरा० ५२।३-४)

पञ्चसु वर्षेषु द्वयोरधिमासयोरवस्थितिर्हि वेदाङ्गज्योतिषानुसारेण सिध्यति । नक्षत्रगणना कृत्तिकात एव तत्र मता । अनुशासनपर्वणि चतुःषष्टितमेऽध्याये कृत्तिकात आरभ्य भरणीपर्यन्तं नक्षत्रगणना कृताऽस्ति तत्तन्नक्षत्रेषु दानविशेष-निर्देशश्च । युधिष्ठिरजन्ममुहूर्तो यथा—

'ऐन्द्रे चन्द्रसमारोहे मुहूर्तेऽभिजिदष्टमे ।
दिवो मध्यगते सूर्ये तिथौ पूर्णेतिपूजिते ।।' (आदि० १२३।६)

ग्रहाणां सौम्यक्रूरत्वं तेषां शुभाशुभफलप्रदत्वं च यथा—

'प्राजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः ।
शनैश्चरः पीडयति पीडयन् प्राणिनोऽधिकम् ।।
कृत्वा चाङ्गारको वक्रं ज्येष्ठायां मधुसूदन ।
अनुराधां प्रार्थयते मैत्रं सङ्गमयन्निव ।।
नूनं महद्भयं कृष्ण कुरूणां समुपस्थितम् ।
विशेषेण हि वार्ष्णेय चित्रां पीडयते ग्रहः ।।
सोमस्य लक्ष्म व्यावृत्तं राहुरर्कमुपैति च ।
दिवश्चोल्काः पतन्त्येताः सनिर्घाताः सकम्पनाः ।।' (उद्योग० १४३।८।११)

ग्रहयोगो यथा—

भृगुपुत्रधरापुत्रौ शशिजेन समन्वितौ ।' (शल्य० ११।१८)

त्रयोदशदिनपक्षो यथा—

'चतुर्दशीं पञ्चदशीं भूतपूर्वां तु षोडशीम् ।
इमां तु नाभिजानेऽहममावास्यां त्रयोदशीम् ।।

चन्द्रसूर्यावुभौ ग्रस्तावेकमासीं त्रयोदशीम् ।'

अनुशासनपर्वणि १०६ अध्याये (१७-३१) १०७ अध्याये (३-१४) च मार्गशीर्षादिद्वादशमासानां नामानि गृहीतानि सन्ति ।

चन्द्रस्वरूपं यथा—

'मार्गशीर्षस्य मासस्य चन्द्रे मूलेन संयुते ।
पादौ मूलेन राजेन्द्र जङ्घायामथ रोहिणीम् ॥
अश्विभ्यां सक्थिनी चैव ऊरू चाषाढयोस्तथा ।
गुह्यं तु फाल्गुनी विद्यात्कृत्तिका कटिकास्तथा ॥
नाभिर्भाद्रपदे विद्याद् रेवत्यामक्षिमण्डलम् ।
पृष्ठमेव धनिष्ठासु अनुराधोत्तरास्तथा ॥
बाहुभ्यां तु विशाखासु हस्तौ हस्तेन निर्दिशेत् ।
पुनर्वस्वङ्गुलौ राजन् आश्लेषास्तु नखास्तथा ॥
ग्रीवा ज्येष्ठा च राजेन्द्र श्रवणेन तु कर्णयोः ।
मुखं पुण्येण दानेन दन्तोष्ठौ स्वातिरुच्यते ॥
हासं शतभिषाञ्चैव मघाञ्चैवाथ नासिकाम् ।
नेत्रे मृगाशिरो विद्याल्ललाटे मित्रमेव तु ॥
भरण्यां तु शिरो विद्यात्केशानार्द्रा नराधिप ।
....

जायते परिपूर्णाङ्गः पौर्णमास्येव चन्द्रमाः ।'

नक्षत्रगणनाक्रममधिकृत्य महाभारते वनपर्वणि उक्तम्—

अभिजित् स्पर्धमाना तु रोहिण्याः कन्यसी स्वसा ।
इच्छन्तीं ज्येष्ठतां देवी तपस्तप्तुं वनं ययौ ॥
तत्र मूढोऽस्मि भद्रं ते नक्षत्रं गगनाच्च्युतम् ।
कालं त्विमं परं स्कन्द ब्रह्मणा सह चिन्तये ॥
धनिष्ठादिस्तदा कालो ब्रह्मणा परिकल्पितः ।
रोहिणी ह्यभवत्पूर्वमेवं सङ्ख्या समाऽभवत् ॥
एवमुक्ते तु शक्रेण कृत्तिका त्रिदिवं गता ।
नक्षत्रं सप्तशीर्षाभं भाति तद्वह्निदैवतम् ॥' (७-११)

अस्यायमाशयः—आदौ हि अभिजितमादाय नक्षत्रसङ्ख्या सप्तविंशतिरासीत् । अभिजिद्धि कालवशेन निस्तेजस्काः समपद्यत । ततो हि नक्षत्रसङ्ख्यापूरणाय कृत्तिका गृहीता । पूर्वं हि रोहिणीक्रमेण नक्षत्रगणनाऽऽसीत् । तदा तु धनिष्ठाक्रमेणेति । व्याख्यातं यथा नीलकण्ठेन—'यस्य नक्षत्रस्याद्यक्षणे चन्द्र-

सूर्यगुरूणां योगस्तद्युगादिनक्षत्रम् । तच्च पूर्वं रोहिण्यभूत् । तदा तु धनिष्ठेति । अत्र विचारणीयो विषयो यथा शङ्करबालकृष्णो निर्दिशति—

'अभिजिन्नक्षत्रस्य शराः ६१ अंशाः उत्तरतः । सम्पातगतिजनितनक्षत्रमण्डलभ्रमणे कदाचिदभिजिद् ध्रुवस्थानमायाति । तदा हि वृत्ते षड्विंशतिरेव नक्षत्राण्यवशिष्यन्ते' । घटनेयं त्रयोदशसहस्रवर्षपूर्वं घटिता सम्भवति यतो हि पाश्चात्यगणका अपि तथा मन्यन्ते । तथैव आदिपर्वणि—

'चकारान्यच्च लोकं वै क्रुद्धो नक्षत्रसम्पदा ।
प्रतिश्रवणपूर्वाणि नक्षत्राणि चकार यः ॥' (७१।३४)

अश्वमेधपर्वणि—

'अहः पूर्वं ततो रात्रिर्मासाः शुक्लादयः स्मृताः ।
श्रवणादीनि ऋक्षाणि ऋतवः शिशिरादयः ॥' (४४।२)

अत्रेदमवधेयं यद्वेदसंहिताकाले उत्तरायणं मृगशिरसि आसीत् । अत्रापि 'यस्याद्यक्षणे चन्द्रसूर्यगुरुयोगस्तद्युगादिनक्षत्रमि'ति सिद्धान्तः । युगादिनक्षत्रं हि प्रति ९६० वर्षं पश्चादपसर्पति । ततश्चोत्तरवैदिककाले रोहिणी युगादिनक्षत्रमासीत् । ब्राह्मणयुगे कृत्तिका तदासीत् । ततश्च क्रमेण वेदाङ्गज्योतिषकाले धनिष्ठा तदासीत् । महाभारतस्याश्वमेधपर्वप्रवचनकाले श्रवणं तदासीत् । कदाचित् उत्तराषाढा तदासीत् । साम्प्रतिककाले तु पूर्वाषाढा तदस्ति ।

एतदतिरिक्तमपि महाभारते ऋत्वयनमासतिथ्यादीनामनेकत्रोल्लेखो लभ्यते । तत्रोक्तम्—

कौमुदे मासि रेवत्यां शरदन्ते हिमागमे ।
स्फीतसस्यसुखे काले कल्पः सत्यवतां वरः ॥' (उद्योग० ४३।७) ।

कौमुदे कार्तिके । रेवत्यामिति शुक्लद्वादश्यां शरदः समाप्तिर्हेमन्तस्यारम्भ इति । एतेन तदा वसन्तो हि चैत्रवैशाखयोरेवेति सिध्यति । पक्षस्तु एकत्र शुक्लपूर्वोऽपरस्मिंस्तु कृष्णपूर्व इत्यपि । यथा—

'मासाः शुक्लादयः स्मृताः । (अश्व० ४४।२)
'कृष्णशुक्लावुभौ पक्षौ ।' (वन० ८४।९६)

एवञ्च—

'काष्ठाः कला मुहूर्ताश्च दिवा रात्रिस्तथा लवाः ।' (शान्ति० ७।२१)

एवमेव—

'संवत्सरान् ऋतून् मासान् पक्षानथ लवान् क्षणान् ।' (शान्ति १४।१६)

तत्र अभिजिज्जयादिमुहूर्तानामपि समुल्लेखो लभ्यते । यथा—

'स भवान् पुण्ययोगेन मुहूर्तेन जवेन च ।' (उद्योग० ६।७)

'ऐन्द्रे चन्द्रसमायुक्ते मुहूर्तेऽभिजिदष्टमे ।' (आदि० १२३।६)

तत्र हि सप्तवाराणां नामानि तु न दृश्यन्ते। आदिपर्वणि वारशब्दः पर्यायार्थे प्रयुक्तो दृश्यते। यथा—

'एकैकश्चापि पुरुषस्तत्प्रयच्छति भोजनम्।
स वारो वहुभिर्वर्षैर्भवत्यसुकरो नरैः॥' (१६०।७)

नक्षत्राणि कृतिकारम्भाणि उक्तानि इति पूर्वमेवोक्तम्। सम्प्रति नक्षत्रविषये महाभारतगतानि कानिचिद्वचनानि समुद्ध्रियन्ते—

'अन्वधावन्मृगं रामो रुद्रस्तारामृगं यथा।' (वन० २७८।२०)
'चन्द्रस्येव पुनर्वसू।' (कर्ण० ४९।२८)
'पञ्चतारेण संयुक्तः सावित्रेणेव चन्द्रमाः।' (आदि० १३५।३०)
'विशाखयोर्मध्यगतः शशी यथा।' (कर्ण० २१।४८)

एवमेव सप्तर्ष्यरुन्धत्यगस्त्यादितारका अपि तत्र तत्र स्मृताः। किन्तु योग-करणादीनां मेषादीनाञ्च न तत्रोल्लेखः। पर्वर्तुविषुवायनचन्द्रसूर्योपरागादयश्च तत्र स्मृताः (वन २००।२४-२५)।

ग्रहणमधिकृत्य महाभारते सन्त्यनेके प्रसङ्गाः। यथा केचित्—

'राहुरग्रसदादित्यमपर्वणि विशाम्पते। (सभा० ७९।१९)
अलक्ष्यः प्रभया हीनः पौर्णमासीञ्च कार्तिकीम्।
चन्द्रोऽभूदग्निवर्णश्च पद्मवर्णे नभस्तले॥' (भीष्म० २।२३)

महाभारतयुद्धवर्षे कार्तिकपौर्णमास्यां चन्द्रग्रहणं मार्गकृष्णामावास्यायां सूर्यग्रहणं घटितमासीत् मार्गशीर्षकृष्णपक्षश्च त्रयोदशदिनात्मक एव। यथोक्तं भीष्मपर्वणि—

'चतुर्दशीं पञ्चदशीं भूतपूर्वां तु षोडशीम्।
इमां तु नाभिजानेऽहममावास्यां त्रयोदशीम्।
चन्द्रसूर्यावुभौ ग्रस्तौ एकमासो त्रयोदशीम्॥' (३।३१-३२)

एवम्—

'राहुश्चाग्रसदादित्यमपर्वणि विशाम्पते।' (गदा० २७।१०)

महाभारते नवैव ग्रहास्तत्र तत्र स्मृताः। यथा—

'सोमो वृहस्पतिः शुक्रो बुधोऽङ्गारक एव च।
इन्द्रो विवस्वान् दीप्तांशुः शुचिः शौरिः शनैश्वरः।' (वन० ३।१७)
'ग्रहाः पञ्च रविं यथा।' (भीष्म० १००।३७)
'सोमं सप्तग्रहा इव।' (द्रोण० ३७।२२)
'निःसरन्तो व्यदृश्यन्त सूर्यात्सप्त महाग्रहाः।' (कर्ण० ३७।४)
'विमार्गस्थौ (वक्रो) ग्रहाविव।' (कर्ण० १८।२२)
'वक्रातिवक्रगमनादङ्गारक इव ग्रहः।' (कर्ण० २०।१)

'प्रतिलोमोऽभवद्गुरुः ।' (शान्ति० ११।१५)
'नक्षत्रमभितो व्योम्नि शुक्राङ्गिरसयोरिव ।' (कर्ण० १८।१)
'भृगुसूनुधरापुत्रौ शशिजेन समन्वितौ ।' (शल्य० ११।१८)

महाभारतयुद्धकालीननक्षत्रग्रहस्थितिर्यथा—

'श्वेतो ग्रहस्तथा चित्रां समतिक्रम्य तिष्ठति ।
(श्वेतो ग्रहः केतुः । चित्रां समतिक्रम्य स्वात्यादौ)
....

धूमकेतुर्महावीर पुष्यञ्चाक्रम्य तिष्ठति ।
मघास्वङ्गारको वक्रः श्रवणे च बृहस्पतिः ।
भगं नक्षत्रमाक्रम्य सूर्यपुत्रेण पीड्यते ।
(भग उत्तरफाल्गुनी)

शुक्रः प्रोष्ठपदे पूर्वे समारुह्य विराजते ।
रोहिणीं पीडयत्येवमुभौ च शशिभास्करौ ।
चित्रास्वात्यन्तरे चैव विष्ठितः परुषग्रहः ।
वक्रानुवक्रं कृत्वा च श्रवणं पावकप्रभः ।
ब्रह्मराशिं समावृत्य लोहिताङ्गो व्यवस्थितः ।
विशाखायाः समीपस्थौ बृहस्पतिशनैश्चरौ ।
चन्द्रसूर्यावुभौ ग्रस्तावेकाह्ना हि त्रयोदशीम् ॥' (भीष्म० तृतीयाध्याये)
'प्राजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः ।
शनैश्चरः पीडयति पीडयन् प्राणिनोऽधिकम् ।
कृत्वा चाङ्गारको वक्रं ज्येष्ठायां मधुसूदन ।
अनुराधां प्रार्थयते मैत्रं सङ्गमयन्निव ।
....चित्रां पीडयते ग्रहः ।' (उद्यो० १४३ अध्याये)

स्थूलानुमानेन तदुच्यते यन्मार्गशुक्लप्रतिपदायां महाभारतयुद्धमारब्धं समाप्तञ्च पौषकृष्णतृतीयायां भीष्मश्च मार्गशुक्लदशम्यां पातितोऽपि अष्टपञ्चाशद्दिनानि प्राणान् धारयित्वा माघशुक्लाष्टम्यां निर्वाणमाप । यथोक्तमनुशासनपर्वणि—

'अष्टपञ्चाशतं रात्र्यः शयानस्याद्य मे गताः ।
....

माघोऽयं समनुप्राप्तो मासः सौम्यो युधिष्ठिर ।
त्रिभागशेषः पक्षोऽयं शुक्लो भवितुमर्हति ॥' (१६७।२७-२८)

सौम्यश्चान्द्रः। मासस्य चतुर्भागकरणे सार्धसप्ततिर्भागत्वात् अष्टम्यर्धस्यानतीतत्वेन प्रथमभागस्य विद्यमानत्वात् त्रिभागशेषो भवितुमर्हतीत्यर्थः। तेनाष्टमीत्यर्थः इति नीलकण्ठः।

अत्रेदमप्यवधेयं यज्जयो नामेतिहासोऽयं वस्तुतः आदिपर्वगतात् 'मृते पितरि ते वीराः' (६१।६) इति पद्यात्प्रारभते समाप्यते च शल्यपर्वणि षष्टितमेऽध्याये यस्यायं चरमः श्लोकः—

'दिष्टचा गतस्त्वमानृण्यं मातुः कोपस्य चोभयोः।
दिष्टचा जयति दुर्धर्षं दिष्टचा शत्रुर्निपातितः।' इति। ४८॥

तेनायमेव भागो महाभारतस्य प्राचीनतमः। अवशिष्टभागस्तु सौतिना पूरितस्ततोऽप्यवशिष्टो लिपिकारेणेति ज्योतिषे जयभागस्यैव प्रामाण्यम्। यो यो भागो यदा यदा गुम्फितस्तत्र तत्र तत्कालव्यवहृतमानमेव निर्दिष्टम्। तेन यत्र कुत्र विषयवैषम्यमपि दृश्यते। वनपर्वणि २३० तमेऽध्याये धनिष्ठारम्भे उत्तरायणमुक्तमनुशासनपर्वणि भीष्मस्वर्गारोहणप्रसङ्गे मकरदावर्थादुत्तराषाढाया द्वितीये पादे। एकत्र नक्षत्राणां कृत्तिकादितो गणनाऽपरत्र श्रवणादितोऽपि मासेष्वप्येकत्र मार्गशीर्षस्य प्राथम्यमपरत्र चैत्रवैशाखयोरेव वसन्तगतत्वमपीति।

जयस्य वीररसकाव्यस्य प्रणयनकालोऽपि न तथा निश्चितः। आदिपर्वणि (२।१३)।

'अन्तरे चैव सम्प्राप्ते कलिद्वापरयोरभूत्।
समन्तपञ्चके युद्धं कुरुपाण्डवसेनयोः॥'

इत्युक्तम्। वनपर्वणि (१४९।३८) 'एतत्कलियुगं नाम अचिराद्यत्प्रवर्तते' इत्युक्तम्। गदापर्वणि तु 'प्राप्तं कलियुगं विद्धि' (३।१।२३) इत्यप्युक्तं दृश्यते। तेन हि पाण्डवा वस्तुतः कदाऽऽसन्निति न निश्चयेन तत्र कथितं दृश्यते। यच्च केरपन्तमहोदयैः साधितो यच्च शङ्करबालकृष्णमहोदयेन पर्यालोचितः पाण्डवसमयः सोऽपि वराहमिहिरस्य—

'आसन्मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ।
षट्द्विकपञ्चद्वि (२५२६) युतः शककालस्तस्य राज्ञश्च॥'

इति कथनासंवादित्वाच्चिन्त्यमेव। श्रीमद्भागवतेऽपि परीक्षितः, काले सप्तर्षीणां मघासु विचरणं नन्दकाले तु पूर्वाषाढायां सञ्चरणमुक्तम्। ते हि एकनक्षत्रेऽब्दशतं तिष्ठन्तीति अव्यक्तगणितेनाप्युक्तम्—

'आरभ्य भवतो जन्म यावन्नन्दाभिषेचनम्।
एतद्वर्षसहस्रं तु शतं पञ्चदशोत्तरम्॥'-इति। (१२।२।२६)

तेन हि वराहमिहिरमतानुसारं ६५३ कलिगतवर्षेषु पाण्डवानामुदयः। यदा युधिष्ठिरो नवतिवर्षवयस्क आसीत्तदा महाभारतयुद्धं प्रवृत्तम्। युद्धानन्तरम्

३८ वर्षाणि स महीं बुभुजे। ततश्च परीक्षिदभिषिक्त इति कलिगत ८८१ वर्षेषु परीक्षितोऽभिषेकः। सोऽपि षष्टिवर्षाणि महीं भुङ्क्त्वा दिवं गत इति कलिगत ९३१ वर्षेषु जनमेजयस्याभिषेकः। कलिगतेषु ३०४४ वर्षेषु विक्रमस्य जन्मेति विक्रमतः २३९१ वर्षपूर्वं पाण्डवसमय इत्यनुमीयते। एतदेव चिन्तनं वराहमिहिराचार्येण सह संवादि।

पुराणेषु ज्योतिषम्

एतदतिरिक्तं पुराणेष्वपि तत्र तत्र ज्योतिषविषयप्रसङ्गो दृश्यते किन्तु तत्र नैव किञ्चिन्नवीनत्वमिति तेषां विस्तृतत्वेन ग्रन्थकलेवरवृद्धिभयाच्च नात्र तस्योल्लेखः। गारुडे हि महापुराणे सर्वस्य सारत्वेन विषयः प्रपञ्चितः। तत्र सामान्यतः सूर्यव्यूहवर्णनं ज्योतिषशास्त्रकथनं नक्षत्राणां कृत्तिकादितो गणना नक्षत्रदेवताकथनं योगिनीस्थितिनिर्णयः सिद्धियोगः अमृतयोगः ज्योतिषशास्त्रवर्णनं दशाकथनं दशाफलं यात्राविचारः चन्द्रशुद्धिकथनं द्वादशराशिपरिमाणं मेषादिलग्नेषु विवाहफलं चरादिलग्ने कर्तव्यानि च तत्र यथायोगं प्रपञ्चितानि। (५९-६१ अध्यायाः)।

एतदतिरिक्तमपि तत्समकालिकत्वेन तदनतिदूरकालवर्तित्वेन वा 'सूर्यप्रज्ञप्तिः' 'ज्योतिषकरण्डकम्' 'वसिष्ठसंहिता' 'नारदसंहिता' 'भृगुसंहिता' 'पराशरसंहिता' 'काश्यपसंहिता' च स्मर्यन्ते।

सूर्यप्रज्ञप्तिः

सूर्यप्रज्ञप्तिर्हि प्राकृतभाषायामाबद्धो ग्रन्थः। ग्रन्थस्यास्य मलयगिरिणा सत्कृतमाश्रित्य टीका प्रणीताऽस्ति। अत्र हि सूर्यस्य गमनं नमनमायुः परिवारः सङ्ख्या च निरूपिताः। सूर्यद्वयस्य कल्पना चन्द्रद्वयस्य च प्रत्येकं पृथक्पृथगष्टाविंशतिनक्षत्राणां कल्पना चास्य ग्रन्थान्तरेभ्यो वैशिष्टचम्। तयोरेकान्तरेण भ्रमणादेकत्वभानमुक्तम्। अत्रापि युगः पञ्चवर्षात्मक एव कथितः।

चन्द्रप्रज्ञप्तिः

चन्द्रप्रज्ञप्तेरपि सूर्यप्रज्ञप्तेरिव विषयाः किन्तु चन्द्रसम्बद्धाः। एतदनुसारेण हि सूर्यस्य प्रतिदिनं योजनात्मिका गतिर्भवति। छायाप्रमाणेन दिनमाननिर्द्धारणमस्य वैशिष्टचम्। अत्र चन्द्रमसो हि स्वयंरश्मित्वमुक्तं न तु सूर्यरश्मित्वम्।

ज्योतिषकरण्डकम्

ज्योतिषकरण्डके हि सन्ति ज्योतिषशास्त्रसम्बद्धविषयाः प्रतिपादिताः। ग्रन्थोऽयमनन्तरोक्तापेक्षया नितान्तमेवार्वाचीनः।

आचार्या हि ऋषिपुत्रं ज्योतिषाचार्यत्वेन स्मरन्ति यस्य ग्रन्थः साम-ज्योतिषमिव प्रलुप्तप्रायः। वाराहीसंहितायाष्टीकाकृद् भट्टोत्पलस्तं बहुशः स्मरति।

इतश्चोदेति ज्योतिषशास्त्रस्य पूर्वमध्यमकालो यत्र विविच्यते प्राधान्येन सिद्धान्तस्कन्धः।

प्रकरणसारः

अथात्रोपस्थाप्यते प्रकरणसारः पूर्वाचार्यमनुसृत्य। यद्धि शतपथब्राह्मणे (२।१।२) कृत्तिका आदायोक्तम् 'एता ह वै प्राच्यै दिशो न च्यवन्ते' इति तस्यायमेवाशयो यत्तदा कृत्तिका हि विषुववृत्तमाश्रित्य स्थिता आसन्। सम्प्रति तु ताः पूर्वविन्दुतः किञ्चिदुत्तरमुपसृत्य स्थिता दृश्यन्ते। तासामिदं स्थिति-परिवर्तनमयनगत्यैव। अयनगतिश्च प्रतिवर्षं पञ्चाशद्विकलाप्रमाणेन भवतीति सार्वत्रिकः सिद्धान्तः। तन्माने कृत्तिकानां क्रान्तिशून्यत्वं हि शककालतः ३०६८ तमवर्षपूर्वं सम्भवति। अयनगतेः प्रतिवर्षम् ४८ विपलामाने तु ततोऽपि १५० वर्षपूर्वं सम्भवति यद्धि कलिप्रारम्भसमयसंवादि। तेन हि शतपथब्राह्मणस्य भागस्यास्य रचनाकालः शककालतः ३१०० वर्षपूर्वमभित आपतति। कलिगत ३१७९ वर्षेषु शकयुगस्यप्रारम्भो मतः। (५०९०–१९११=३१७९)।

वेदेषु ब्राह्मणेषु च कृत्तिका आरभ्य नक्षत्रगणना लभ्यते। तेन हि तदा कृत्तिकासु सम्पातोऽभीष्टः। कृत्तिकासु सम्पातेन तदा तासां सायनभोगेन शून्येन भाव्यम्। शङ्करबालकृष्णानुसारेण १७७२ तमशकवर्षे तस्याः सायनभोगः ०।५७।५४।० आसीत्। अतः तेन वर्षेण शकपूर्व २३९८ तमेन भाव्यम्। नक्षत्राणां कृत्तिकादिगणनायास्तासां पूर्वस्यामुदयनमेव हेतुः। तत्संवादिकालश्च शककालतः २४००मितवर्षपूर्वमभितोऽनुमितः। ततः पूर्वमेव यजुर्वेदसंहिताकालः किन्तु न तथाऽतिदूरवर्ती तत्रापि कृत्तिका आरभ्य नक्षत्रगणनादर्शनात्। ऋक्संहिताकालस्तु ततोऽपि पूर्ववर्ती सम्भवतः सुदूरवर्ती तत्र कृत्तिकादिगणनो-ल्लेखाभावात्।

केचिद्वदन्ति यत्कृत्तिकाप्रभृतिनक्षत्राणां चैत्रादिमासानां च संज्ञा भारतीय-साहित्ये प्रवासत आयाता इति किन्तु शङ्करबालकृष्णस्तन्न मन्यते। तदनुसारेण नक्षत्राणां नामानि हि भारतीयसंस्कृतेः परिचायकानि। यथा कर्तनमिव स्थिताः कृत्तिका इति। अन्यापेक्षया रोहितवर्णेति रोहिणी। कथ्यते हि रोहिण्याद्याः सप्तविंशतिर्दक्षसुताश्चन्द्रेणोद्वाहिताः। तस्य रोहिण्यामेवानुरागातिशयेन दुःखिता अन्याः पित्रे स्वव्यथां निवेदयाञ्चक्रुः। स च जामातरं सर्वासु समानव्यवहाराय निर्दिदेश। तच्च चन्द्रो नानुमेने। तेन कुपितो दुहितृपिता चन्द्रमसं क्षयमवाप्नु-

हीति शशाप। तेन चन्द्रः कृष्णपक्षे क्षीणो भवतीति। एवमेव मृगशिरसो विषयेऽपि कथ्यते यत्प्रजापतिर्हि ब्रह्मा दुहितरं कामयामास। सा च लज्जिता मृगी भूत्वा प्रदुद्राव। ब्रह्माऽपि मृगो भूत्वा तामन्वधावत्। तञ्च निषिद्धकर्मपरं रुद्रोऽनुययौ धनुष्पाणिः। तेन स मृगशिरो भूत्वा तत्रैव स्वरूपेणैकेन भीतस्तिष्ठतीति। सैव रोहिणी। स एव मृगशीर्षमिति। (ऐत० १३।९, तैत्ति० १।१।१०।६। (सा तत ऊर्ध्वारोहत्। सा रोहिण्यभवत्)। अश्विनीविषयेऽप्युच्यते यत्सूर्यस्य पत्नी संज्ञा पतितेजोऽमितप्ता दूरमपासरत्। तां सविताऽन्वधावत्। सा च वडवा भूत्वा प्रदुद्राव। सोऽपि तेनैव रूपेण तामन्वगच्छत्। तावेवाश्विनाविति। इत्थं हि आख्यानादिसिद्धा नक्षत्रसंज्ञा न कथमपि विदेशागताऽपि तु स्वकीयैव। मासानां चैत्रादिसंज्ञाऽपि तथैव स्वकीया। शतपथब्राह्मणं हि द्विधा विभक्तं पूर्वोत्तरभागेन। आदितो दशमकाण्डपर्यन्तं पूर्वभागः शेषकाण्डान्युत्तरभागः। एवमुत्तरभागगते एकादशतमकाण्डे वैशाख्याममावास्यामादधीतेति वचनं लभ्यते (१।१।७)। तेन मासनामान्यपि अत्रत्यान्येवेति स्पष्टमेव। कौषीतकीब्राह्मणे (१९।२।३) तपस्यस्य माघस्य चोल्लेखो दृश्यते। एवमेव पञ्चविंशब्राह्मणेऽपि 'मुखं वा एतत्संवत्सरस्य यत् फाल्गुनः' इति फाल्गुनशब्दः प्रयुक्तो दृश्यते।

आर्तवसौरवर्षापेक्षया नाक्षत्रसौरवर्षो हि पञ्चाशत्पलया अधिको भवति। ऋतुर्हि आर्तवसौरवर्षे आधारितो भवति। सूर्ये सम्पातस्थेऽद्य य ऋतुर्भवति वर्षसहस्रानन्तरमपि तदा स एव ऋतुर्भवति किन्तु नाक्षत्रसौरवर्षे न तथा स्थितिः। कस्मिंश्चिन्नक्षत्रे स्थिते सूर्येऽद्य य ऋतुर्भवति द्वितीयपर्याये न तथैव स्थितिरपि तु किञ्चिद्भिन्नैव। तत्र हि द्विसहस्रवर्षेषु एकमासस्य चतुःसहस्रवर्षेषु द्विमासस्यैवान्तरं भवति। यथा हि अश्विनीगते सूर्ये यदि कस्मिंश्चित्पर्याये वसन्तः सम्पद्यते तत्र सपादसहस्रचतुष्कवर्षानन्तरं ग्रीष्मः सम्पद्यते सार्द्धाष्टसहस्रवत्सरानन्तरं वर्षा सम्पद्यते। अश्विनीतः प्रारभ्य पुनस्तत्रैवागमनाय सूर्यो यावन्तं कालमाददाति तदवधिको हि नाक्षत्रसौरवर्षः। सूर्येऽश्विन्यां प्राप्ते चन्द्रोऽपि पूर्णिमायां चित्रां प्राप्नोति। स एव चान्द्रो मासश्चैत्रः। चित्रानक्षत्रसम्बन्धादेव स मासश्चैत्रः। तदा हि यद्येकवारं वसन्तर्तुर्भवति चेत्तत्र सपादचतुःसहस्रवर्षानन्तरं ग्रीष्मः सम्पद्यते। तेन हि यदि चैत्रे वसन्तारम्भ एकदा भवति चेत्सार्द्धैकविंशतिशतवर्षपर्यन्तं तु स चैत्रे एव भवति। तदनु स फाल्गुने घटते। ततोऽपि सार्द्धैकविंशतिशतवर्षानन्तरं माघे एव घटते। इत्थं चैत्रे वसन्तारम्भोपक्रमात् सार्द्धचतुःसहस्रवर्षानन्तरं तत्र ग्रीष्मारम्भोपक्रमः सम्पद्यते। तेन हि चैत्रस्य वसन्तारम्भहेतुना प्रथममासत्वं द्विसहस्रवर्षपर्यन्तमेव स्थायि। शतपथब्राह्मणे चैत्रस्य प्रथममासत्वं तत्रैव वसन्तारम्भश्चोक्तः—'मधुश्च माधवश्च वसन्तर्तू' इति। समय-

क्रमेण वसन्तारम्भोऽपि पश्चादपसृतः। ततश्च फाल्गुनो हि मासः प्रथममासः सञ्जातस्तत्रैव वसन्तारम्भात्। साम्प्रतिककाले तु माघे एव वसन्तारम्भो भवति माघफाल्गुनौ हि वसन्तर्तू। एतेन हि चतुःसहस्रवर्षपूर्वं चैत्रादिगणना प्रवृत्तासीदिति ज्ञायते।

वर्षारम्भमधिकृत्य तिस्रः स्थितयो दृश्यन्ते तत्र तत्र। वर्षारम्भमादाय ऋग्वेदे मौनेऽपि यजुर्वेदः साक्ष्यं ददाति यद्वसन्तारम्भे एव वर्षारम्भो भवति वसन्तारम्भश्च चैत्रे एवेति। तैत्तिरीयब्राह्मणे तु स्पष्टमेव वसन्तो हि ऋतूनां मुखं मतः। उत्तरफाल्गुन्यां वसन्तस्य वर्षस्य चारम्भश्च निर्दिष्टस्तत्र। यथा—

'वसन्ते ब्राह्मणोऽग्निमादधीत। वसन्तो वै ब्राह्मणस्यर्तुः। मुखं वा एतदृतूनाम्। यद्वसन्तः। यो वसन्तेऽग्निमाधत्ते मुख्य एव भवति। न पूर्वयोः फल्गुन्योरग्निमादधीत। एषा वै जघन्या रात्रिः संवत्सरस्य यत्पूर्वे फल्गुनी। उत्तरयोरादधीत। एषा वै प्रथमा रात्रिः संवत्सरस्य यदुत्तरे फल्गुनी। मुखत एव संवत्सरस्याग्निमाधाय।............। (१।१।२)।

वेदाङ्गज्योतिषे स्पष्टत उत्तरायणारम्भादेव वर्षारम्भ उक्तः। महाभारते तु स्पष्टमेव मार्गे वर्षारम्भः कथितः किन्तु वसन्तर्तुस्तु चैत्रवैशाखयोरेव उत्तरायणञ्च माघे। कोषकारोऽपि तथैव मन्यते यदा स कथयति—

'मृगशीर्षं मृगशिरस्तस्मिन्नेवाग्रहायणी।'
'मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः।' इति।

'मासानां मार्गशीर्षोऽहमृतूनां कुसुमाकरः' इति कथयन्महाभारतं पुनस्तदेव द्रढयति। एतेन सिध्यति यन्न हि काचिद्राजाज्ञा यद्वसन्ते एव वर्षारम्भो भवत्विति। ऋतुविचारे वसन्तः श्रेष्ठो मासविचारे मार्गशीर्षः। वर्षारम्भस्तु तदुभयविलक्षण इति। प्राग्वैदिकसंहिताकाले मृगशिरसि सूर्ये प्राप्ते वर्षारम्भो मत आसीत्। मृगशिर्षस्यैवापरं नामाग्रहायणीति। आग्रहायणीयुक्ता पौर्णमासी आग्रहायणी यत्र मासे सा स नाम्ना आग्रहायणिको मास इति मार्गस्य आग्रहायणीयुक्तपूर्णिमायुक्तत्वेनैव आग्रहायणिकत्वं न तु प्रथममासत्वेनेति स्पष्टम्। न हि मासस्य प्राथम्यं वार्तोर्वर्षारम्भे हेतुरपि तु सूर्यस्योदगयनमेवेति तैत्तिरीयब्राह्मणस्य—'उत्तरयोरादधीत एषा वै प्रथमा रात्रिः संवत्सरस्य यदुत्तरे फल्गुनी। मुखत एव संवत्सरस्याग्निमाधाय........' इत्यादिवचनात् ज्ञायते। उत्तरायणमेव वर्षारम्भ इति वेदाङ्गज्योतिषादपि सिध्यति। तथाभूते सत्येव 'विषुवान् हि मध्ये संवत्सरं तिष्ठती'ति (ऐत० ब्रा० १८।१८। तैत्ति० ब्रा० १।२।४) कथनमपि सिध्यति। समरात्रिन्दिवः काल एव विषुवान् भवति। एवमेव तथ्यं निभाल्यैवोक्तं स्यात्—'उभयतो मुखमृतुपात्रं भवति। को हि तद्वेद यदृतूनां मुखम्'। (तै० सं० ६।५।३) इति।

मार्गशीर्षस्याग्रहायणिकत्वं प्राग्वैदिकसहिताकालस्मृत्येव न तु तात्कालिकत्वेन । महाभारत हि पञ्चमो वेदस्तद्वेदसम्मतं मार्गमनुसरतीति किमाश्चर्यं कामं तद्यदाकदाऽपि गुम्फितं स्यात् । अमरसिंहश्च कोषकारः परमवैदिकः । सोऽपि तदेवानुयातीति नाश्चर्यम् । यदा हि सूर्ये मृगशिरसि प्राप्ते उत्तरायणं प्रवर्तते स्म तदा मृगशिरसः आग्रहायणीत्वं मार्गस्य च आग्रहायणिकत्वं तद्युक्तपौर्णमास्यास्तस्मिन् मासे घटनात् । तत्सम्बन्धेन तस्याः प्रथमत्वेन गणना । वर्षमुखत्वं तु तस्यैव मासस्य यदा सूर्य उदगयनमालिङ्गति कामं स मार्गो हि स्यात् फाल्गुनो वाऽपि ।

ज्योतिषस्य सिद्धान्तस्कन्धः

प्राक्कथनम्

शकपूर्वपञ्चमशतकादारभ्य शकानन्तरषोडशशतकपर्यन्तं हि भारतीयज्योतिषशास्त्रविकासस्य मध्यमकालः । कालेऽस्मिन् ग्रहाणां मध्यमगतिः स्पष्टस्थितिः दिग्देशकालविवेकः ग्रहयुतिः ग्रहनक्षत्राणामुदयास्तमयविचारः चन्द्रशृङ्गोन्नतिः पातः भूस्थितिः मानानि चेत्यादिविषये कतिपये सिद्धान्ता निरूपिताः । अत एवायं सिद्धान्तकालसंज्ञयाऽपि ज्ञायते । अस्मिन्नेव काले ज्योतिषस्य होराताजिकमुहूर्तादिविषये च सिद्धान्ताः प्रतिपादिता व्याख्याताश्च । कालस्यास्य सिद्धान्तसंज्ञयाऽभिधानं तु प्राधान्येनैव । कालोऽयमपि सिद्धान्तप्रतिपादनतद्व्याख्यानाश्रयेण पूर्वोत्तरभागे विभक्तः । सूर्यसिद्धान्तमारभ्य ब्रह्मगुप्तपर्यन्तमस्य पूर्वमध्यमकालस्तदनु जयसिंहपर्यन्तकाल उत्तरमध्यमकालः । यद्यप्युत्तरमध्यमकालेऽपि प्रणीता अनेके सिद्धान्तविषयकमौलिकग्रन्थास्तथापि कालेऽस्मिन् व्याख्याया एव प्राधान्यात्स व्याख्याकालत्वेन गृहीतः । पूर्वमध्यमकाले आर्षः सूर्यसिद्धान्तः आर्यभटस्यार्यभटीयम् वराहमिहिरस्य पञ्चसिद्धान्तिका, ब्रह्मगुप्तस्य ब्राह्मस्फुटसिद्धान्तश्चोल्लेखनीयसिद्धान्तग्रन्थाः ।

वैदिकसाहित्ये वेदाङ्गज्योतिषे च योऽपि ज्योतिषविषयः प्रस्तुतः स तत्कालीनदृष्ट्या पर्याप्तोऽपि ग्रहाणां स्पष्टगतिस्थितिबोधनाय नालमिति तत्साधकतया सिद्धान्तग्रन्थानां तदपेक्षया वैशिष्ट्यम् । वेदाङ्गज्योतिषसिद्धान्तग्रन्थान्तरालवर्तिकालेऽपि सिद्धान्तभूमिकाव्याख्यातृग्रन्थैरपि भाव्यमेव । किन्तु ते सम्प्रति ज्ञानबाह्या एवास्माकम् । सिद्धान्तग्रन्थेषु वयमार्षत्वेन ख्यातं सूर्यसिद्धान्तग्रन्थमेव प्राथम्येन जानीमः । यद्यपि सूर्यमयसंवादमयस्य ग्रन्थस्य मौलिकं रूपं किमासीदिति वयं नैव जानीमः । सम्प्रति यो हि ग्रन्थस्तन्नाम्ना ख्यातः प्राप्यश्च स तु निश्चयमेव केनापि पश्चाद्भाविना विपश्चिता पूर्वप्रोक्तसिद्धान्तमाधारीकृत्य प्रणीत

इति स्पष्टमेव तस्य—'अल्पावशिष्टे तु कृते मयो नाम महासुरः' इत्यादि प्राग्भागवाक्यतः। केचित्तु सूर्यो नाम कश्चिदृषिरासीदित्यपि मन्यन्ते तत्त एव जानीयुः। वराहमिहिरो हि यं सूर्यसिद्धान्तं पञ्चसिद्धान्तिकायामनुवदति यानि सूर्यसिद्धान्तसम्बद्धानीति कानिचिद्वचनानि भट्टोत्पलो वराहमिहिरप्रणीत-'बृहत्संहिता' टीकायामुद्धरति तेषाञ्च सम्प्रति समुपलब्धे सूर्यसिद्धान्तेऽदर्शनात् ग्रन्थोऽयं मूलसिद्धान्तानुवाद एवेति निश्चिन्वन्ति विज्ञाः। किन्तु भास्कराचार्यो हि सिद्धान्तशिरोमणौ भगणोपपत्तिप्रसङ्गे—'अदृश्यरूपाः कालस्य मूर्तयो भगणाश्रिताः' इत्यादिपद्यद्वयं सूर्यसिद्धान्तगतत्वेन स्मरति तस्यात्र स्थितेः भास्करकाले ग्रन्थोऽयमीदृक्स्वरूप एवाऽऽसीदिति तु स्पष्टमेव। नायं मौलिको ग्रन्थ इति तु—'शास्त्रमाद्यं तदेवेदं यत्पूर्वं प्राह भास्करः' (१।९) इति कथनादेव ज्ञायते। सूर्यसिद्धान्तगतस्पष्टाधिकारः सूचयति यद्वेदाङ्गज्योतिषनिर्दिष्टस्थूलमानस्य सूक्ष्ममानस्यास्य चान्तराले कैश्चिदन्यैरपि मध्यमपथानुसारिभिर्ग्रन्थैर्भाव्यमिति। मौलिकं वाऽनूदितं यत्किमपि स्वरूपं सम्प्रत्युपलभ्यसूर्यसिद्धान्तग्रन्थस्य स्यादेत्ततु निश्चयमेव यत्सूर्यो हि ज्योतिर्विद्यायाः प्रतिष्ठापक आद्याचार्यश्च। तेन तन्नाम्ना ख्यातेन मतेन एतत्प्रकृतिकग्रन्थान्तरापेक्षया प्राचीनतमेन भाव्यमेव। तर्हि कियत्प्राचीनमित्यपेक्षायामुच्यते सूर्यसिद्धान्तनामकग्रन्थोपवर्णितो वराहमिहिरस्मृतोऽपि सूर्यसिद्धान्तः कथमपि वेदाङ्गज्योतिषकालान्नैव प्राचीनतर इति तु स्पष्टमेव विषयप्रतिपादनरीतिदर्शनेन। अस्य हि भास्कराचार्यात्तु प्राचीनत्वमेवेति निश्चितमेव। स्थूलानुमानेन मौलिकः सूर्यसिद्धान्तो वेदाङ्गज्योतिषानतिदूरानन्तरवर्तिकाले प्रतिपादित आसीदिति। वस्तुतस्तु वेदाङ्गज्योतिषोपवर्णितमध्यममानजनितासौकर्यापसारणायैवास्य प्रवृत्तिरिति सत्यमेवोच्यते। एवत्प्रागेवोक्तं यद् वेदाङ्गज्योतिषोक्तं वर्षादिमानं त्रुटिपूर्णमासीदिति। तत्र हि अयनारम्भस्य स्थिरत्वमुक्तमस्ति वस्तुतस्तु न तथा। यदि हि प्रथमपर्याये माघशुक्लप्रतिपदायामयनारम्भस्तदा द्वितीयपर्यये प्रायः ततो दिनचतुष्कात्प्रागेव भवति। एवमेव ९५ तमवर्षे द्विसप्ततिदिनेभ्यः प्रागेव भवत्ययनारम्भः। चान्द्रमासेऽपि पञ्चसु वर्षेषु ५४ घटिकाः न्यूना एव भवन्ति। तेन ह्यमावास्यापूर्णिमामाने पञ्चवर्षेषु एकदिवसस्यान्तरमुपजायते। वेदाङ्गज्योतिषपद्धत्यनुसारेण ९५ वर्षेषु ३८ अधिमासा भवन्ति किन्तु वस्तुतस्तु तेषां सङ्ख्या ३५ एवाभीष्टा अन्यथा हि शतत्रयवर्षे ऋतुत्रयस्यान्तरं घटते यद्धि नाभीष्टम्। वेदाङ्गज्योतिषगतैतादृशदोषापसारणाय तदैव सूक्ष्मचिन्तनमपि प्रारब्धमासीद्यस्य फलं सूर्यसिद्धान्त इति। पितामह-रोमक-पुलिश-वसिष्ठादिप्रोक्तानि पञ्चसिद्धान्तिकायां स्मृतानि लाटदेवादिभिर्व्याख्यातानि च मतान्यपि सूर्यसिद्धान्तान्नातिदूरानन्तरवर्तीनीति निश्चितमेव। एवमेव गर्गकश्यपनारदादिप्रोक्तानि ज्योतिषविषयकमतान्यपि तादात्यान्येव।

किन्तु दुर्भाग्यवशात्सम्प्रति तेषां मौलिकं स्वरूपं नास्माकं पुरतः। यच्च सम्प्रति नारदसंहिता पाराशरहोराशास्त्रं भृगुसंहिता काश्यपसंहिता चास्माकं पुरतः तदपि कैश्चिद्धि पश्चाद्वर्तिभिः सङ्ग्रहरूपेण सङ्कलितमेव येन तत्र तत्राधुनिकत्वमपि विन्यस्तं दृश्यते। तेनैषां पौर्वापर्ये वास्तविकप्रवचनकालविषये च वयं किमपि इदमित्थन्तया निश्चेतुमसमर्था एव। ज्योतिषस्य त्रिषु स्कन्धेषु विभाजनमपि स्पष्टतया वराहमिहिरादेव दृश्यते यदा स कथयति—

'ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितं
तत्कार्त्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता।
स्कन्धेस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः।' इति। (११९)

तस्य हि गणकेश्वरस्य सन्ति त्रयोदशग्रन्था अस्मज्ज्ञाताः येषु पञ्चसिद्धान्तिका जातकार्णवश्च सिद्धान्तपक्षं व्याख्यातः बृहज्जातकलघुजातकौ होराग्रन्थौ अन्ये संहिताविषयकग्रन्थाः।

शङ्करबालकृष्णः साधुः यदा स कथयति यत्कथं हि ज्योतिषशास्त्रं मध्यममानधरातलतः स्पष्टगतिस्थितिरूपोच्चस्थितिं प्राप्तमिति नास्माकं ज्ञातमिति। वेधं विना नैव सूक्ष्मज्ञानं सम्भवतीति कथं तैर्वेधः कृतः कथञ्च तस्य सूक्ष्मनिरीक्षणेन गतिमानं निश्चितमिति चास्माकं कृते महत्कुतूहलमेव।

तदत्र वयं यथाज्ञानं ज्योतिषसिद्धान्तस्कन्धस्य प्रसारे दृष्टिपातं कुर्मः। इदं तु पूर्वमेवोक्तं यज्ज्योतिषस्य ग्रहगतियुत्यादिविचारको भागः सिद्धान्तपदेनोच्यते इति। मध्यमाधिकारः स्पष्टाधिकारः दिग्देशकालेति त्रिप्रश्नाधिकारः ग्रहणाधिकारः छेद्यकाधिकारः ग्रहयुत्यधिकारः भग्रहयुत्यधिकारः उदयास्ताधिकारः चन्द्रश्रृङ्गोन्नत्यधिकारः पाताधिकारः भूगोलाध्यायः मानाध्यायश्च सिद्धान्तज्योतिषविवेच्यविषयाः सङ्क्षेपेण। गण्यते सङ्ख्यायते येन तद्गणितम्। तच्चतुर्विधव्यक्ताव्यक्तग्रहगोलभेदैः। तत्र व्यक्तेन सङ्कलनादिना यदुच्यते तद् व्यक्तं यावत्तावत्कालादिना सापेक्ष्यबुद्ध्या गणितमव्यक्तं ग्रहकर्मणा ग्रहगणितं गोलेन वेधादिना ग्रहकर्म सवासनं गण्यत इति गोलगणितमिति। तस्यैव निरूपकः सिद्धान्तः। यथोक्तम्—'व्यक्ताव्यक्तभगोलवासनमयः सिद्धान्त' इति। यथा वा—'यत्र कल्पादेर्ग्रहानयनं स सिद्धान्तः। यत्र युगवर्षायनर्तुमासपक्षाहोरात्रयाममुहूर्तनाडीविनाडीप्राणत्रुट्यादीना तथा सौरचान्द्रादिमासानां विवेकस्तिष्ठेत्स सिद्धान्तपदवाच्यः' इति। यथा वा—

'शतानन्दध्वस्तिप्रभृतित्रुटिपर्यन्तसमय-
प्रमाणं भूधिष्ण्यग्रहनिवहसंस्थानकथनम्।

ग्रहेन्द्राणां चाराः सकलगणितं यत्र गदितं
स सिद्धान्तः प्रोक्तो विपुलगणितस्कन्धविपुलैः ॥'

यथा वा—

'समयमितिरशेषा सावनं खेचराणां
गणितमखिलयुक्तं यत्र कुट्टाद्युपेतम् ।
ग्रहभगणमहीनां संस्थितिर्यत्र सम्यक्
स खलु मुनिवरिष्ठैः स्पष्टराद्धान्त उक्तः ॥'

तथा च—

'त्रुटचादिप्रलयान्तकालकलना मानप्रभेदः क्रमात्
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथासोत्तराः ।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः । इत्यादि ।

तस्य माहात्म्यं यथा सिद्धान्तशिरोमणौ—

जानन् जातकसंहिता सगणितस्कन्धैकदेशा अपि
ज्योतिःशास्त्रविचारसारचतुरप्रश्नेष्वकिञ्चित्करः ।
यः सिद्धान्तमनन्तयुक्तिविततं नो वेत्ति भित्तौ यथा
राजा चित्रमयोऽथवा सुघटितः काष्ठस्य कण्ठीरवः ॥'

अपि च—

'गर्जत्कुञ्जरवर्जिता नृपचमूरप्युर्जिताऽश्वादिकै-
रुद्यानं च्युतचूतवृक्षमथवा पाथोविहीनं सरः ।
योषित् प्रोषितनूतनप्रियतमा यद्वन्न भात्युच्चकैः
ज्योतिःशास्त्रमिदं तथैव विबुधाः सिद्धान्तहीनं जगुः ॥'

सिद्धान्तोऽयं मूलतो ग्रहगणितगोलभेदेन विचारितो दृश्यते ज्योतिर्विदो हि सिद्धान्तमपि द्विविधं मन्यन्ते प्राचीनमर्वाचीनञ्चेति । उभयत्र हि पञ्चसिद्धान्ताः सन्तीति प्राचीनसिद्धान्तपञ्चकमर्वाचीनसिद्धान्तपञ्चकमपीत्युच्यते । प्राचीन-सिद्धान्तपञ्चके हि वराहमिहिरेण पञ्चसिद्धान्तिकायां स्मृताः सूर्यपितामहरोमक-पुलिशवसिष्ठसिद्धान्ताः गृहीताः अर्वाचीनपञ्चके तु सूर्यसोमवसिष्ठरोमशब्रह्म-सिद्धान्ताः । सुर्यादीनामुभयत्र नामसाम्येऽपि सिद्धान्तभेदेन पृथङ्निर्देशः । प्राचीनपञ्चकस्य पृथग्ग्रन्थाः सम्प्रति नैवोपलभ्यन्ते केवलं तेषां कृतेऽस्माकं पञ्चसिद्धान्तिका एव शरणमर्वाचीनपञ्चकस्य सम्प्रत्यपि सन्ति पृथग्ग्रन्थाः । अर्वाचीनेष्वपि सूर्यवसिष्ठसिद्धान्तौ सम्प्रत्यपि प्रसारमालभेते । प्राचीनार्वा-चीनयोर्भेदो वर्षमानं ग्रहगतिमानञ्चाश्रित्य प्रवृत्तो दृश्यते ।

प्राचीनसिद्धान्तपञ्चकम्

प्राचीनपञ्चसिद्धान्ता यथा स्मरति वराहमिहिरः—

'पोलिशरोमकवासिष्ठसौरपैतामहास्तु पञ्चसिद्धान्ताः ।
पञ्चभ्यो द्वावाद्यौ व्याख्यातौ लाटदेवेन ॥' इति । (१।३)

तानधिकृत्य स एव कथयति—

'पोलिशकृतः स्फुटोऽसौ तस्यासन्नस्तु रोमकः प्रोक्तः ।
स्पष्टतरः सावित्रः परिशेषौ दूरविभ्रष्टौ ॥' (१।४) ।

तत्र सौरो हि अनुभवविषयः पोलिशकृतः दृक्प्रतीतिविषयः रोमकः ततः प्राचीन एव । पैतामहवासिष्ठौ तु नितान्तप्राचीनौ यदनुसारं न तदैव गगने ग्रहादीनां स्थितिरिति । यथोक्तम्—'सूर्य उवाच' इत्युपक्रम्य ।

'पैतामहञ्च सौरञ्च वासिष्ठं पौलिशं तथा ।
रोमकञ्चेति गणितं पञ्चकं परमाद्भुतम् ॥'

तत्र—'वेदैः सह समुद्भूतं वेदचक्षुः सनातनम् ।
रहस्यं वेदमध्यस्थं स्मृतवान् यत्पितामहः ॥
तेन पैतामहं ज्ञानमाद्यं तच्छ्रुतिसम्मतम् ।
तेन दत्तं स्वपुत्राय वसिष्ठाय महात्मने ॥'

....

'अंशावतरणे विष्णुर्यदा ब्रह्माणमादिशत् ।
स नाभिकमलोद्भूतं वेदैः सह चतुर्भुजम् ॥
ब्रह्मज्ञानमयं वेदमस्मै सन्दिश्य स प्रभुः ।
मामप्यादिष्टवान् सृष्टिनिमित्तं कालसिद्धये ॥
चक्षुर्भूतं तदा मह्यं सन्ददौ ज्ञानमुत्तमम् ।
तत्सौरमिति विख्यातं गणितं परमाद्भुतम् ॥'

... ...

'तन्मयाऽपि ममाऽप्येतत्तपसा तोषितेन च ।
आदिष्टं परमं ज्ञानं शिष्यभूतायसाधवे ॥'

... ...

'वासिष्ठञ्च वसिष्ठेन पुत्राय प्रतिपादितम् ।
पराशराय तेनाऽथ मुनिभ्यः कृतविस्तृतम् ॥'

....

'पौलिशं पुलिशेनोक्तं गर्गादिमुनिषु ध्रुवम् ।'

....

'रोमकं रोमकायोक्तं मया यवनजातिषु ।
जातेन ब्राह्मणः शापात्तथा दुर्यवनस्य च ॥
रोमके नगरे तच्च रोमकेण च विस्तृतम् ।
इति पञ्च पुराणानि गणितानि प्रचक्षते ॥'

पितामहो ब्रह्मा यं हि वेदमध्यं रहस्यं वसिष्ठाय प्रोक्तवान् सः पैतामहो हि सिद्धान्तः । स हि नितान्तप्राचीनः । इयमेवादाय ब्रह्मगुप्तः कथयति—

'ब्रह्मोक्तं यद्गणितं महता कालेन यत्खिलीभूतम् ।
अभिधीयते स्फुटं तज्जिष्णुसुतब्रह्मगुप्तेन ॥' इति ।

भास्कराचार्येणापि सिद्धान्तशिरोमणौ स एव स्वीकृतः । यथाह स एव—

'कृती जयति जिष्णुजो गणकचक्रचूडामणिः ।' इति ।

नारायणेन कालचक्रप्रवर्तनाय सूर्याय यदेवोपदिष्टं तदेवं सौरं शास्त्रम् तच्चार्यभटः स्मरति । ब्रह्मणोपदिष्टं गणितं स्वबुद्धियोगेन यद्वसिष्ठः पराशरायोपदिष्टवान् तद्वासिष्ठम् । वसिष्ठप्राप्तं यच्छास्त्रं पराशरो मुनिभ्यो गर्गादिभ्यः उपदिष्टवान् तत्पौलिशं पुलिशेनोक्तम् । यच्च रोमकाय यवनजातिषु ब्रह्मणः शापाज्जातेन सूर्येण प्रोक्तं तेन च रोमके नगरे विस्तारितं तदेव रोमकगणितमिति । अथैतेषां सङ्क्षेपेण परिचय उपस्थाप्यते ।

पितामहसिद्धान्तः

पितामहशास्त्रानुसारेण यथा पञ्चसिद्धान्तिकायामुक्तं रविशशिनोः पञ्च वर्षाणि युगं त्रिशद्भिर्मासैरधिमासः अह्नां त्रिषष्ठ्या अवमः (क्षयदिनम्) इति । (पञ्चसि० १२।१)

अहर्गणानयनविधिर्यथा—

'द्व्यूनं शकेन्द्रकालं पञ्चभिरुद्धृत्य शेषवर्षाणाम् ।
द्युमणं माघसिताद्यं कुर्याद् द्युगणं तदह्न्युदयात् ॥' (१२।२)

द्वाभ्यां रहितं शकं पञ्चभिरुद्धृत्य शकवर्षाणां पूर्वनियमानुसारेण अधिमासावमे कृत्वा माघशुक्लप्रतिपदादेर्द्युगणमहर्गणं कुर्यात् । तद् द्युगणमानमह्निदिवसे सूर्योदयाद्भवतीत्यर्थः । अत्र शककाल ग्रहणेन नेदमवधेयं यत्सिद्धान्तोऽयं तदनन्तरवर्तीति । व्यवस्थेयं वराहमिहिरस्याहर्गणानयनसौकर्याय ।

तिथिनक्षत्राद्यानयनप्रकारो यथा—

'सैकषष्टचंशे गणे तिथिर्भमार्कं नवाहतेऽक्ष्येर्कैः ।
दिग्रसभागैः सप्तभिरूनं शशिभं धनिष्ठाद्यम्' ॥ ३ ॥

स्वैकषष्टचंशसहितेऽहर्गणे तिथिर्भवति । अहर्गणे नवगुणिते ६१२ भक्ते धनिष्ठाद्यं रविभं तच्च सप्तभिरूनं चन्द्रभमिति ।

'प्रागर्द्धं पर्व यदा तदोत्तरातोऽन्यथा तिथिः पूर्वा ।
अर्कघ्ने व्यतिपाताः द्युगणे पञ्चाम्बरहुताशैः ॥ ४ ॥
द्व्यग्निनगेषूत्तरतः स्वमितमेष्यदिनमपि याम्यायनस्य ।
द्विघ्नं शशिरसभक्तं द्वादशहीनं दिवसमानम्' ॥ ५ ॥

इत्थं हि पैतामहं तन्त्रं सर्वमेव वेदाङ्गज्योतिषसंवादि । युगस्य पञ्चसंवत्सरात्मकत्वमहर्गणानयनं नक्षत्राणां धनिष्ठादिमानं दिवसमानानयनप्रकारश्चोभयोरेव समानः । गणितमिदं वेदाङ्गज्योतिषानतिदूरान्तरकालप्रोक्तमिति तेन स्पष्टमेव । यच्चाहर्गणानयनाय शककालप्रयुक्तस्तन्नेदमर्वाचीनयति । तत्तु वराहमिहिरेण गणनासौकर्याय प्रस्तुतं मूलेऽन्यदेवाऽऽसीदिति प्रकरणान्तरतो ज्ञायते । सम्प्रति हि सन्ति त्रयो ब्रह्मसिद्धान्ताः प्रचलिताः । ब्रह्मगुप्तकाख्यातब्रह्मसिद्धान्तः शाकल्योक्तब्रह्मसिद्धान्तः विष्णुधर्मोत्तरपुराणोक्तो ब्रह्मसिद्धान्तः । एतेषु हि ब्रह्मगुप्तप्रोक्त एव ब्रह्मसिद्धान्तः प्राचीनः । शाकल्योक्तब्रह्मसिद्धान्तस्त्वर्वाचीनसूर्यसिद्धान्तेन सह नितान्तसंवादी ।

पितामहसिद्धान्ते 'अधिमासस्त्रिंशद्भिर्मासैः' इति यदुक्तं तच्चिन्त्यं दृश्यते । तत्संशोधनाय 'अधिमासो द्व्यग्निसमैर्मासैः' इति भट्टोत्पलेन बृहत्संहिताव्याख्याने पाठान्तरं कल्पितम् । वस्तुतस्तु सार्धद्वात्रिंशन्मासानन्तरमेवाधिमासो घटते । तेन हि अत्र 'द्व्यग्निसमैर्मासैरि'ति पाठ एव मौलिक इति शङ्करबालकृष्णमतम् । वयमपि तदेव मन्यामहे ।

वासिष्ठसिद्धान्तः

ब्रह्मतः प्राप्तं ज्ञानं वसिष्ठः पराशराय यदूचिवांस्तदेव वासिष्ठगणितम् । वराहमिहिराचार्योऽमुमपि सिद्धान्तं दूरविभ्रष्टं निर्दिशति । सन्ति पञ्चसिद्धान्तिकायामेतत्सम्बद्धास्त्रयो दश गाथाः । अत्रापि पितामहशास्त्रे इव चन्द्रसूर्यविव गत्या विवेचितौ । अत्रत्या तिथिनक्षत्रानयनपद्धतिः राश्यंशकलामानानि च आधुनिकपद्धत्यपेक्षया विलक्षणानि । अत्र हि छायाविचारोऽधिकं निरूपितो दिनमानापेक्षया । वसिष्ठसिद्धान्तोऽपि प्राचीननवीनभेदेन द्विविधः । यथा स्मरति ब्रह्मगुप्ताचार्यः—

'पौलिशरोमकवासिष्ठसौरपैतामहेषु यत्प्रोक्तम् ।
तन्नक्षत्रानयनं नार्यभटोक्तं तदुक्तिरतः ॥' (१४।४६)
'अयमेव कृतः सूर्येन्दुपुलिशरोमकवसिष्ठयवनाद्यैः ।' (२४।१३)

अयमिति युगारम्भः ।

'युगमन्वन्तरकल्पाः कालपरिच्छेदकाः स्मृतावुक्ताः ।
यस्मान्न रोमके ते स्मृतिबाह्यो रोमकस्तस्मात् ॥' (१।१३)

एवमेव—

'लाटात्सूर्यशशाङ्कौ मध्याविन्दूच्चचन्द्रपातौ च ।
भुजबुधशीघ्रबृहस्पतिसितशीघ्रशनैश्चरान् मध्यान् ।
युगपातवर्षभगणान् वासिष्ठान् विजयनन्दिकृतपादान् ।
मन्दोच्चपरिधिपातस्पष्टीकरणाद्यमार्यभटात् ।
श्रीषेणेन गृहीत्वा रत्नोच्चयरोमकः कृतः प(क)न्था
यतान्येव गृहीत्वा वासिष्ठो विष्णुचन्द्रेण ॥' (११।४८-५०)

वासिष्ठाद्युगपातवर्षभगणान् गृहीत्वा विष्णुचन्द्रो वासिष्ठं सिद्धान्तं प्रोक्तवानित्यस्य कथनस्यायमेवार्थो यद्ब्रह्मगुप्तसमये आस्तां द्वौ वसिष्ठसिद्धान्तौ । तयोराद्यः पञ्चसिद्धान्तिकायां वराहमिहिरेण प्राचीनसिद्धान्तत्वेन वर्णितोऽपरस्तु सूर्यचन्द्रादिमध्यादीन् लाटदेवात् ('लाटदेवो हि पौलिशरोमकयोर्व्याख्यातृत्वेन वराहमिहिरेण स्मृतः' पञ्चसि० १।३) प्राचीनवासिष्ठाद्युगादीन् मन्दोच्चपरिधिपातस्पष्टीकरणादीन्यार्यभटात् गृहीत्वा विष्णुचन्द्रेण व्याख्यात इति । यतो हि आर्यभटान्मन्दोच्चपरिधिपातस्पष्टीकरणादीनि गृहीत्वा प्रोक्तं नवीनवसिष्ठगणितमतोऽस्य प्रणयनकाल ४२१ मितशकवर्षादर्वाचीन एव । सम्प्रति हि 'लघुवासिष्ठसिद्धान्त' नाम्ना प्रकाशितो ग्रन्थस्तदुभयविलक्षणः । सन्त्यत्र ९४ श्लोकाः । अस्य गणितमपि पञ्चसिद्धान्तिकोपवर्णितगणितापेक्षया नियमितं परिमार्जितञ्च ।

रोमकसिद्धान्तः

नारायणेन यत्सूर्याय प्रोक्तं तदेव रहस्यं ब्रह्मणः शापाद्यवनजातिषु जातेन सूर्येण यद्रोमकायोपदिष्टं यच्च रोमकेण रोमकनगरे विस्तारितं तदेव मौलिकं रोमकगणितमिति प्राञ्चः । रोमकसिद्धान्तो हि सिद्धान्तपञ्चाशिकायां वैशद्येन व्याख्यातः । दिङ्मात्रं यथा—

'सप्ताश्विवेदसङ्ख्यं शककालमपास्य चैत्रशुक्लादौ ।
अर्धास्तमिते भानौ यवनपुरे भौमदिवसाद्यः ॥' इत्यादि । १।८

रोमकसिद्धान्तोऽपि प्राचीनार्वाचीनभेदेन द्विविधः । प्राचीनो यथा वराहमिहिरप्रोक्तोऽर्वाचीनस्तु श्रीषेणसङ्गृहीतत्वेन ब्रह्मगुप्तेन स्मृतः । (ब्रह्म० ११।४८-५०) । वराहमिहिरो हि रोमकसिद्धान्तं हि पौलिशसिद्धान्तवत्स्फुटं मन्यते । सिद्धान्तोऽयमपि अहर्गणमेवाधारत्वेन गृह्णाति । यथा—

'रोमकसूर्यो द्युगणात् खतिथिघ्नात् पञ्चकर्तृपरिहीनात् ।
सप्ताष्टकसप्तकृतेन्द्रियोद्धृतात् मध्यमार्कः सः ॥' इत्यादिः ।

रोमकसिद्धान्तप्रसङ्गे यावन(ग्रीक)गणकः हिपार्कसाख्यः (सम्भवतः हिमार्कः हिमार्कस्, हितार्कः वा) स्मर्तव्य एव । तस्य समयः शकेन्द्रतः २२८

वर्षपूर्वमभितो मतः । तत्साधितवर्षमानं ३६५।१४।४८) रोमकवर्षमानेन सह संवदते । यच्च—

'रोमकं रोमकायोक्तं मया यवनजातिषु ।
जातेन ब्रह्मणः शापात् .... ।'

इति कथितं तद्धि हिपार्कसाख्यं गणकमादायैव चरितार्थमपि सम्भवति। हिपार्कससिद्धान्ते सूर्याचन्द्रमसावेव विवेचितौ यद्धि प्रायेण सर्वेष्वेव प्राचीन-सिद्धान्तेषु दृश्यते । शकेन्द्रसमकालिकः टालमी (तालमणिः ?) हिपार्कस-मुपजीवति ग्रहसाधने । सम्भवति पूर्वीयरोमकसिद्धान्तोऽपि तमेवानुगच्छेत् । हिपार्कसो हि यवनखगोलविद्याया उन्नायकः । तेन हि सौरगतिः तस्या असङ्ग-तयः आनतिः पाताः भूम्युच्चः इत्यादिविषये चन्द्रकक्षाविषये च नवीन आविष्कारः कृतः । तेन हि गोलीयत्रिकोणमितिरप्याविष्कृता तथा गोलस्य समतलोपरि प्रक्षेपा अपि आविष्कृताः । तदनुसारेण ग्रहाणां गतिर्वृत्तीया भवति । तेन हि दृश्यगत्या सह वृत्तीयगत्याः सम्बन्धनाय अधिचक्राणामुत्केन्द्रा-णाञ्चाश्रयो गृहीतः स्वपूर्ववर्तिनं रेखागणिताचार्यं खगोलज्ञम् 'एपोलोनियसः' (अपलावण्यः ?) इति नाम्ना प्रसिद्धमाचार्यमनुसृत्य । स हि तस्मादेकशतक-पूर्ववर्ती । तेन हि विषयान्तरातिरिक्तं चन्द्रग्रहणमधिकृत्यापि सिद्धान्ताः प्रति-पादिताः । तेन विषुवायनाविष्कारेण सह तद्गणनाप्रणाल्यप्याविष्कृता । तेन हि १०८० तारकाणां सारिणी प्रणीता यत्र भोगाङ्कानां शराणाञ्च माध्यमेन तारकाणां स्थानमपि सुनिश्चितमासीत् । एतदपि विश्वस्यते यद् हिपार्कस-सिद्धान्तः शकेन्द्रकालात्प्रागेव पूर्वीयदेशमनुप्रविष्टः । सम्भवतस्तथ्यमेवेदम्—

'युगमन्वन्तरकल्पाः कालपरिच्छेदकाः स्मृतावुक्ताः ।
यस्मान्न रोमके ते स्मृतिबाह्यो रोमकस्तस्मात् ।'

इति कथनेन ब्रह्मगुप्तः सङ्केतयति । रोमकसिद्धान्तव्याख्यानाय शङ्कर-बालकृष्णः नववर्षमानानि तुलनात्मकाध्ययनायोपन्यस्यति । यथा—

वेदाङ्गज्योतिषानुसारेण	वर्षमानं	३६६।०।०।०।० ।
पितामहसिद्धान्तानुसारेण	,,	३६५।२१।२५।०।० ।
वासिष्ठसिद्धान्तानुसारेण	,,	३६६।०।०।०।० ।
पुलिशसिद्धान्तानुसारेण	,,	३६५।१५।३०।०।० ।
सूर्यसिद्धान्तानुसारेण	,,	३६५।१५।३१।३०।० ।
रोमकसिद्धान्तानुसारेण	,,	३६५।१४।४८।०।० ।
अर्वाचीनसूर्यादिसिद्धान्तानुसारेण	,,	३६५।१५।३१।३१।२४ ।
द्वितीयार्यसिद्धान्तानुसारेण	,,	३६५।१५।३१।१७।६ ।

राजमृगाङ्कानुसारेण वर्षमानं ३६५।१५।३१।१७।१७$\frac{3}{5}$ ।
करणकुतूहलानुसारेण ,, ३६५।१५।३१।१७।१७$\frac{3}{5}$ ।

रोमकसिद्धान्तसम्मतमाने इतरमानापेक्षया नितान्तपार्थक्येन न्यूनसङ्ख्यया च तस्यार्वाचीनत्वं सिध्यतीति ।

पौलिशसिद्धान्त

पाराशरं हि ज्ञानं पुलिशाख्येन मुनिना यद्गर्गादिभ्य उक्तं तदेव पौलिश-गणितमिति प्रसिद्धम् । पञ्चसिद्धान्तिकाकारः पौलिशसिद्धान्तं स्पष्टं मन्यते । सिद्धान्तोऽयं पञ्चसिद्धान्तिकायां बहुत्र व्याख्यातः । दिङ्मात्रं यथा—

'रुद्रघ्नः सममुशरो लब्धोनो गुणखसप्तभिर्द्युगणः ।
रोमकसिद्धान्तोऽयं नातिचिरे पौलिशेऽप्येवम् ।' इति ।

अत्र रोमकपौलिशसिद्धान्तयोरहर्गणे साम्यं दृश्यते । सिद्धान्तेऽस्मिन् सूर्य-चन्द्रातिरिक्तग्रहाणामपि वक्रत्वादिनिर्दिष्टं प्रतिभाति 'पौलिशसिद्धान्ते तारा ग्रहा एवम्' इति कथनेन । पलभातश्चरखण्डानयनं चरखण्डतो दिनमानानयनञ्च निर्दिष्टं तत्र । तत्र देशान्तरमपि विचारितं सम्यक् । तत्र तिथिनक्षत्रानयन-पद्धतिश्च वर्तमानपद्धताविव निर्दिष्टाऽस्ति । करणमपि निरूपितं तत्र । चर-खण्डा यथा—

'यवनाच्चरजा नाड्यः सप्तावन्त्यास्त्रिभागसंयुक्ताः ।
वाराणस्यां त्रिकृतिः.............................. ।'

इत्यादि पौलिशो हि सिद्धान्तो लाटदेवेन व्याख्यात इति वराहमिहिर-साक्ष्येण ज्ञायते । भट्टोत्पलोऽपि बृहत्संहिताटीकायां पोलिशसिद्धान्तसम्बद्धत्वेन कानिचित्पद्यानि समुद्धरति किन्तु तानि नैव पञ्चसिद्धान्तिकासंवादीनि । तत्र तत्र भगणमानप्रभृतिविषयो निरूपितः । शङ्करबालकृष्णमहोदयस्तान्यक्षरशः उद्धरति स्वकीये भारतीयज्योतिषग्रन्थे । (हि० अ० पृ० २२५) । पौलिश-सिद्धान्तो हि पञ्चसिद्धान्तिकायां प्रतिव्याख्यातो भट्टोत्पलेन समुद्धृतः इति द्विविधस्तु दृष्ट एव । अलबेरुनिः (सम्भवतः आर्कावरुणिः) यो हि १०१७ खीष्टाब्दतः १०३० खीष्टाब्दपर्यन्तं भारतमध्यवात्सीत् कथयति यत्पौलिशो हि सिद्धान्तः पौलशाख्येन यवनेन प्रणीतः पश्चाद्भारतमनुप्रविष्ट इति । सम्भवतः वराहमिहिराचार्यस्य—

'पोलिशकृतः स्फुटोऽसौ तस्यासन्नस्तु रोमकः प्रोक्तः ।
स्पष्टतरः सावित्रः परिशेषौ दूरविभ्रष्टौ ।'

इति कथने तथैव लाटदेवेन पोलिशरोमकयोरेकत्र व्याख्यानाच्च तदपि नामूलम् । यद्यपि ब्रह्मगुप्तो रोमकमेव स्मृतिबाह्यं मन्यते तथापि पौलिशमपि न तथा प्रशंसति । सम्भवति ब्रह्मगुप्तसमयात्प्रागेव लाटदेवेन वा केनापि पौलिश-

सिद्धान्ते युगमानमनुनिहितमपि येन ब्रह्मगुप्तस्तं स्मृतिबाह्यं न मन्यते । स्मृतिसंवादियुगादिमानभाव एव स्मृतिसम्मतत्वे तत्राधारः । सम्भवति हितार्कस्य (हिपार्कसस्य) अनेकेषु शिष्येषु पोलसोऽप्येक आसीत् यस्यानुवर्तिनः सम्प्रति पोलैण्डदेशे निवसन्ति । ते हि सम्प्रति पोलिशशब्देनैव ज्ञायन्ते । रोमकसिद्धान्तात्प्रागेव पौलिशसिद्धान्तो भारतमागनस्तेन तत्र युगादिमानमनुप्रविष्टमिति । तथ्यं यत्किञ्चिदपि स्यादेतत्तु निश्चयेन वक्तुं शक्यते यत् पौलिशरोमकसिद्धान्तौ हि प्रायः समदेशिकौ समकालिकौ च । एतदपि सम्भवति यद् गर्गो मुनिर्हि पौलिशाच्छास्त्रमिदमधीत्य भारते प्रचारितवान् । यथा हि गर्गवचनम्—'म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम् ।' इति वराहेण स्मर्यते । सोऽपि यवनानां ज्योतिषविषयकज्ञानं मुग्धकण्ठतया प्रशंसति स्मरति तान् यत्र तत्र 'प्राहुर्यवनाः' इत्यादिकथनैः ।

सूर्यसिद्धान्तः

पञ्चसिद्धान्तिकायां सूर्यसिद्धान्तः स्पष्टतरसिद्धान्तत्वेन गृहीतः । प्रागेव प्रतिपादितमेतद्यत्सूर्यसिद्धान्तोऽपि त्रिविधः स्मर्यते यत्र तत्र । तत्रैक आर्ष पैतामहवासिष्ठसमकालिको द्वितीयस्तु वराहमिहिरेण पञ्चसिद्धान्तिकायां वैशद्येन व्याख्यातस्तृतीयश्चार्वाचीनः सूर्यसिद्धान्ताख्यग्रन्थे प्रस्तुतः । तत्राद्यविषये तु वयं नितान्तमेवाज्ञाः । ज्योतिषशास्त्रे सूर्यो हि यत्र तत्र स्तुतस्तु दृश्यते ज्योतिषामधिपत्वेन सिद्धान्तप्रवक्तृत्वेन वेति तु नैव निश्चेतुं शक्यते । कथ्यते हि विष्णुर्हि भगवान् सूर्यं यत्कालचक्ररहस्यं सृष्टयादावुपदिदेश तदेवाद्यं सौरगणितमिति । यच्च गणितं वराहमिहिरः स्मरति तत्तस्यैव विकसितं रूपम् । यत्तु सूर्यमयासुरसंवादरूपग्रन्थे लभ्यते तत्तु तस्मादप्यर्वाचीनमिति तज्ज्ञानां मतम् । ब्रह्मगुप्तो हि मयमपि गणिताचार्येषु गणयतीति साम्प्रतिकसूर्यसिद्धान्तग्रन्थस्यापि ब्रह्मगुप्तप्राग्वर्तित्वं तु मन्तव्यमेव ।

सूर्यसिद्धान्तो हि न केवलं चन्द्रसूर्ययोरेव यथा सिद्धान्तान्तरेऽपितु सर्वेषामेव ग्रहाणां गत्यादिकं निरूपयति । अस्य हि दृक्प्रतीतिविषत्वमेवास्य स्पष्टतरत्वे हेतुः । तेनैवोक्तं पञ्चसिद्धान्तिकाया स्पष्टतरः सावित्र इति । अथात्र पञ्चसिद्धान्तिकामनुसृत्य सिद्धान्तस्यास्य कतिपये पक्षा उपस्थाप्यन्ते । अधिमासानयनं यथा—

'वर्षायुते धृतिघ्ने नववसु गुणरसरसाः स्युरधिमासाः ।
सावित्रे शरनवखेन्द्रियार्णवाशान्तिविप्रलयाः ॥' (१।१४)

वर्षमानानयनं तथा—

'एष निशाऽर्धेऽवन्त्यां ताराग्रहणेऽर्कसिद्धान्ते ।
तत्रेन्दुपुत्रशुक्रौ तुल्यगतौ मध्यमार्केण ॥ १ ॥

जीवस्य शताभ्यस्तं द्वित्रियमाग्नित्रिसागरैर्विभजेत् ।
द्युगणं कुजस्य चन्द्राहतं तु सप्ताष्टषड्भक्तम्' ॥ २ ॥

सूर्यसिद्धान्तानुसारेण ३६५।१५।३१।३० मितं हि वर्षमानं मध्यरात्रितो युगारम्भश्च ।

इतरे

एते हि पञ्चसिद्धान्तिकायां व्याख्याताः सिद्धान्ताः । एतदतिरिक्तं व्यासगर्गपराशरनारदादिसम्मतसिद्धान्ता अपि यत्र तत्र स्मृता दृश्यन्ते किन्तु न कश्चित् सैद्धान्तिकविषयो ग्रन्थस्तेषां सम्प्रति समुपलब्धः । सम्प्रति समुपलभ्याः गर्गपराशरनारदादिसंहिताः संहिताग्रन्था एव न तु सिद्धान्तग्रन्थाः । सोमसिद्धान्तोऽपि यत्र तत्र स्मृतो दृश्यते । आर्यभटो हि पाराशरसिद्धान्तं स्मरति ब्रह्मगुप्तश्च सोमसिद्धान्तम् । यथा—

'अयमेव कृत सूर्येन्दुपुलिशरोमकवसिष्ठयवनाद्यैः । इति । (२४।३)

सिद्धान्तेष्वेतेषु मानादौ फलसंस्कारादौ चान्तरं दृश्यन्ते । यथा हि वराहमिहिरसम्मतसूर्यसिद्धान्तानुसारेण वर्षमानं हि ३६५।१५।३१।३०।० यदाऽर्वाचीनसूर्यसिद्धान्तानुसारेण तु तत् ३६५।१५।३१।१५।४८ एव । एवमेवान्यस्मिन् विषयेऽपि । यथा—

एकस्मिन् महायुगे (४,३२,०००० वर्षेषु)

प्राचीनसूर्यसिद्धान्तानुसारेण		अर्वाचीनसूर्यसिद्धान्तानुसारेण
१५८२२३७८००	नक्षत्रभ्रमाः	१५८२२३७८२८
४३२००००	रविभगणाः	४,३२,००००
१५७७९१७८००	सावनदिनानि	१५७७९१७८२८
५७७५३३३६	चन्द्रभगणाः	५७७५३३३६
४८८२१९	चन्द्रोच्चभगणाः	४८८२०३
२२९६८२४	मङ्गलभगणाः	२२९६८३२
१७९३७०००	बुधभगणाः	१७९३७०६०
३६४२२०	गुरुभगणाः	३६४२२०
७०२२३८८	शुक्रभगणाः	७०२२३७६
१४६५६४	शनिभगणाः	१४६५६८
५१८४००००	सौरमासाः	५१८४००००
१५९३३३६	अधिमासाः	१५९३३३६
५३४३३३३६	चान्द्रमासाः	५३४३३३३६
१६०३०००८०	तिथयः	१६०३०००८०

२५०८२२८०	क्षयाहाः	२५०८२२५२
३६५।१५।३१।३०।०	वर्षमानम्	३६५।१५।३१।१५।४८
—	चन्द्रकेन्द्राणि	५७२६५१३३
—	चन्द्रपाताः	२३२२३८

अर्वाचीनसिद्धान्तानुसारेण उच्चभगणा पातभगणा ग्रहाणां यथा—

ग्रहाः	सूर्यः	भौमः	बुधः	गुरुः	शुक्रः	शनिः
उच्चभगणाः	३८७	२०४	३६८	९००	५३५	३९
पातभगणाः	—	२१४	४८८	१७४	९०३	६०

(सङ्ख्याऽत्र शङ्करबालकृष्णस्य भारतीयज्योतिषतो गृहीता)

आधुनिकसूर्यसिद्धान्तः

आधुनिकं हि सूर्यसिद्धान्तं प्राय आर्यभटमनुसरति। अर्वाचीनसिद्धान्तपञ्चकमपि न ब्रह्मगुप्ततोऽर्वाचीनम्। ब्रह्मगुप्तस्य स्थितिकालः ५२० मितशकाब्दमभितोऽनुमितः। यच्च वेटलीमहाशयः अर्वाचीनसूर्यादिसिद्धान्तप्रोन्नयनकालं १०१३ मितशकाब्दमभितः द्वितीयार्यसिद्धान्तं १२१० मितशकाब्दमभितः पाराशरसिद्धान्तकालञ्च १३०६ मितशकाब्दमभितः इत्यनुमाति तन्न समीचीनम्। द्वितीयार्यसिद्धान्तो हि निश्चयमेव १०७२ मितशकाब्दात् प्राचीन एव यतस्तत्रत्यं तथ्यं सिद्धान्तशिरोमणावुद्धृतं दृश्यते। शङ्करबालकृष्णमतेन पञ्चसिद्धान्तिकोक्तसूर्यसिद्धान्तः प्रथमार्यभटादपि नितान्तप्राचीनः। केचिद्धि लाटाचार्यं सूर्यसिद्धान्तस्य प्रणेतृत्वेन गृह्णन्ति सूर्यसिद्धान्तसम्मतभगणमानस्य लाटाचार्यग्रन्थेन संपादित्वमेव तथाचिन्तने हेतुः। लाटदेवो हि वराहमिहिरपूर्ववर्ती। यथा स एव स्मरति द्वावाद्यौ व्याख्यातो लाटदेवेन। इति (पञ्चसि० १।३)। यदि हि वर्तमानसूर्यसिद्धान्तो लाटदेवेन गुम्फितोऽभविष्यत् तदा स वराहमिहिरेण स्मृतोऽभविष्यत्। तथाप्येतावत्तु निश्चितमेव यत्तत्रत्यानि भगणादि मूलतत्त्वानि ४२७ मितशकवर्षात्प्राचीनान्येव। आधुनिकसूर्यसिद्धान्तो हि लाटाचार्येण गुम्फितः स्याद्वा न वा एतावत्तु निश्चितमेव यत्ते षडेव सिद्धान्ताः ब्रह्मगुप्तकालात्प्रागेव प्रचलिता आसन्। तेन हि तेषां प्रणयनं शकेन्द्रपञ्चमशतकादर्वाचीनं तु कदापि न सम्भवति।

प्रस्तुते हि सूर्यसिद्धान्ते सन्ति चतुर्दशाधिकाराः **मध्यम-स्पष्ट-दिग्देशकाल-छेद्यक-चन्द्रग्रहण-सूर्यग्रहण-ग्रहयुति-भग्रहयुति - उदयास्त - चन्द्रशृङ्गोन्नति - पात-भूगोल-ज्योतिषोपनिषद्मानसंज्ञकाः**। मध्यमाधिकारे युगमानं कल्पमानं वा भगणभभ्रमचान्द्रमासाधिमासावम-सौरवर्ष-ग्रहध्रुव-परमशरांशादिविषयाः निरूप्यन्ते। वस्तुतस्तु मध्यमाधिकारे ग्रहाणां मध्यमस्थितिर्वर्ण्यन्ते। स्पष्टाधिकारे

ग्रहाणां तात्कालिकी स्थितिर्वर्ण्यते। भगणभ्रमादिमानं लाटदेवतः शेषविषयश्च पञ्चसिद्धान्तिकात एवादाय सिद्धान्तोऽयं ख्यापित इत्यनुमीयते। रोमकवासिष्ठ-सिद्धान्तयोरपीयमेव स्थितिः। वस्तुतस्तु सूर्यसिद्धान्ते विविधेषु संस्करणेषु श्लोकसाम्यमपि न दृश्यते। भट्टोत्पलेन सूर्यसिद्धान्तसम्बद्धत्वेनोद्धृताः कतिपये श्लोका अपि सूर्यसिद्धान्तग्रन्थे नैवोपलभ्यन्ते। तथैव मध्यमाधिकारे कतिपयेषु संस्करणेषु साम्प्रतिकसंस्करणमुद्रितषष्ठसप्तमश्लोकयोर्मध्येऽधोनिर्दिष्टः श्लोको लभ्यते—

'तस्मात्त्वं स्वां पुरीं गच्छ तत्र ज्ञानं ददामि ते।
रोमके नगरे ब्रह्मशापान्म्लेच्छावतारधृक्॥' इति।

एतेन प्रसङ्गेन सूर्यसिद्धान्तस्य रोमकसम्प्रदायसम्बद्धता दर्श्यते। केचन मयासुरं टालमीतोऽभिन्नं मन्यन्ते। किन्तु सूर्यसिद्धान्तसम्मतभगणादिमानैः सह टालमीपरिगणितमानस्य कीदृशस्यापि सम्बन्धस्याभावात्तन्निर्मूलमिति शङ्करबालकृष्णमतम्।

साम्प्रतिकसूर्यसिद्धान्तग्रन्थो हि स्यात्प्राचीनऽर्वाचीनो वा तस्य सिद्धान्तज्योतिषस्य करणग्रन्थेषु दृश्यते सुमहत्प्रभावः। अस्य परमोपयोगित्वमाश्रित्यैवास्य प्रणीता अनेकैर्विपश्चिद्भिरनेके टीकाग्रन्थाः। तेषु रङ्गनाथस्य गूढार्थप्रकाशिका (१५२५ शा०) नृसिंहदैवज्ञस्य सौरभाष्यं (१५४२ शा०) विश्वनाथस्य गहनार्थप्रकाशिका (१५५० शा०) दादाभाई इत्येतस्य किरणावली (१६४१ शा०) भूधरस्य भूधरीटीका (एवमेव आर्यभट-मम्मट-मल्लिकार्जुन-येल्लया-तन्मयादिभिः प्रणीताष्टीका एतास्तु श्रुता एव न तत्त्वतो ज्ञाताः। सुधाकरस्य सुधावर्षिणी कपिलेश्वरस्य श्रीतत्त्वामृतश्च प्रसिद्धाः।

सोमसिद्धान्तः

चन्द्रमसा हि शौनकायोपदिष्टं तच्छिष्यपरम्परासन्धारितं सिद्धान्तं सोमसिद्धान्तशब्देन ज्ञायते। एतद्ग्रन्थो दशाध्यायेषु विभक्तः सन्ति च तत्र ३३५ श्लोकाः। ब्रह्मगुप्तो हि प्रदूषणं विनैव सोमसिद्धान्तं स्मरतीति सिद्धान्तस्यापि प्राचीनत्वं त्वविहतमेव कमलाकरोऽपि—

'ब्रह्मा प्राह च नारदाय हिमगुर्यच्छौनकायामलं
माण्डव्याय वसिष्ठसंज्ञकमुनिः सूर्यो मयायाह यत्।'

इत्युक्त्वाऽमुं स्मरति। वस्तुतस्तु सिद्धान्तोऽयं वर्तमानसूर्यसिद्धान्तेन सह नितान्तसंवादीनि तद्वैशिष्ट्यमेवास्य वैशिष्ट्यम्।

आधुनिकवासिष्ठसिद्धान्तः

वसिष्ठसिद्धान्तग्रन्थौ सम्प्रति द्विविधौ लभ्येते केवलं स्वरूपभेदेन। एकस्मिन् ग्रन्थे सन्ति तत्र पञ्चाध्यायाः चतुर्णवतिश्लोकाश्च। ग्रन्थोऽयं कमलाकरेणाऽपि

स्मृतः वसिष्ठमाण्डव्यसंवादरूपः। रङ्गनाथो हि लघुवसिष्ठसिद्धान्तं वृद्धवसिष्ठसिद्धान्तञ्च स्मरति। स हि ततो ग्रहणविषयकौ उपजातिच्छन्दो गुम्फितौ द्वौश्लोकावुद्धरति। साम्प्रतिकग्रन्थस्त्वनुष्टुब्छन्दस्येव वर्तते। अपरश्च मध्यमाधिकारमात्रविषयः। स चात्मानं वृद्धवसिष्ठसम्बद्धमुद्घोषयति चरमे वाक्ये कथयति चादौ शास्त्रमिदं वसिष्ठेन वामदेवाय प्रोक्तमिति। तदित्थं हि वसिष्ठेन पराशराय प्रोक्तं तेन वामदेवाय प्रोक्तं तेनैव माण्डव्याय प्रोक्तमिति दृश्यन्तेऽस्य त्रीणि प्राक्कथनानि।

आधुनिकरोमशसिद्धान्तः

रोमशसिद्धान्तमधिकृत्य कथ्यते यद्विष्णुर्हि यज्ज्ञानं वसिष्ठाय रोमशाय चोपदिष्टवांस्तदेव रोमशेन व्याख्यातं रोमशसिद्धान्ताऽऽख्यमिति। लोमशो हि ऋषिः पुराणेषु प्रसिद्धः। रो(लो)माणि(नि) सन्त्यस्येति मत्वर्थीयः शः। रोमशसिद्धान्तग्रन्थे सन्त्येकादशाध्यायाः अनुष्टुब्वृत्ते गुम्फिताः ३७४ श्लोकाः। सिद्धान्तो भगणभभ्रमादिविषये सूर्यसिद्धान्तसंवादी। नायं ग्रन्थः कुत्राऽप्युद्धृतो दृश्यते इति तज्ज्ञाः। अत्र प्रयुक्तो नवार्थे नन्दशब्दः भौमार्थे आरशब्दाश्चास्यार्वाचीनत्वं सूचयति।

शाकल्योक्तब्रह्मसिद्धान्तः

शाकल्योक्तो विष्णुधर्मोत्तरीयव्याख्यातः ब्रह्मगुप्तप्रतिपादितश्चेति ब्रह्मसिद्धान्तोऽपि त्रिः प्रस्तुतो दृश्यते। तत्र शाकल्यप्रोक्तब्रह्मसिद्धान्तग्रन्थे सन्ति षडध्यायाः ७६४ श्लोकाश्च। कथ्यते हि ब्रह्मा नारदाय यज्ज्ञानमुपदिष्टवान् तदेवायं सिद्धान्त इति। रङ्गनाथो हि सूर्यसिद्धान्तस्य गूढार्थप्रकाशिकाटीकायां यत्र कुत्र 'शाकल्योक्ते' इति क्वचन तु 'ब्रह्मसिद्धान्ते' इति चोल्लिख्य सिद्धान्तमेनं स्मरति। कमलाकरभट्टश्च सिद्धान्ततत्त्वविवेके 'ब्रह्मा प्राह च नारदाय' इत्युक्त्वा सिद्धान्तमिमं स्मरति। अस्यापि भगणभभ्रमादिमानानि सूर्यसिद्धान्तसंवादीनि। अत्र गणितातिरिक्तमपि तिथिविशेषनिर्णयादिविषया अपि समुपन्यस्ताः। तत्र ज्योतिषशास्त्रमष्टधानिर्गतमित्युक्तम्। यथा—

'एतच्च मत्तः शीतांशोः पुलस्त्याच्च विवस्वतः।
रोमकाच्च वसिष्ठाच्च गर्गादपि बृहस्पतेः।
अष्टधा निर्गतं शास्त्रम्···· ···· ···· ···· ····.···· ।।' १।९-१०।

मत्त इति शाकल्यात्। सम्भवति पुलस्त्यप्रोक्तः सिद्धान्तो पौलिश एव यद्यपि पोलिशशब्दोऽपि द्विस्त्रिर्वा प्रयुक्तो दृश्यते तत्र। तत्रत्यं हि—

'तस्मात्पञ्चसु सिद्धान्तेषूक्तमार्गेविचार्यताम्' (१।९०) इति कथनेनाऽस्य शाकल्यशास्त्रस्य सिद्धान्तपञ्चकान्तरवर्तित्वं सूच्यते। अस्य हि 'प्रमाथि

प्रथमं वर्षं सौरं कल्पस्य सर्वदा' इति कथनमाश्रित्य संवत्सरगणनायां बार्हस्पत्यमानस्थाने सौरमानाधारेण शकानन्तर ७४३ वर्षानन्तरमेवास्य प्रणयनमिति शङ्करबालकृष्णमतमस्माभिरप्यनुगतम्। सप्तर्षीणामपि शरभोगोऽस्य सिद्धान्तस्य वैशिष्टयं यद्धि सिद्धान्तान्तरे नैव दृष्टम्।

इत्थं हि येऽपि सिद्धान्ताः पूर्वं विवेचितास्तेषां सूर्यसिद्धान्त एव परं प्रमाणमिति समष्टया तेषां कृतेऽपि सौरशब्दव्यवहारः, ज्योतिषशास्त्रे हि दृश्यन्ते त्रयः पक्षाः सौरः आर्यभटीयः ब्राह्मगुप्तीयश्च। तत्राद्यो विवेचितः। अथात्र विवेच्यते द्वितीय आर्यभटीयः पक्षः।

आर्यसिद्धान्त आर्यभटीयञ्च

आर्यभटो हि ज्योतिषसिद्धान्तप्रणेतृषु पुरुषेषु प्रथमः। यद्यपि स बहुषु विषयेषु सूर्यसिद्धान्तसंवादी स्तौति ब्रह्म (१।१) तथापि तस्य वेधपरिपाटी तदुभयविलक्षणा। आर्यभटस्य आर्यभटीयं ज्योतिषग्रन्थेषु पौरुषेयेषु प्रथमम्। आर्यभट आत्मानं कुसुमपुरनिवासिनं ३९८ मितशकाब्दभवञ्च कथयति। कुसुमपुरं केचन पाटलीपुत्रमपरे तु दक्षिणप्रदेशस्थं किमपि तत्संज्ञकं नगरं मन्यन्ते। अधिकांशविपश्चितस्तु तं मागधमेव मन्यते।

आर्यभटौ हि द्वौ ख्यातावुभावेव गणकौ ययोराद्य आर्यभटीयस्य प्रणेता ३९८ शकाब्दे जातः, अपरस्तु महासिद्धान्तस्य कर्ता शकानन्तर ८७५ मितवर्षमभितो जातः। प्रकरणेऽस्मिन् यत्रापि आर्यसिद्धान्त इति व्यपदेशः स प्रथमार्यभटसम्बद्धो यश्च महासिद्धान्तनाम्ना व्यपदिश्यते स द्वितीयार्यभटसम्बद्धः।

आर्यभटस्यार्यभटीयं चतुर्षु भागेषु विभक्तम्—गीतिकापादः गणितपादः कालक्रियापादः गोलपादश्चेति। स एवाह एथा—

'प्रणिपत्यैकमनेकं कं सत्यां देवतां परं ब्रह्म।
आर्यभटस्त्रीणि गदति गणितं कालक्रियां गोलम्॥' इति। (१।१)

सन्ति तत्र क्रमेण १३, ३३, २५, ५० श्लोका इति समष्टौ १२१ श्लोकाः। आर्यभटो हि लाघवार्थं वर्णसाहाय्येनाङ्कान्निर्दिशति। ग्रन्थान्तरे १२३४५ कथने शरयुगाग्निलोचनेन्दवः इति कथ्यते (व्यक्तमव्यक्तेन सूच्यते) आर्यभटीये तु सैव सङ्ख्या ङघगखका इति। गणना च कः १ खः २····मः २५, यः ३० रः ४० लः ५० वः ६० शः ७० षः ८० सः ९० हः १००। एवमेव अः १ (एककम्) आः (द्विकम्) इः शतम् ईः सहस्रम् उः दशसहस्राणि ऋः लक्षम् ॠः दशलक्षाणि ऌः कोटीः ॡः दशकोटयः एः अयुतम् ऐः दशायुतानि ओः नियुतम् औः दशनियुतानि। तेन किः १०० खिः २०० ङिः ५०० शिः ७००० खुः २००० बुः २३००० इत्यादि।

परिपाटचाऽनया घटे पारावारस्तु गृह्यते किन्तु सम्भवोऽपि तत्र महतोऽनर्थस्य। एकाक्षराशुद्धचा सम्भवति महती अशुद्धिः। यथा घुरिति घस्य चतुर्वाचकत्वेव उकारस्य सहस्रवाचकत्वेन च ४००० सङ्ख्याबोधकः। धुरिति १९००० सङ्ख्याबोधकः। एवमेव पिरिति २१०० षिरिति ८०००। वर्णसाहाय्येन सङ्ख्यां बोधयित्वैव केवलं त्रयोदशार्यासु गीतिकापाद उक्तः। आद्ये ब्रह्मणो वै परस्य ब्रह्मणस्य च स्तुतिरूपं मङ्गलाचरणं ततः सङ्ख्याया अक्षरैः सूचनविधिनिर्देशः तदनु सूर्यादीनां भगणसङ्ख्या निर्देशः। किञ्चार्यभटः पृथ्व्या अपि दैनिकी वार्षिकीञ्च गतिं मन्यतेऽतस्तेन तस्या अपि भगणा निर्दिष्टाः युगमाश्रित्य। (१।१।२)। यथा हि भूभ्रमा १५८२२३७५०० वर्षमानञ्च ३६५।१५।३१।१५।०। बुधभगणाः १७९३७०२० गुरुभगणाः ३६४२२४ इति तत्र निर्दिष्टाः शेषाश्च प्राचीनसूर्यसिद्धान्तसंवादिनः। तदनु तृतीयार्यया कल्पादित आरभ्य युगकालगणना निर्दिष्टा। तदनु राश्यंशकलासम्बन्धः आकाशकक्षाया विस्तारः पृथ्वीसूर्यचन्द्रादीनां गतिः अङ्गुलहस्तपुरुषयोजनसम्बन्धः पृथिव्याः व्यासः सूर्यादिग्रहाणां बिम्बव्यासपरिमाणं ग्रहाणां क्रान्तयो विक्षेपाश्च तेषां पाता मन्दोच्चस्थानानि च तेषां मन्दशीघ्रपरिधिपरिमाणं ज्याखण्डमानञ्च तत्र क्रमेण निर्दिष्टानि।

द्वितीये गणितपाठे सन्ति त्रयस्त्रिंशच्छ्लोका यत्र अङ्कबीजरेखागणितानां क्रमेण विधयो निर्दिष्टाः।

तृतीयो हि कालक्रियापादकालविभागतदाधारितज्योतिषसम्बद्धगणना पञ्चविंशतिश्लोकैर्निर्दिष्टा। तस्यायमादिमः श्लोकः—

'वर्षं द्वादशमासास्त्रिंशद्दिवसो भवेत्स मासस्तु।
षष्टिर्नाडचो दिवसः षष्टिस्तु विनाडिका नाडी'॥ १॥

ग्रहावस्थितिर्यथा—

'भानामधः शनैश्चरसुरगुरुभौमार्कशुक्रबुधचन्द्राः।
तेषामधश्च भूमिर्मेधीभूता त्वमध्यस्था'॥ १५॥

मण्डलमल्पमधस्तात्कालेनाल्पेन पूरयतिचन्द्रः। अल्पे हि मण्डलेऽल्पा महति महान्तश्च राशयो ज्ञेयाः।

गोलपादे सन्ति पञ्चाशच्छ्लोकाः। तस्यायमादिमः श्लोकः—

मेषादेः कन्यान्तं सममुदगपमण्डलार्धमपयातम्।
तौल्यादेर्मीनान्तं शेषार्धं दक्षिणेनैव॥ १॥

तदनु—

'ताराग्रहेन्दुपाता भ्रमन्त्यजस्रमपमण्डलेऽर्कश्च।
अर्काच्च मण्डलार्धे भ्रमति हि तस्मिन् क्षितिच्छाया'॥ २॥

आर्यभटगणिता युगपद्धतिर्ग्रन्थान्तरापेक्षया भिन्नैव। तदनुसारेण द्वासप्तति-युगैरेकं मन्वन्तरं भवति। तन्मते सर्वेऽपि युगपादाः समाना एव। बुधवासरस्य सूर्योदयान्महायुगारम्भः प्रावर्तत। तत आरम्य वर्तमानकलियुगारम्भ पर्यन्तं १९८६१२०००० वर्षाणि गतान्यभूवन्। कल्पारम्भे गुरुवासर आपतति कलि-युगारम्भे शुक्रवारश्च। सिद्धान्तान्तरानुसारं तु कल्पारम्भतः वर्तमानकलि-युगप्रारम्भपर्यन्तं व्यतीतानि १९७२९४४००० वर्षाणि। आर्यभटस्य सिद्धान्त-मियं ब्रह्मगुप्तः खण्डयति कथनेनानेन—

'न समा युगमनुकल्पा कल्पादिगतं कृतादि यातश्च।
स्मृत्युक्तैरार्यभटो जातो जानाति मध्यगतिम्॥' इति।

आर्यभटानुसारेण कल्पारम्भे प्रत्येकमहायुगारम्भे प्रत्येकयुगपादारम्भे च सर्वेऽपि ग्रहा एकत्रासन्नाः।

आर्यभटो हि भूम्या अपि गतिं मन्यते। तेन स भूभ्रमानपि गणयति। स कथयति—

'अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमनं यद्वत्।
अचलानि भानि तद्वत् समपश्चिमगानि लङ्कायाम्।' इति।

सा च भूः प्राणेनेति। पलस्य षष्ठांशेः कलयैकया चलतीति। सिद्धान्तमिमं पर्यालोचयन् ब्रह्मगुप्तः कथयति—

'प्राणेनेति कलां भूर्यपि तर्हि कुतो व्रजेत्कमध्वानम्।'

आवर्तनमुर्व्याश्चेन्न पतन्ति समुच्छ्रयाः कस्मात्। नक्षत्रादिगतिविषये तत्सिद्धान्तो यथा—

'उदयास्तमयनिमित्तं नित्यं प्रवहेण वायुना क्षिप्तः।
लङ्कासमपश्चिमगो भपञ्जरः सग्रहो भ्रमति॥'

एवमेव ग्रहगतिर्यथा—

षष्ट्या सूर्याब्दानां प्रपूरयन्ति ग्रहाः भपरिणाहम्।
दिव्येन नभः परिधिं समं भ्रमन्तः स्वकक्षासु॥ (३।१२)।

आर्यसिद्धान्तो हि नैव ग्रन्थान्तरवदधिकारेषु विभक्तः किन्तु त्रिष्वेव प्रकरणेषु बहवो विषयाः सङ्क्षेपणोक्ताः। सिद्धान्तोऽयं सङ्क्षिप्तोऽपि नैव तथा दुर्बोध्यः। अत्र हि नैव चन्द्रश्रृङ्गोन्नतिर्भग्रह युति योगताराभोगशराः अयनां-शाश्च विवेचिता ये हि ग्रन्थान्तरे प्राधान्येन गृह्यन्ते। तेन हि सिद्धान्तोऽयं ज्योतिषस्य सिद्धान्तपक्षमात्रसम्बद्धो न तु व्यवहारेणाऽपि। न चात्र तिथिनक्षत्र-करणाद्यानयनविधिरत्रोक्तः। शङ्करबालकृष्णः परामृशति यदेतादृशविषया आर्यभटस्य नैव ज्ञानविषया इति न। तेन हि तेनापरः कश्चित्करणग्रन्थोऽपि प्रणीतो भवति एतादृशं विषयमवलम्ब्येति। स हि—

'उदयो यो लङ्कायां सोऽस्तमयः सवितुरेव सिद्धपुरे ।
मध्याह्नो यवकोटयां रोमकविषयेऽर्धरात्रः स्यात् ॥' (३।१३)

इति तु कथयति किन्तु दिनप्रवृत्तिः कदाऽऽरभ्य भवतीति नैव तत्रोक्तं किन्तु वराहमिहिरो हि आर्यभटेन लङ्कार्द्धरात्रितो दिनप्रवृत्तिः कथितेति स्मरति । तदवश्यमेव क्वचिदुक्तं भवति । तेनाऽपि तस्य हि करणग्रन्थस्य सम्भवसङ्गतिर्दृश्यते । यथोक्तं तेन स्वयमेव—

'क्षितिरवियोगाद् दिनकृद्रवीन्दुयोगात्प्रसाधितश्चन्द्रः ।
शशिताराग्रहयोगात्तथैव ताराग्रहाः सर्वे ।
सदसज्ज्ञानसमुद्रात्समुद्धृतं देवताप्रसादेन ।
सज्ज्ञानोत्तमरत्नं मया निमग्नं स्वमतिना वा ।' इति ।

ब्रह्मगुप्तो ह्यार्यभटस्य पर्यालोचकः । तदुन्नीताः कतिपये दोषास्तु यथार्था अपि किन्तु तत्राधिक्येन तं प्रति समालोचकस्य दुराग्रह एव दृश्यते यदा स कथयति—

'आर्यभटदूषणानां सङ्ख्या वक्तुं न शक्यते यस्मात् ।
तस्मादयमुद्देश्यो बुद्धिमताऽन्यानि योज्यानि ॥' (११।४४) ।

तत्र दूषणान्यपि कतिपयान्यासन्नेवेति लल्लकृतात् तदुपरि बीजसंस्कारादपि सिध्यति । अथात्र कानिचिदेव ब्रह्मगुप्तसङ्केतितानि आर्यभटदूषणान्युपस्थाप्यन्ते ।

'युगपादानार्यभटश्चत्वारि समानि कृतयुगादीनि ।
यदभिहितवान्न तेषां स्मृत्युक्तसमानमेकमपि ॥' (१।९)
'अकृतार्यभटः शीघ्रगमिन्दूच्चं पातमल्पगं स्वगतेः ।
तिथ्यन्तग्रहणानां घुणाक्षरं तस्य संवादः ॥' (१।५९)
'मध्यगतिज्ञं वीक्ष्य श्रीषेणार्यभटविष्णुचन्द्रजाः ।
सदसि न भवन्त्यभिमुखाः सिंहं दृष्ट्वा यथा हरिणः ॥' (१।६८)
अर्कोदयास्तमययोर्विना चारार्द्धेन रात्रिदिनदलयोः ।
न स्फुटमार्यभटोक्तं स्पष्टीकरणं स्फुटोक्तिरतः ॥' (२।१९)
'मेषादितः प्रवृत्ता नार्यभटस्य स्फुटा युगस्यादौ ।
श्रीषेणस्य कुजाद्या सूर्याद्यैर्विष्णुचन्द्रस्य ।
दूरभ्रष्टा स्पष्टाः श्रीषेणार्यभटविष्णुचन्द्रेषु ।
यस्मात्कुजादयस्तेषु न विदुषामादरस्तस्मात् ॥' (२।४६-४७)
'न स्फुटमार्यभटादिष्टार्कग्रहणं ···· ···· ··· ···· ।' (५।२१)
'पूर्ववदन्यस्पष्टं ब्रह्मोक्तिसूर्यस्पष्टशशिपातैः ।
नार्यभटादिभिरुक्तं···· ···· ···· ···· ··· ··· ···· ····' । (५।२५)

आर्यभटः क्षेत्रांशैर्दृश्यान्यदुक्तवांस्तदसत् ।' (६।१२)

'कृत्वाऽपि दृष्टिकर्म श्रीषेणार्यभटविष्णुचन्द्रोक्तम् ।
प्रतिदिनमुदयेऽस्ते वा न भवन्ति दृग्गणितयोरैक्यम् ॥' (१०।१३)

'आर्यभटो युगपादान् त्रीन् पातानाह कलियुगादौ यत् ।
तस्य कृतान्तर्यस्मात् स्वयुगाद्यन्तौ न तस्मात् ॥' (११।४)

इत्थं हि यान्यप्यार्यभटदूषणत्वेन ब्रह्मगुप्तवचनानि तेषां सङ्ग्रहे कृते ग्रन्थान्तरमेव सम्पद्यते। दूषणनियतोऽपि ब्रह्मगुप्त एतत्तु तथ्यं स्वीकरोति यत्कतिपये दोषास्तु कालान्तरितत्वेनापि सम्भवन्तीति ।

'कालान्तरेण दोषा येऽन्यैः प्रोक्ता न ते मयाऽभिहिताः ।'

करणप्रकाशः (१०१४ शा०) दामोदरस्य भटतुल्यश्चास्य करणग्रन्थौ । मूल-सूर्यसिद्धान्तेन सहार्यसिद्धान्तस्य प्रायः साम्यं दृश्यते वर्तमानसूर्यसिद्धान्तेन सह वैषम्यञ्च । यथा हि शङ्करबालकृष्णः ४२१ मितशकाब्दे चैत्रकृष्णनवम्यां रवि-वासरे सूर्योदयात् पञ्चदशघटिकासु गतासु मध्यमभोगं तालिकीकृत्य निर्दिशति—

ग्रहाः	प्राचीनसूर्य-सिद्धान्तानुसारेण	प्रथमार्य-सिद्धान्तानुसारेण	अर्वाचीनसूर्यादि-सिद्धान्तानुसारेण	ब्रह्मगुप्तीय-सिद्धान्तानुसारेण
	रा. अं. क. वि.	रा. अं. क. वि.	रा. अं. क. वि.	रा. अं. क. वि.
सूर्यः	० ० ० ०	० ० ० ०	११ २९ ५८ ३७	० ० ५१ ४५
चन्द्रः	९ १० ४७ ८	९ १० ४८ ०	९ १० २९ ३३	९ १ ३१ ४६
भौमः	० ७ १२ ०	० ७ १२ ०	० ९ २३ १६	० ८ ४ ४५
बुधः	६ ० ० ०	६ ६ ० ०	६ १७ ५४ १६	६ ० ४१ २
गुरुः	६ ६ ० ०	६ ७ १२ ०	६ ५ ५९ ५३	६ ७ २८ १
शुक्रः	११ २६ २४ ०	११ २६ २४ ०	११ २२ ४५ ४५	११ २६ ५७ १३
शनिः	१ १९ १२ ०	१ १९ १२ ०	१ २० २३ ५७	१ १९ ० १
चन्द्रोच्चः	१ ५ ४२ ०	१ ५ ४२ ०	१ ० ५३ ५१	१ ७ २१ ३
राहुः		११ २२ १२ ०	११ १८ ३६ ४	११ २३ २३ १४

नक्षत्रप्रदक्षिणाकालश्च तालिकीकृतो यथा तेनैव—

ग्रहाः	प्राचीनसूर्य-सिद्धान्तानुसारेण	आर्य-सिद्धान्तानुसारेण	अर्वाचीनसूर्य-सिद्धान्तानुसारेण	ब्रह्मगुप्त-सिद्धान्तानुसारेण
	दि. घ. प. वि.	दि. घ. प. वि.	दि. घ. प. वि.	दि. घ. प. वि.
सूर्यः	३६५ ३५ ३१ ३०	३६५ १५ ३१ १५	३६५ १५ ३१ ३१.४	३६५ १५ ३० २२.४
चन्द्रः			२७ १९ १८ १.६	२७ १९ १८ ०.२५
चन्द्रोच्चः			३२३२ ५ ३७ १३.६	३२३२ ४४ २ ४५
राहुः			६७९४ २३ ५९ २३.५	६७९२ १५ १४ १४.७
भौमः			६८६ ५९ ५० ५.८७	६८६ १४ २४ १९.२
बुधः			८७ ५८ १० ५५.७	८७ ५८ ११ ४३.७
गुरुः			२२४ ४१ ५४ ५०.६	२२४ ४१ ५२ ३४.८
शुक्रः			४३३२ १९ १४ २०.९	४३३२ १४ २४ १९.२
शनिः			१०७६५ ४६ २३ ४.१	१०७६५ ४८ ५४ ५१.२

६ ज्यो०

लल्लाचार्यः धीवृद्धिदतन्त्रञ्च

एतत्प्रागेवोक्तं यदार्यभटसिद्धान्ते लल्लेन बीजसंस्कारो दत्त इति। अत्रेदमवधेयं यन्मध्यमस्थितिस्पष्टस्थित्योर्यदन्तरं ग्रहस्य तत् फलसंस्कारशब्देनोच्यते यच्च ग्रहस्य सिद्धान्तागतवेधागतस्थित्योरन्तरे सति तत्संयोजनाय संस्कारः क्रियते तद्धि बीजसंस्कारशब्देनाभिधीयते। ग्रहस्य स्थितिर्हि त्रिविधा भवति—मध्यमस्थितिः, स्पष्टस्थितिर्यथार्थस्थितिश्च। आद्याः सिद्धान्तानुयायिनी, द्वितीया करणानुयायिनी तृतीया तु वेधानुयायिनी।

लल्लो हि भटदीपिकाकारपरमादीश्वरमतानुसारेण आर्यभटस्य शिष्यः समानवयस्कश्चासीत्। किन्तु तस्यैव हि स्वप्रणीतगणिताध्यायसमाप्तौ—

'........आर्यभटाभिधानसिद्धान्ततुल्यफलमेतदकारितन्त्रम्।' इति कथनात् तदध्यायारम्भे—

'विज्ञाय शास्त्रमलमार्यभटप्रणीत-
तन्त्राणि यद्यपि कृतानि तदीयशिष्यैः।
कर्मक्रमो न खलु सम्यगुदीरितस्तैः
कर्म ब्रवीम्यहमतः क्रमशस्तु सूक्तम्॥'

इति कथनेन च तस्यार्यभटशिष्यत्वं तु नैव सिध्यति। एवञ्च यदि हि स आर्यभटशिष्योऽभविष्यत्तदा आर्यभटस्य—'प्राणेनेति सा च भूः' इति भूभ्रमसिद्धान्तस्य विरोधे—

'यदि वा भ्रमति क्षमा तदा स्वकुलायं कथमाप्नुयुः खगाः'

इति नाकथयिष्यत्। यद्यपि न हि तत्र कापि राजाज्ञा यच्छिष्यो हि गुरुमतं कदापि नैव दूषयेदिति। 'दोषा वाच्या गुरोरपि' इति शास्त्रवचनमपि दृश्यते तथापि न तथा दूषणं सम्भवति प्रत्यक्षतः। अपरञ्च लल्लं बहुधा स्मरन् यत्र तत्र तं दूषयंश्च भास्कराचार्यो न हि कुत्रापि तमार्यभटशिष्यत्वेन जानाति। यच्च लल्लो बीजसंस्कारप्रसङ्गे शकाब्देषु ४२० सङ्ख्याया वियोगं निर्दिशति तत्तु ब्रह्मसिद्धान्ते कलियुगारम्भतो बीजसंस्कार इव मानमात्रबोधकं न तु तत्स्थितिकालसूचकमपि। वस्तुतस्तु रेवतीयोगताराया: ३५९ भोगांशा लल्लेनोक्तास्तेन तु ६०० मितशकाब्दसमकालः सूच्यते। अपरञ्च लल्लो हि ब्रह्मगुप्तं ब्रह्मगुप्तश्च तं न जानीत इत्युभयोः समकालिकत्वं सिध्यति इति शङ्करबालकृष्णमतमपि वयं सविनयं नैवाद्रियामहे। यतो हि लल्लो यदार्यभटमाने बीजसंस्कारमर्पयति तत्कालान्तरभिन्नत्वे सत्येव सम्भवति। तच्च ब्रह्मगुप्तः 'कालान्तरेण दोषा येऽन्यैः प्रोक्ता न ते मयाऽभिहिता' इति स्पष्टमेव सङ्केतयति। नाऽत्रापि राजाज्ञा यदार्यभटदूषणाय प्रवृत्तो ब्रह्मगुप्तो लल्लमपि तथैव दूषयेदेव। तस्य त्वाचार्यत्वेनार्यभटेन सह प्रतिस्पर्द्धा सम्भवति यथा न तथा लल्लेनापि भवत्येव।

तेन हि लल्लाचार्यो ब्रह्मगुप्तात्पूर्ववर्त्येवेत्यस्माकं विचारः । कामं लल्ल आर्यभट-शिष्यो वाऽन्यो वाऽपि स्यात्तस्य ज्योतिषसिद्धान्ते योगदानं त्वविस्मरणीयमेव । तस्य हि शिष्यधीवृद्धिदतन्त्रं हि स्वप्रकृतिकेष्वपूर्वो ग्रन्थः । शङ्करबालकृष्ण-स्त्विमं धीवृद्धितन्त्रमित्येवाह्वयति । धीवृद्धिदस्य गणिताध्याये मध्यमस्पष्टत्रि-प्रश्नचन्द्रार्कग्रहणपर्वसम्भवग्रहोदयास्तचन्द्रच्छायातच्छृङ्गोन्नतिग्रहयुतिभग्रहयुति - महापातोत्तराद्यधिकारा यथायथं विवेचिताः सन्ति । गोलाध्याये च छेद्यकगो-लबन्धमध्यगतिवासनाभूगोलग्रहभ्रमसंस्थाभुवनकोशमिथ्याज्ञानयन्त्रप्रश्नाध्यायाः निरूपिताः सन्ति । ग्रन्थनिर्माणप्रयोजनं तेनोक्तं यथा—

'आचार्याऽऽर्यभटोदितं सुविषमं व्योमौकसां कर्मय-
यच्छिष्याणामभिधीयते तदधुना लल्लेन श्रीवृद्धिदम् ॥' इति ।

लल्लोऽपि तीक्ष्णमतिर्वेधकर्ताऽऽसीत् । यथा स दृष्टवान् यदार्यसिद्धान्तेन तादात्म्यप्रक्रिया नैव संवदते तदा तेन तत्र बीजसंस्कारोऽर्पितः । स न हि ब्रह्मगुप्त इव आर्यसिद्धान्तालोचकोऽपितु तस्य संस्कारक एव । स हि उत्तराधिकारे आर्य-सिद्धान्तानीतग्रहेषु इत्थं बीजसंस्कारमर्पयति—

'शाके नखाब्धि(४२०)रहिते शशिनोऽक्षदस्रैः (२५)
तत्तुङ्गतः कृतशिवैः (११४) तमसः षडङ्कैः (९६) ।
शैलाब्धिभिः (४७) सुरगुरोर्गुणिते सितोच्चात्
शोध्यं त्रिपञ्चकु (१५३) हतेऽभ्रशराक्षि (२५०) भक्ते ॥ १८ ॥
....(इ) भाम्बुधि(४८)हते क्षितिनन्दनस्य
सूर्यात्मजस्य गुणितेऽम्बरलोचनैः(२०)श्च ।
व्योमाक्षिवेदनिहते विदधीत लब्धं
शीतांशसूनुचलतुङ्गकलासु वृद्धिम्' ॥ १९ ॥ इति ।
'.....................ग्रहकर्म.....................दृक्प्रभावात् ।
....' ॥ २० ॥ इति ।

धीवृद्धिदतन्त्रे हि भगणादिमानं सर्वमेव आर्यभटमानसंवादि केवलं तद्बीज-संस्काराहितमेव । अयनचलनविषये लल्लसिद्धान्तमपि मौनमालम्बते । आर्य-सिद्धान्तोक्तग्रहेषु लल्लोक्तबीजसंस्काराधानपूर्वकं करणप्रकाशभटतुल्यप्रभृति करणग्रन्थाः प्रणीताः । लल्लेन हि रत्नकोषनाम्ना संहिताग्रन्थोऽपि प्रणीत आसीद् यमाधारीकृत्य श्रीपतिना ९६१ शकाब्दे रत्नमाला प्रणीता ।

सिद्धान्तशिरोमणिकृद्भास्कराचार्योऽयनांशचलनज्ञानं हि मुञ्जाल(८५४ शा०)प्रवर्तितं मन्यते 'अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम्' (गोल-बन्धा० १८) इत्युक्त्वा । वस्तुतस्तु सर्वालोचकोऽपि ब्रह्मगुप्तोऽप्ययनांशस्पष्ट-क्रान्त्यादीनां चर्चामपि नैव करोति । तेन मुञ्जालस्य (८५४ शा०) अयनांश-

ज्ञानप्रवर्तकत्वं सिद्धत्येव। लल्लाचार्योऽपि काममार्यभटसिद्धग्रहे बीजसंस्कार-मर्पयति किन्तु स्वयमयनचलनविषये मौनमालम्बते।

वराहमिहिरः पञ्चसिद्धान्तिका च

यद्यपि ज्योतिषशास्त्रे **वराहमिहिरस्य** सर्वातिशायि स्थानं तथापि तस्य मौलिकसिद्धान्तं तु सम्प्रत्यपि नैवास्मान् प्रसादीकरोति प्रकटनेन। तस्य पञ्च-सिद्धान्तिकेति सिद्धान्तग्रन्थो लभ्यते श्रूयते च तस्य जातकार्णवो नाम करण-ग्रन्थोऽप्यस्तीति बृहत्संहिताऽग्रभागस्थाद् त्रिपाठिनः अवधबिहारिणोऽवतारिका-लेखाज्ज्ञायते च। उक्तञ्च तेनैव बृहत्संहितायाम्—

'वक्रानुवक्रास्तमयोदयाद्यास्ताराग्रहाणां करणे मयोक्ताः' (१।१०) इति।

भट्टोत्पलस्तु 'करणे' इत्येतस्य पञ्चसिद्धान्तिकायाम् इति व्याख्याति किन्तु पञ्चसिद्धान्तिका हि न वराहस्य मौलिकसिद्धान्तवाहिकाऽपितु पुनरुक्तः सङ्ग्रह-ग्रन्थ एव। क्वचित्तु तत्र श्लोक एव ग्रन्थान्तरादनूदितो दृश्यते। यथा पञ्चदशा-ध्यायस्य त्रयोविंशतितमः श्लोकः—'उदयो यो लङ्कायाम्०' इत्यादिः आर्यभटी-यस्य गोलपादस्य त्रयोदशतमं पद्यम्। तथापि पञ्चसिद्धान्तिकायामपि वराह-मिहिरस्य स्वकीयं चिन्तनमेव नास्तीति नैव वक्तुं शक्यते। तथाहि तत्रोक्तम्—

'अष्टादशभिर्बद्ध्वा ताराग्रहतन्त्रमेतदार्याभिः।
वरमिह वराहमिहिरो ददाति निर्मत्सरः करणम्॥' (१८।६५)

इति कथनेन तस्य करणभागस्तु तस्यैव मौलिकी रचना प्रतीयते। तस्यायं प्रथमः कल्पः—

'आकरणाद्रविभागाः दिवसाश्चारणिका रवौ कार्याः।
अधिका यदा दिनेभ्यो भागा ज्ञेयास्तदा चक्रात्॥' (१८।६६) इति।

अपरत्र स सूर्यसिद्धान्तागतमध्यमग्रहे बीजसंस्कारमपि ददाति! यथा—

'क्षेप्याः शरेन्दु(१५)विफलाः प्रतिवर्षं मध्यमक्षितिजे।
दश दश गुरोर्विशोध्याः शनैश्चरे सार्द्धसप्तयुताः॥
पञ्चद्वया (२५) विशोध्याः सिते बुधे खाश्विचन्द्र(१२०)युताः।' इति।

यदि हि वराहमिहिरेण स्वकीयोऽपि सिद्धान्तः प्रणीतोऽभविष्यत्तदा सौरे बीजसंस्कारो नैवार्पितोऽभविष्यत्, सिद्धान्ते एव संशोधितरूपप्रस्तुतिसम्भवात्। तथापि—

'यत्तत्परं रहस्यं भ्रमति मतिर्यत्र तन्त्रकाराणाम्।
तदहमपहाय मत्सरमस्मिन् वक्ष्ये ग्रहे भानोः॥'

इति कथनेन तस्य मौलिकं चिन्तनं प्रतिभात्येव। एवमेव—

'प्रद्युम्नो भूतनये जीवे सौरे च विजयनन्दी।
भग्नावतः स्फुटमिदं करणं दृष्टं वराहमिहिरेण॥' इत्यपि।

एतावता एतदेव सिध्यति यद्वराहः स्वसिद्धान्तप्रणयनापेक्षया प्रचलित-सिद्धान्तानेव सामयिकीकृत्य गृह्णातीति। तथाकरणे तत्र यावानेव मौलिको भागस्तावानेव तस्य मौलिकः सिद्धान्तः। एतत्तु स्पष्टमेव यद्वराहः प्राचीनसूर्य-सिद्धान्तमेवात्मसात्करोतीति। विशेषतो देशान्तरे छायासाधने ग्रहणे छेद्यके च स मूलतो विचिन्तयति तत्र तत्राशुद्धिसम्भवात्। परोन्नत्यसहिष्णुप्रकृतिको ब्रह्म-गुप्ताचार्योऽपि वराहमिहिरं नैव तथा विनिन्दति यद्यपि स वराहेण ग्रहणहेतुत्वेन भूच्छाया चन्द्रमसि प्रविष्टो राहुरित्यपि नोक्त इत्यालोचयत्येव। भास्करा-चार्यस्तु तं स्तौत्यपि। (सि० शि० १।२)। वराहमिहिरः कामं सिद्धान्त-प्रवर्तनेन नैव स्वाचार्यत्वं प्रदर्शितवान् किन्तु तस्य हि ज्योतिषाचार्यत्वं सर्वा-तिशायि। तस्य बृहज्जातकं सम्प्रति जातकस्कन्धचूडामणित्वेन गृह्यते सर्वैः। तस्य बृहत्संहिता संहितास्कन्धस्य पृष्ठास्थि।

वराहमिहिरेण हि प्रद्युम्नविजयनन्दिलाटदेवादीनां सिद्धान्तप्रसङ्गे मय-यवनमणित्थशक्तिविष्णुगुप्तदेवस्वामिसिद्धसेनजीवशर्मसत्याचार्याणां नामानि संहिताहोराप्रसङ्गे स्मृतानि, किन्तु तेषां विशेषपरिचयः कृतयश्च नाधुनाऽप्यस्माकं ज्ञाताः।

आचार्यान्तरवद्वराहाचार्योऽपि स्वस्थितिकालजन्मस्थानविषये मौन-मालम्बते। एतत्तु कथ्यते यत्स अवन्तीपुर्यामासीत्। यथा स एव बृहज्जातकान्ते कथयति—

'आदित्यदासतनयस्तदवाप्तबोधः कापित्थके सवितृलब्धवरप्रसादः।

आवन्तिको मुनिमतान्यवलोक्य सम्यक् होरां वराहमिहिरो रुचिरां चकार'॥ इति॥ ९॥

किन्तु पद्येऽस्मिन् 'चकार' इति लिटः प्रयोगेण श्लोकस्यास्य पश्चादवक्षिप्तत्वं स्पष्टयते। यदि हि श्लोकोऽयं वराहमिहिरेण स्वयं प्रणीतोऽभविष्यत्तदा 'चकार' इत्येतस्य स्थाने अकार्षीत् अकार्षं वा प्रयुक्तमभविष्यत्। 'होरां वराहमिहिरो रुचिरामकार्षीत्' यद्वा 'होरां वराहमिहिरो रुचिरामकार्षम्' इति पाठः पूर्वपाठा-पेक्षया साधुतरोऽपि लगति। तेन नास्याचार्यप्रणीतत्वमिति स्पष्टमेव। अपरञ्च तत्रैव—'मया कृतः (२८।६), मया कृतं (२८।७), यद्वा मया कुकृतमल्प-मिहाकृतं वा' (२८।८) इति उत्तमपुरुषप्रयोगप्रसङ्गे चकारेत्यन्यपुरुषप्रयोग एवाप्रासङ्गिकः। एतदप्युच्यते यत् नवाधिकपञ्चशतसंख्याकशाके वराहमिहिरा-चार्यो दिवं गतः इति। एतदप्युच्यते—

'स्वस्तिश्रीनृपसूर्यसूनुजशके याते द्विवेदाम्बर-

त्रैमानाब्दमिते (३०४२) त्वनेहसि जये वर्षे वसन्तादिके।

चैत्रे श्वेतदले शुभे वसुतिथावादित्यदासादभूद्
वेदाङ्गे निपुणो वराहमिहिरो विप्रो रवेराशिभिः' ॥

किन्त्वेतदपि न विश्वासयोग्यं संवत्सरस्यैव सङ्गत्यभावात् । ज्योतिर्विदाभरणाख्ये ग्रन्थे वराहमिहिरस्य विक्रमार्कस्य सभासत्त्वमुक्तं किन्तु नैतदपि विश्वासास्पदं, यतो हि तत्रैव ३०६८ मितकलिगतवर्षे ग्रन्थक्रियोपक्रम उच्यते, यद्धि २४ मितवैक्रमाब्दसंवादि । तत्रैव—

'शाकः शराम्भोधियुगो (४४५) मितो हृतो ।
मानं खतर्कैरयनांशकाः स्युः ॥'

इति ४४५ शकाब्दा अपि चोल्लिख्यन्ते । स हि पञ्चसिद्धान्तिकायामार्यभटं स्मरतीति ४२१ शकाब्दा एव तस्य स्थितिकालस्य पूर्वसीमा उत्तरसीमा च ५०९ मितशकाब्दः । अत एव वराहमिहिराचार्य आर्यभटसमकालिक एव ।

श्रीषेणविष्णुचन्द्रौ

यथा हि लाटदेवेन पोलिशरोमकसिद्धान्तौ व्याख्यातौ, यथा च विजयनन्दिना वासिष्ठो हि सिद्धान्तः तथैव श्रीषेणेन लाटदेवात् मध्यसूर्याचन्द्रमसौ चन्द्रोच्चचन्द्रपातौ कुजबुधादीन्मध्यांश्च वासिष्ठाद्युगपातवर्षभगणान् आर्यसिद्धान्तान् मन्दोच्चपरिधिपातस्पष्टीकरणादीन् चादाय रोमकसिद्धान्तः प्रोक्तः, एतान्येवादाय विष्णुचन्द्रेण वासिष्ठसिद्धान्तः प्रोक्त इति लाटदेवविजयनन्दिश्रीषेणविष्णुचन्द्राणामपि सिद्धान्तकर्तृकत्वम् । तत्तद्विषये ब्रह्मगुप्तः कथयति—

'पोलिशरोमकवासिष्ठसौरपैतामहेषु यत्प्रोक्तम् ।
तन्नक्षत्रानयनं नार्यभटोक्तं तदुक्तिरतः ॥' (१४।४६)
'मेषादितः प्रवृत्ता नार्यभटस्य स्फुटा युगस्यादौ ।
श्रीषेणस्य कुजाद्याः सूर्याद्या विष्णुचन्द्रस्य ॥
दूरभ्रष्टाः स्पष्टाः श्रीषेणार्यभटविष्णुचन्द्रेषु ।
यस्मात्कुजादयस्तेषु न विदुषामादरस्तस्मात् ॥' (२।४६-४७)
'श्रीषेणविष्णुचन्द्रप्रद्युम्नार्यभटलाटसिंहानाम् ।
ग्रहणादिविसंवादात् प्रतिदिवसं सिद्धमकृत्वम्' ॥ (११।४६)
'तद्युगवधो महायुगमुक्तं श्रीषेणविष्णुचन्द्राद्यैः' । (११।५५)
'कृत्वाऽपि दृष्टिकर्म श्रीषेणार्यभटविष्णुचन्द्रोक्तम् ।
प्रतिदिनमुदयेऽस्ते वा न भवन्ति दृग्गणितयोरैक्यम् ॥' (१०।१३)

तत्र लाटदेवप्रद्युम्नविजयनन्दिनो वराहमिहिरोऽपि पञ्चसिद्धान्तिकायां स्मरतीति तेषां तत्पूर्ववर्तित्वं स्पष्टमेव, तथैव श्रीषेणविष्णुचन्द्रयोस्तु वराहविष्णुगुप्तान्तरालवर्ती स्थितिकाल आद्येनास्मृतत्वादन्त्येन खण्डितमण्डितत्वात् तत्सिद्धान्तयोः ।

प्रकरणसारः

इत्थं हि विष्णुगुप्तात्पूर्वमासन् सप्तदशसिद्धान्ताः प्रचलिता भारते वर्षे। तत्रैकः प्राचीनः सौरसिद्धान्तो द्वितीयो मौलिकः पैतामहसिद्धान्तः तृतीयस्तु प्राचीनो वासिष्ठसिद्धान्तः चतुर्थो हि मौलिकः पोलिशसिद्धान्तः पञ्चमस्तु प्राचीनरोमकसिद्धान्तः षष्ठो हि आर्यसिद्धान्तः सप्तमस्तु लाटदेवव्याख्यातो रोमकसिद्धान्तः अष्टमो हि तेनैव संस्कृतः पोलिशसिद्धान्तः नवमो हि विजयनन्दिसंस्कृतो वासिष्ठसिद्धान्तः दशमस्तु प्रद्युम्नप्रोक्तः पैतामहसिद्धान्तः। एतान् दश सिद्धान्तान् वराहाचार्यः पञ्चसिद्धान्तिकायां स्मरति। एकादशो हि वराहमिहिरसंस्कृतः सूर्यसिद्धान्तः द्वादशस्तु श्रीषेणव्याख्यातो रोमकसिद्धान्तः त्रयोदशो हि विष्णुचन्द्रव्याख्यातो वासिष्ठसिद्धान्तः चतुर्दशस्तु लाटसिंहप्रति-व्याख्यात आधुनिकसूर्यसिद्धान्तश्च। अपरान् पञ्च विष्णुगुप्तः स्मरति। ततः पञ्चदशो हि शाकल्यप्रोक्तः ब्रह्मसिद्धान्तः षोडशस्तु विष्णुधर्मोत्तरप्रोक्तो ब्रह्म-सिद्धान्तो यं ब्रह्मगुप्तोऽनुसरति सप्तदशश्च पाराशरसिद्धान्तः।

एते हि प्रायः सूर्यसिद्धान्तसंवादिनो विहाय कतिपयानपवादान्। तेषु आर्य-सिद्धान्तो विलक्षणः। स हि युगान् समानपादान् मन्यते भूभ्रमांश्च परिगणयति। ग्रहाणाञ्च स हि समानां गतिं मन्यते वृत्तानुसारेण शीघ्रदीर्घकालपरिपूर-यितव्याम्। स वर्षमानञ्च पञ्चदशविकलया न्यूनं मन्यते। एवमन्येऽपि विशेषाः सन्ति तत्र यान् हि जिष्णुसुतो ब्रह्मगुप्तो भूयोभूयः खण्डयन्नपि नैव तृप्तिमनुभवति सिद्धान्तग्रन्थेऽनुयाति च करणग्रन्थे।

ब्रह्मगुप्तः ब्राह्मस्फुटसिद्धान्तश्च

ततश्चोदेति ब्रह्मगुप्तप्रतिपादितो ब्राह्मस्फुटसिद्धान्तः। ब्रह्मगुप्तो हि महान् ज्यौतिषिको वेधकुशलश्च। तस्य ब्राह्मस्फुटसिद्धान्तो नाम सिद्धान्तग्रन्थः खण्ड-खाद्यकं नाम करणग्रन्थश्च सम्प्रति समुपलभ्येते। श्रूयते च तस्य ध्यानग्रहो नाम फलितज्योतिषग्रन्थोऽपि।

ब्रह्मगुप्तो हि जिष्णुनाम्नः सुतः गुर्जरप्रान्तस्थश्रीमालग्रामवास्तव्यः। सम्प्रति श्रीमालो हि भिन्नमालनाम्नाऽपि ज्ञातो लघुग्राम एव किन्तु तदा तत्क्षेत्रस्य राजधान्यासीदिति हुएन-शाङ्गस्य (सम्भवतः हवनसङ्घः) संस्मरणा-ज्ज्ञायते। तस्य स्थितिकालविषये सः स्वयमेव कथयति—

'श्रीचापवंशतिलके श्रीव्याघ्रमुखनृपे शकनृपाणाम्।
पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभिः (५५०) अतीतैः॥
ब्राह्मस्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रीत्यै।
त्रिंशद्वर्षेण कृतो जिष्णुसुतब्रह्मगुप्तेन॥'

(ब्राह्मस्फुटसिद्धान्ते २४।७-८)

अनेन हि ब्राह्मस्फुटसिद्धान्तस्य ५५० मितशकाब्दे प्रणयनं तु सर्वथा सिध्यति किन्तु ब्रह्मगुप्तस्य जन्मशकमादाय तु विवाद एव। अत्रत्येन त्रिंशद्वर्षेणेति पदेन ब्रह्मगुप्तस्य ५५० शकाब्दे त्रिंशद्वर्षवयस्कत्वमनुमाय केचित् ५२० मितशकाब्दे तस्य जन्माधिवदन्ति अपरे तु त्रिंशद्वर्षेण कृत इति क्रियाविशेषणत्वेन तदादाय त्रिंशद्भिर्वर्षैः प्रणीत इत्यप्यामनन्ति। अपवर्गे तृतीया—मासेन व्याकरणमधीतमितिवत्। तन्मते ५०० मितशकाब्दमभित एव तस्य जन्म सिध्यति। एतादृशग्रन्थस्य प्रणयने त्रिंशद्वर्षाणि हि नैव दीर्घः काल एकैकस्य वेधस्य अनेकवर्षसाध्यत्वात्। आद्यपक्षेऽपि विंशतिवर्षवयस्को युवा एतद्विधां प्रौढां मतिमुपन्यस्यतीति न सहसा विश्वासास्पदम्। द्वितीयपक्षेऽपि ५०७ शकाब्दे खण्डखाद्यप्रणयनस्योल्लेखात् सप्ताशीतिवर्षवयस्कस्तादृशं करणग्रन्थं प्रणयतीत्यपि तथैव। तेनाद्यपक्ष एव सुसङ्गतो मन्तव्यः। तदनुसारेण ५२० शकाब्देषु स जनिं लेभे ५९० मितशकाब्दं यावत्स जीवित एवाऽऽसीदिति।

ब्रह्मगुप्तो हि महानन्वेषक आसीत्। वेधप्रसङ्गे यदा तेन दृष्टं यत्प्रचलितसिद्धान्तानीतग्रहस्थितिवास्तविकग्रहस्थित्योर्महदन्तरं तदा स आत्मानं नैव निरोद्धुं शशाक प्रवृत्तश्च दृक्प्रत्येयग्रहस्थितिसाधकसिद्धान्तप्रणयनाय। प्रणीतश्च तेन शास्त्रमिदं यत्प्रामाण्याय प्राचीनः पैतामहसिद्धान्तश्च सम्बद्धः कृतो बलादेव। यथा स एव कथयति—

'संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेण।
तत्संस्कृतग्रहेभ्यः कर्तव्यौ निर्णयादेशौ॥' इति।

सिद्धान्तग्रन्थादौ स कथयति—

'ब्रह्मोक्तं ग्रहगणितं महता कालेन यत्खिलीभूतम्।
अभिधीयते स्फुटं तज्जिष्णुसुतब्रह्मगुप्तेन॥'

खिलीभूतमिति कालान्तरितत्वेनानुपयोगित्वमापन्नमिति। इदं प्रागेवोक्तं यत्पञ्च हि ब्रह्मसिद्धान्ताः प्रसिद्धा भारतीयपरम्परायाम्। तत्राद्यः पैतामहनाम्ना वराहाचार्येण पञ्चसिद्धान्तिकायां व्याख्यातः। द्वितीयस्तु पितामहेन नारदाय प्रोक्त इति शाकल्येन व्याख्यातः। तृतीयो हि विष्णुधर्मोत्तरपुराणसमुपवर्णितः। चतुर्थस्तु ब्रह्मगुप्तेन स्वमहनीयान्वेषणसमायोजनेन सामयिकीकृतः ब्राह्मस्फुटसिद्धान्तनाम्ना प्रसिद्धः। पञ्चमस्तु भोजदेवेन बीजसंस्कारानर्पयित्वा ख्यापितो राजमृगाङ्कसम्बद्ध इति। एतदपि प्रागुक्तं यद्भारतीयज्योतिषे सन्ति हि त्रय एव सिद्धान्ता वस्तुतः प्रथाव्यापिनः सौर आर्यो ब्राह्मश्च, यत्र सौरो लाटसिंहव्याख्यातः सूर्यसिद्धान्तनाम्ना ख्यातः द्वितीयस्त्वार्यभटप्रवर्तितस्तृतीयस्तु ब्रह्मगुप्तप्रवर्तित इति। अथैतेषां करणग्रन्था अपि स्मर्यन्तेऽत्र।

सिद्धान्तः	करणग्रन्थाः	प्रचारक्षेत्रम्
सूर्यसिद्धान्तः	१. सूर्यतुल्यम् (१२२० शा०)	मध्यभारते
	२. मकरन्दः (१४००)	
	३. ताजिकभूषणम् (१४८०)	
	४. ज्योतिषदर्पणः (१४८०)	
	५. रामविनोदः (१५१२)	
	६. वार्षिकतन्त्रम् (१५५०)	
आर्यसिद्धान्तः	१. आर्यभटीयकरणम् (अप्राप्यम्)	दाक्षिणात्य-प्रदेशे
	२. धीवृद्धिदतन्त्रम् (अनि०)	
	३. करणप्रकाशः (१०१४)	
	४. भटतुल्यम् (१३३९)	
	५. ग्रहलाघवम्	उत्तराञ्चले काश्मीरकूर्माचलादौ
ब्रह्मसिद्धान्तः	१. खण्डखाद्यम् (५८७ शा०)	
	२. राजमृगाङ्कः (९६४)	
	३. करणकमलमार्तण्डः (९८०)	
	४. करणकुतूहलम् (११०५)	
	५. महादेवीसारिणी (१२३८)	
	६. खेटकसिद्धिः (१५००)	
	७. चन्द्रार्कौ (१५०५)	

ब्राह्मस्फुटसिद्धान्तानन्तरं न कोऽपि नवीनःसिद्धान्तः प्रवर्तितः केनापि। ब्रह्मगुप्तसमकक्षविपश्चिद्भास्कराचार्यस्तत्तुल्यतुलः कमलाकरोऽपि ब्राह्मस्फुट-सिद्धान्तमेव व्याख्यातः किमुतान्ये। भास्करस्य सिद्धान्तशिरोमणिः कमलाकरस्य सिद्धान्ततत्त्वविवेकश्च सिद्धान्तमेवामुं वीनादिना संस्कृत्य व्याख्यातः।

यद्यपि विषयेऽस्मिन् जयसिंहेन महान् प्रयासः कृतः। निर्दिष्टश्च तेन दृक्प्रत्येयग्रहस्थित्यानयनविधिश्च। तस्य प्रेरणया जगन्नाथपण्डितेन सम्पादितः सिद्धान्तसम्राट् स हि विषयेऽस्मिन् महती समुपलब्धिः किन्तु दुर्भाग्यवशान्न हि तस्य प्रयोगः कुत्रापि। स हि १६५० मितशकाब्दमभितः स्थितिमान्। एवञ्च १७४९ शकाब्दभवेन रघुनाथलेलेमहोदयेन विषयेऽस्मिन् बहु कृतं किन्तु नैव साफल्यमुपलब्धम्। १७८२ मितशकाब्दे गृहीतजनुषा सुधाकरद्विवेदिनाऽपि विषयेऽस्मिन् कार्यं कृतं किन्तु सोऽपि रघुनाथपदवीमेवाप। इत्थं हि अनेकै-र्विचक्षणैः स्वसामर्थ्यानुसारं प्रयासे कृतेऽपि ज्योतिषशास्त्रं हि सम्प्रत्यपि ब्रह्मगुप्त-परिसराभ्यन्तरे एव चेक्रीड्यते इति तस्य महिमा सर्वातिशायी।

ब्राह्मस्फुटसिद्धान्तानुसारेण कल्पीयभगणादिमानानि यथा शङ्करबालकृष्णेन निर्दिष्टानि—

ग्रहाः	भोगभगणाः	मन्दोच्च-भगणाः	पात-भगणाः		
सूर्यस्य	४३२०००००००	४८०		नक्षत्रभ्रमाः	१५८२२३३६४५००००
चन्द्रस्य	५७७५३३०००००			सावनदिनानि	१५७७९१६४५००००
चन्द्रोच्चस्य	४८८१०५८५८			सौरमासाः	१५८४००००००
राहोः	२३२३११६८			अधिमासाः	१५९३३०००००
भौमस्य	२२९६८२८५२२	२९२	२६७	चान्द्रमासाः	५३४३३३०००००
बुधस्य	१७९३६९५८९८४	३३२	५२१	तिथयः	१६०२९९००००००
गुरोः	३६४२२६४५५	८५५	६३	क्षयाहाः	२५०८२५५००००
शुक्रस्य	७०२२३८९४९२	६५३	८९३	वर्षमानम्	
शनेः	१४६५६७२९८	४१	५८४		३३५।१५।३०।२२।३०

इत्थं हि ब्रह्मसिद्धान्तानुसारेण ३६५।१२।३०।२२।३० आर्यसिद्धान्तानुसारेण ३६५।१५।३१।१५।० प्राचीनसूर्यसिद्धान्तानुसारेण ३६५।१५।३१।३०।० वर्तमान-सूर्यसिद्धान्तानुसारेण तु ३६५।१५।३१।३१।४० वर्षमानं भवति । ब्रह्मसिद्धान्ता-नुसारेण कल्पादावेव सर्वेऽपि मध्यमग्रहा एकविन्दावेष्यन्ति नान्तराले कदापि । एतद्विपरीतं सूर्यार्यसिद्धान्तानुसारेण ते कलियुगारम्भे एकविन्दावेष्यन्ति । सिद्धान्तोऽयं कल्पारम्भादेव ग्रहचारारम्भं मन्यते यदा सूर्यसिद्धान्तः कल्पारम्भा-नन्तरमेव । ब्रह्मसिद्धान्तस्य वर्षमानमार्यसिद्धान्ततः ५२$\frac{1}{2}$ विपलातो न्यूनं मूल-सूर्यसिद्धान्ता ६७$\frac{1}{2}$ विपलातः । एतेन ५४० शकाब्दे मेषसङ्क्रान्तिर्हि आर्य-सिद्धान्तापेक्षया १४।१४।५० सूर्यसिद्धान्तापेक्षया ५४।४३।४४ घटिकादिपूर्वमेव सम्पन्ना । सिद्धान्तोऽयं विषुवदिने (यदा रात्रिन्दिवं समदैर्घ्यं भजतः) मेष-सङ्क्रान्ति मन्यते यद्धि १९१२ शकाब्दे चैत्रकृष्णनवम्यां घटते । ५४० मित-शकाब्दे सा चैत्रकृष्णप्रतिपदायां ५७।२२ समये ५०९ मितशकाब्दे तु सा चैत्र-शुक्लतृतीयायां ५६।४० समये घटिताऽऽसीत् । तदेव स कथयति—

'यदि भिन्नाः सिद्धान्ताः भास्करसङ्क्रान्तयोऽपि भेदसमाः ।
स स्पष्टः पूर्वस्यां विषुवत्यर्कोदयो यस्य ।।' इति ।

(२४।४)

वस्तुतस्तु गणना या काऽपि भवतु सायना निरयणा वा कल्पादितो कल्पा-रम्भानन्तरकालतो वा किन्तु मेषसङ्क्रान्तिस्तु तदैव भवति यदा क्षितिजस्य पूर्वविन्दौ साक्षात्सूर्योदयो भवति । सिद्धान्ता भिन्ना भवितुमर्हन्ति किन्तु सूर्य-सङ्क्रमणसमयस्तु सर्वेषां कृते समान एव । स्पष्टमेव ब्रह्मगुप्तः सायनमानमङ्गी-करोति कथनेनानेन । १९१२ शकाब्दे सायनसूर्यः चैत्रकृष्णनवम्या ५३.० घटीषु

पूर्वविन्दौ उदेति । स एव वस्तुतः सङ्क्रान्तिकालः । यद्यपि ब्रह्मगुप्तेन क्रान्तिपातो नोक्तो नैव विचारितश्च तथापि वेधानुयायिना तेन तदानुकूल्यमेवाचरितम् । स उद्घोषयति—

'ब्रह्मोक्तमध्यरविशशितदुच्चतत्परिधिभिः स्फुटीकरणम् ।
कृत्वैनं स्पष्टतिथिर्दूरभ्रष्टान्यतन्त्रोक्तैः ॥' (२।३१)

वस्तुतस्तु वर्षमानमपि प्रतिवर्षमल्पीभवत्येव कामं नितान्तस्वल्पमात्रया स्यात् । वेदाङ्गकाले इदं ३६६।०।०।०।० आसीद्यदा ब्रह्मगुप्तकाले ३६५।१५।३०।२२।३० आसीत् सम्पातगतिस्वीकरणेऽन्यथा तु ३६५।१४।३२।०।० एव ।

ब्रह्मगुप्तेन हि ग्रहभगणमन्दोच्चपातविषये स्वातन्त्र्येण शोधः कृतो येन ज्योतिषशास्त्रं हि सामयिकं सञ्जातम् । स एवाद्यो ज्ञातेषु यो हि बीजगणितं निर्दिष्टवान् । तेनैवोक्तं स्यात्—

'यदा महता कालेन महदन्तरं भविष्यति तदा महामतिमन्त्रो ब्रह्मगुप्तसमानधर्मिण एवोत्पत्स्यन्ते ते तदुपलब्ध्यनुसारिणीं गतिमुरीकृत्य शास्त्राणि करिष्यन्ति ।' इति । ब्रह्मगुप्तस्य ब्राह्मस्फुटसिद्धान्तग्रन्थश्चतुर्विंशत्यध्यायेषु विभक्तः सन्त्यत्र १००८ आर्याः । न केवलं विषयप्रतिपादनेऽपितु स्वरूपेणाप्ययं ग्रन्थो ग्रन्थान्तराद्विलक्षणः । अत्र हि आद्यदशाध्यायेषु सर्वेऽप्यधिकाराः मध्यमस्पष्टत्रिप्रश्नग्रहयुतिभग्रहयुतिचन्द्रार्कग्रहचन्द्रोच्चशृङ्गछेद्यकपातगोलाद्याख्याः विवेचिताः । शेषाध्यायेषु अङ्कगणितबीजगणित(कुट्टक)प्रभृतिविषया निरूपिताः ।

तस्येयमादिमाऽऽर्या—

'जयति प्रणतसुरासुरकिरीटरत्नप्रभाच्छुरितपादः ।
कर्ता जगदुत्पत्तिस्थितिविलयानां महादेवः' ॥ १ ॥

यथा हि आर्यभटस्य समालोचको ब्रह्मगुप्तस्तथैव तस्य वटेश्वरः ।

ब्राह्मस्फुटसिद्धान्तस्य पृथूदकस्वामिना प्रणीता तिलकाख्या टीका लभ्यते ।

खण्डखाद्यकरणम्

ब्रह्मगुप्तेन खण्डखाद्याभिधः करणग्रन्थोऽपि प्रणीतः किन्तु ग्रन्थेऽस्मिन् स हि बहुधा ब्राह्मस्फुटसिद्धान्तेऽग्राह्यत्वेन तुच्छीकृतमार्यसिद्धान्तमपि स्वीकरोतीत्याश्चर्यमेव । ग्रन्थस्यास्य द्वौ भागौ पूर्वोत्तरार्द्धभेदेन । पूर्वभागे नवाधिकाराः उत्तरार्द्धे पञ्चैव । तस्येयमादिमाऽऽर्या—

'.... ... . ।
वक्ष्यामि खण्डखाद्यकमाचार्यार्यभटतुल्यफलम् ॥ १ ॥
प्रायेणार्यभटेन व्यवहारः प्रतिदिनं यतोऽशक्यः ।
उद्वाहजातकादिषु तत्समफललघुतरोक्तिरतः' ॥ २ ॥

खण्डखाद्ये हि वर्षमानं मूलसूर्यसिद्धान्तेन संवादि अर्थात् ३६५।१५।३१।३०।० गृहीतं येन हि स्वमतासम्मतमपि (तन्मतानुसारेण तु युगप्रवृत्तिः सूर्योदयादेव भवति) युगप्रवर्तनं ह्यर्द्धरात्रितो मन्तव्यं भवति । तत्रत्यानि हि ग्रहमध्यगतिक्षेपकादीनि आर्यभटकरणग्रन्थेन संवादीनि । खण्डखाद्योपरि वरुणभट्टोत्पलपृथूदकैश्च प्रणीताष्टीकाः सन्तीत्याचार्याः ।

ग्रहाणां दृक्प्रत्येयस्थितिसाधनमेव खण्डखाद्यस्य प्रयोजनम् ।

मूल्याङ्कनम्

ब्रह्मगुप्तो हि महानन्वेपकः । तस्य हि चक्रीयचतुर्भुजप्रमेयो भारतीयबीजगणिते महत्युपलब्धिः । ज्याभिर्विना भुजकोटिज्ययोरानयनं ज्यातश्चापानयनञ्च सर्वप्रथमं ब्रह्मगुप्तेनैव कृतम् । तत्प्रकारश्च यथा—

'भुजकोटचंशोनगुणा भार्धांशास्तच्चतुर्थभागोनैः ।
पञ्चद्वीन्दुखचन्द्रैर्विभाजिता व्यासदलगुणिता ॥
तज्ज्ये परमफलज्या सङ्गुणिता तत्फले विना ज्याभिः ।
इष्टोच्चनीचवृत्तव्यासार्धं परमफलजीवाः ॥' इत्यादि ।

यद्यपि परम्पराभक्तो भारतीयज्योतिषिसमूहो ब्रह्मगुप्तस्य समीक्षात्मकपद्धतिं सहसा नैव स्वीकर्तुं प्राभवत्तेन हि तेन खण्डखाद्यकाख्यो हि करणग्रन्थः किञ्चित्तदानुकूल्येन प्रणीतस्तथापि दृक्प्रत्येयतासिद्धचै ब्रह्मगुप्तप्रयत्नः सदाऽनुकरणीय एव ।

अयनचलनविषये आर्यभटवराहमिहिरलल्लप्रभृतिभिरिव ब्रह्मगुप्तेनापि तथ्यं नैवोन्नीतं दृश्यते । यद्यपि वराहेण अयनचलनं ज्ञातमासीत्तथापि सोऽपि तत्र सन्दिहान इव दृश्यते यदा स कथयति 'नूनं कदाचिदासीत्तेनोक्तं पूर्वशास्त्रेषु' इति ।

ब्रह्मगुप्तस्तु तदपि खण्डयन्निव दृश्यते, यदा स कथयति—

'परल्पा मिथुनान्ते द्युरात्रिनाडचोऽर्कगतिवशादृतवः ।
नायनयुगमयनवशात् स्थिरमयनद्वितयमपि तस्मात् ॥' इति ।

अयनचलनस्य बहुकालसम्भवित्वमेवात्र हेतुत्वेन भाव्यं तथाकथने । सामान्यतो हि क्रान्तिपातः पञ्चषष्टचा वर्षैः प्राय एकमंशं पश्चिमदिश्यपसरति । विषयोऽयं मुञ्जालेन प्रथममुन्नीत इति भास्कराचार्यस्य साक्ष्यतो ज्ञायते । ब्रह्मगुप्तकालेऽश्विन्यादौ क्रान्तिपात आसीदिति तदादिनक्षत्रगणना या प्रवृत्ता साऽधुनापि चलति । सम्प्रति (१९११ शकाब्दे) ब्रह्मगुप्ततः (५५० शकाब्दतः) १३६० वर्षाणि व्यतीतानि यद्धि पञ्चषष्टिवर्षसंख्याया २१ पर्यायान् जनयति ।

आर्यभटोन्नीतं भूचलनखण्डनमप्यस्यापरमसाफल्यम् । यद्यपि आर्यभटः स्वयमेवाऽत्र सन्दिहान इव दृश्यते यदा स कथयति—

'अनुलोमगतिर्नौस्थः पश्यत्यचलं विलोमगं यद्वत् ।
अचलानि भानि तद्वत्समपश्चिमगानि लङ्कायाम् ॥' इत्येकत्र ।
'उदयास्तमयनिमित्तं नित्यं प्रवहेण वायुना क्षिप्तः ।
लङ्कासमपश्चिमगो भपञ्जरः सग्रहो भ्रमति ॥' इत्यन्यत्र ।

सम्भवतः परमादीश्वरोऽपि तेनैव भ्रान्त इव दृश्यते यदा स 'भू' इत्येतस्य स्थाने 'भ' इति पाठेन व्याख्याति । ब्रह्मगुप्तस्तु स्पष्टमेव भूभ्रमणं खण्डयति कथनेनानेन—

'प्राणेनेति कला भूर्यदि तर्हि कुतो व्रजेत्कमध्वानम् ।
आवर्तनमुर्व्याश्चेन्न पतन्ति समुच्छ्रयाः कस्मात् ॥' इति ।

दृग्गणितयोरैक्यस्थापनमेव ब्रह्मगुप्तस्योद्देश्यं सिद्धान्तप्रणयने । स्पष्टमेव स कथयति—

'कृत्वाऽपि दृष्टिकर्मश्रीषेणार्यभटविष्णुचन्द्रोक्तम् ।
प्रतिदिनमुदयेऽस्ते वा न भवति दृग्गणितयोरैक्यम् ॥
भमुनिमृगव्याधानां यतस्ततो दृष्टिकर्म वक्ष्यामि ।
दृग्गणितसमं देयं शिष्याय त्रिरोषिता देयम् ॥' इति ।

पद्मनाभस्य बीजगणितम्

शकानन्तरसप्तमशतकवर्तिना पद्मनाभाख्येन विदुषा बीजगणितग्रन्थः प्रणीत आसीदिति भास्कराचार्यसाक्ष्यतो ज्ञायते ।

अन्ये

एवमेव भास्कराचार्यः श्रीधराख्यं बीजगणितकारं कमप्याचार्यं स्मरति । एवमेव महावीराख्येन विदुषा कश्चिद् व्यक्तगणितग्रन्थः प्रणीत आसीदिति तत्साक्ष्यत एव ज्ञायते । प्रसङ्गेऽस्मिन् मन्वाख्यस्य ब्रह्ममानसाख्यं करणं बलभद्राख्यस्य बलभद्रीयं वित्तेश्वरस्य करणसारश्च तत्र तत्र स्मर्यन्ते ।

मुञ्जालः बृहन्मानसं लघुमानसञ्च

प्रसङ्गेऽस्मिन् स्मर्यते मुञ्जालस्य बृहन्मानसं यद्धि भास्कराचार्योऽपि भूरिशः स्मरति । मुञ्जालो हि ब्रह्मगुप्तवत् स्वतन्त्रान्वेषक आसीत् । तस्य स्थितिकालः ८५४ मितशकाब्दमभित इति शङ्करबालकृष्णोऽनुमाति । कथ्यते हि मुञ्जालो हि मनोर्बृहन्मानसाख्यस्य करणग्रन्थस्य सारसंक्षेपरूपेण ग्रन्थमेकं प्रणिनायेति । मुञ्जालं हि भास्कराचार्यः सश्रद्धं स्मरति । यथा—

'विषुवत्क्रान्तिवलययोः सम्पातः क्रान्तिपातः स्यात् ।
तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे ॥

अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम् ।
तत्पक्षे तद्भगणाः कल्पे गोङ्गर्तुनन्दगोचन्द्राः ।।
तत्सञ्जातं पातं क्षिप्त्वा खेटेऽयमः साध्यः ।
क्रान्तिवशाच्चरमुदयाच्चरदललग्नागमे ततः क्षेप्यः ।।' (गोल० १७-१९)

मुञ्जालो यथा—

'उत्तरतो याम्यदिशं याम्यान्तात्तदनु सौम्यदिग्भागम् ।
परिसरतां गगनसदां चलनं किञ्चिद्भवेदपमे ।।
विषुवदपक्रममण्डलसम्पाते प्राचि मेषादिः ।
पश्चात्तुलादिरनयोरपक्रमासम्भवः प्रोक्तः ।।
राशित्रयान्तरेऽस्मात् कर्कादिरनुक्रमान्मृगादिश्च ।
तत्र च परमा क्रान्तिर्जिनभागमिताऽथ तत्रैव ।।
निर्दिष्टोऽयनसन्धिश्चलनं तत्रैव सम्भवति ।
तद्भगणाः कल्पे स्युर्गोरसरसगोङ्कचन्द्रमिताः ।।' इति ।

मुञ्जालस्य द्वौ ग्रन्थौ—मानसं नाम सिद्धान्तग्रन्थो लघुमानसं नाम करणग्रन्थः । आद्यो हि आर्याच्छन्दसि अपरश्चानुष्टुप्छन्दसि विद्यते । लघुमानसारम्भे स कथयति—

'प्रकाशादित्यवत्ख्यातो भारद्वाजो द्विजोत्तमः ।
लघुपूर्वं स्फुटोपायं वक्ष्येऽन्यल्लघुमानसम् ।।' इति ।

लघुमानसे हि सन्ति षष्टिमिताः श्लोकाः । अत्र ८५४ शकाब्दस्य चैत्रशुक्लप्रतिपदायाः रविवासराया मध्याह्नस्य क्षेपकानि दत्तानि । अतोऽयमेव ग्रन्थप्रणयनसमय इति तज्ज्ञाः । अत्र सन्ति अष्टावधिकाराः मध्यमस्पष्टतिथित्रिप्रश्नसूर्यग्रहणग्रहयुतिचन्द्रग्रहणशृङ्गोन्नत्याख्याः । इतःपरं न हि कस्मिंश्चिदपि पौरुषेयग्रन्थेऽयनचलनविषये किमपि विचिन्तितमासीत् । प्रथमं तन्मुञ्जालेनैवोन्नीतमिति तदस्य गौरवाधायकम् । अनेन हि चन्द्रस्पष्टेऽपि विशेषसंस्कार आधापितो यदन्यत्र नैव दृष्ट आसीत् । लघुमानस्य भट्टोत्पलकृता टीका विद्यते, १४९४ मितशकाब्दे प्रणीता ।

मुञ्जालेन हि ८५४ शकाब्दे ६।५० अयनांशास्तद्वार्षिकगतिश्च विकलैका दत्ता । तदनुसारेण ४४४ मितशकवर्षं हि शून्यायनांशवर्षम् ।

मुनीश्वरोऽपि स्वग्रन्थे मरीच्यां मुञ्जालं स्मरति ।

द्वितीय आर्यभटः महासिद्धान्तश्च

ब्रह्मगुप्तभास्कराचार्ययोरन्तकालवर्ती कश्चिदार्यभटो नाम ज्यौतिषिकः । एष हि ऐतिहासिकैर्द्वितीयार्यभट इति ख्यापितः । तस्य दृक्काणोदयसिद्धान्तं भास्कराचार्यः स्मरतीति तस्य भास्कराचार्यपूर्ववर्तित्वं स्पष्टमेव । दृक्काणो हि राशे-

स्तृतीयांशः । प्रथमो ह्यार्यभटो लग्नं त्रिशदंशवत्त्वेन गृह्णाति न तु दशस्वंशेषु । अयं द्वितीय आर्यभटो यो हि लग्नं तथा गृह्णाति । तेन भास्करीयम् 'आर्यभटादिभिः सूक्ष्मतत्त्वार्थं दृक्काणोदयाः पठिता' इति कथनं द्वितीयमार्यभटमेव सङ्केतयति । आर्यसिद्धान्ते ब्रह्मगुप्तेन लल्लेनापि ये दोषाः प्रख्यापितास्तेषां निराकरणपूर्वकं द्वितीयार्यभटेन स्वकीयः सिद्धान्तः प्रख्यापितः । यथा स कथयति ग्रन्थारम्भे—

'विविधखगागमपाटीकुट्टकबीजादिदृष्टशास्त्रेण ।
आर्यभटेन क्रियते सिद्धान्तो रुचिर आर्याभिः ॥' इति ।

एष हि ब्रह्मगुप्त इव अयनचलनं स्थिरं मन्यते । तस्य हि स्थितिकालः शङ्करबालकृष्णेन ८७५ शकाव्दानभितोऽनुमितः । अस्य सिद्धान्तग्रन्थो महासिद्धान्तनाम्ना प्रसिद्धः । सन्त्यत्र अष्टादशाध्यायाः । सर्वेऽप्यधिकाराः पाटीगणितमङ्कगणितं क्षेत्रफलघनफलादिकश्चास्य प्रतिपाद्यविषयाः । अष्टादशेऽध्याये बीजगणितं निरूपितं यद्धि कतिपयैः पक्षैर्ब्रह्मगुप्तनिरूपितसंस्कारापेक्षया विशिष्यते । असावपि वर्णसाहाय्येन अङ्कान् निर्दिशति किन्तु गणनाक्रम आर्यसिद्धान्ताद्भिन्न एव । स हि सप्तर्षीणामपि गतिं मन्यते प्रस्तौति च तेषां कल्पभगणाश्च । पुराणेष्वपि सप्तर्षीणां गतिरुक्ता दृश्यते किन्तु केचित्तन्न मन्यन्ते । सप्तर्षयो हि एकस्मिन्नक्षत्रे शतं वर्षाणां तिष्ठन्ति । स हि पाराशरसिद्धान्तमपि स्मरति । यथाऽऽह सः—

'पाराशर्यादिविचरयोगे नेच्छन्ति दृष्टिफलम् ।' (११।१)
'फलिसंज्ञे युगपादे पाराशर्यमतं प्रशस्तमतः ॥
वक्ष्ये तदहं.......................................।' (२।१)

अथात्र प्रस्तूयते तुलनात्मकदृष्टया कल्पीयोच्चपातभगणाः—

ग्रहाः	सूर्यसिद्धान्तानुसारेण		प्रथमार्यभटसिद्धान्तानुसारेण		ब्रह्मगुप्तसिद्धान्तानुसारेण		द्वितीयार्यभटसिद्धान्तानुसारेण		पाराशरसिद्धान्तानुसारेण	
	१	२	१	२	१	२	१	२	१	२
खेः	३८७	—					४६१	—	४८०	—
भौमस्य	२०४	२१४					२९९	२९८	३२७	२४५
बुधस्य	३६८	४८८					३३९	५२४	३५६	६४८
गुरोः	९००	१७४					८३०	९६	९८२	१९०
शुक्रस्य	५३५	९०३					६५४	९४७	५२६	८९३
शनेः	३९	६०					७६	६२०	५४	६३०

पाराशरसिद्धान्तोऽपि यथावर्णितो महासिद्धान्तो कतिपयपक्षेषु महासिद्धान्त-संवादी। उभयोरेव वर्षमानं बीजसंस्कृतब्रह्मगुप्तमानस्य नैकट्यं भजते।

पृथूदकः

प्रकरणेऽस्मिन् पृथूदकस्वामी ब्राह्मस्फुटसिद्धान्तस्य व्याख्यातृत्वेन स्वतन्त्र-ग्रन्थप्रणेतृत्वेन च स्मर्यते, किन्तु तस्य स्वतन्त्रो ग्रन्थः सम्प्रति नैवोपलभ्यते। तस्य स्थितिकालः शकानन्तर ८५० मितवर्षमभितोऽनुमीयते तज्ज्ञैः।

भट्टोत्पलः

खण्डखाद्य-बृहत्संहिता-बृहज्जातकाद्यनेकग्रन्थानां व्याख्याता भट्टोत्पलः काश्मीर आसीत्। तस्य स्थितिकालः शकानन्तरनवमशतकोत्तरार्धभाग-मभितोऽनुमितः। तस्य कश्चित्करणग्रन्थोऽप्यासीदिति विश्वस्यते। स हि त्रिष्वेव स्कन्धेषु प्रकाण्डपण्डित आसीत्। काव्यजगति मल्लिनाथस्य यत्स्थानं तदेवास्य ज्योतिषक्षेत्रे।

विजयनन्दो करणतिलकम्

एवमेव विजयनन्दिनः करणतिलकाख्यो ग्रन्थोऽपि विपश्चिद्भिः स्मर्यते यो हि ८८८ मितशकाब्दानभितः प्रणीत आसीद्यत्र हि अहर्गणानयनपद्धतिर्मध्यम-ग्रहानयनविधिर्ग्रहणोपयोगि रविचन्द्रबिम्बसाधनं महापातगणितञ्चेत्यादिविषयाः सप्रपञ्चं निरूपिता आसन्।

भानुभट्टः रसायनतन्त्रम्

ऐतिहासिकः भानुभट्टाख्यस्य रसायनतन्त्राख्यस्तन्त्रग्रन्थस्तिलकाख्यो हि करणग्रन्थश्च स्मर्यते। खण्डखाद्यटीकाकृद्वरुणाचार्यः रसायनतन्त्रतः कतिपय-श्लोकानप्युद्धरति। अस्य हि स्थितिकालः ९०० शकाब्दमभितोऽनुमितः।

व्यवहारप्रदीपाख्यस्य संहितामुहूर्तग्रन्थस्य प्रणेतृत्वेन पद्मनाभमिश्रं सुधाकर-दीक्षितः सादरं स्मरति।

श्रीपतिः

सिद्धान्तशेखरस्य धीकोटिदकरणस्य च प्रणेता रत्नमाला जातकपद्धति-ग्रन्थानाञ्च रचयिता श्रीपतिः भास्कराचार्येण सिद्धान्तशिरोमणौ सश्रद्धं स्मर्यते। वासनावार्तिककृद्यथा तमुद्धरति—

'ज्योतिर्ग्रहाणां विधिवासरादौ सृष्टिर्लयस्तद्दिवसावसाने।
यस्मादतोऽस्मिन् गणिते ग्रहाणां योग्यो मतं नः खलु कल्प एव ॥' इति।

वासनावार्तिके एवान्यत्र 'लल्लश्रीपतिप्रणीतशास्त्राद् बालावबोधम्' इति श्रीपतेः सिद्धान्तकृत्त्वं ख्यापितम्। तस्य बीजगणितादुद्धरणं यथा मुनीश्वरेण लीलावतीटीकायां कृतम्—

'दोःकोटिभागरहिताभिहता खनाग-
चन्द्रास्तदीयचरणोनशरार्कदिग्भिः ।
ते व्यासखण्डगुणिता विहृता फलं तु
ज्याभिर्विनाऽपि भवतो भुजकोटिजीवा ॥' इति ।

अस्य हि ९६० शकाब्दानभितोऽनुमितः स्थितिकालः । त्रिस्कन्धस्यैव पण्डितोऽयं सिद्धान्तपक्षे आर्यसिद्धान्तानुयायी ग्रन्थप्रणयने लल्लानुगामीति तज्ज्ञैरनुमीयते ।

वरुणाचार्यः

एवमेव खण्डखाद्यस्य टीकाकृद्वरुणाचार्यः सश्रद्धं स्मर्यते कालविद्भिः । अस्य स्थितिकालः कैश्चित् ९६० मितशकाब्दमभितः कैश्चित्तु तत्र सिद्धान्तशिरोमणि-ग्रन्थस्योल्लेखात् १०७२ मितशकाब्दानन्तर एवेत्यप्यनुमितः ।

भोजदेवः राजमृगाङ्कः

भोजदेवस्य राजमृगाङ्को ब्रह्मगुप्तसिद्धान्तस्य करणग्रन्थः । ग्रन्थेऽस्मिन् मध्यमस्पष्टाख्यौ द्वावेवाधिकारौ सम्प्रति ज्ञायेते, यत्र ६९ श्लोकाः सन्ति । अनेन हि ब्रह्मगुप्तसिद्धान्ते बीजसंस्कार आहितः । ग्रन्थान्ते लिखितमस्ति—

'इत्युर्वीपतिवृन्दवन्दितपदद्वन्द्वेन सद्बुद्धिना ।
श्रीभोजेन कृतं मृगाङ्ककरणं ज्योतिर्विदां प्रीतये ॥' इति ।

ग्रन्थेऽस्मिन् करणारम्भकालीनमन्दोच्चपाता हि ब्रह्मसिद्धान्तगा एव । बीज-संस्कारो ह्यस्यैव मौलिककल्पना प्रतिभाति इतः पूर्वं तददृष्टेः । तदानयन-प्रकारश्च यथा तत्रोक्तः—

'नन्दाद्रीन्द्वग्निसंयुक्तान् (३१७९) भजेत् खाभ्राभ्रभानुभिः ।
शाकाब्दानविनष्टं तु भाजकाच्छेषमुत्सृजेत् ॥
तयोरल्पं द्विशत्याप्तं बीजं लिप्तादिकं पृथक् ।
त्रिभिः शरैर्भुवा द्व्यक्षैर्बाणैस्तिथिभिरब्धिभिः ॥
द्विकेन यमलेनैव गुण्यमर्कादिषु क्रमात् ।
स्वं शशीध्रे धरासूनौ सूर्यपुत्रे परेष्वृणम् ॥' इति ।
(१।१७-१९)

अयनांशानयनविधिर्यथा—

'शकः पञ्चाब्धिवेदोनः षष्टिभक्तोऽयनांशकाः ।' (१।२५)

यथा १९११–४४५ = १४६६ × ६० = २४।२६ । ग्रन्थान्तरे तु १९११–४४४ = १४६७ × ६० = २४।२७ । ग्रन्थोऽयं महादेवीसारिण्यां स्मर्यते । ताजकसारे यथा—

'श्रीसूर्यतुल्यात्करणोत्तमाद्वा स्पष्टा ग्रहा राजमृगाङ्कतो वा ।' इति ।

अत्रत्यानि क्षेपकाणि ९६३ मितशकाब्दसम्बद्धानीति ग्रन्थस्यास्य प्रणयनकालः ९६४ मितशकाब्द इति तज्ज्ञाः । भोजदेवेन कृतो वा कारितोऽपि किं न स्याद् ग्रन्थोऽयं भोजस्यैव ज्योतिषविज्ञत्वं प्रसाधयति नाममंज्ञः कर्तुं कारयितुं वा प्रभवतीति ।

दशबलस्य करणकमलमार्तण्डः

एवमेव राज्ञो दशबलस्य करणकमलमार्तण्डश्च क्षेत्रेऽस्मिन् स्मर्यते । यथोक्तं तदन्ते—

'वल्लभान्वयसञ्जातो विरोचनसुतः सुधीः ।
इदं दशबलः श्रीमान् चक्रे करणममृतम् ।।' इति ।

ग्रन्थोऽयं राजमृगाङ्कमनुसरति स्वसाधनाय । अस्य मन्दोच्चनक्षत्रध्रुवपातादयो राजमृगाङ्कसंस्कृतब्रह्मसिद्धान्तसम्मताः । अत्र हि ग्रहसाधनं वर्षगणद्वारा निर्दिष्टम् । इतः पूर्वं तदहर्गणमाध्यमेन निर्दिष्टमासीद्यद्धि गणिते गौरवं भजते स्म । अत्र तत्साधककोष्ठकान्यपि दत्तानि सन्ति येन तत्साधने सौकर्यं भवति । अत्र हि अयनांशशून्यवर्षत्वेन ४४४ शकाब्दाः अयनांशस्य वार्षिकी गतिश्च कलैका निर्दिष्टा । सन्त्यत्र मध्यमस्पष्टत्रिप्रश्नचन्द्रसूर्यग्रहणोदयास्तशृङ्गोन्नतिमहापातग्रहयुतिस्फुटाधिमासवत्सरानयनेति दशाधिकाराः २७९ श्लोकाश्च । अस्य प्रणयनकालस्तु ९८० मितशकाब्दः । वर्षगणद्वारा मध्यमग्रहसाधनमेवास्य वैशिष्टयम् ।

ब्रह्मदेवः करणप्रकाशः

ब्रह्मदेवस्य करणप्रकाशो हि आर्यसिद्धान्तानुगामी करणग्रन्थः । यथोक्तं ग्रन्थकृतैव—

'नत्वाहमार्यभटशास्त्रसमं करोमि श्रीब्रह्मदेवगणकः करणप्रकाशम् ।' इति ।

ग्रन्थोऽयं लल्लाहितबीजसंस्कारमार्यसिद्धान्तमनुयाति इति तद्व्यवहृतक्षेपकाज्ज्ञायते । क्षेपकान्यस्य १०१४ शकाब्दसम्बद्धानि । अत्र त्वहर्गणमाध्यमेनैव मध्यमग्रहानयनमुक्तम् । मध्यमस्पष्टपञ्चतारास्पष्टीकरणच्छायाचन्द्रसूर्यग्रहणोदयास्तशृङ्गोन्नतिग्रहयुतीति नवाधिकारा अत्र सप्रपञ्चं निरूपिताः । अत्र शून्यायनांशवर्षत्वेन ४४५ मितशकाब्दो गृहीतोऽयनांशगतिश्च प्रतिवर्षमेककलामानेन ।

शतानन्दः भास्वती

शतानन्दप्रणीता भास्वती वराहसंस्कृतसूर्यसिद्धान्तसम्बद्धकरणग्रन्थः । अस्योपक्रमवर्षः १०२१ मितशकाब्दः । तत्रोक्तम्—

'अथ प्रवक्ष्ये मिहिरोपदेशात्तत्सूर्यसिद्धान्तसमं समासात् ।' इति ।

अत्रापि मध्यमग्रहसाधनमहर्गणस्थाने वर्षगणद्वारा निरूपितमस्ति। आरम्भश्चात्र स्पष्टमेषसङ्क्रान्तित एव न तु मध्यममेषसङ्क्रान्तितो यथाऽन्यत्र। अत्र क्षेपकग्रहगतीनां गुणकभाजकानि शतांशपद्धत्या लिखितानि सन्ति। तत्रापि सूर्याचन्द्रमसोर्गतिस्थितिः नक्षत्रात्मिका भौमादिग्रहाणां तु राश्यात्मिकैव। अत्राष्टावधिकाराः तिथिध्रुवाधिकारो ग्रहध्रुवाधिकारः स्फुटतिथ्यधिकारः ग्रहस्फुटाधिकारः त्रिप्रश्नाधिकारः चन्द्रग्रहणाधिकारः सूर्यग्रहणाधिकारः परिलेखश्चेति। अत्र शून्यायनांशवर्षः ४५० शकाब्दाः वार्षिकी अयनगतिश्च कलैका। अस्योपरि बलभद्रस्य बालबोधिनी (१३३० शा०) अनिरुद्धस्य (१४१७ शा०) माधवस्य (१४४२ शा०) गङ्गाधरस्य (१६०७) भास्वतीकरणपद्धतिः रामकृष्णस्य तत्त्वप्रकाशिका वृन्दावनस्योदाहरणञ्च केचन श्रुताष्टीकाग्रन्थाः।

करणोत्तमकरणम्

अज्ञातकर्तृकस्य करणोत्तमाख्यग्रन्थस्यावस्थितिर्हि रत्नमालायाः महादेवकृतटीकातो ज्ञायते। अस्य प्रणयनकालः १०३८ मितशकाब्दो मतः। अत्र हि शून्यायनांशवर्षत्वेन ४३८ मितशकाब्दो गृहीतः अयनांशस्य वार्षिकी कलैका गतिः। असौ आर्यपक्षीयः करणग्रन्थ आसीदिति तज्ज्ञा अनुमान्ति।

महेश्वरः शेखरः

महेश्वरस्य शकानन्तरैकादशशतकपूर्वार्द्धमभितः स्थितिमतः शेखराख्यः करणग्रन्थ आसीत्।

सोमेश्वरः

सोमेश्वरस्य मानसोल्लासः करणग्रन्थत्वेनापि गृहीतः। अस्यारम्भकालस्तु १०५१ मितशकाब्दो मतः। अत्र हि ग्रहसाधनमहर्गणसाधनेन निर्दिष्टम्।

माधवः

एवञ्च माधवप्रणीतः सिद्धान्तशिरोमणिः सम्प्रति दुर्लभोऽपि भास्कराचार्यसाक्ष्येन स्मर्यते। एवमेव तत्साक्ष्येणैव ब्रह्मदेवप्रणीतं बीजगणितं विष्णुदैवज्ञप्रणीतं बीजगणितञ्च स्मर्यते नाममात्रतः।

भास्कराचार्यः सिद्धान्तशिरोमणिः

ततश्चोदेति भास्कराचार्यो ज्योतिषभास्करः। तस्य हि सिद्धान्तशिरोमणिनामकः सिद्धान्तग्रन्थः करणकुतूहलसंज्ञकः करणग्रन्थश्च सर्वानपि अतिशय्य ज्योतिषजगति स्वविजयपताकामुल्लासयन्तः स्तो नवशतवर्षेभ्यः। भास्कराचार्यः १०३६ मितशकाब्दे समुत्पन्न इति तस्यैव—

'रसगुणपूर्णमही (१०३६) समशकनृपसमयेऽभवन्मयोत्पत्तिः ।
रसगुणवर्षेण मया सिद्धान्तशिरोमणी रचिता ।।'
(गोला० ५८)

इति कथनाज्ज्ञायते । अनेन सिद्धान्तशिरोमणेः प्रणयनकालः १०७२ मितशकाब्द इत्यपि ज्ञायते । तस्य करणग्रन्थश्च ११०५ समशकाब्दे प्रणीत इति तदारम्भवर्षाज्ज्ञायते ।

भास्कराचार्यात्पूर्वमपि कश्चिदपरो भास्करो नाम गणक आसीद्यस्य आर्यभटीयभाष्यं महाभास्करीयं लघुभास्करीयञ्चेति ग्रन्थत्रयी लभ्यते । तत्र प्रथमं हि नाम्नैव स्पष्टं द्वितीयं तृतीयञ्च करणग्रन्थावित्येतावदेव तद्विषये ज्ञायते। स हि दाक्षिणात्य आसीत् । तस्य ग्रन्था हि शाकपञ्चदशशतकपर्यन्तमपि दक्षिणप्रदेशे प्रयुज्यमाना आसन्निति श्रूयते । केचित्तं ब्रह्मगुप्तादपि पूर्ववर्तिनं मन्यन्ते । इतोऽधिकं तद्विषयेऽन्वेष्टव्यमेवास्ति । शङ्करबालकृष्णस्तु तं नाम्नाऽपि न स्मरति सुधाकरश्च । गोरक्षप्रसादस्तु तं ५५१ मितशकाब्दमभितः स्थितिमन्तं मन्यते । यदि हि तथाऽभविष्यत् तदा मुञ्जाल-श्रीपतिप्रभृतिभिरवश्यमेव यत्र कुत्रापि स्मृतोऽभविष्यत् । अस्तु । प्रकृतं तु सिद्धान्तशिरोमणेः प्रणेतारं भास्कराचार्यमेवानुधावति । स स्वयमेव कथयति—

आसीत् सह्यकुलाचलाश्रितपुरे त्रैविद्यविद्वज्जने
नानासज्जनधाम्नि विज्जडविडे शाण्डिल्यगोत्रो द्विजः ।
श्रौतस्मार्तविचारसारचतुरो निःशेषविद्यानिधिः
साधूनामवधिर्महेश्वरकृती दैवज्ञचूडामणिः ।।
तज्जस्तच्चरणारविन्दयुगलप्राप्तप्रसादः सुधी-
र्मुग्धोद्बोधकरं विदग्धगणकप्रीतिप्रदं प्रस्फुटम् ।
एतद्व्यक्तसदुक्तियुक्तिबहुलं हेलावगम्यं विदां
सिद्धान्तग्रथनं कुबुद्धिमथनं चक्रे कविर्भास्करः ।।' इति ।
(गोल० ६१-६२)

अनेन सिध्यति यत्स हि महेश्वरस्य शेखराख्यकरणकृतः पुत्रः सह्यकुलपर्वतप्रान्तग्रामवास्तव्यः । तस्य जनक एव गुरुरप्यासीत् ।

सिद्धान्तशिरोमणेश्चत्वारो भागाः पाटीगणितमर्थात् लीलावती बीजगणितं ग्रहगणितं गोलाध्यायश्च । क्वचिदुत्तरभागस्य द्वौ भागावेव सिद्धान्तशब्देनापि व्यवह्रियेते । पाटीगणितं लीलावत्याख्यमङ्कगणितस्य महत्त्वमायनस्य च स्वतन्त्र एव ग्रन्थः । अत्र हि सन्ति २७८ पद्यानि । दिङ्मात्रं यथा—

'एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः ।
अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात् ।। २ ।।

जलधिश्चान्त्यं मध्यं परार्द्धमिति दशगुणोत्तराः संज्ञाः ।
सङ्ख्यायाः स्थानानां व्यवहारार्थं कृताः पूर्वैः' ॥ ३ ॥

उपक्रमो यथा—

पाटीं सद्गणितस्य वच्मि चतुरप्रीतिप्रदां प्रस्फुटां
संक्षिप्ताक्षरकोमलामलपदैर्लालित्यलीलावतीम्' ॥ १ ॥

अत्र हि विविधपरिमाणनिर्देशः सङ्ख्यानविधिः परिकर्माष्टकं (पूर्णाङ्कानां योगान्तरगुणनभागवर्गवर्गमूलघनघनमूलानि । अपूर्णाङ्कपरिकर्माष्टकं शून्यपरिकर्माष्टकमिष्टकर्म त्रैराशिकं पञ्चराशिकं क्षेत्रफलं घनफलं कुट्टकं पाक्षिकविपर्ययः सर्वांशिकविपर्ययश्च निरूपिताः । कथ्यते हि लीलावत्यध्ययेन जनो हि वृक्षस्थ पत्राण्यपि परिसङ्ख्यातुं प्रभवतीति । नापि स्यात्तदेतावत्तु सत्यमेव यद् ग्रन्थोऽयं सर्वाङ्गपूर्ण इति ।

बीजगणितमस्य द्वितीयो भागः । अत्र धनर्णषाड्विध्यं शून्यसङ्कलनादिकमव्यक्तकल्पनासङ्कलनादिकमनेकवर्णषाड्विध्यं करणीषाड्विध्यं कुट्टकः वर्गप्रकृतिः चक्रवालमेकवर्णसमीकरणमनेकवर्णमध्यमाहरणं भावितञ्चेति निरूपितविषयाः । तस्यायमादिमः श्लोकः—

'उत्पादकं यत्प्रवदन्ति बुद्धेरधिष्ठितं सत्पुरुषेण साङ्ख्याः ।
व्यक्तस्य कृत्स्नस्य तदेकबीजमव्यक्तमीशं गणितं च वन्दे ॥ १ ॥ इति ।

विषयोपपत्तिर्यथोक्तं तत्र—

'पूर्वं प्रोक्तं व्यक्तमव्यक्तबीजं प्रायः प्रश्ना नो विना व्यक्तयुक्त्या ।
ज्ञातुं शक्या मन्दधीभिर्नितान्तं यस्मात्तस्माद् वच्मि बीजक्रियाञ्च' ॥ २ ॥

धनर्णयोगे करणसूत्रं यथा—

'योगे युतिः स्यात् क्षययोः स्वयोर्वा धनर्णयोरन्तरमेव योगः ।' इति ।

अवसाने च यथा—

'ब्रह्माह्वयश्रीधरपद्मनाभबीजानि यस्मादतिविस्तृतानि ।
आदाय तत्सारमकारि नूनं सद्युक्तियुक्तं लघुशिष्यतुष्टयै ॥' इति ।

ग्रहगणितमस्य तृतीयो भागः । अत्र उपोद्घातः मध्यमाधिकारो मानाध्यायः भगणाध्यायः ग्रहानयनं कक्षाध्यायोऽधिकमासादिविचारः भूपरिज्यादिविषयाः स्पष्टाधिकारः त्रिप्रश्नाधिकारः पर्वसम्भवाधिकारः चन्द्रग्रहणाधिकारः सूर्यग्रहणाधिकारः ग्रहच्छायाधिकारः ग्रहोदयास्ताधिकारः शृङ्गोन्नत्यधिकारः ग्रहयुत्यधिकारः भग्रहयुत्यधिकारः पाताधिकारश्च विवेचितविषयाः । यथोक्तं तत्रैव—

'त्रुटयादिप्रलयान्तकालकलना मानप्रभेदः क्रमात्
चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।

भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः' ॥ ६ ॥

ग्रन्थाधारश्च यथा—

'कृती जयति जिष्णुजो गणकचक्रचूडामणि-
र्जयन्ति ललितोक्तयः प्रथिततन्त्रसद्युक्तयः ।
वराहमिहिरादयः समवलोक्य येषां कृतीः
कृती भवति मादृशोऽप्यतनुतन्त्रबन्धेऽल्पधीः' ॥ २ ॥

गोलाध्यायोऽस्य चतुर्थः पादः । अत्र हि उपोद्घातः गोलस्वरूपप्रश्नाध्यायः मध्यगतिवासना छेद्यकाधिकारः गोलबन्धाधिकारः त्रिप्रश्नवासना ग्रहणवासना उदयास्तवासना शृङ्गोन्नतिवासना यन्त्राध्यायः ऋतुविचारः प्रश्नाध्यायश्च क्रमेण विवेचितविषयाः । यथोक्तं तत्रोपक्रमे—

'मध्याद्यं द्युसदां यदत्र गणितं तस्योपपत्तिं विना
प्रौढिं प्रौढसभासु नैति गणको निःसंशयो न स्वयम् ।
गोले सा विमला करामलकवत् प्रत्यक्षतो दृश्यते
तस्मादस्म्युपपत्तिबोधविधये गोलप्रबन्धोद्यतः' ॥ २ ॥

अध्यायोऽयमपूर्ण इव प्रतिभात्यवसानपद्याभावात् ।

ग्रन्थस्यास्य यावत्यष्टीकाः सन्ति न तावत्यो ग्रन्थान्तरस्य । तत्रापि काश्चित् सम्पूर्णग्रन्थमाव्याप्य काश्चिल्लीलावतीमेवादाय काश्चित्तु बीजगणितमाश्रित्यापरास्तु शेषभागद्वयमावृत्य च सन्ति ।

लीलावतीमादाय याष्टीकाः सन्ति तासु—गोवर्धनस्य गणितामृतसागरी (१३४२ शा०), गणेशदैवज्ञस्य (१४६७ शा०) बुद्धिविलासिनी, धनेश्वरस्य लीलावतीभूषणम्, महीदासस्य महीदासी (१५०९ शा०), मुनीश्वरस्य लीलावतीविवृतिः (१५५७ शा०), महीधरस्य लीलावतीविवरणम् (१५६० शा०), रामकृष्णस्य गणितामृतलहरी (१२६८ शा०), नारायणस्य पाटीगणितकौमुदी (१२९९ शा०), रामकृष्णस्य मनोरञ्जना, रामचन्द्रस्य लीलावतीभूषणम्, विश्वरूपस्य निसृष्टदूती, सूर्यदासस्य गणितामृतकूपिका, चन्द्रशेखरस्य उदाहरणम्, विश्वेश्वरस्योदाहरणम्, टीकारामस्य चन्द्रकला । एवमेव दामोदरदेवसीहायपरशुरामरामदत्तलक्ष्मीनाथवृन्दावनश्रीधरादिप्रणीताष्टीकाः प्रसिद्धाः । बीजगणितस्य तु कृष्णस्य बीजनवाङ्कुरः (१५२४ शा०) (इयमेव बीजपल्लवकल्पलतावतारादिनाम्नाऽपि ज्ञायते) रामकृष्णस्य बीजप्रबोधः (१५७० शा०) परमसुखस्य बीजविवृत्तिकल्पलता कृपारामस्य उदाहरणं च प्रसिद्धाः कतिपयाष्टीकाः ।

ग्रहगणितस्य गोलाध्यायस्य च गणेशस्यैव सिद्धान्तशिरोमणिप्रकाशः (१५०० शा०), नृसिंहस्य वासनाभाष्यम् (१५४३ शा०), मुनीश्वरायरनामकस्य विश्वरूपस्य मरीचि (१५५७ शा०), गोपीनाथस्य सिद्धान्तसूर्योदयः (१४५० शा०)।

सम्पूर्णग्रन्थस्य तु सूर्यदासस्य परमादीश्वरस्य सिद्धान्तदीपिका, रङ्गनाथस्य मितभाषिणी (१५८१ शा०), लक्ष्मीदासस्य करणतत्त्वचिन्तामणिः (१४४९ शा०), विश्वनाथस्योदाहरणम्, एवमेव जयलक्ष्मणस्य महेश्वरस्य मोहनदासस्य लक्ष्मीनाथस्य वाचस्पतिमिश्रस्य हरिहरस्य च टीकाः प्रसिद्धाः।

करणकुतूहलं नाम भास्करस्य करणग्रन्थत्वेन प्रसिद्धम्। अस्य हि प्रारम्भकालः ११०५ मितशकाब्दः। अत्रत्यानि क्षेपकाणि ११०४ शकाब्दस्य गुरुवासरायाः फाल्गुनकृष्णामावास्यायाः सूर्योदयस्य। मध्यमग्रहसाधनञ्चात्राहर्गणमाध्यमेन। ग्रन्थोऽयं प्रणेत्रा ब्रह्मतुल्यत्वेन घोषितः, किन्तु राजमृगाङ्कबीजसंस्कृतब्रह्मतुल्य एव। अस्यापरं नामधेयं ग्रहागमकुतूहलमपि। ग्रहलाघवोक्ता ब्रह्मपक्षीयग्रहा एतदनुसारेणैव। अत्र हि मध्यमस्पष्टत्रिप्रश्नचन्द्रसूर्यग्रहणोदयास्तशृङ्गोन्नतिग्रहयुतिपूर्वसम्भवेति दशाधिकारा यत्र क्रमशः सप्तदश त्रयोविंशतिः सप्तदश चतुर्विंशतिः दश पञ्चदश पञ्च सप्त षोडश पञ्चेति १३९ पद्यानि सन्ति।

करणकुतूहले सोड्ढलपद्मनाभशङ्करादिप्रणीताष्टीकाः सन्ति। एवमेव केशवार्कस्य ब्रह्मतुल्यगणितसारः हर्षगणितकृतगणककुमुदकौमुदी विश्वनाथस्योदाहरणम् एकनाथस्य टीका च।

लीलावत्याः १५०९ शकाब्दे बीजगणितस्य १५९७ शकाब्दे पर्शियन (परश्चायन ?) भाषायां रूपान्तरं कृतम्। एवमेवोभयोरेव १७५५ शकाब्दे अङ्ग्रेजी (अङ्गराजीय ?) भाषायामपि। गोलाध्यायस्य १७२३ शकाब्दे बापूदेवेन अङ्ग्रेजीभाषायां रूपान्तरं कृतम्। भारतेऽपि सिद्धान्तशिरोमणेः समग्रस्य करणकुतूहलस्य च सन्ति परःशतानि संस्करणानि मुद्रितानि। एतदतिरिक्तमपि भास्कराचार्यप्रणीतत्वेन व्यवहारदर्पणाख्यो मुहूर्तग्रन्थः स्मर्यते (११८५ शा०)। एवमेव भास्करस्य विवाहपटलाख्यस्य ग्रन्थस्यास्तित्वं सूचितं शङ्करबालकृष्णेन।

रत्नमालाटीकायां माधवेन

एतत्प्रागेवोक्तं यद्भास्करो ब्राह्मस्फुटसिद्धान्ताद्विषयजातं राजमृगाङ्काच्च गृहीत्वा ग्रन्थप्रणयनमकरोत् तेन तत्र नास्ति तत्र काऽपि नवीनोपपत्तिस्तथापि प्रस्तुतिकौशल्यमेव तस्य साफल्ये हेतुः। तेन तत्र न चेदपि वेधसाध्यं विचारसाध्यं नवीनं वस्तु तु विद्यत एव। गोलं हि तत्र करतलामलकात् स्पष्टम्। त्रिप्रश्नाधिकारे नवीना रीतयो निर्दिष्टाः। तेन हि शङ्कोरिष्टदिक्छायासाधनं

कृतं यद्धि पूर्वाचार्यग्रन्थेषु न विद्यते। पातसाधने पूर्वाचार्याणां मतं निरस्य स्वमतमुपस्थापितम्। यथा हि पूर्वं ग्रहाणां शराः क्रान्तिवृत्ते ध्रुवाभिमुखत्वेन वर्ण्यंते स्म किन्तु भास्करेण ते हि क्रान्तिवृत्ते लम्बत्वेन वर्णिताः। उदयान्तरमस्य नवीनं शोधनम्। अहर्गणद्वारा मध्यमग्रहानयने सर्वेषां दिनानां समानदैर्घ्यमानमावश्यकं किन्तु यथार्थस्तु तद्विपरीतमेव। विषुवदिनेऽपि दिनदैर्घ्यं त्रिंशद्घटिकातः किञ्चिन्न्यूनमधिकं वा भवति। तेन मध्यमसूर्ये स्पष्टसूर्ये उदयस्यान्तरं भवति। अहर्गणागतग्रहा मध्यमसूर्यस्यैव भवन्ति। तेषां स्पष्टोदयकालीनकरणाय पूर्वाचार्यैर्भुजान्तरचरसंस्कारा निर्दिष्टाः। भास्करस्तत्रोदयान्तराख्यं संस्कारमपि संयोजयति। सूर्यस्य क्रान्तिवृत्ते नैव सदैव समाना गतिः। इष्टकालीनमध्यमस्पष्टरवेर्यदन्तरम् एतदेव फलसंस्कार इत्युच्यते। तदनुसारेण स्पष्टोदयोऽग्रे पश्चाद्वा भवति। एतत्सम्बद्धसंस्कारो हि भुजान्तर इत्युच्यते। भूर्हि स्वकक्षायां विषुवत्येव भ्रमति न तु क्रान्तिवृत्ते। तेन हि क्षितिजे क्रान्तिवृत्तीयत्रिंशदंशस्योदये यावान् कालोऽपेक्षितो नाडीवृत्तीयत्रिंशदंशोदये सदैव न तावानेव कालोऽपेक्ष्यते। अयमेवोदयान्तरसंस्कारः। संस्कारोऽयमपेक्षितः। यत्र कुत्र तु भास्कराचार्यो ब्रह्मगुप्तस्य त्रुटीरपि सङ्केतयति। तेन हि भास्करो न केवलं व्याख्याताऽपितु सिद्धान्तप्रवर्तकोऽपि। तेन हि अहर्गणतो ग्रहानयनपद्धतिमारभ्य ज्योत्पत्तिसदृशगहनविषयोऽपि सोपपत्तिकं निरूपितः। अस्य हि प्रतिपादनरीतिश्च सरसा स्पष्टा च। तस्य हि गणितसाधकश्लोका अपि काव्यानन्दायापि भवन्ति। वेधविषये भास्कराचार्येण न किमपि चिन्तितं कृतं वा। तस्य हि समग्रः प्रयास उपपत्तिविवेचनायैव सम्प्रवृत्तः। तेन स्वकीयसिद्धान्तशिरोमणेस्तृतीयचतुर्थमयोर्वासनाभाष्यमपि प्रणीतम्। सर्वप्रथमत्वेन तेनैवाङ्कगणितीयक्रियासु अपरिमेयराशीनां प्रयोगः कृतः। चक्रविधिनाऽऽविष्कृतमनिश्चितमेकवातीयवर्गासमीकरणव्यापकसमाधानमेव तस्य गणितशास्त्राय सर्वोत्तममुपायनम्। अनेन गोलाध्याये माध्यकर्षणतत्त्वनाम्ना गुरुत्वाकर्षणसिद्धान्तोऽपि प्रणीतः। अनेन हि दशमलवप्रणाल्याः क्रमिकरूपेण व्याख्याऽपि कृता।

ज्योतिषसिद्धान्तस्य भास्करोऽन्तिम आचार्यः। भास्करादेव प्रारब्धं शास्त्रं भास्करं प्राप्य विश्रान्तमिति नात्युक्तिः। भास्करानन्तरं केवलं व्याख्याकृत एव सञ्जाता न तु सिद्धान्तपर्यालोचकाः। यच्च वार्हस्पत्ये—

'शतन्यूने सहस्राणां चतुष्के तु कलौ युगे।
विन्ध्यादुत्तरदेशे स्यान्मूलागमपरिक्षयः॥'

इति कथितं तद्विन्ध्यदक्षिणेऽपि भास्करानन्तरं सत्यमेव सञ्जातम्।

महादेवीसारिणी

महादेवीसारिणी वा महादेवकृता ग्रहसिद्धिर्ब्राह्मसिद्धान्तपक्षीयः करणग्रन्थः।

सन्त्यत्र ४३ श्लोकाः। केवलमत्र मध्यमस्पष्टग्रहसाधनविधिरेव निर्दिष्टः। अत्र क्षेपकानि मध्यममेषसङ्क्रान्तिकालीनानि। अत्र मध्यमग्रहसाधनं हि वर्ष-गणतः कृतमस्ति।

बोपदेवात्मजस्य महादेवस्य ब्राह्मार्योभयपक्षसाधकं कामधेनुकरणं प्रसिद्ध-मस्ति। अस्य प्रणयनकालः १२८९ मितशकाब्दः। सन्त्यत्र पञ्चत्रिंशच्छ्लोकाः। अत्रोक्तं यद् द्वाविंशन्तिकोष्ठकपटेन तिथिसिद्धिर्भवतीति।

यन्त्ररत्नावली

एवमेव पद्मनाभस्य यत्नरत्नावली (१३२० शा०) दामोदरस्य भटतुल्यं करणम् (१३३९ शा०), गङ्गाधरस्य सूर्यसिद्धान्तानुसारी चान्द्रमानं (१३५६ शा०) च सश्रद्धं स्मर्यन्ते।

मकरन्दः

मकरन्दस्य पञ्चाङ्गसाधकः सूर्यसिद्धान्तानुसारी ग्रन्थः १४०० मितशकाब्द-मभितः प्रणीतः। तत्रोक्तम्—

'श्रीसूर्यसिद्धान्तमतेन सम्यग्विश्वोपकाराय गुरुप्रसादात्।
तिथ्यादिपत्रं वितनोति काश्यामानन्दकन्दो मकरन्दनामा॥' इति।

अस्य हि दिवाकरेण १५४० मितशकाब्दमभितः मकरन्दविवरणनाम्नी टीका प्रणीतास्ति।

केशवः ग्रहकौतुकम्

केशवस्य ग्रहकौतुकं करणं ज्योतिषशास्त्रेतिहासे स्वकीयं वैशिष्ट्यमावहति। इदं हि १४१८ मितशकाब्दे प्रणीतमिति तदात्रारम्भवर्षतो ज्ञायते। स हि कमलाख्यज्योतिर्विदः पुत्रो नन्दिग्रामवास्तव्य आसीत्। स हि सफलो वेधक-श्चासीत्। करणस्यास्य स्वोपज्ञटीकायां स कथयति—

ब्राह्मार्यभटसौराद्येषु····ग्रहकरणेषु बुधशुक्रयोर्महदन्तरमङ्कतया दृश्यते। मन्दे आकाशे नक्षत्रग्रहयोगे उदयेऽस्ते च पञ्चभागा अधिकाः प्रत्यक्षमन्तरं दृश्यते।····एवं क्षेप्येष्वन्तरं वर्षभोगेष्वपि अन्तरमस्ति। एवं बहुकाले बह्वन्तरं भविष्यति।' इति।

स हि भाविनो गणकान् सन्दिशति—

'एवं बह्वन्तरं भविष्यैः सुगणकैर्नक्षत्रयोगग्रहयोगोदयास्तादिभिर्वर्तमान-घटनामवलोक्य न्यूनाधिकभगणाद्यैर्ग्रहगणितानि कार्याणि। यद्वा तत्कालक्षेपक-वर्षभोगान् प्रकल्प्य लघुकरणानि कार्याणि। स्वचेष्टितं विज्ञापयति—एवं मया परमफलस्थाने चन्द्रग्रहणतिथ्यन्ताद्विलोमविधिना मध्यश्चन्द्रो ज्ञातस्तत्र फल-ह्रासवृद्ध्यभावात्। केन्द्रगोलादिस्थाने ग्रहणतिथ्यन्ताद्विलोमविधिना चन्द्रोच्च-

माकलितं तत्र फलस्य परमह्लासवृद्धित्वात् । तत्र चन्द्रः सूर्यपक्षात्पञ्चकलोनो दृष्टः । उच्चं ब्रह्मपक्षाश्रितम् । सूर्यः सर्वपक्षेऽपीषदन्तरः स सौरो गृहीतः । अन्ये ग्रहा नक्षत्रग्रहयोग-ग्रहयोगास्तोदयादिभिर्वर्तमानघटनामवलोक्य साधिताः ।'

स्ववेधस्य परिणाममाह—

'तत्रेदानीं भौमेज्यौ ब्राह्मपक्षाश्रितौ घटतः । ब्राह्मो बुधः । ब्राह्मार्यमध्ये शुक्रः । शनिः पक्षत्रयात्पञ्चभागाधिको दृष्टः । एवं वर्तमानघटनामवलोक्य लघुकर्मणाऽहर्गणितं कृतम् ।' इति ।

केशवस्य हि जातकपद्धतिः ताजिकपद्धतिः मुहूर्ततत्त्वञ्च प्रसिद्धा ग्रन्थाः । ग्रहकौतुक इव जातकपद्धतावप्यस्य स्वोपज्ञा टीका लभ्यते । एवमेवास्य वर्ष-ग्रहसिद्धिः तिथिसिद्धिः ग्रहचालनगणितदीपिका आचारपद्धतिः कुण्डाष्टलक्षणञ्च श्रुता ग्रन्थाः ।

केशवो हि महान् गणक आसीत् । नापि आर्यभटब्रह्मगुप्ताभ्यां तुलना सम्भवेत्किन्त्वान्येभ्यस्तस्य श्रैष्ठ्यं न कोऽपि तिरोधातुं प्रभवति ।

गणेशः ग्रहलाघवम्

गणेशदैवज्ञस्य ग्रहलाघवं करणं लोकप्रियो बहुप्रयुक्तश्च ग्रन्थः । गणेशो हि केशवदैवज्ञसुतः । गणेशस्य सन्त्यन्येऽपि दशाधिका ग्रन्थाः, परं तेषां ग्रहलाघवं हि सर्वातिशायि । गणेशो हि शास्त्रज्ञो वेधकृच्चासीत् । तस्य हि करणग्रन्थे प्रयासो लाघवायैव न तु ज्ञानमदेन । यथा स एवाह—

'यद्यप्यकार्षुरुरवः करणानि धीरास्तेषु ज्यकाधनुरपास्य न सिद्धिरस्मात् ।
ज्याचापकर्मरहितं सुलघुप्रकारं कर्तुं ग्रहप्रकरणं स्फुटमुद्यतोऽस्मि ॥'
इति । (१।३)

अस्योपक्रमवर्षः १४४२ मितशकाब्दसमः । ग्रहाणां दृक्तुल्यतायै स संयोग-वियोगराशिमपि सन्दिशति । ज्याचापसम्बन्धं विनैव ग्रहानयनं सूक्ष्मतररीत्या एकादशवर्षान्तर्गताहर्गणचक्रमानेन ध्रुवाङ्केन (४०१६) मध्यमग्रहानयनं मानसंयोजनाय संयोगवियोगराशिनिर्देशश्च गणेशस्य वैशिष्ट्येषु समुल्लेखनीयः पक्षः । ग्रहलाघवे हि मध्यमस्पष्टपञ्चताराત્રिप्रश्नचन्द्रसूर्यग्रहणमासग्रहणस्थूलग्रह-साधनोदयास्तछायानक्षत्रच्छायाशृङ्गोन्नतिग्रहयुतिमहापाताख्याः सन्ति चतुर्दशा-धिकाराः । केचित्पञ्चाङ्गग्रहणाधिकारमपि पञ्चदशाधिकारत्वेन संयोजयन्ति तत्र । ग्रहलाघवस्य गङ्गाधरकृता (१५०८ शा०) मल्लारिकृता (१५२४ शा०) विश्वनाथकृता (१५३४ शा०) सीतारामकृता च टीकाः प्रसिद्धाः ।

ज्ञानराजः सिद्धान्तशेखरः

ज्ञानराजेन हि वर्तमानसूर्यसिद्धान्तानुसारी सिद्धान्तसुन्दराख्यः सिद्धान्त-

ग्रन्थः प्रणीतः। अत्र क्षेपकादि १४२५ मितशकाब्दस्य दत्तमित्ययमेव कालोऽस्य प्रणयनस्य। ग्रन्थेऽस्मिन् न हि किञ्चिद्वैशिष्टयं ग्रन्थान्तरापेक्षया। सामयिक-बीजसंस्काराधानमेवास्य वैशिष्टयम्।

नृसिंहः

शकानन्तरं १४८०मितवर्षाण्यभितः स्थितिमता नृसिंहेन महादेवस्य ग्रह-सिद्धिमाश्रित्य मध्यमग्रहसिद्धिः प्रणीतः।

रघुनाथः सुधामञ्जरी

रघुनाथस्य सुधामञ्जरी ब्राह्मपक्षीयः करणग्रन्थः। अस्यारम्भवर्षः १४८४ मितशकाब्दसमः। सोमभट्टात्मजस्य रघुनाथस्यापि मणिप्रदीपः सूर्यसिद्धान्ता-नुसारी करणग्रन्थः। दिनकरस्य खेटकसिद्धिः चन्द्रार्की च राजमृगाङ्कानुगामिनौ ग्रन्थौ। रामभटस्य रामविनोदः (१५१२ शा०) वर्तमानसूर्यसिद्धान्तानुसारि करणम्। मुहूर्तचिन्तामणिरस्यातीव लोकप्रियो ग्रन्थः। श्रीनाथस्य 'ग्रह-चिन्तामणिः' (सम्भवतः) ब्राह्मसिद्धान्तीयकरणग्रन्थः। अत्र वर्षगणमाध्यमेन ग्रहानयनं निर्दिष्टम्। विष्णुनाम्नो गणकस्य करणग्रन्थः सौरपक्षीयः। मल्लारेः १५४७ मितशकाब्दे ग्रहलाघवस्य सयुक्तिकोपपत्तिः प्रसिद्धाः। विश्वनाथो हि भट्टोत्पल इव महांष्टीकाकारः। तेन हि सिद्धान्तशिरोमणिप्रभृत्यष्टादशाधिक-ग्रन्थेषु टीकाग्रन्थाः प्रणीताः। नृसिंहस्य (१५०८ शा०) सौरभाष्यं वासना-वार्तिकञ्च प्रसिद्धौ ग्रन्थौ।

रङ्गनाथस्य सूर्यसिद्धान्तस्य गूढार्थप्रकाशिका टीका प्रसिद्धाः। सा १५२५ मितशकाब्दे प्रणीता। टीकायामस्यां सर्वत्रोपपत्तयो निहिताः।

नागेशः ग्रहप्रबोधः

नागेशाख्यस्य ग्रहप्रबोधः ग्रहलाघवानुसारी करणग्रन्थः। अस्यारम्भवर्षः १५४१ मितशकाब्दसमः। केवलं ग्रहस्पष्टाधिकार एवात्र वर्णितः। अस्य हि यादवप्रणीतमुदाहरणं लभ्यते।

मुनीश्वरः सिद्धान्तसार्वभौमः

सिद्धान्तसार्वभौमो हि १५५८ मितशकाब्दमभितो मुनीश्वरेण प्रणीतः सिद्धान्तग्रन्थः। तेन हि लीलावत्या निसृष्टदूत्याख्या गणितगोलाध्याययोः भास्करीययोर्मरीच्याख्या टीकाऽपि प्रणीता। पाटीसारश्च तस्य ग्रन्थः। अनेन स्वग्रन्थस्य टीकाऽपि प्रणीता १८७२ मितशकाब्दे। ग्रन्थोऽयं चापीयक्षेत्र-पञ्चरहितः क्षेत्रसजातीयविचाररहितश्चेति न बह्वादृतः। अस्यैव नामान्तरं विश्वरूप इति।

दिवाकरः मकरन्दविवरणम्

दिवाकरेण विदुषा मकरन्दस्य मकरन्दविवरणाख्यटीका प्रणीता। स हि १५२८ मितशकाब्दभवः। तेन हि पद्मजातकमपि १५४७ शकाब्दे प्रणीतम्।

कमलाकरः सिद्धान्ततत्त्वविवेकः

कमलाकरस्य सिद्धान्ततत्त्वविवेको हि बहुचर्चितो ग्रन्थः। १५८० मितशकाब्दे प्रणीतः सर्वाङ्गपूर्णे ग्रन्थेऽस्मिन् सर्वेऽपि ज्योतिषविषयाः सप्रपञ्चं निरूपिताः। ग्रन्थोऽयं सर्वथा सौरसिद्धान्तमालिङ्गति। ग्रन्थप्रयोजनं यथोक्तं तत्र—

'अस्ति चाद्यमपरम्परयाऽज्ञैर्नाशितं सदपि सौरमतं तत्।
तत्कृतेरनवबोधत एवे.............................. ॥
सद्गोलवासनाबाह्यैः करणग्रन्थियुक्तितः।
सुस्थूलव्यवहारार्थं त्वाचार्यत्वप्रसिद्धये ॥
वस्तुतत्त्वमबुद्ध्वैव स्वार्थैः साकं विरोधतः।
बहुभिर्बहुधा पूर्वं सिद्धान्ताः स्वधिया कृताः ॥ इत्यादि।

सम्भवतः तथाकथनेनायं मुनीश्वरं सिद्धान्तसार्वभौमस्य स्वसमानकालमपि समाक्षिपति। मुनीश्वरो हि देवरातगोत्रो वैदर्भो ब्राह्मणः शुक्लयजुर्वेदाध्यायी, यदा कमलाकरस्तु भारद्वाजगोत्रो महाराष्ट्रियस्तैत्तिरीयशाखाध्यायी। श्रूयते हि तयोः परम्परागत एव विरोध आसीत्। सम्भवति तेनैव कमलाकरो भास्कराचार्यस्य उदयान्तरसंस्कारमपि दूषयति।

कमलाकरो हि न केवलं सूर्यसिद्धान्तस्याधिवक्ताऽपितु महानन्वेषकश्च। तस्य हि सन्ति कतिपयानि वैशिष्ट्यान्यपि यैः स श्रद्धीयते सर्वैः। सम्पातस्य गतिमत्त्वेन ध्रुवनक्षत्रस्यास्थिरत्वं साम्प्रतिक दृश्यमानध्रुवस्य ध्रुवस्थानात्किञ्चिदपसरणं पूर्वोत्तररात्र्योस्तस्य स्थानवैभिन्यं चास्याविष्कारेषूल्लेखनीयविषयाः। अनेन तुरीयमन्त्रेण वेधस्य विस्तृतो विधिर्निर्दिष्टः, त्रिप्रश्नाधिकारे ग्रहणाधिकारे च अनेका नवीना रीतयो निर्दिष्टाः, मेघभूकम्पोल्कापातकरकादीनां कारणान्यपि निर्दिष्टानि, कामं नैव पूर्णतः सत्यानि तथापि नैव नितान्तमेव वितथ्यानि। अनेन गणितेऽपि सरलो विधिर्निर्दिष्टः। ३४३८ त्रिज्यास्थाने ६० त्रिज्या कल्पिता। ग्रहभोगेन विषुवांशानयनसारिण्यपि प्रणीताऽनेन।

असौ हि मकरन्दविवरणस्य कर्तुर्दिवाकरस्य भ्राता शिष्यश्च, वासनावार्तिकस्य कर्तुर्नृसिंहस्य पुत्रः।

रङ्गनाथः

कमलाकरस्य कनिष्ठो भ्राता रङ्गनाथः १५३४ मितशकाब्दमभितो जातः।

अनेन १५६५ मितशकाब्दमभितः सिद्धान्तचूडामणिसंज्ञककरणग्रन्थः प्रणीतः। भङ्गीविभङ्गी लोहगोलखण्डनं पलभाखण्डनञ्चेति त्रयोऽस्य मुनीश्वरकृतसिद्धान्तसार्वभौमखण्डनपरकलघुग्रन्थाः। सिद्धान्तचूडामणिर्हि करणग्रन्थः सिद्धान्ततत्त्वविवेकपक्षधरः। सन्त्यत्र मध्यमाधिकारादिद्वादशाधिकाराः। स्पष्टाधिकारे मन्दशीघ्रफलसाधनायाधिकखण्डकल्पनाऽस्य वैशिष्टयम्। अन्यत् सर्वं पूर्वग्रन्थेभ्यः समानमेव। ग्रन्थोऽयं सारस्वतसुषमायां भागशः प्रकाशितो दृश्यते हिम्मतरामात्मजमीठालालशास्त्रिसम्पादितः। मुनीश्वरप्रोक्तलोहगोलस्य रङ्गनाथेन खण्डनं कृतं गदाधरेण तन्मण्डनञ्च। खण्डनं यथा—

'अगणितगणितज्ञसार्वभौमं सकलगुरुं कमलाकरं प्रणम्य।
कृतमवरमुनीश्वरेण गोलं तमहमपाकरवाणि लोहजातम्'॥ १॥

मण्डनं यथा—

'ध्यानासक्तमुनीश्वरस्य नियमं छेत्तुं नृसिंहार्भकं
स्वायान्तं नियतं विलोक्य तमपाकर्तुं सुधीरुद्यतः॥'

भङ्गीविभङ्गीकरणस्योपक्रमो यथा—

'दिवाकरादीनभिवन्द्य बन्धुं वन्द्यं गुरुं श्रीकमलाकरञ्च।
मुनीश्वरस्याननभञ्जनार्थं भङ्गीविभङ्गीकरणोद्यतोऽस्मि'॥ १॥

पलभागखण्डनं यथा—

'अभिन्नकालोदितधिष्ण्यदेशपलांशसंसाधनमभ्यधायि।
अखर्वगर्वेण मुनीश्वरेण तत्खण्डनं चारुतरं करोमि॥ १॥ इति।

नित्यानन्दः सर्वसिद्धान्तराजः

१५६१ मितशकाब्दे नित्यानन्देन 'सर्वसिद्धान्तराजः' प्रणीतः। ग्रन्थेऽस्मिन् प्राधान्येन द्वावेवाधिकारौ गणिताध्यायौ गोलाध्यायश्च। तयोराद्ये मीमांसामध्यमस्पष्टत्रिप्रश्नचन्द्रसूर्यग्रहणशृङ्गोन्नतिभग्रहयुतिछायाख्याः नवैवाधिकाराः, द्वितीये भुवनकोषगोलबन्धयन्त्राधिकाराश्च निरूपिताः। सत्स्वपि सर्वेष्वेव विषयेषु समानेषु सावनमानस्य वैशिष्टयम्। मीमांसाधिकारे एव स स्पष्टं कथयति यत्सावनमानमेव मुख्यं देवर्षिसम्मतञ्च। सिद्धान्तोऽयं कल्पारम्भात् सृष्टयुत्पत्तिपर्यन्तं ९०४१० वर्षाणि गणयति। एतदनुसारेण सूक्ष्मसायनवर्षमानं हि १५६१ मितशकाब्दे ३६५।१४।३१।५३।४२। तेन ग्रहेषु बीजसंस्कारोऽप्याधापितः। स्पष्टमेव यदेतत्सम्मतं मानं हि प्रचलितमानाद्भिन्नमेव। स स्वयमेव कथयति—

'दृष्ट्वा रोमकसिद्धान्तं सौरञ्च ब्रह्मगुप्तकम्।
पृथक् स्पष्टान् ग्रहान् ज्ञात्वा सिद्धान्तं निर्ममे स्फुटम्॥' इति।

कृष्णः करणकौस्तुभः

महादेवात्मजेन कृष्णाख्येन १५७५ मितशकाब्दे करणकौस्तुभसंज्ञकः करणग्रन्थः प्रणीतः। ग्रन्थोऽयं ग्रहकौतुकं ग्रहलाघवञ्चानुसरति प्रणमति च केशवाचार्यम्। ग्रन्थेऽस्मिन् मध्यमग्रहसाधनं वर्षगणैः कृतमस्ति। एतद्धि ४५० मितशकाब्दं शून्यायनांशं मन्यते अयनांशस्य वार्षिकीं गतिश्च ६० विपलामिताम्। ग्रहलाघवविपरीतमेव ज्याचापस्योपयोगः कृतः। तस्य तन्त्ररत्नमपि प्रसिद्धो ग्रन्थः। तस्यायमादिमः श्लोकः—

'प्रकुरु तत्करणं ग्रहसिद्धये सुगमदृग्गणितैक्यविधायि यत्।
इति नृपेन्द्रशिवाभिधनोदितः प्रकुरुते कृतिकृष्णविधिज्ञराट्॥' इति।

रत्नकण्ठः पञ्चाङ्गकौतुकम्

रत्नकण्ठेन १५८० मितशकाब्दे पञ्चाङ्गकौतुकं नाम खण्डखाद्यानुसारी पञ्चाङ्गसारिणी ग्रन्थः प्रणीतः। कथ्यते ह्यस्य प्रयोगेण द्वाभ्यामेव दिनाभ्यां पञ्चाङ्गं निर्मातुं शक्यते।

त्रिहणाख्येन गणकेन वार्षिकतन्त्राख्यो ग्रन्थः प्रणीतः। अस्य प्रणयनकालो नाधुनापि ज्ञातः। ग्रन्थोऽयं सूर्यसिद्धान्तानुसारी। अत्रत्यं वर्षमानं ग्रहभगणादि च वर्तमानसूर्यसिद्धान्तसंवादि। तत्र बीजसंस्कार आहितः। मकरन्दे हि बीजसंस्कार ऋणात्मको यदाऽत्र धनात्मकः। आद्ये भौमे बीजसंस्कारो नैव दत्तः, किन्त्वत्र २$\frac{3}{3}$ भगणा धनत्वेन संयोजिताः। अत्र हि टीकैकाऽपि लभ्यते कस्यचित्। शङ्करबालकृष्णानुसारेण ग्रन्थोऽयं शकानन्तरचतुर्दशशतकादनन्तरवर्त्येव। अस्यैव ग्रहणमुकुराख्यो ग्रन्थोऽपि स्मर्यते।

जटाधरः फत्तेशाहप्रकाशः

जटाधराख्येन गणकेन १६२७ मितशकाब्दे गढवालशासकस्य फत्तेशाहस्याज्ञया फत्तेशाहप्रकाशाख्यः करणग्रन्थः प्रणीतः। अस्य हि करणारम्भवर्षः १६२६ मितशकाब्दसमः। ग्रन्थोऽयं ग्रन्थान्तरसदृश एव।

दादाभटः

१६४१ मितशकाब्दमभितः स्थितिमता दादाभटेन सूर्यसिद्धान्तस्य किरणावली टीका प्रणीता।

जयसिंहः जगन्नाथश्च सिद्धान्तसम्राट्

मत्स्यदेशाधिपतेर्जयसिंहस्याविर्भावो ज्योतिषशास्त्रे सुमहदवसरः। तेन हि दृक्तुल्यग्रहानयनाय वेधः कारितः। काश्यादिविविधस्थलेषु तेन वेधशाला अपि निर्मापिताः, नवीनानि दृढानि च वेधयन्त्राणि कारितानि। तस्य सभायां बहवो ज्यौतिषिकाः कार्यरता आसन्, येषु जगन्नाथपण्डितनयनसुखोपाध्यायो

नाम्नाऽपि गृह्येते । तेन हि वेधमाश्रित्य 'सिद्धान्तसम्राट्' संज्ञको ग्रन्थराजः १६५३ मितशकवर्षे जगन्नाथपण्डितेन लेखापितः । ग्रन्थोऽयं सुविस्तृतः । तत्रोपक्रमे द्वाभ्यामध्यायाभ्यां खगोलभूगोले वर्णिते स्तः सामान्यतः । प्रथमाध्याये चतुर्दश प्रकरणानि षोडश क्षेत्राणि द्वितीयाध्याये त्रयोदशप्रकरणानि पञ्चविंशतिक्षेत्राणि च सन्ति । एतदतिरिक्तमपि यन्त्र-ज्याचापादिरेखागणितसाध्य-त्रिप्रश्न-मध्यम-स्पष्टाध्याया अपि सप्रपञ्चं निरूपिताः । अत्र सायनं वर्षमानं गृहीतमस्ति यत्र अयनांशवार्षिकगतिः ५१.४ मता । सिद्धान्तपक्षे ग्रन्थोऽयं सबीजसंस्कारं सूर्यसिद्धान्तमनुसरति । जयसिंहस्याज्ञया नयनसुखोपाध्यायेन कटराख्यग्रन्थः प्रणीतो यत्र सन्ति त्रयोऽध्यायाः एकोनषष्टिक्षेत्राणि च । अनेन 'जिजमहम्मद'संज्ञकोऽपि ग्रन्थः अरबीभाषायां लेखापितः । जयसिंहपद्धत्या ग्रहाणां सूक्ष्मतमगतिर्ज्ञातुं शक्यते । सिद्धान्तसम्राजः प्रारम्भे कथितमस्ति—

'राजाधिराजो जयदेवसिंहः श्रीमत्स्यदेशाधिपतिश्च सम्राट् ।
श्रीरामपादाम्बुजदत्तचित्तो यज्वा सदा दानपरः सुशीलः ॥
गोलादियन्त्रेषु नवीनयुक्तिप्रचारदक्षो गणितागमज्ञः ।
सत्यप्रियः सत्यरतः कृपालुस्तिग्मप्रतापो जयति क्षमायाम् ॥
स धर्मपालो गणितप्रवीणान् ज्योतिर्विदो गोलविचारदक्षान् ।
कारूंस्तथाहूय चकार वेधं गोलादियन्त्रैर्द्युसदाञ्च भानाम् ॥
ग्रन्थं सिद्धान्तसम्राजं सम्राट् रचयति स्फुटम् ।
तुष्टचै श्रीजयसिंहस्य जगन्नाथाह्वयः कृती ॥
अरबीभाषया ग्रन्थो मिजास्तीनामकः स्थितः ।
गणकानां सुबोधाय गीर्वाण्या प्रकटीकृतः ॥' इति ।

ग्रन्थोऽयं जगन्नाथस्यादेशेन लोकमणिनाम्ना लेखकेन १६४९ शकाब्दे लिखितमासीदिति—

'युगवसुनगभूवर्षे शुचिशुक्ले युगतिथौ रवेर्वारे ।
व्यलिखल्लोकमणिः किल सम्राजामाज्ञया पुस्तम् ॥'

रेखागणितावसानपद्याज्ज्ञायते । जगन्नाथो हि दक्षिणप्रदेशाज्जयसिंहेन स्वपुरमानीय ससम्मानं रक्षितः । स हि १५७४ मितशकाब्दे जात आसीत् । लोकमणिर्हि तस्य शिष्यः सम्भवति ।

जयसिंहेन हि गणितागतग्रहवास्तवग्रहयोरैक्यसाधनार्थं वेधेन गणितोपकरणानां शुद्धिं विधातुं जयपुरे वाराणस्यां मथुरायामिन्द्रप्रस्थे उज्जयिन्याञ्च वेधशालाः स्थापिताः । वेधेन गणितोपकरणानामपि शोधनमेषां मुख्यं प्रयोजनमासीत् । तत्र संस्थापितानि यन्त्राणि कानिचित्प्रतिसंस्कृतानि कानिचित्तु नूतनान्यप्यासन् । यन्त्ररचनायामारबीयज्यौतिषिकयन्त्राणां तद्विदाञ्च साहाय्य-

मासीदिति तु सत्यमेव किन्तु न हि यन्त्राणि आरवीयप्रतिकृतय एव न तु सिद्धान्तसम्राडेव मिजास्त्या अनुवादमात्रम्। तत्र तत्र तत्तत्प्रभावस्तु स्वयं ग्रन्थप्रणेत्राऽपि स्वीकृत एव। यथोक्तम्—

'एवं सत्यपि व्यवहारार्थं प्राचीनोक्ता मध्यमक्रिया कथ्यते। अथ च तेषु बीजं दत्त्वा फलसंस्कारेण यथा दृक्तुल्यतां यान्ति तथाऽत्र ग्रहाः साधिताः'। इति।

तेन ये खलु जयसिंहप्रयत्नमारवीयानुकृतिमात्रं कथयन्ति, यथा जी० आर० के० महोदयाः; ते भ्रान्ता एव। वेधालयस्य प्रयोजनं यथोक्तं तत्र—

'यदा इन्द्रप्रस्थेऽभ्रं जातं तस्मिन् दिने सवाईजयपुरे वेधो दृष्टः। सवाइजयपुरे यदा अभ्रादिकं जातं तस्मिन् दिने इन्द्रप्रस्थे वेधः कृतो दृष्टश्च। एवमवन्त्यां मथुरायां काश्याञ्च सर्वत्र निश्चयः कृतः। एवम्प्रकारैर्ग्रहशोधने देशाधिपेन राज्ञा देशे-देशे यन्त्ररचनां कृत्वा निश्चयः कार्यं' इति।

जयसिंहेन न केवलं स्वदेश एवापितु दूरवर्तिदेशेष्वपि तज्ज्ञान् सम्प्रेष्य तत्रत्यावस्था अपि ज्ञानविषयीकृता आसन्। यथोक्तं सिद्धान्तसम्राजि—

'अन्यच्च फिरङ्गदेशे श्रीमहाराजाधिराजैर्महम्मदसरीफनामा यवनः प्रेषितः स्थितः। तेन महैलदेवद्वीपं (सम्भवति साम्प्रतिक मालदीप एव) अक्षांशा ४।१२ निश्चिताः। ते दक्षिणाः। दक्षिणदेशे यत्राग्रे दक्षिणध्रुव उन्नतो दृष्टः तत्रत्यानां तारकाणामाकृतीर्दृष्ट्वा शुद्धाः कृत्वा आनीताः। इति।

सम्प्रत्यपि काश्यां दशाश्वमेधघट्टसमीपस्थमानमन्दिरपरिसरे स्थिता मृतप्राया वेधशाला जयसिंहस्य यशः उच्चैर्गायत्येव। तत्रत्यः यन्त्रादिविषये सारस्वतसुषमायाः चतुर्दशवर्षीयतृतीयेऽङ्के विभूतिभूषणभट्टाचार्यस्य काशीस्थमानमन्दिरवेधालयीययन्त्राणि' इति लेखो द्रष्टव्यः। सत्यमेव कथितं शङ्करबालकृष्णमहोदयेन यज्जयसिंहस्य वेधशाला-वेधपरिणाम-यन्त्र-ग्रन्थानां विस्तृतवर्णने एकः पृथगेव ग्रन्थः सम्पद्यत इति। दुर्भाग्यमिदमस्माकं यज्जयसिंहस्य सिद्धान्तदृक्प्रत्ययसमन्वयप्रयासस्तेनैव सहास्तङ्गतः। सम्प्रति जयपुरे एव सिद्धान्तसम्राट् नैव लभ्यते वेधशालायां मूषकाः क्रीडन्ति इति का वार्ताऽन्यत्रावस्थितेः। सिद्धान्तसम्राजा सायनग्रहाः साधिताः सामयिकग्रहसाधनमपि कृतम्, किन्तु सम्प्रत्यपि पञ्चाङ्गेषु उत्तराषाढाया द्वितीयपादे एव रवेरुदगयनं लिख्यते, यद्धि वराहमिहिरसमये आसीत्। यद्यपि श्रीकृष्णमिश्रः स्पष्टमेव पूर्वाषाढायां रवौ उत्तरायणारम्भं निर्दिशति (सा० सु० २००७ पृ० ३७) तथापि पञ्चाङ्गे न कोऽपि सुधारो दृश्यते। संशोधनमिदमादाय रघुनाथेनाजीवनं प्रयतितं किन्तु न कोऽपि परिणामो दृष्टः। सिद्धान्तसम्राजि अयनांशचलनस्य वार्षिकी गतिः ५१·४ विकला निर्दिष्टा तथापि सा प्रायः ५०·२ एव स्वीक्रियते। सिद्धान्ता-

तिशयभक्तित एव सर्वत्र भ्रमः सम्भवति। वस्तुतस्तु सर्वमेवेदं जगत् कामं यथा प्रकृति गतिगतिर्भिद्यते। यत्र विन्दौ वराहमिहिरकाले वर्षस्य प्रथमः सूर्योदयो निश्चयमेव साम्प्रतिककाले न तत्रैवापितु किञ्चिदपसृत्यैव। सत्यमेवाह ब्रह्मगुप्तः—

'यदि भिन्नाः सिद्धान्ताः भास्करसङ्क्रान्तयोऽपि भेदसमाः।
सः स्पष्टः पूर्वस्यां विषुवत्यर्कोदयो यस्य ॥'
(ब्रा० सि० २४।४)

आशास्महे कदाचित्तु सोऽपि समय आगमिष्यति यदा भारतीयविपश्चितोऽपि सिद्धान्तभक्तिमपहाय याथार्थ्यतो वास्तविकस्थितिं स्वीकरिष्यन्तीति। आशैव जीवनसखी।

शङ्करस्य करणग्रन्थः

वसिष्ठगोत्रीयेण शङ्करेण विष्णुगुप्तमतानुसारी करणग्रन्थः १६८८ मितशकाब्दे प्रणीतः। अत्र हि ३०० श्लोकाः। ग्रन्थोऽयं भूयो भूयो भास्करमनुयाति। अस्य शून्यायनांशवर्षः ४४५ मितशकाब्दसमः। ख्यापितेऽपि ग्रहाणां दृक्तुल्यत्वे नास्त्यत्र किमपि नूतनं वैशिष्ट्यमत्र।

मणिरामः

मणिरामाख्येन भारद्वाजगोत्रीयेण विपश्चिता १६९६ मितशकाब्दे **ग्रहगणितचिन्तामणिः** प्रणीतः। ग्रन्थोऽयं ग्रहलाघववत् एकादशवर्षीयं चक्रं मन्यते। अत्र हि मध्यमग्रहेषु रेखान्तरसंस्कारो भुजान्तरचरयोः संस्कारश्च सर्वेषाम्। अत्र सूर्यसिद्धान्तानुसारेणायनांशाः ग्रहस्पष्टीकरणञ्च ग्रहलाघवानुसारेण। तत्र केवलं मन्दशीघ्राङ्का एव क्वचिद्भिन्नाः। तत्र मध्यम-रविचन्द्रस्पष्टीकरण-ग्रहस्पष्टीकरण-लग्नादिसाधन-चन्द्रग्रहण-सूर्यग्रहण-परिलेख-चन्द्रदर्शन-नलिका-बन्धादि-शृङ्गोन्नति-उदयास्त-पातादिद्वादशाधिकाराः सन्ति।

ब्रह्मसिद्धान्तसारः

भुलाऽऽख्येन केनचिद्विदुषा १७०३ मितशकाब्दे ब्रह्मसिद्धान्तसाराख्यो ग्रन्थः प्रणीतः। सन्त्यत्र द्वादशाधिकाराः। अस्योपक्रमवर्षश्च १७०३ मितशकाब्दसमः। प्रथमाधिकारो हि सिद्धान्तशिरोमणेः सारसङ्क्षेप एव। अत्र ग्रहसाधनमहर्गणैः सम्पादितमस्ति। ग्रन्थोऽयं पद्धत्यर्थं ग्रहलाघवसंवादी।

मथुरानाथः यन्त्रराजघटना

मथुरानाथेन १७०४ शकाब्दमभितः यन्त्रराजघटना करणग्रन्थः प्रणीतः। अन्वर्थनामा ग्रन्थोऽयं वेधार्थयन्त्रनिर्माणप्रयोगश्चानुशास्ति। अनेनैव ज्योतिषसिद्धान्तसाराख्यग्रन्थोऽपि प्रणीतः। सन्त्यत्र ह्यष्टावध्यायाः।

चिन्तामणिः गोलानन्दः

चिन्तामणिदीक्षितेन १७१३ शकाब्दे **गोलानन्दा**ख्यो वेधयन्त्रविषयको ग्रन्थः प्रणीतः । अस्य यज्ञेश्वरप्रणीता टीकाऽपि लभ्यते । अनेन सूर्यसिद्धान्तसारिणी च प्रणीता ।

राघवः खेटकृतिः

पुण्यस्तम्भवास्तव्येन राघवाख्येन विदुषा १७३२ शकाब्दे **खेटकृतिर्नामकः** करणग्रन्थः प्रणीतः । ग्रन्थोऽयं ग्रहलाघवसंवादी । अत्र क्षेपकसंयोगवियोगादिना तिथ्यानयनविधिर्निर्दिष्टा । अत्र मध्यमग्रहसाधनं वर्षगणैः कृतम् । अत्र केवलं मध्यमग्रहाधिकार एव निरूपितः । अनेन १७३९ मितशकाब्दे पञ्चाङ्गार्कः प्रणीतः । अस्यैव १७४० मितशकाब्दे प्रणीता पद्धतिचन्द्रिकाऽपि लभ्यते ।

शिवः तिथिपारिजातः

महादेवाख्यसुतेन शिवाऽऽख्येन विदुषा १७३७ मितशकाब्दे तिथिपारिजातः प्रणीतः । ग्रन्थोऽयं ग्रहलाघवसंवादी ।

दिनकरः ग्रहविज्ञानसारिणी

दिनकराख्येन विदुषा ग्रहविज्ञानसारिणी (१७३४ शा०) मासप्रवेश-सारिणी (१७४४ शा०) लग्नसारिणी क्रान्तिसारिणी (१७५३ शा०) चन्द्रोदयाङ्कजालः (१७५७ शा०) दृक्कर्मसारिणी (१७५८ शा०) ग्रहणाङ्क-जालः (१७५५ शा०) पातसारिणीटीका (१७६१ शा०) यन्त्रचिन्तामणि-टीकाप्रभृति ग्रन्थाः प्रणीताः ।

बापूदेवः

नृसिंहापराभिधेयस्य बापूदेवस्य बहुषु ग्रन्थेषु सरलत्रिकोणमितिः प्रसिद्धो ग्रन्थः । विपश्चिदसौ १७४३ मितशकाब्दे जात आसीत्, १८२२ मित-शकाब्दे पञ्चत्वमाप्तश्च । अस्य हि सन्त्यन्ये लघुकाया बृहत्कायाश्च द्वादशाधिका ग्रन्थाः ।

नीलाम्बरः

१७४५ मितशकाब्दे जातेन नीलाम्बरेण गोलप्रकाशाख्यो ग्रन्थः प्रणीतः । तत्र सन्ति पञ्चाध्यायाः—ज्योत्पत्ति-त्रिकोणमिति-चापीयरेखागणित-चापीयत्रि-कोणमितिप्रश्नविषयाख्याः ।

विनायकः

विनायकाख्येन विदुषा १७७२ मितशकाब्दे ग्रहसाधनकोष्ठकग्रन्थः प्रणीतः । अत्र सूर्यसिद्धान्तीयं वर्षमानं सायनाग्रहगतिस्थितिश्च गृहीता ।

रघुनाथः

१७४९ मितशकाब्दमभितः स्थितिमान् रघुनाथलेलेः सायनपञ्चाङ्गस्य पक्षधर आसीत् । तेन हि साधनपञ्चाङ्गः प्रकाशितमपि ।

रघुनाथः ज्योतिषचिन्तामणिः

१७५० शकाब्दे लब्धजनुषा रघुनाथेन ज्योतिषचिन्तामणिः प्रणीत आसीत् । अस्यैव दृग्गणितपञ्चाङ्गमपि प्रसिद्धम् ।

कृष्णः ज्योतिषशास्त्रम्

१७५३ मितशकाब्दे जातेन कृष्णशास्त्रिणा ज्योतिःशास्त्राख्यो ग्रन्थः प्रणीत आसीत् । असौ हि मध्यमसूर्यचन्द्रस्थित्या पञ्चाङ्गनिर्माणमतपोषक आसीत् ।

पञ्चाङ्गसायनसारः

वामानकृष्णाख्येन विदुषा १७९१ मितशकाब्दे पञ्चाङ्गसायनसारः प्रणीतः ।

केतकरः ज्योतिर्गणितम्

वेङ्कटेशकेतकरमहोदयेन १८१२ मितशकाब्दे ज्योतिर्गणितं प्रणीतम् । अत्र ३६५।१५।२२।५३ वर्षमानं गृहीतं तथा अयनवार्षिकगतिस्तु ५०.२ विकलाः । कथ्यते ह्यनेन सूक्ष्मग्रहाः साध्यन्त इति । सन्त्यत्र चत्वारो भागाः यत्र प्रथमे पञ्चाङ्गगणितं द्वितीये ग्रहस्थानगणितं तृतीये ग्रहणयुतिशृङ्गोन्नत्यादिगणितं चतुर्थे तु त्रिप्रश्नाधिकारलग्नमानादिगणितञ्च । सर्वत्र मेषसङ्क्रान्तिकालीनक्षेपकस्पष्टाः गृहीताः । ग्रन्थोऽयं पञ्चाङ्गकर्तॄणां नितान्तोपयोगी प्रयुञ्जन्ति च पञ्चाङ्गकर्तारः साकल्येन । अस्माभिरपि ग्रन्थोऽयं हिमालयपञ्चाङ्गस्य प्रणेतुः पद्मनाभत्रिपाठिनः प्राप्तः । मुद्रितोऽप्यसौ सर्वथा दुर्लभः पुनर्मुद्रणयोग्यः ।

सिद्धान्तसारः

विनायकपाण्डुरङ्गेण १८३० मितशकाब्दमभितो ग्रन्थान्तरातिरिक्तं सिद्धान्तसारः प्रणीतो यत्र आधुनिकमतानुकूल्येन पृथ्वादीनां गतयो विवेचिताः ।

सुधाकरः

१७८२ मितशकाब्दे गृहीतजनुः सुधाकरद्विवेदी प्रकरणेऽस्मिन् सश्रद्धं स्मर्यते । तत्प्रणीता सन्त्यनेके ग्रन्थाः, येषु दीर्घवृत्तलक्षणं (१८०० शा०) विचित्रप्रश्नः सभङ्गः (१८०१ शा०) वास्तवचन्द्रशृङ्गोन्नतिसाधनं (१८०२ शा०) द्युचरचारः (१८०४) पिण्डप्रभाकरः (१८०७ शा०) भाभ्रमरेखानिरूपणम्, धराभ्रमः ग्रहणकरणम् गोलीयरेखागणितम्, प्रतिभाबोधकञ्च

प्रसिद्धम् । अस्य गणकतरङ्गिणी ज्यौतिषिकैतिह्यविषयो ग्रन्थः । अनेन पञ्च-सिद्धान्तिकाप्रभृत्यनेके ग्रन्था व्याख्याय प्रकाशिताः ।

शङ्करबालकृष्णः भारतीयज्योतिषम्

शङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषं ज्योतिषशास्त्रैतिह्यविषयको ग्रन्थः । असौ हि स्वप्रकृतिकः प्रथमो ग्रन्थ । ग्रन्थोऽयं १८१८ मितशकाब्दे प्रथमं प्रकाशितः । इतःपूर्वं बापूदेवेन ज्योतिषाचार्याशयवर्णनं सुधाकरेण गणकतरङ्गिणी च प्रणीता आसन्, किन्तु एतदपेक्षया ते एकाङ्गिन एव । ग्रन्थोऽयं भारतीयज्योतिषशास्त्रं साङ्गोपाङ्गं निरूपयति ।

इत्थं हि वैदिकसंहिताकालादारभ्य साम्प्रतिकयुगपर्यन्तं जयसिंहपूर्वं स्वेनैव रूपेण जयसिंहतः आरबीयप्रभावसंयुक्तरूपेण नीलाम्बरतः आङ्गलप्रभावसिक्त-रूपेण च भारतीयं ज्योतिषशास्त्रं स्वयात्राक्रममनवरतरूपेण वर्तयदस्ति । तदित्थं सिद्धान्तगणितभेदेन द्वेऽस्य रूपे प्रथमम् । सिद्धान्तस्यापि सिद्धान्ततन्त्र-भेदेन द्वे रूपे यत्र कल्पादिमानविवेचकः सिद्धान्तः कलियुगादिमाननिरूपक-स्तन्त्रम् । तत्रापि मध्यमस्थितिविवेचकः सिद्धान्तो वार्षिकी या स्थिति-स्तद्विवेचकं करणम् । गणितञ्च पाटीबीजभेदेन द्विविधम् ।

अथाऽत्र पाठकानां सौकर्याय ग्रन्थेऽस्मिन् ये हि खलु सिद्धान्तग्रन्थाः करण-ग्रन्थाश्च समुल्लिखितास्तेषां सूची समुपस्थाप्यते ।

सिद्धान्तग्रन्थाः

१. लगधस्य वेदाङ्गज्योतिषम् (१४०० शा० पू०) ।
२. आर्यभटस्य आर्यभटीयम् (३९८ शा०) आर्यसिद्धान्तप्रतिपादकम् ।
३. वराहमिहिरस्य पञ्चसिद्धान्तिका प्राचीनसूर्यपितामहवसिष्ठरोमकपुलिश-सिद्धान्तप्रतिपादकम् ।
४. लल्लस्य शिष्यधीवृद्धिदतन्त्रम् आर्यसिद्धान्ते बीजाधायकम् ।
५. लाटसिंहस्य सूर्यसिद्धान्तः आधुनिकसूर्यसिद्धान्तव्याख्याता ।
६. श्रीषेणस्य रोमकसिद्धान्तः आधुनिकरोमकसिद्धान्तव्याख्याता ।
७. विष्णुचन्द्रस्य वासिष्ठसिद्धान्तः आधुनिकवासिष्ठसिद्धान्तव्याख्याता ।
८. ब्रह्मगुप्तस्य ब्राह्मस्फुटसिद्धान्तः (५४० शा०) ब्रह्मसिद्धान्तव्याख्याता ।
९. लल्लस्य धीवृद्धिदतन्त्रं सबीजार्यमतव्याख्यातृ ।
१०. आर्यभटस्य महासिद्धान्तः (८७५ शा०) ।
११. श्रीपतेः सिद्धान्तशेखरः (९६१ शा०) ।
१२. भास्कराचार्यस्य सिद्धान्तशिरोमणिः (११०४ शा०) ।
१३. मुनीश्वरस्य सिद्धान्तसार्वभौमः (१५६८ शा०) ।

१४. कमलाकरस्य सिद्धान्ततत्त्वविवेकः (१५८० शा०) ।
१५. रङ्गनाथस्य सिद्धान्तचूडामणिः (१५८० शा०) करणप्रकृतिकः ।
१६. नित्यानन्दस्य सर्वसिद्धान्तराजः (१५६१ शा०) ।
१७. जयसिंहस्य सिद्धान्तसम्राट् (१६५० शा०) ।

करणग्रन्थाः

१. आर्यभटीयकरणम् (श० ४००) आर्यभटप्रणीतत्वेन मतम् ।
२. पञ्चसिद्धान्तिका (श० ४३०) वराहमिहिरप्रणीतम् ।
३. खण्डखाद्यकरणम् (श० ५८७) ब्रह्मगुप्तप्रणीतम् ।
४. लघुमानसम् ।
५. धीकोटिकरणम् (शक ९६१) श्रीपतिविरचितं मुद्रितम् ।
६. राजमृगाङ्ककरणम् (शक ९६४) श्रीभोजराजविरचितममुद्रितमस्ति ।
७. करणकमलमार्तण्डः (शक ९८०) श्रीदशवलराजविरचितः ।
८. करणप्रकाशः (शक १०१४) श्रीब्रह्मदेवविरचितो मुद्रितश्चार्यभट-तन्त्रमनुवर्तते ।
९. भास्वती (शक १०२१) शतानन्दविरचिता मुद्रिता प्रसिद्धा चेयं सौरमतमनुवर्तते ।
१०. शेखरः (शक १०३०) श्रीमहेश्वरविरचितः ।
करणोत्तमः (शक १०३८) लेखकस्य नाम न ज्ञायते ।
११. करणकुतूहलम् (शक ११०५) श्रीभास्कराचार्यविरचितं ब्रह्मपक्षीयं प्रसिद्धं मुद्रितं चास्ते ।
१२. करणकण्ठीरवम् (शक ११६४) श्रीकेशवार्कविरचितमनुपलब्धम् ।
१३. वाविलालकोच्चनाकृतकरणम् (शक १२२०) अप्रसिद्धम् ।
१४. महादेवीसारिणी (शक १२३८) महादेवविरचिता प्रसिद्धा ।
१५. कामधेनुः (शक १२७९) महादेवविरचिता ब्रह्मार्यभटमतद्वयानु-सारिणी ।
१६. भटतुल्यम् (शक १३३९) दामोदरकृतकरणम् ।
१७. मकरन्दसारिणी (शक १४००) मकरन्दविरचिता सौरमतीया सर्वत्र लब्धप्रतिष्ठा बहुसम्मता च वर्तते ।
१८. ग्रहकौतुककरणम् (शक १४१८) श्रीकेशवविरचितममुद्रितम् ।
१९. ग्रहलाघवम् । (शक १४४२) श्रीगणेशदैवज्ञकृतमतिप्रसिद्धं सर्वत्र समादृतं वर्तते । अस्यैवाचार्यस्यान्यौ द्वौ तादृशौ ग्रन्थौ लघुतिथिचिन्तामणिः बृहत्तिथिचिन्तामणिश्चेति वर्तेते । अस्मिन् ग्रहलाघवकरण उदिते केवलं मकरन्दग्रहलाघवाख्ये द्वे करणे सूर्यचन्द्राविव जगति प्रकाशेते ।

अन्यानि करणानि ग्रहतारका इव यथाकालं किञ्चित् किञ्चित् प्रकाशमानानि सन्ति ।

२०. कल्पद्रुमकरणम्, श्रीरामचन्द्रकृतम् ।

२१. अनन्तसुधारसः (शक १४४७) श्रीअनन्तदैवज्ञकृतः (सौरमतावलम्बिनी सारणी)।

२२. सुबोधमञ्जरी (शक १४८४) श्रीरघुनाथकृता ।

२३. मणिप्रदीपः (शक १४८७) श्रीरघुनाथशर्मकृतोऽप्रसिद्धः ।

२४. खेटकसिद्धिस्तथा चन्द्रार्की (शक १५००) श्रीदिनकरदैवज्ञकृते द्वे करणेऽमुद्रिते स्तः ।

२५. रामविनोदः (शक १५१२) श्रीरामदैवज्ञविरचितः प्रसिद्धो वर्तते, राजस्थानादिप्रान्तेषु महान् प्रचारोऽस्य ।

२६. ग्रहचिन्तामणिः (शक १५१२) श्रीनाथकृतः ।

२७. विष्णुकरणम् (शक १५३०) सौरपक्षीयं करणमेतद् विष्णुदैवज्ञकृतममुद्रितमप्रसिद्धं च ।

२८. ग्रहप्रबोधः (शक १५४१) श्रीनागेशकृतः ।

२९. सिद्धान्तचूडामणिः (शक १५६५) श्रीरङ्गनाथविरचितः ।

ज्योतिषस्य संहितास्कन्धः

प्राक्कथनम्

इदं प्रागेवोक्तं यज्ज्योतिषस्य हि सन्ति त्रयो मुख्यभागाः स्कन्धसंज्ञिताः सिद्धान्तसंहिताहोराऽऽख्याः । तत्र ग्रहाद्यवस्थितिर्बोधकः स्कन्धः सिद्धान्तो यस्य गणितग्रहगणितगोलभेदेन त्रयः पादाः । ग्रहाणां सामूहिकप्रभावो येन ज्ञायते स संहितास्कन्धः सार्वत्रिकविषयः । येन सः प्रभावो व्यक्तावन्विष्यते स होरास्कन्धः । एतेनैतत्सिध्यति यद्ग्रहस्थितिज्ञानमेव सिद्धान्तस्तस्याः समूहे प्रभावज्ञानं संहिताव्यक्तौ तु होरेति । केचित्तु नैतद् वाञ्छन्ति । तेषां मते जातकप्रश्नमुहूर्तनिमित्तादिहोराविषयम् । सिद्धान्तहोरयोरेकत्र वर्णनमेव संहितेति । मतभेदोऽयं संहिताहोरे आदायैव । कल्याणवर्मा स्पष्टमेव निर्दिशति यज्जातस्य शुभाशुभादिकर्मफलादेशिका होरेति । यथोक्तम्—

> 'कर्मफललाभहेतुं चतुराः संवर्णयन्त्यन्ये ।
> होरेति शास्त्रसंज्ञा लग्नस्य तथार्धराशेश्च ॥
> जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा ।' इति ।

तद्विपरीतं होराविषयो यथा नारदसंहितायाम्—

'शास्त्रोपनयनाध्यायो ग्रहचारोऽब्दलक्षणम् ।
तिथिर्वारश्च नक्षत्रं योगं तिथ्यर्द्धसंज्ञकम् ॥
मुहूर्तोऽपग्रहोऽर्कस्य सङ्क्रान्तिर्गोचरस्तथा ।
चन्द्रताराबलाध्यायः सर्वलग्नार्तवाह्वयः ॥
आधानपुंससीमन्तो जातनामान्नभुक्तयः ।
चौलाङ्कुरार्पणे मौञ्जीछुरिकाबन्धने क्रमात् ॥
समावर्तनवैवाहप्रतिष्ठा सद्मलक्षणम् ।
यात्राप्रवेशनं सद्यो वृष्टिकर्म विलक्षणम् ॥
उत्पातलक्षणं शान्तिर्मिश्रकं श्राद्धलक्षणम् ।
सप्तत्रिंशद्भिरध्यायैर्नारदीयाऽऽख्यसंहिता ॥' इति ।

वराहमिहिरस्तु—

'ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम्
तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ॥' इति ।

स तत्रैव कथयति—

'............गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ ।
होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ॥' इति ।

भट्टोत्पलो व्याख्यात्येतत्—

'प्रतिष्ठायात्राविवाहादीनां लग्नग्रहवशेन च शुभाशुभफलं जगति यथा निश्चीयते सा होरा'। इति। एतेनैतदुक्तं भवति—'गणितेन ग्रहगतिज्ञानं सिद्धान्तः, अङ्गविनिश्चयो होरा सामान्यफलवर्णनं संहितेति ।

एतावत्तु सुनिश्चितमेव यद्धोरासंहितयोर्विषयविभागो यः कोऽपि स्यात् ग्रहाणां शुभाशुभप्रभावस्तूभयोरेव विषयः । तत्र संहिताभागः प्राणिमात्रे ग्रहप्रभावं कालस्थितिञ्च, निरूपयति, यदा होराभागो व्यक्तिविशेषे एव । तेन हि संहिताभागः सार्वभौमविषयकः । अत्र हि सिद्धान्तफलितयोरुभयोरेव समन्वयो दृश्यते ।

सम्भवतः संहिताभागः सिद्धान्तभागादपि प्राचीनतरः । अस्य हि पर्याप्ता सामग्री वैदिकसंहितायां वैदिकसाहित्ये च समुपलभ्यते । वस्तुतस्तु वेदा हि यज्ञप्रयोजकास्तेन वेदेषु यत्किञ्चिदपि प्रोक्तं तत्सर्वं यज्ञार्थमेव । अतो यज्ञनिमित्तकोपयुक्तकालज्ञानायैव तत्र ज्योतिषं हि प्रवर्तितम् । यत्र कुत्र ज्योतिषं कालज्ञानशास्त्रमित्यप्युक्तं तेनैव । विषयोऽयं संहितासाध्यः । तेन प्रथमं संहिता एव प्रचलिताऽऽसीत् । पश्चाच्च विशिष्टज्ञानाय संहितातः सिद्धान्तभागः पृथक्कृतः । होराभागस्तु सर्वेष्ववर्चीनः । यद्यपि पश्चाद्वर्तिकाले संहिताभागे

मुहूर्तविषय एवावशिष्टस्तथापि नेदमस्य यथार्थरूपम् । संहिताकालेऽपीदं दृश्यते यत्प्रत्येककर्मनिमित्तं शुभो मुहूर्त आवश्यकः, किञ्च शुभे मुहूर्ते कृतं कर्म शुभं फलति तदन्यथा तद्विपरीतम् । अथात्र शुभकालसूचकानि कानिचिद्वचनानि समुद्ध्रियन्ते तत्रत्यानि—

'आ यद्रुहाव वरुणश्च नावं प्र यत समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥
वसिष्ठं ह वरुणो नाव्याधादृषिञ्चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन् यादुषासः ॥'
(ऋ० ७।८८।३–४)

'शं नो मित्रः शं वरुणः शं विवस्वांछमन्तकः ।
उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचरा: ग्रहाः ॥
शं नो भूमिर्वेप्यमाना शमुल्का निर्हतं च यत् ।
शं गावो लोहितक्षीराः शं भूमिरव तीर्यतीः ॥
नक्षत्रमुल्काभिहतं शमस्तु नः शं नोऽभिचाराः शमु सन्तु कृत्याः ।
शं नो निखाता वल्गाः शमुल्का देशोपसर्गाः शमु नो भवन्तु ॥
शं नो ग्रहाश्चान्द्रमसाः शमादित्यश्च राहुणा ।
शं नो मृत्युर्धूमकेतुः शं रुद्रास्तिग्मतेजसः ॥'
(अथर्व० १९।९।७–१०)

'कृत्तिकास्वग्नीऽआदधति····तद्भूमानमेवैतदुपैति ।
तस्मात्कृत्तिकास्वादधीत························ ॥' (शत० २।१।२।१–२)

'अथ यस्मान्न कृत्तिकास्वादधीत । ऋक्षाणां ह वा एताऽअग्रे पत्न्य आसुः सप्तर्षीनु ह स्म वै पुरर्क्षाऽइत्याचक्षते । ना मिथुनेन व्याध्यन्तामी ह्युत्तरा हि सप्तऋषय उद्यन्ति पुरऽएता अशमिव वै तद्यो मिथुनेन व्यृद्धः स नेन्मिथुनेन व्यृध्या इति तस्मान्नकृत्तिकास्वादधीत ।' (शत० ४)

'········रोहिण्यां ह वै प्रजापतिः प्रजाकामोऽग्नीऽआदधे······· ।
········पशुषु कामं रोहति य एवं विद्वान् रोहिण्यामाधत्ते ॥'
(शत० ७)

'········श्रियं ह गच्छति यऽएवं विद्वान् मृगशीर्ष आधत्ते ।'
(शत० ८)

'··· ····उत्तरयोरादधीत श्वः श्रेयसं हैवास्माऽउत्तरावद्भवति ॥'
(शत० ११)

'·······हन्ति सपत्नान् हन्ति द्विषन्तं भ्रातृव्यं य एव विद्वांश्चित्रायामाधत्ते तस्मादेतत् क्षत्रिय एव नक्षत्रमुपेत्··········· ।' (शत० १७)

'वसन्तो ग्रीष्मो वर्षाः। ते देवा ऋतवः शरद्धेमन्तः शिशिरस्ते पितरो य एवाऽऽपूर्यतेऽर्द्धमासः स देवाः योऽपक्षीयते स पितरोऽहरेव देवारात्रिः पितरः पुनरहः पूर्वाह्णो देवाः अपराह्णः पितरः।' (शत० २।१।३।१)

'उदितेषु नक्षत्रेषु व्रतं कृणुतेति वाचं विसृजति।' (तै० सं० ६।१।४।४)

'कृत्तिकास्वग्निमादधीत……………ब्रह्मवर्चसी भवति इति। मुख्यं वा एतन्नक्षत्राणां यत्कृत्तिकाः। यः कृत्तिकास्वग्निमाधत्ते मुख्य एव भवति इति।

यः कामयेत दानकामाः ये प्रजाः स्युरिति स पूर्वयोः फल्गुन्योशग्निमादधीत। अर्यम्णो वा एतन्नक्षत्रं यत्पूर्वे फल्गुनी। अर्यमेति तमाहुर्यो ददाति दानकामा अस्मै प्रजा भवन्ति इति।' (तै० ब्रा० १।१।२)

'पुण्याह एव कुरुते।' (तै० ब्रा० १।५।२)

'यां कामयेत दुहितरं प्रिया स्यादिति तां निष्टचायां दद्यात्। प्रियैव भवति।' (तै० ब्रा० १।५।२)

'निष्टचा स्वाती।

पौष्णेन व्यवस्यन्ति। मैत्रेण कृषन्ते। वारुणेन विधृता आसते। क्षैत्रपत्येन पाचयन्ते। आदित्येनादधते।' (तै० ब्रा० १।८।४)

'यत्पुण्यं नक्षत्रं तद्वत्कुर्वीतोपव्युषम्। यदा वै सूर्य उदेति। अथ नक्षत्रं नैति। यावति तत्र सूर्यो गच्छेत्। यत्र जघन्यं पश्येत्। तावति कुर्वीत यत्कारी स्यात्। पुण्याह एव कुरुते। एवं ह वै यज्ञेषु च शतद्युम्नश्च मात्स्यो निरवसाययाञ्चकार।' (१।५।२।१)

न केवलं संहितायां ब्राह्मणे वाऽपितु कल्पेऽपि यथा श्रौतधर्मगृह्यसूत्रेष्वपि कृत्यनिर्वाहायनमासपक्षतिथिचन्द्रनक्षत्रविषयिण्योऽनेकाः शुभाशुभनिर्देशिकाः पद्धतयो निर्दिष्टा दृश्यन्ते।

सामान्यतः संहिताशास्त्रे सूर्यादीनां विशेषेण नक्षत्रेण सहोदयेन प्राणिषु सम्भवी प्रभावो ग्रहकृतपरिवर्तनं वर्षादियोगाश्च निरूपणीयविषयेष्वन्यतमाः। मुहूर्तज्ञानमस्य मुख्यो विषयः।

पृथक्शास्त्रत्वेन संहिताभागस्य कदोदयो जात इति तु न शक्यत इदमित्थन्तया वक्तुम्। बृहत्संहिताकृद्वराहमिहिराचार्यो हि स्वपूर्ववर्तित्वेन गर्गपराशर-असित-देवल-वृद्धगर्ग-कश्यप-भृगु-वसिष्ठ-बृहस्पति-मनु-मय-सारस्वत-ऋषिपुत्रादीन् संहिताकृत्तया स्मरति तत्र तत्र। तद्विवृतौ भट्टोत्पलश्च व्यास-भानुभट्ट-विष्णुगुप्त-विष्णुचन्द्र-यवन-रोम-सिद्धासन-भद्रबाहु-नन्दि-नग्नजित्प्रमुखान् संहिताकारान् स्मरति यथाप्रसङ्गम्। तेषां हि ग्रन्थाः सम्प्रति नैवोपलभ्यन्ते। सम्प्रति नारद-संहिता पाराशरसंहिता गर्गसंहिता भृगुसंहिता काश्यपसंहिता वसिष्ठसंहिता च बृहत्संहितापूर्ववर्तित्वेन ज्ञायन्ते समुपलभ्यग्रन्थत्वेन।

इदमनुमीयते यद्वेदाङ्गकालपर्यन्तं संहिताशास्त्रस्य पृथगस्तित्वं नैवाऽऽसीत्। महाभारते हि कतिपयेषां संहिताशास्त्राणां विशेषतो व्याससंहिताया अवस्थिति-संसूचकवचनान्युपलभ्यन्ते—

'तत इष्टेऽहनि प्राप्ते मुहूर्ते साधुसम्मते।
जग्राह विधिवत्पाणिं माद्रयाः पाण्डुर्नराधिपः॥ (१।११३।१६)
'ऐन्द्रे चन्द्रसमायुक्ते मुहूर्तेऽभिजिदष्टमे।
दिवा मध्यगते सूर्ये तिथौ पूर्णेऽतिपूजिते॥' (१।१२३।६)

'ततोऽब्रवीद्भगवान् धर्मराजमद्यैव पुण्याहमुत वः पाण्डवेयाः।
अद्य पौष्यं योगमुपैति चन्द्रमाः पाणिं कृष्णायास्त्वं गृहाणाद्य पूर्वम्॥' इत्यादि।
(१।१९८।६)

न केवलं महाभारतेऽपितु वाल्मीकीये रामायणेऽपि संहिताविषयाः समुल्लिखिता दृश्यन्ते। यथा—

'युक्ते मुहूर्ते विजये सर्वाभरणभूषितैः।
भ्रातृभिः सहितो रामः कृतकौतुकमङ्गलः॥' (१।७३।९)
'ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः।
ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ॥
नक्षत्रेऽदितिदैवत्ये स्वोच्चसंस्थेषु पञ्चसु।
ग्रहेषु कर्कटे लग्ने वाक्पताविन्दुना सह॥' (१।१८।८-९)
चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः।' (२।३।४)
'श्व एव पुष्यो भविता श्वोऽभिषेच्यस्तु मे सुतः॥' इत्यादि।
(२।४।२)

ग्रन्थत्वेन आर्षेषु प्रथमं नारदसंहिता लभ्यते सम्प्रति, यद्यप्यस्य साम्प्रतिकं स्वरूपं नवीनमिव प्रतिभाति।

नारदसंहिता

नारदसंहिता पञ्चपञ्चाशदध्यायेषु विभक्ता। तत्र हि प्रथमे विषयनिर्देश उक्तः। तत्र मङ्गलाचरणानन्तरमष्टादशज्योतिःशास्त्रप्रवर्तकाः, इत्थं स्मृताः—

'ब्रह्माऽऽचार्यो वसिष्ठोऽत्रिर्मनुः पौलस्त्यरोमशौ।
आचार्यः सूर्य इति परम्परा।
मरीचिरङ्गिरा व्यासो नारदः शौनको भृगुः॥
च्यवनो यवनो गर्गः कश्यपश्च पराशरः।
अष्टादशैते गम्भीरा ज्योतिःशास्त्रप्रवर्तकाः॥' इति। (२-३)

ततश्च ज्योतिषस्य सिद्धान्तः संहिता होरा चेति त्रयः स्कन्धा उक्ता नामतः (४)। पञ्चमपद्ये शास्त्रस्य वेदाङ्गेन सह सम्बन्ध उक्तोऽभिधेयश्च जगतः

शुभाशुभनिरूपणम् । प्रयोजनञ्चास्य यज्ञाध्ययनसङ्क्रान्तिग्रहषोडशकर्मणां तत्तत्कालविनिर्णयः । ततो विषयनिर्देशो यथा—

'शास्त्रोपनयनाध्यायो ग्रहचारोऽब्दलक्षणम् ।
तिथिर्वारश्च नक्षत्रं योगं तिथ्यर्द्धसंज्ञकम् ॥
मुहूर्तोऽपग्रहोऽर्कस्य सङ्क्रान्तिर्गोचरस्तथा ।
चन्द्रताराबलाध्यायः सर्वलग्नार्तवाह्वयः ॥
आधानपुंससीमन्तो जातनामान्नभुक्तयः ।
चौलाङ्कुरार्पणे मौञ्जीच्छुरिकाबन्धने क्रमात् ॥
समावर्तनवैवाहप्रतिष्ठाः सद्मलक्षणम् ।
यात्राप्रवेशनं सद्यो वृष्टिकर्म विलक्षणम् ॥
उत्पातलक्षणं शान्तिर्मिश्रकं श्राद्धलक्षणम् ।
सप्तत्रिंशद्भिरध्यायैर्नारदीयाख्यसंहिता ॥' (१०–१५)

अनेन सिध्यति यन्मूलनारदीयसंहितायामासन् सप्तत्रिंशद्भिरेवाध्यायाः सङ्ग्रहकर्त्रा च पश्चात्संयोजिता अन्येऽष्टादशाध्याया इति । ततश्च सांवत्सरिकलक्षणमुक्तम् । यथा—

'त्रिस्कन्धज्ञो दर्शनीयः श्रौतस्मार्तक्रियापरः ।
निर्दाम्भिकः सत्यवादी दैवज्ञो दैववित्स्थिरः ॥' इति ।

ततश्च क्रमेण द्वितीयेऽध्याये सूर्यादिनवग्रहचाराः कथिताः । तृतीये निरूपितं यद्भवन्ति नव मानानि ब्राह्मदैवमानुषपित्र्यसौरसावनचान्द्रनाक्षत्रबार्हस्पत्यभेदात् । तत्रोक्तं यद्ग्रहणं सौरमानतः गर्भादिकं सावनतः वर्षादिकं नाक्षत्रमानतः यात्रोद्वाहव्रतक्षौरतिथिपर्वादि तु चान्द्रमानतो गुरुमानेन प्रभवाद्यब्दलक्षणमेव । ततश्च षष्टिसंवत्सराणां नामान्युक्तानि तत्र । तत्रोक्तं यत्पञ्चभिर्वर्षैर्युगं भवति द्वादश युगानि च । ततश्च युगेश्वराः प्रोक्ता विष्ण्वाद्याः । ततश्च संवत्सरफलभुक्तम् । तत उक्तम्—

'सौम्यायनं मासषट्कं मृगाद्यं भानुयुक्तिक्तः ।
अहः सुराणां तद्रात्रिः कर्काद्यं दक्षिणायनम् ॥' इति ।

ततश्च अयनकृत्यमृतवो माससंज्ञा पक्षविचारश्चोक्तः । अत्र हि मृगादित उत्तरायणं कर्कादितो दक्षिणायनमुक्तम्, शिशिराद्या ऋतवश्चैत्राद्या मासाः—शुक्लकृष्णौ च पक्षाविति । चतुर्थेऽध्याये तिथिविचारः प्रोक्तो यत्र तिथिदेवतास्तिथिकृत्यं युगादितिथयश्च प्रोक्ताः । पञ्चमे वासरविचारः । नक्षत्रविवेकः ताराविचारश्च षष्ठे । सप्तमे योगविचारः, अष्टमे करणविचारः, नवमे मुहूर्तविवेकः, दशमे उपग्रहविचारः । एवमेव सङ्क्रान्तिविचारः, गोचरविवेकः, शुभा-

शुभपक्षविचारः, कृत्येषु मुहूर्तविचारः शान्तिप्रकरणमुल्काविचारश्चात्र निरूपित-विषयाः पश्चाद्वर्त्यध्यायेषु ।

पाराशरगर्गकाश्यपवासिष्ठादिसंहितादिष्वपि नारदसंहितायामिव विषयाः सम्भवति कामं निरूपणक्रमो भिन्न एव भवेत् । संहितासु भृगुसंहिता स्थूलकलेवरा बहुविषया च । पौरुषेयेषु संहिताग्रन्थेषु ज्ञातेषु वराहमिहिराचार्यस्य बृहत्संहितैवाद्या ।

बृहत्संहिता

बृहत्संहिता वाराहीसंहिताप्युच्यते । वराहमिहिराचार्योऽस्य प्रणेता । स हि ४२७ मितशकाब्दमभित आसीत् । एषा हि तस्य चरमा कृतिः । अत्र सन्ति षडधिकशताध्यायाः, यत्र निरूपितविषया यथा तेनैवोक्तम्—

'शास्त्रोपनयः पूर्वं सांवत्सरसूत्रमर्कचारश्च ।
शशिराहुभौमबुधगुरुसितमन्दशिखिग्रहाणाञ्च ॥
चारश्चागस्त्यमुनेः सप्तर्षीणाञ्च कूर्मयोगश्च ।
नक्षत्राणां व्यूहो ग्रहभक्तिर्ग्रहविमर्दश्च ॥
ग्रहशशियोगः सम्यग्गृहवर्षफलं ग्रहाणाञ्च ।
श्रृङ्गारसंस्थितानां मेघानां गर्भधारणञ्चैव ॥
धारणवर्षणरोहिणिवायव्याषाढभाद्रपदयोगाः ।
क्षणवृष्टिः कुसुमलताः सन्ध्याचिह्नं दिशां दाहः ॥
भूकम्पोल्कापरिवेशलक्षणं शक्रचापखपुरञ्च ।
प्रतिसूर्यो निर्घातः सस्यद्रव्यार्घकाण्डञ्च ॥
इन्द्रध्वजनीराजनखञ्जनकोत्पातबर्हिचित्रञ्च ।
पुष्याभिषेकपट्टप्रमाणमसिलक्षणं वास्तु ॥
उदकार्गलमारामिकममरालयलक्षणं कुशिललेपः ।
प्रतिमा वनप्रवेशः सुरभवनानां प्रतिष्ठा च ॥
चिह्नं गवामथ शूनां कुक्कुटकूर्माजपुरुषचिह्नञ्च ।
पञ्चमनुष्यविभागः स्त्रीचिह्नं वस्त्रविच्छेदः ॥
चामरदण्डपरीक्षा स्त्रीस्तोत्रञ्चापि सुभगकरणञ्च ।
कान्दर्पिकानुलेपनपुंस्त्रीकाध्यायशयनविधिः ॥
वज्रपरीक्षामौक्तिकलक्षणमथ पद्मरागमरकतयोः ।
दीपस्य लक्षणं दन्तधावनं शाकुनं मिश्रम् ॥
अन्तरचक्रं विरुतं श्वचेष्टितं विरुतमथ शिवायाश्च ।
चरितं मृगाश्वकरिणां वायसविद्योत्तरञ्च ततः ॥
पाको नक्षत्रगुणास्तिथिकरणगुणाः सधिष्ण्यजन्मगुणाः ।

गोचरस्तथा ग्रहाणां कथितो नक्षत्रपुरुषश्च ॥
शतमिदमध्यायानामनुपरिपाटिक्रमादनुक्रान्तम् ।
अथ श्लोकसहस्राण्याबद्धा न्यूनचत्वारि ॥'

ग्रन्थस्यास्य भट्टोत्पलकृता विस्तृता टीका लभ्यते। अत्र हि वराहमिहिरेण यात्राविवाहप्रकरणे नैव समावेशिते तयोः संहिताङ्गत्वेऽपि। सम्भवति तत्तद्विषये तेनैव पृथक्पृथग्ग्रन्थप्रणीतत्वात्तथा कृतं स्यात्। योगयात्रा विवाहपटलः विवाहखण्डः ढिकनिकयात्रा दिक्तिनीयात्रा ग्रहमण्डलपटलं समाससंहिता चेत्यस्यैवान्ये संहिताविषयकग्रन्थाः। तत्र योगयात्रायां राज्ञां यात्राविषये विस्तरतो विचारितमस्ति। पञ्चपक्षी भविष्यदर्थप्रकाशको ग्रन्थः। तेषु विवाहखण्डपञ्चपक्ष्योर्वराहाचार्यप्रणेतृत्वे पण्डिता संशेरते। समाससंहिता सम्भवति बृहत्संहिताया एव संक्षिप्तरूपम्।

बृहत्संहितायाः प्रागपि तत्तद्विषये ग्रन्थाः प्रोक्ताः प्रणीता वा आसन्निति तत्र तत्र पूर्वाचार्यत्वेन पराशर-गर्ग-भृगु-मय-असित-देवल-वृद्धगर्ग-कश्यप-वसिष्ठ-बृहस्पति-मनु-सारस्वत-ऋषिपुत्रादीनां स्मरणेन ज्ञायते, किन्तु तेषां ग्रन्थास्तु न सम्प्रति सर्वेषां सुलभाः। एतदनुमीयते यद् ब्रह्मप्रोक्तं हि ज्योतिषशास्त्रमपि बहुशाखमासीत्। तेषु हि कश्चित् केनचित् पुनरुक्तोऽपरोऽन्येनेति सर्वेषां सङ्ग्रहो वाराह्यां विहितो मतिविभ्रमपरिहाराय।

बृहत्संहितातः पूर्वं तु वयमनुमातुमेव प्रभवामः कथमासीत् किमिति किन्तु एतदनन्तरमेतदनुसृतपद्धतिस्तु न केनाप्यनुसृता। मुहूर्ततत्त्वे यद्यपि ग्रन्थान्तरापेक्षया सन्ति बहव एव विषयाः, किन्तु न तथा यथाऽभीष्टाः। तेन हि शङ्करबालकृष्णः सत्यमेव कथयति यद्वराहमिहिरानन्तरं संहिता लुप्तप्रायेति। संहिताविषयेषु केवलं मुहूर्तखण्डमेव सम्प्रत्यपि सजीवम्। मुहूर्तो नाम कृत्यनिमित्तनिश्चितसमयः। यथा हि विवाहमुहूर्ता इति। कृत्यविशेषनिमित्तग्राह्याग्राह्यतिथिवारनक्षत्रादिविचारणैव मुहूर्तग्रन्थस्य प्रयोजनम्। सामान्यतो मुहूर्तस्य व्यवहारेण सहापरिहार्यः सम्बन्धः। निषेकादिश्मशानान्ता ये संस्काराः कर्षणादारभ्य कुसूलपूरणपर्यन्तं यत्कृषिकर्म चुल्लिकानिर्माणादिकं यद् गृहकर्म यात्रारम्भः शिलान्यासादारभ्य गृहप्रवेशनपर्यन्तं यन्निर्माणकर्म ते सर्वेऽपि शुभमुहूर्ते एव भवन्ति। अथाऽत्र कतिपये ज्ञाता मुहूर्तग्रन्था अत्रोपस्थाप्यते सारतः।

रत्नकोशः

कथ्यते हि ५६० मितशकाब्दमभितः स्थितिमता लल्लाचार्येण ग्रन्थोऽयं प्रणीत आसीदिति। एतद्विषये नाधिकं ज्ञातमस्त्यस्माकम्। कथ्यते ह्येनमेवाधारीकृत्य श्रीपतिर्हि रत्नमालां प्रणिनायेति।

रत्नमाला

ग्रन्थोऽयं ९६१ मितशकाब्दमभितः श्रीपत्याख्येन विदुषा प्रणीतः। अस्य माधवप्रणीता टीका लभ्यते ११८५ मितशकाब्दमभितः प्रणीता। माधवो हि स्वपूर्ववर्तित्वेन बहून् ग्रन्थान् ग्रन्थकारांश्च स्मरति येषां विषये नास्माकं सूच्यग्रभागमात्रमपि प्रवेशः।

राजमार्तण्डः

राजमार्तण्डो राजमृगाङ्ककर्तुरेव ग्रन्थान्तरत्वेन गृह्यते ९६४ मितशकाब्दमभितः प्रणीत इत्यपि। **विद्वज्जनवल्लभाख्य** एतद्विषयक एव ग्रन्थोऽन्योऽपि भोजकृतत्वेन स्वीक्रियते तद्विद्भिः। रत्नमालाटीकाकृन्माधवोऽपि ग्रन्थमिमं तथैव स्मरति।

अद्भुतसागरः

वस्तुतः अद्भुतसागरोऽद्भुत एव। ग्रन्थोऽयं १०८९ मितशकाब्दे पूरितः। अत्र हि वाराह्यामिव विषयाः। सन्ति बहवो नवीना अपि विषयाः, ये खलु अन्तरिक्षभूमीराश्रित्य बहवोऽद्भुतरूपा उत्पातास्तेऽप्यत्र विवेचिता येषां खलु वाराह्यां चर्चाऽपि नास्ति। तत्र दिव्याश्रया अन्तरिक्षाश्रया भौमाश्रयाश्च विविधोत्पाताः सोपपत्तिकं वर्णिताः कथितश्च तेषां शान्त्युपायोऽपि। तत्र दिव्याश्रये सूर्यचन्द्रराहुभौमबुधगुरुशुक्रशनिराहुकेतुध्रुवादीनामद्भुतावर्ताः, ग्रहयुद्धाद्भुतावर्ताः, आकृत्यादियोगाद्भुतावर्ताः, रव्यादिवर्षाद्भुतावर्ताः, संवत्सराद् भुतावर्ताः ऋक्षाद्यद्भुतावर्ताश्च सप्रपञ्चं निरूपिताः। अन्तरिक्षाश्रयाद्भुतप्रसङ्गे प्रतिसूर्य-परिवेषेन्द्रधनू-रश्मिदण्ड-गन्धर्वनगर-निर्यात-सन्ध्या-सन्ध्याकालिकरविकिरण-दिग्दाह-छाया-तमोधूमनीहारोल्का-विद्युद्-वात-मेघ-मेघगर्भ-प्रवर्षणातिवृष्टि-कबन्धाद्भुतावर्ताः साङ्गोपाङ्गं प्रपञ्चिताः। भौमाश्रये तु भूकम्प-जलाशयाग्नि-दीप-देवप्रतिमा-शक्रध्वज-वृक्ष-गृह-वातजोपस्कर-वस्त्रोपानहासन-शस्त्र-पुरा-दीव्यस्त्रीपुरुषदर्शन-मानुष-पिटक-स्वप्न-कायरिष्ट-दन्तजन्मप्रसव-सर्वशाकुन-नानामृगविहग-गजाश्व-वृषमहिष-बिडाल-शकुन-शृगाल-गृहगोधिका-पिपीलिकापतङ्गमशक-मक्षिक-लूताभ्रमरभेक-खञ्जरीटदर्शन-पोतकी-कृष्णपेचिका-वायसाद्भुतावर्ताः, मिश्रकाद्भुतावर्ताः, अद्भुतशान्त्यद्भुतावर्ताः, सद्योवर्षनिमित्ताद्भुतावर्ताः, अविरुद्धाद्भुतवर्षाः पाकसमयाद्भुतावर्ताश्च निरूपिताः। ग्रन्थोपक्रमे तत्रोक्तम्—

'ज्योतिर्विदार्यवचनानि विचार्य तेषां तात्पर्यपर्यवसितो ग्रथनानुपूर्व्या।
विप्रप्रसादनवशादवसादबुद्धिर्निःशङ्कशङ्करनृपः कुरुते प्रयत्नम्॥

ग्रन्थेऽत्र वृद्धगर्गगर्गपराशरवसिष्ठगार्गीयान् ।
बार्हस्पत्यबृहस्पतिकठश्रुतिब्रह्मसिद्धान्तान् ॥
आथर्वणाद्भुताशितषट्त्रिंशद् ब्रह्मर्षिकृतीः ।
गार्गीयमतौशनसे कालावलिसूर्यसिद्धान्तौ ॥
विन्ध्यवासिबादरायणोशनशालिहोत्रविधुगुप्तसुश्रुतान् ।
पीलुकार्यनृपपुत्रदेवलान् भार्गवीयविजवायकाश्यपान् ॥
नारदमयूरचित्रे चरकं यवनेश्वरस्य मतम् ।
निखिलं वराहमिहिराचार्यग्रन्थं वसन्तराजकृतिम् ॥
मार्कण्डेयपुराणं स्कान्दं भागवतमाद्यमाग्नेयम् ।
पाद्मं मत्स्यपुराणं रामायणमहाभारताख्याने ॥
हरिवंशविष्णुधर्मोत्तरे निबन्धं चरिण्यमाणञ्च ।
वचनं तेषां सारान् बहुशोऽर्थान्वीक्ष्य सोऽद्राक्षीत् ॥'

एवमेवाग्रे उक्तम्—

'शाके नवाष्टखेन्द्वाख्य आरम्भेऽद्भुतसागरम् ।
गौडेन्द्रकुञ्जरालानस्तम्भबाहुर्महीपतिः ॥'

ग्रन्थोऽयं वङ्गेशेन लक्ष्मणसेनेन प्रारब्धस्तत्तनयेन वल्लालसेनेन पूरितः १०८९ शकाब्दे । यथोक्तं तत्रैव—

'ग्रन्थेऽस्मिन्नसमाप्त एव तनये साम्राज्यलक्ष्मीं मुदा
दीक्षापर्वणि दक्षिणे निजकृतेर्निष्पत्तियस्थापयत् ।
नानादानतिलाम्बुसंवलनभं सूर्यात्मजासङ्गमं
गङ्गायां विरचय्य निर्जरपुरं भार्यानुयातो गतः ॥
श्रीमल्लक्ष्मणसेनभूपतिरतिश्लाघ्यो यदुद्योगतो
निष्पन्नोऽद्भुतसागरः कृतिरसौ वल्लाभूमीभुजः ।
ख्यातः केवलमर्णवः सगरजस्तातस्य तत्पूरण-
प्रावीण्येन भगीरथेन भुवनेष्वद्यापि विद्योतते ॥ इति ।

अद्भुतो यथा—

'अभूतपूर्वं यत्पूर्वं यत्पूर्वं जायतेऽन्यथा ।
तदद्भुतमिति प्रोक्तं नैमित्तं स्यान्निमित्तजम् ॥'

अभूतपूर्वं यल्लोकस्य पूर्वं भवति पूर्वञ्च यदन्यथा भवति तदद्भुतम् । तच्च नैमित्तानैमित्तभेदेन द्विविधम् । तदुभयमपि द्विविधं शुभसूचकमशुभसूचकञ्च । यदसूचकं स एवोत्पातः । यथोक्तम्—

'प्राग्विनाशाय सम्प्रोक्तो योऽत्रोत्पात इति स्मृतः ।' इति ।

सोऽपि त्रिविधः दिव्यनामसभूमिजभेदात् । तस्योत्पत्तिर्यथा—

'अतिलोभादसत्याद्वा नास्तिक्याद्वाऽप्यधर्मतः ।
नरापचारान्नियतमुपसर्गः प्रजायते ॥' इति ।

अयनचलनविषये तत्रोक्तम्—

सकलवसुधाधिनाथश्रीमद्वल्लालसिंहदेवेन ।
अयनद्वयं यथा तत्परीक्ष्य संलिख्यते सवितुः ॥
इदानीं तद्विसंवादादयनं दक्षिणं रवेः ।
भवेत् पुनर्वसोरादौ विश्वादावुत्तरायणम् ॥' इति ।

ब्रह्मगुप्तस्तु यथा—

'द्वौ द्वौ राशी मकरादृतवः षट् सूर्यगतिवशाद् ग्राह्याः ।
शिशिरवसन्तग्रीष्मवर्षाशरदः सहेमन्ताः ॥'

पञ्चसिद्धान्तिकायां तु—

'उदगयनं मकरादावृतवः शिशिरादयश्च सूर्यवशात् ।
द्विभवनकालसमाना दक्षिणमयनञ्च कर्कटकात् ॥'

वल्लालकाले तु—

'धनुषो विंशत्यंशात् षष्ठांशकभोगसम्मिता ऋतवः ।
शिशिराद्याः षट् क्रमशः सम्प्रत्ययनक्रमेण रवेः ॥'

पाराशर्यां तु—

'तस्य श्रविष्ठाद्यात्पौष्णान्तं चरतः शिशिरः वसन्तः पौष्णार्द्धाद्रोहिण्यन्तम् । सौम्यात् सार्पार्द्धं ग्रीष्मः प्रावृट् सार्पार्द्धाद्धस्तान्तम् । चित्राद्यादिन्द्रार्धं शरत् हेमन्तो ज्येष्ठार्द्धाद्वैष्णवान्तमिति ।' एवं हि उदग्दक्षिणायनं रवेः—

वेदाङ्गकाले—	धनिष्ठार्द्धात्	सार्पार्द्धात्
पाराशरकाले—	तथैव	तथैव
वराहमिहिरकाले—	मकरादितः	कर्कटादितः
	उत्तराषाढाया द्वितीयपादतः	पुनर्वसोश्चरमपादात्
ब्रह्मगुप्तकाले—	तथैव	तथैव
वल्लालकाले—	विश्वादितः	पुनर्वसोरादितः

धनुषो विंशत्यंशाच्छिशिरस्य प्रवृत्तिः ।

पूर्वाषाढाया द्वितीयपादान्ते धनुषो विंशत्यंशाः पूरिता भवन्ति । अत एव पूर्वाषाढायास्तृतीयपादे यदा रविः प्राप्नोति तदैवोत्तरायणं प्रारम्भते शिशिरर्तुश्च । धनिष्ठार्द्धात् पूर्वाषाढार्द्धपर्यन्तं भवन्ति द्वादशपादाः कालश्च तदतिक्रमणाय २४०० वर्षमितः । एतेन सिद्धयति यत् प्रतिद्विशतवर्षं सूर्यस्योदगयनं दक्षिणायनञ्च

पादेनैकेन पश्चात् सरति। मानेनानेन १९११ मितशकाब्दे उदगयनं सूर्ये मूलस्य द्वितीयपादमाक्रामति सति घटते यद्धि साम्प्रतिकपञ्चाङ्गेषु 'मकरे सायनार्कः' इति ज्ञाप्यते। २३०० मितशकाब्दे तद्धनुषारम्भे एव घटिष्यते। ग्रन्थान्ते ह्युक्तम्—

'इति श्रीमहाराजाधिराजनिःशङ्कशङ्करश्रीमद्बल्लालसेनविरचिते अद्भुतसागरे········।' इति।

ग्रन्थोऽयं श्रीमुरलीधरशर्मणा संशोध्य प्रकाशितः काश्यां प्राभाकरीयन्त्रालयतः।

व्यवहारप्रदीपः

व्यवहारप्रदीपो हि मुहूर्तविषयकग्रन्थः। अस्य प्रणेता पद्मनाभमिश्र इति तु तत्रत्यात्—

'किल पद्मनाभनामा कुरुते व्यवहारदीपाख्यम्।'

इति वचनाज्ज्ञायते। स हि काशीवासिनः कृष्णदेवाख्यस्य पुत्र इत्यपि तत्रत्यवर्णनाज्ज्ञायते। स हि स्वपितामहप्रपितामहत्वेन गङ्गादासशिवदासौ स्मरति च। असौ भास्कराचार्येण 'ब्रह्माह्वयश्रीधरपद्मनाभबीजानि' इति स्मृतोऽन्य एवेति न निश्चितं किन्त्वसौ भोजकृत-राजमार्तण्डं स्मरतीत्यस्य स्थितिकालः ९६४ मितशकाब्दादनन्तरमेवेति निश्चय एव। सामान्यतो बीजगणितकारो हि पद्मनाभः ७०० मितशकाब्दात् पूर्ववर्तित्वेनानुमितः। भास्कराचार्येण सिद्धान्तशिरोमणिः १०७२ मितशकाब्दे पूरितः। व्यवहारप्रदीपसिद्धान्तशिरोमण्योः कतिपयश्लोकानां साम्यं दृश्यते। तत्र सुधाकरः भास्करेण व्यवहारप्रदीपाद् गृहीता इमे इति मन्यते (ग० त० २८,२९), किन्तु शङ्करबालकृष्णस्तु पद्मनाभेन भास्करतो गृहीता इमे इति निश्चिनोति। यथा हि भास्करीये—

'तुष्यन्तु सुजना बुद्ध्वा विशेषान्मदुदीरितान्।
अबोधेन हसन्तो मां तोषमेष्यन्ति दुर्जनाः॥' इति। (१।५)

व्यवहारप्रदीपे यथा—

'तुष्यन्तु सुजना बुद्ध्वा विशेषान्मदुदीरितान्।
अबोधेन हसन्तो मां स्वतस्तुष्यन्तु दुर्जनाः॥' इति। (१७)

तथैव शिरोमणौ गोलाध्यायस्य छेद्यकाधिकारे समुपन्यस्तं दिव्यज्ञानमतीन्द्रियं····(९) इत्यादिपद्यं व्यवहारप्रदीपे तथा शौनकसंहितायाम् इत्युपक्रम्य दत्तमस्ति यथापाठम्। तथैव सिद्धान्तशिरोमणौ गोलाध्याये यत् 'यो वेद वेदवदनम्' (८) इति पद्यं व्यवहारप्रदीपे 'यथा चोक्तं वासिष्ठे' इत्युपक्रम्य वेदवदनमित्येतस्य स्थाने वेदनयनमिति पाठं कृत्वा यथायोगं पठितमस्ति।

वस्तुतस्तु भास्करीयेऽपि नयनमेव पाठः समीचीनः प्रतिभाति, ज्योतिषशास्त्रप्रशंसनप्रसङ्गे तथैवान्वयित्वात्। 'शब्दशास्त्रे पटिष्ठ'। इति पूर्वमेवोक्तत्वाच्च। प्रथमं शब्दशास्त्रं ततो गणितशास्त्रं ततश्च समग्रं ज्योतिषशास्त्रं च ज्ञात्वैव वेदाध्ययनेऽधिकारी भवति इति पद्यद्वयस्याशयाच्च। एतदपि सम्भवति यदुभाभ्यामेव तद्ग्रन्थान्तरतो यथा शौनकसंहिता वसिष्ठसंहितादितो गृहीतं स्यात्। यतो ह्युभावेव समकालिकाविव दृश्येते। भास्करः १०३६ मितशकाब्दे जातः, पद्मनाभोऽपि राजमार्तण्डं स्मरतीति न हि १००० मितशकाब्दपूर्ववर्ती यतो हि ९७० मितशकाब्दमभितो राजमार्तण्डस्य प्रणयनकालः। स्याद्यत्किञ्चिदपि तथ्यमेतत्तु निश्चितमेव यद्भास्करस्मृतः पद्मनाभो बीजगणितकृद् व्यवहारप्रदीपकृतोऽन्य एवेति शङ्करबालकृष्णमतं समीचीनमेव। ज्योतिषशास्त्रे हि आर्यभटद्वयं भास्करद्वयं पद्मनाभद्वयमिति यद् द्विकं तद् भ्रमहेतुरेव पाठकानाम्। व्यवहारप्रदीपे हि बहवः पूर्ववर्त्याचार्यास्तद्ग्रन्थाश्च स्मृता दृश्यन्ते। तत्र हि भीमपराक्रमः रत्नमाला रूपनारायणः राजमार्तण्डः सारसागरः रत्नावली ज्योतिस्तन्त्रम्, व्यवहारचण्डेश्वरः मुक्तावली चेत्यादिग्रन्थाः असकृत्स्मृताः शौनकसंहिता बार्हस्पत्यं व्याससंहिताऽत्रिसंहिता वसिष्ठसंहिता वासिष्ठतन्त्रम्, चन्द्रिका दीपिका लल्लसंहिता खण्डखाद्यकम्, सारावली देवलसंहिता वामनपुराणं स्कन्दपुराणं पाठकगृह्यसूत्रं भारद्वाजसंहिता कश्यपसंहिता मणित्थः जैमिनिसूत्रम्, विष्णुधर्मोत्तरं वायुपुराणञ्च। ग्रन्थोऽयं बाहुल्येन प्रचारयोग्यः।

ज्योतिर्विदाभरणम्

मुहूर्तविषयकग्रन्थोऽयं कालिदासप्रणीतत्वेनात्मानं परिचाययति। अत्रोक्तं यद्ग्रन्थोऽयं कलिगत ३०६८ वर्षे रघुवंशादिकाव्यप्रणेत्रा कालिदासेन प्रणीत इति। तत्र वराहमिहिरोऽपि कालिदाससमकालिकत्वेन स्मृतः। किन्तु वराहमिहिरो न कथमपि ४२७ मितशकाब्दपूर्ववर्ती सम्भवति, यतो हि स पञ्चसिद्धान्तिकायामार्यभटं स्मरति (१५।२०)। आर्यभटस्तु कलिगत ३६०० वर्षमभित आसीदिति तस्यैव 'षष्टचब्दानां षष्टिः—' इति कथनेन सिद्धयति। तेन ज्योतिर्विदाभरणोक्तमसत्यमिति स्पष्टमेव। नैतावन्मात्रमपितु स्वयमेवापि ऐन्द्रयोगस्य तृतीयांशे व्यतीते सूर्याचन्द्रमसोः क्रान्तिसाम्यं वर्णयति, येन हि तस्य प्रणयनकालः ११६४ मितशकाब्दमभित आपतति। यदि ह्यस्य प्रणेता कालिदास एव तदाऽसौ महाकविकालिदासाद्भिन्नः कश्चिदपर एव स्याद्यो ह्यात्मानं तथा प्राचीनत्वेन परिचाययति। न च श्रीहर्षमेव विक्रमादित्यं मत्वा तथा कल्पना सम्भवति यतो हि श्रीहर्षः कलिगत ३६४९ वर्षे एव राज्यारूढ आसीन्न तु ३०६८ वर्षमभितः। वस्तुतस्तु ज्योतिर्विदाभरणं हि भोजप्रबन्ध इव कल्पनाप्रधानो ग्रन्थः। विषयनिरूपणे तु ग्रन्थोऽयं प्रामाणिक एव।

विवाहवृन्दावनम्

विवाहवृन्दावनं हि वराहस्य विवाहपटल इव विवाहसम्बद्धग्रन्थः। असौ हि केशवप्रणीतत्वेन प्रसिद्धः। केशवोऽसौ ग्रहलाघवप्रणेतुर्गणेशस्य पितृतोऽभिन्न इति सुधाकरमतं भिन्नः कश्चित्प्राचीन इति शङ्करबालकृष्णमतम्। अस्य टीकायां गणेशदैवज्ञस्य ग्रन्थप्रणयनकाले अयनांशा १२ आसन्निति कथनेनास्य प्रणयनकालः ११६५ मितशकाब्दमभित इति गणेशपितुः केशवस्य तु १४१८ मितशकाब्दमभितः स्थितिरिति शङ्करबालकृष्णमतपृष्ठभूमिः। अस्य हि पितुर्नाम राणग इति पितामहस्य श्रियादित्यः प्रपितामहस्य जनार्दन इति। यदा मुहूर्ततत्त्वकृतस्तु पितुर्नाम कमलाकर इति। आद्यो भारद्वाजगोत्रीय औदीच्यो ब्राह्मणो द्वितीयस्तु कौशिकगोत्रीयो दाक्षिणात्यः।

अस्य करणकण्ठीरवो नाम करणग्रन्थोऽप्यासीदिति शङ्करबालकृष्णः कथयति। रत्नमालाटीकायां माधवेन केशवः स्मर्यते इति तस्य ११८५ शकाब्दपूर्ववर्तित्वं सिध्यति। तत्रैवास्य केशवव्यवहाराख्यग्रन्थान्तरमपि स्मृतं माधवेन। विवाहवृन्दावनं हि प्रसिद्धो ग्रन्थः। अस्य गणेशदैवज्ञेन व्याख्याग्रन्थः प्रणीतोऽस्ति।

विवाहपटलः

विवाहपटलो हि शार्ङ्गधरप्रणीतो ग्रन्थो मुहूर्तविषयकः। अत्र हि हेमाद्रिमाधवौ स्मृतौ इत्यस्य रचनाकालः १४०० मितशकाब्दमभितः। अत्र हि हरि-गदाधर-मुकुन्द-भार्गव-पवनेश्वर-लक्ष्मीधरभट्टप्रभृतय आचार्याः स्मृताः।

मुहूर्ततत्त्वम्

मुहूर्ततत्त्वं हि केशवस्य कमलाकरसुतस्य १४०० मितशकाब्दमभितः स्थितिमतः कृतिः। अस्य गणेशदैवज्ञेन टीका प्रणीताऽस्ति। अत्र विषयान्तरातिरिक्तं ग्रहचारयुद्धादिविषया अपि संक्षेपेण निरूपिताः। नौकाप्रकरणमस्य वैशिष्टयं मौलिकञ्च, यत्र नौकानिर्माणजलावतारणजलयात्राविषयकमुहूर्ता निरूपिताः। अत्र वसन्तराजभूपालनृसिंहादयः स्मृता आचार्यत्वेन। अस्य हि पूर्वखण्डे गर्भाधानादिसंस्कारमुहूर्ता उत्तरखण्डे ग्रहचारादिविषयाः। अस्यैव जातकपद्धतिस्ताजिकपद्धतिश्च परां प्रसिद्धिं प्राप्ताः।

विवाहपटलः

विवाहपटलः जगन्नाथपौत्रेण पीताम्बरेण १४४४ मितशकाब्दे प्रणीतः। अस्य हि ग्रन्थकर्तुरेव निर्णयामृतनाम्नी टीका लभ्यते। अत्रापि सन्ति बहवो ख्याता अज्ञाताश्च ग्रन्थाः ग्रन्थकाराश्च स्मृताः।

ज्योतिर्निबन्धः

ज्योतिर्निबन्धो हि शिवदासप्रणीतो धर्मशास्त्रसम्बद्धो मुहूर्तविषयकग्रन्थः। असौ हि विवाहपटलस्य निर्णयामृतटीकायां स्मर्यते इति १४४६ मितशकाब्द-प्राग्वर्तित्वमस्य सिध्यति।

ज्योतिषदर्पणः

गद्यपद्योभयात्मकोऽयं ग्रन्थः पञ्चपल्लूसंज्ञकेन ज्योतिर्विदा १४७९ मित-शकाब्दे प्रणीतः। पञ्चपल्लूर्हि कण्वशाखाध्यायी वत्सगोत्रीयो ब्राह्मणः। स हि पैलूभटीयाऽऽख्यं ग्रन्थं स्मरति।

मुहूर्तमार्तण्डः

ग्रन्थोऽयमनन्ताऽऽख्यसुतेन नारायणेन १४९३ मितशकाब्दमभितो हि प्रणीतः। ग्रन्थोऽयमतीव लोकप्रियः सर्वत्र सुलभश्च। अत्र हि त्याज्यप्रकरणं नक्षत्रप्रकरणं संस्कारप्रकरणं विवाहप्रकरणमग्न्याधानप्रकरणं यात्राप्रकरणं मिश्रप्रकरणं गोचरप्रकरणं सङ्क्रान्तिप्रकरणमनध्यायप्रकरणञ्चेति सन्ति दश प्रकरणानि ग्रन्थान्ते प्रणेता कथयति—

'श्रीमत्कौशिकपावनो हरिपदद्वन्द्वार्पितात्मा हरि-
तज्जोऽनन्त इलासुरार्चितगुणो नारायणस्तत्सुतः।
ख्यातं देवगिरेः शिवालयमुदक्तस्मादुदक् टापर-
ग्रामस्तद्वसतिर्मुहूर्तभवनं मार्तण्डमत्राकरोत्॥'

अत्र हि काव्यगुणगुणितानि सन्ति १६० पद्यानि सुगुम्फितानि। असौ हि १४९३ मितशकवर्षे माघे मासि प्रणीतः। अस्य ग्रन्थकर्त्रैव १४९४ मितशकाब्दे प्रणीता मार्तण्डवल्लभाऽऽख्या टीका लभ्यते। ज्योतिर्विदसौ कौशिकगोत्रीयो माध्यन्दिनीयशाखाध्यायी कृष्णाख्यः प्रपौत्रः हर्याख्यस्य पौत्रोऽनन्ताख्यस्य पुत्रः। निभाल्यतामस्य काव्यात्मकत्वम्—

'चौलं माघादिपञ्चस्वमधुषु गदितं द्वित्रिपञ्चोन्मितेऽब्दे
स्वाचाराद्वा सगर्भा यदि भवति जनन्यत्र नो कार्यमेतत्।
साकं यात्रोपनीत्या क्रियत इह तदाऽयं निरोधो न हि स्या-
ज्जह्यादम्बार्तवोऽदो व्रतमुपनयनं चाविशुद्धेः शुभार्थी॥' १०॥

ग्रन्थस्यास्य प्रयोजनं मन्दमतीनामपि विषयज्ञानसौकर्याय। यथाऽऽह ग्रन्थकृत्स्वयमेव—

'पूर्ववाक्यार्थमादाय ग्रन्थोऽयं रचितो लघुः।
पठनार्थमशक्तानामङ्गीकार्यो बुधैर्मुदा॥' इति।

अस्यैव मैथिलेन कपिलेश्वरशास्त्रिणा प्रणीता मार्तण्डप्रकाशिकाऽऽख्या टीकाऽपि लभ्यते ।

तोडरानन्दः

सुविस्तृतोऽयं ग्रन्थः १५०९ शकाब्दे नीलकण्ठेन सङ्कलितः । अत्र चण्डेश्वर-पवनेश्वरदुर्गादित्यप्रभृत्याचार्याः स्मृताः दैवज्ञमनोहरव्यवहारोच्चयकल्पलता-प्रभृतिग्रन्थाश्च ।' सुधाकरस्त्विमं रामदैवज्ञसङ्कलितं मन्यते ।

मुहूर्तचिन्तामणिः

मुहूर्तचिन्तामणिर्हि अनन्तदैवज्ञात्मजेन रामाख्येन दैवज्ञेन प्रणीतः १५२२ मितशकाब्दे । अतीवलोकप्रिये ग्रन्थेऽस्मिन् सन्ति बह्वष्टीका यासु ग्रन्थकृत एव प्रमिताक्षरा गोविन्दस्य पीयूषधारा च प्रसिद्धाः । सुधाकरो हि ग्रन्थमेनं श्रीपति-प्रणीतरत्नमालाप्रतिबिम्बं मन्यते । ग्रन्थोऽयं १५२२ मितशकाब्दे प्रणीतः । ग्रन्थेऽस्मिन् शुभाशुभ-नक्षत्र-सङ्क्रान्ति-गोचर-संस्कार-विवाह-वधूप्रवेश-द्विरा-गमन-अग्न्याधान-राजाभिषेक-यात्रा-वास्तु-गृहप्रवेशप्रभृतिप्रकरणानि सन्ति । अहो अस्य काव्यात्मकताऽनिर्वर्णनीया । दिङ्मात्रमुद्धरणं यथा—

क्रियाकलापप्रतिपत्तिहेतुं संक्षिप्तसारार्थविलासगर्भम् ।
अनन्तदैवज्ञसुतः स रामो मुहूर्तचिन्तामणिमातनोति ॥ (१।२)
एवं सुलग्ने स्वगृहं प्रविश्य वितानपुष्पश्रुतिघोषयुक्तम् ।
शिल्पज्ञदैवज्ञविधिज्ञपौरान् राजाऽर्चयेद् भूमिहिरण्यवस्त्रैः ॥ (१३।७)
आसीद्धर्मपुरे षडङ्गनिगमाध्येतृद्विजैर्मण्डिते
ज्योतिर्वित्तिलकः फणीन्द्ररचिते भाष्ये कृतातिश्रमः ।
तत्तज्जातकसंहितागणितकृन्मान्यो महाभूभुजां
तर्कालङ्कृतिवेदवाक्यविलसद्बुद्धिः स चिन्तामणिः ॥ १ ॥
ज्योतिर्विद्गणवन्दिताङ्घ्रिकमलस्तत्सूनुरासीत्कृती
नाम्नाऽनन्त इति प्रथामधिगतो भूमण्डलाहस्करः ।
यो रम्यां जनिपद्धतिं समकरोद् दुष्टाशयध्वंसिनीं
टीकाञ्चोत्तमकामधेनुगणितेऽकार्षीत् सदां प्रीतये ॥ २ ॥
तदात्मज उदारधीर्विबुधनीलकण्ठानुजो
गणेशपदपङ्कजं हृदि निधाय रामाभिधः ।
गिरिशनगरे वरे भुजभुजेषुचन्द्रैर्मिते
शके विनिरमादिमं खलु मुहूर्तचिन्तामणिम् ॥' ३ ॥ इत्यादि ।

मुहूर्तचूडामणिः

अन्वर्थनामा ग्रन्थोऽयं शिवाख्येन दैवज्ञेन १५४० मितशकाब्दमभितः प्रणीतः ।

मुहूर्तकल्पद्रुमः

विठ्ठलदीक्षितस्य कृतिरियं मुहूर्तविषयैव । ग्रन्थोऽयं १५४५ मितशकाब्दं प्रणीतः । अस्य ग्रन्थकर्तुरेव १५४९ मितशकाब्दमभितः प्रणीता मञ्जर्याख्या टीका लभ्यते ।

मुहूर्तमाला

ग्रन्थोऽयं १५८२ मितशकाब्दे रघुनाथदैवज्ञेन प्रणीतः । रघुनाथो हि शाण्डिल्यगोत्रीयो महाराष्ट्रब्राह्मणः । ग्रन्थोऽयमपि ग्रन्थान्तरवन्मुहूर्तविषयकः ।

मुहूर्तदीपकः

ग्रन्थोऽयं महादेवाऽऽख्येन विदुषा १५८३ मितशकाब्दे प्रणीतः । अस्य ग्रन्थकर्त्रैव प्रणीता टीकाऽस्तीति श्रूयते ।

कल्पलता

ग्रन्थोऽयं जलदाख्यग्रामवास्तव्येन रुद्रभटात्मजेन सोमदैवज्ञेन १५६४ मित-शकाब्दे प्रणीतः ।

मुहूर्तगणपतिः

ग्रन्थोऽयं गणपतिनाम्ना दैवज्ञेन १६०७ मितशकाब्दे प्रणीतः । असौ हि भारद्वाजगोत्रीयो गुर्जरब्राह्मणः । तद्वृत्तान्तो यथा—

'गौडोर्वीशशिरोविभूषणमणिर्गोपालदासोऽभव-
न्मान्धातेत्यभिरक्षिताद् व्यलभते ख्यातिं न दिल्लीश्वरात् ।
तत्पुत्रो विजयी मनोहरनृपो विद्योतते यः सदा
भुतु··· ··· ··· ···· ···· ···· ····· ···· ····· ···· ···· ॥'

मुहूर्तसिन्धुः

ग्रन्थोऽयं गङ्गाधरशास्त्रिणा १८०५ मितशकाब्दे प्रणीतः । ग्रन्थेऽस्मिन् प्राचीनग्रन्थाधारेण विषया निरूपिताः सन्ति । सुसङ्ग्राह्योऽयं ग्रन्थः ।

एते हि केचन ज्ञाता मुहूर्तविषयकग्रन्थाः । एतदतिरिक्तमपि सन्त्यन्येऽपि शतशः श्रुतमात्रा वा श्रुतिपथमप्यनागता एतद्विषयकग्रन्था येषां सङ्ख्यानं ग्रन्थ-विस्तरायैव । राजावली जगन्मोहनं समयसिद्धाञ्जनं नरेन्द्रवल्ली च प्रसिद्धा एतद्विषयकग्रन्थाः, यान् हि शङ्करबालकृष्णः सादरं स्मरति ।

शकुनविचारोऽपि संहिताया भाग एव । विषयेऽस्मिन्नपि सन्त्यनेके ग्रन्था येषु नरपतिदैवज्ञेन प्रणीताः नरपतिजयचर्या प्रसिद्धा ।

नरपतिजयचर्यास्वरोदयः

नरपत्याख्येन दैवज्ञेन १०९७ मितशकाब्दमभितः प्रणीतोऽयं ग्रन्थः । अत्र शास्त्रसङ्ग्रह-मात्रास्वर-द्वादशवार्षिकादिस्वर-चक्रबन्ध-भूबल-शान्त्याख्याः षड-ध्यायाः । तत्रोक्तम्—

'श्रुत्वादौ यामलान् सप्त तथा युद्धजयार्णवम् ।
कौमारीं कौशलञ्चैव योगिनीजालसञ्चरम् ॥
रक्षोघ्नञ्च त्रिमुण्डञ्च स्वरसिंहं स्वरार्णवम् ।
भूबलं भैरवं नाम पटलं स्वरभैरवम् ॥
तन्त्रं रणाह्वयं ख्यातं सिद्धान्तं जयपद्धतिम् ।
पुस्तकेन्द्रञ्च ढौकञ्च श्रीदर्शज्यौतिषं तथा ॥
मन्त्रयन्त्राण्यनेकानि कूटयुद्धानि यानि च ।
तन्त्रयुक्तिञ्च विज्ञाय विज्ञानं वडवानले ॥
एतेषां सर्वशास्त्राणां दृष्टसारोऽहमात्मना ॥
सारोद्धारं भणिष्यामि सर्वसत्त्वानुकम्पया ॥' इति (३०१७)

ग्रन्थेऽस्मिन् हरिवंशस्य जयलक्ष्मीः नरहरिकृता भूधरप्रणीता रामनाथविरचिता गणेशदत्तस्य सुबोधिनी टीका च व्याख्याग्रन्थाः ।

समरसारः

ग्रन्थोऽयं नैमिषारण्यनिवासिनः सूर्यदासस्य सुतस्य रामस्य कृतिः स्वरशास्त्रविषयकः । अस्योपरि भरतस्य टीका लभ्यते । असौ हि १६७१ मितशकाब्दमभितः प्रणीतः । यथा—

'ग्रन्थे वत्समुनीश्वरस्य शिवदासाख्या दुरुख्यातितः
सम्राडग्निचिदाप यस्य जनकः श्रीसूर्यदासोऽजनि ।
यन्मातुर्यशसा दिशो दश विशालाक्ष्या वलक्षा व्यधात्
स प्राज्यस्वरशास्त्रसारविचितं रामो वसन्नैमिषे ॥' इति ।

बृहद्वास्तुमाला

रामनिहोरद्विवेदेन सम्पादिता बृहद्वास्तुमालाऽपि प्रकरणेऽस्मिन् स्मर्तव्यो ग्रन्थः । अत्र हि वास्तुपुरुषस्वरूपं वर्गज्ञानं दिग्दिशाज्ञानं भूमिलक्षणं भूशोधनप्रकारः निषिद्धग्राह्यकाष्ठानि मानादि दिक्साधनानि मुहूर्तविचार इतिप्रभृतयो विषयाः सप्रपञ्चं निरूपिताः । अन्ते च वास्तुशान्तिः ।

गृहरत्नविभूषणम्

ग्रन्थोऽयं १८७८ मितशकाब्दे मातृकाप्रसादपाण्डेयसङ्गृहीतः । अत्रापि सर्वे वास्तुविषयाः सयुक्तिकं निरूपिताः । तत्रोक्तं—

'गृहस्थस्य गेहं विना सर्वकार्यं न सिध्यन्त्यतो गेहिनाञ्चैव गेहम् ।
अवश्यं तु रम्यं पवित्रेऽतिभूमौ विनिर्माय कार्या क्रिया सर्वदैव ॥'

इति संक्षेपतो निरूपितो ज्योतिषशास्त्रस्य सुविपुलः संहितास्कन्धः । विस्तृतज्ञानाय तु तत्तद्ग्रन्था एव अध्येतव्याः ।

ज्योतिषस्य होरास्कन्धः

'होराशास्त्रं जातकं ताजिकञ्च'

प्राक्कथनम्

इदं प्रागेवोक्तं तत्र तत्र यज्ज्योतिषस्य हि सन्ति त्रयः स्कन्धाः—सिद्धान्तः संहिता होरा चेति । तत्र हि सिद्धान्तस्य द्वौ स्वरूपौ सिद्धान्तस्तन्त्रञ्च । तत्र यत्र हि कल्पादित एव गणना क्रियते स सिद्धान्तो यत्र च युगादारभ्य सा क्रियते तत्तन्त्रमिति । उभयोरेव द्वौ पादौ प्रत्येकं गणितं गोलश्च । गणितस्य त्रयो भेदाः सामान्यगणितं बीजगणितं ग्रहगणितञ्च । सामान्य(पाटी)गणितस्य द्वौ भेदौ व्यक्तगणितमव्यक्तगणितञ्चेति । यत्र स्कन्धे गणितफलितयोः सामान्येन निर्देशः सर्वविषयकत्वेन सा सङ्ग्रहस्वरूपा संहिता । साऽपि चतुष्पदा ग्रहचार-काल-फलशकुनस्वरभेदात् । यत्र वैयक्तिकसम्बन्धेन फलादेशः सा होरा । साऽपि पञ्चपदा **जातकताजिकरमलप्रश्नस्वप्नभेदात्** ।

होराशास्त्रम्

सामान्यतो यत्र ग्रहस्थितितिथिनक्षत्रादिद्वारा मनुष्यस्य सुखदुःखाद्यवाप्ति-र्निर्णीयते तदेव होराशास्त्रमित्युच्यते । होराशब्दो हि अहोरात्रशब्दस्य आद्यान्ता-क्षरविलोपेन निष्पन्न इति केचिद्वदन्ति । यथा पाराशरहोराशास्त्रे—

'अहोरात्रस्य पूर्वान्त्यलोपाद्धोराऽवशिष्यते ।' इति । (४।१)

वयं तु शब्दोऽयं फलितज्योतिषार्थे रूढ इति मन्यामहे सौकर्यात् । वराह-मिहिराचार्यो यथाऽऽह—

'होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात् ।' (बृह० १।३)

तत्र भट्टोत्पल उपपत्तिमाह—

'मेषादयो द्वादशलग्नराशयोऽहोरात्रान्तर्भूताः लग्नस्य च कालवशाज्ज्ञानम् । लग्नवशाच्छुभाशुभज्ञानम् । अतोऽहोरात्राश्रयत्वात् तत एव होराशब्दो व्युत्पाद्यते ।' इति ।

भट्टोत्पल एतदेवाचार्यस्याप्यभिप्रेतम् । यतः परमतगप्रतिषिद्धमनुमत-मिति । वयन्तु एतन्न तस्याभिमतमिति मन्यामहे 'एके' पदसूचितत्वात् । सामा-न्यतः 'एकापरान्यप्रभृतिशब्दैरनभिमतमतमेव प्रकाशितं दृश्यते शास्त्रान्तरेषु । यथा हि भगवान् पाणिनिः 'यजुष्येकेषाम्' (८।३।१०४) इति सूत्रे । सारा-वलीकारस्तु तदेवानुवदति । यथा—

'आद्यन्तवर्णलोपाद्धोराऽस्माकं भवत्यहोरात्रात् ।
तत्प्रतिषिद्धः सर्वो ग्रहभगणश्चिन्त्यते यस्मात् ।।' इति ।

स्वरूपसिद्धिस्तु हिंसासंवरणाद्यर्थकाद् हुर धातोः ('हुल हुर हिंसा-संवरणयोः'—पा०) होरतीति पचाद्यचि टापि हुर्यते इति घञि टापि वा सिध्यति । अस्यार्थस्तु लग्नं राश्यर्द्धं रेखा शास्त्रभेदश्चेति मेदिन्याम् । लग्नेऽर्थे होरा यथा—

'संज्ञा वेश्माष्टमयोश्चतुरस्रं वैतपश्च नवमस्य ।
होरास्तदशजलानां चतुष्टयं कण्टकं केन्द्रम् ॥'
(सारावल्याम् २।२८)

'षष्ठं तृतीयं दशमञ्च राशिमेकादशञ्चोपचयर्क्षमाहुः ।
होरागृहस्थानशशाङ्कभ्यः शेषाणि चैभ्योऽपचदात्मकानि ॥'
(होरारत्ने १।९४)

बृहज्जातके यथा—
'होरादयस्तनुकुटुम्बसहोत्थबन्धुपुत्रारिपत्निमरणानि शुभास्पदायाः ।
रिःफाख्यमित्युपचयान्परिकर्मलाभदुश्चिक्यसंज्ञितगृहाणि न नित्यमेके ॥' (१।१५)

राश्यर्द्धेऽर्थे होरा यथा—
'होरा राशिदलं समे प्रथमतश्चन्द्रस्य भानोरतो
व्यत्यासा..।' (भावकुतूहले १।८)
'विषमर्क्षेषु प्रथमहोराः स्युश्चण्डरोचिषः ।
द्वितीयाः शशिनो युक्षु व्यत्ययाद् गणयेत् सदा ॥' (ज्योतिस्तत्त्वे)

सार्द्धदण्डद्वयात्मककालेऽर्थे होरा यथा—
'चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते ।
पश्चिमादर्द्धरात्रादिहोराणां विद्यते क्रमः ॥' (आग्नेये गणभेदाध्याये)

लघुजातके होराशब्दप्रयोगो यथा—
'गृहहोराद्रेष्काणा नवभागो द्वादशांशकस्त्रिंशः ।
वर्गः प्रत्येतव्यो ग्रहस्य यो यस्य निर्दिष्टः ॥' इति । (१।२३)

होराशब्दः शास्त्रार्थे तु सर्वत्रैव प्रयुक्तः ।

होराशास्त्रविषयो हि मनुष्यस्य प्राग्जन्मोपार्जितकर्म सदसत्फलकथनमेव । यथोक्तं बृहज्जातके—
'कर्मार्जितं पूर्वभवे सदादि यत्तस्य पङ्क्तिं समभिव्यनक्ति ।' (१।३)
यथा वा लघुजातके—
'यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम् ।
व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ॥' इति ।

ननु शुभस्य अशुभस्य वाऽवश्यम्भाविनः किं व्यनक्तीत्यपेक्षायामुच्यते द्विविधं शुभाशुभं दृढकर्मोपार्जितमदृढकर्मोपार्जितञ्च । तत्र दृढकर्मोपार्जितस्य

दशाफलं पाकक्रमेण व्यनक्ति । अशुभं दशाफलं ज्ञात्वा यात्रादेः परिहारः कर्तव्यः । शुभं ज्ञात्वा प्रवृत्तिः । अदृढकर्मोपार्जितस्य अष्टकवर्गेण फलव्यक्तिः तच्चाशुभं ज्ञात्वा शान्तिः कार्या । यथोक्तं यवनाचार्यैः—

'यद्यद्विधानं नियतं प्रजानां ग्रहर्क्षयोगप्रभवं प्रसूतौ ।
भाग्यानि तानीत्यभिशब्दयन्ति वार्तानियोगेति दशा नराणाम् ॥' इति ।

यदि हि दृढकर्मार्जितमशुभं तदा तस्य परिहारं कुर्यात् यदा त्वदृढकर्मार्जिताशुभं तदा पौरुषेण तद्धन्यादिति फलादेशस्य प्रयोजनम् । यथाऽऽह व्यासः—

'विहन्याद् दुर्बलं देवं पुरुषेण विपश्चिता ।' इति ।

ग्रहा हि पूर्वजन्मकर्मार्जितं शुभाशुभफलं व्यञ्जयन्तीत्येतस्य कथनस्यायमेवाशयो यद्यस्य यादृक् सञ्चितं कर्म स तदनुकूले समये जन्म लभत इति । ग्रहनक्षत्राण्यपि तथैव यथायोगमनुकूलाः प्रतिकूला वा भूत्वा शुभमशुभं वा प्रकटयन्ति च । शुभाशुभज्ञानानन्तरं नरः शान्त्यादिविविधोपायेन शुभं परिहर्तुं प्रभवेदिति फलादेशस्य महत्त्वम् । यस्य जन्मनि यस्य यस्य ग्रहादेः प्राबल्यं स तत्समानप्रकृतिक एव भवतीति भेलापकादावस्य सुमहत्प्रयोजनम् । अत एवोक्तं 'त्रिस्कन्धज्ञो नावसीदती'ति । तस्मात् स्थितमेतत् अस्यावश्यकता यथाऽऽह कल्याणवर्मा—

अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः ।
यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः ॥' इति । (२।५)

होराशास्त्रविभागः

ज्योतिर्विद्भिः होराशास्त्रं हि पञ्चधा विभक्तमस्ति—जातकं, ताजिकं, रमलं, प्रश्नः स्वप्नश्चेति । तेष्वपि सर्वातिशायित्वेन जातकस्यैव प्राधान्याद्यदा कदा होराशास्त्रमेव जातकशब्देनाऽप्यभिधीयते । यथाऽऽह कल्याणवर्मा—

'जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा ।
अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः ॥' इति । (२।४)

तत्र यत्र जन्मकालग्रहनक्षत्रतिथिराश्यादीनाधारीकृत्य फलादेशः क्रियते तज्जातकम् । जातकसम्बद्धग्रन्थाश्च बृहज्जातकादयः । यत्र च गोचरमाधारीकृत्य फलादेशः क्रियते तत्ताजिकम् । ताजिकग्रन्थाश्च ताजिकनीलकण्ठीप्रभृतयः । यत्र च प्रस्तारद्वारा शुभाशुभफलं कथ्यते तद्रमलशास्त्रम् । रमलग्रन्थाश्च रमलनवरत्नादयः । यत्र च प्रश्नलग्नमाश्रित्य फलादेशः क्रियते तत्प्रश्नशास्त्रम् । प्रश्नग्रन्थाश्च प्रश्नसारादयः । स्वप्नविवेचनेन शुभाशुभफलनिरूपकं स्वप्नशास्त्रं तद्ग्रन्थाश्च स्वप्नाध्यायादयः । तत्र प्रथमं जातकशास्त्रमत्र निरूप्यते ।

जातकशास्त्रम्

यत्र हि जन्मकालिकग्रहाद्यवस्थितिमाधारीकृत्य जनस्य भूतवर्तमानभावि-शुभाशुभफलादेशः क्रियते तज्जातकशास्त्रम् ।

खस्थानां पिण्डानां भूस्थितैर्जनैः सह सम्बन्धनं सहसा न प्रतीतिमायाति । किन्तु तयोरविच्छेद्यः सम्बन्धोऽस्त्येव यथार्थतः । सत्यमेवोक्तम्—

'ग्रहैर्व्याप्तमिदं सर्वं त्रैलोक्यं सचराचरम्' । इति ।

सूक्ष्मावलोकनेनैतत्स्पष्टमेव ज्ञायते यद्यत्प्रकृतिको यस्य जन्मनक्षत्रतत्स्वामि-राशितत्पतिलग्नतत्पमासतत्पतिवासरतिथितत्पतीत्यादिः तत्प्रकृतिक एव जनो भवतीति । यथा हि मेषराशौ जातो जनो जलाद् बिभेत्येव । मेषराशेः स्वामी भौमः स च वह्निप्रकृतिको जलविमुखः । एवमेव सिंहस्य स्वामी सूर्यः । तद्राशौ जातो निश्चयमेव पित्तप्रकृतिकोऽल्पवाचश्च भवति । यदि योगान्तरवशात् कस्मिं-श्चिन्नापि सर्वाणि लक्षणानि घटेरंस्तथापि स्वल्पमपि जन्मराशिप्रभावं देहे दृश्यत एव । एवमेव नक्षत्रादीनामपि । तेन जातकफलादेशात् पूर्वं खस्थपिण्डज्ञानमत्या-वश्यकीयं भवति ।

गगने हि या हि तारका दृश्यन्ते दूरतो दर्शनेन समप्रकृतिवद्भासमानास्वपि तासु आभ्यन्तरं महदन्तरं विद्यते । तत्र काश्चनातिस्थूलाः कतिपयास्तु नितान्त-कृशाः काश्चिज्ज्योतिर्मया अपरा ज्योतिर्हीना वा स्वल्पज्योतिष्काः । काश्चिच्चलनशीला अपरास्तु सदास्थिराः । गतिमतीस्वपि काश्चिच्छीघ्रगतिका अपरास्तु मन्दगतिका अपि । या हि स्थिरा दृश्यन्ते ता नक्षत्रशब्देन ज्ञायन्ते ऋक्ष-भशब्दयोर्वा । या हि गतिशीलास्ता ग्रह-खेट-खेचरप्रभृतिशब्दैरपि ज्ञायन्ते । यथोक्तं पाराशरशास्त्रे—

'आकाशे यानि दृश्यन्ते ज्योतिर्बिम्बान्यनेकशः ।
तेषु नक्षत्रसंज्ञानि ग्रहसंज्ञानि कानिचित् ।।
तानि नक्षत्रनामानि स्थिरस्थानानि यानि वै ।
गच्छन्तो भानि गृह्णन्ति सततं ये तु खेचराः ।।' (३।२–४)

यद्यपि गगनमविभाज्यमेकं विभु चानन्तश्च तथापि ज्योतिःपिण्डस्थित्य-ध्ययनाय ज्योतिर्विद्भिः समस्तं ज्योतिषचक्रं सप्तविंशतिधा प्रथमतो विभाजितं कैश्चिदष्टाविंशतिधाऽपि । ते च प्रत्येकं विभागा यथाप्रकृति नाम्नाऽप्याहूताः । त एव नक्षत्राणि । तानि हि सम्प्रति निरयणमानेन उत्तराभाद्रपदातः पूर्वाभाद्र-पदापर्यन्तानि सायनमानेन शतभिषातः धनिष्ठापर्यन्तानि । तेषामपि प्रत्येकं सन्ति चत्वारः पादाः इति भवन्ति १०८ पादाः ये हि नवाङ्कविभाज्या निःशेषत्वेन । तेन हि प्रतिनवपादमेको राशिः कल्पितः । राशयो द्वादश सम्प्रति निरयणमानेन

मीनतः कुम्भपर्यन्ताः सायनमानेन कुम्भतो मकरान्ताः । (२७×४ = १०८/९ = १२) तेषु हि मेषसिंहधनुःसंज्ञकाः नक्षत्रादितः प्रवृत्ता अन्ये तन्मध्यत एव । नक्षत्राणां सन्ति प्रत्येकं स्वप्रकृतिनिरूपका देवताः । राशीनामपि स्वामिनः सूर्यादयो ग्रहाः सप्त स्वस्वप्रकृतिकाः यत्र क्रमेण सिंहस्य कर्कटस्य मेषवृश्चिकयोः मिथुनकन्ययोः धनुर्मीनयोः वृषतुलयोः मकरकुम्भयोः सूर्यचन्द्रभौमबुधबृहस्पति-शुक्रशनैश्चराः स्वामिनः । ग्रहाणामपि उच्चनीचसाम्यस्थितिर्भवति यदानुकूल्येन ते फलं ददति । शास्त्रेषु मेषवृषमकरकन्याकर्कटमीनतुलामिथुनराशयः सराहूणां सूर्यादीनामुच्चस्थानानि ततश्च सप्तमराशयः क्रमेण नीचस्थानानि अन्तरालवर्तिनः साम्यस्थानानि । यथा—

ग्रहाः	आ०	चं०	मं०	बु०	बृ०	शु०	श०	रा०
उच्चस्थानानि	मेषः	वृषः	मकरः	कन्या	कर्कटः	मीनः	तुला	मिथुनम्
नीचस्थानानि	तुला	वृश्चिकः	कर्कटः	मीनः	मकरः	कन्या	मेषः	धनुः

वस्तुतस्त्वयं हि शास्त्रीयो विधिः । नूनं कदाचिदासीद्यत्प्रोक्तं पूर्वशास्त्रेषु । सम्प्रति तु सूर्यो निरयणमिथुने वा सायनकर्के एव परमोच्चः । शास्त्रे भौमो हि मकरे उच्चत्वेन सम्मतः । वस्तुतस्तु स्थितिरेषा शकोदयात् ९७०० वर्षाणि प्रागेव सम्भवति न तु कदापि तदनन्तरम् (भारतीयज्योतिषम्, पृ० ६२७)। एवमेवान्येषामपि स्थितिः ।

नक्षत्रराशिग्रहाणां स्वस्ववर्णजातिलिङ्गान्यपि कथितानि । यथोक्तं पाराशर्याम्—

'क्लीबौ द्वौ सौम्यसौरौ च युवतीन्दुभृगू द्विजः ।
नराश्च शेषा विज्ञेयाः·····························।।' इत्यादि ।


एवमेव दिगनुसारेण तेषां बलाबलमपि प्रोक्तम् । ग्रहाणां मित्रत्वामित्रत्व-समत्वञ्च तत्र तत्र शास्त्रे प्रतिपादितम् । यथा हि—

ग्रहाः	सू०	चं०	भौ०	बु०	बृह०	शुक्र०	शनिः
मित्राणि	चं० भौ० वृ०	सू० बु०	वृ० चं० सू०	शु० श०	सू० चं० भौ०	बु० श०	शु० बु०
समाः	बु०	सर्वे	शु०श०,	श० वृ० भौ०	श०	वृ० भौ०	वृ०
शत्रवः	शु० श०	×	बु०	च०	बु० शु०	सू० चं०	सू० चं० भौ०

किन्तु अन्योन्यतः तृतीयैकादशचतुर्थदशमद्वितीयद्वादशस्थानगतास्ते तत्काल-मित्राणि भवन्ति । ते च दशमतृतीयस्थानयोः पादेनैकेन नवपञ्चमस्थानयोः पाद द्वयेन चतुरस्रे पादत्रयेण सप्तमे तु सम्पूर्णदृष्ट्या पश्यन्ति । तत्रापि


तृतीयदशमयोः शनिः त्रिकोणे वृहस्पतिः चतुरस्रे भौमः सम्पूर्णयैव दृष्टया पश्यन्ति ।

जातकस्य हि जन्मकाले यो राशिः क्षितिजस्य पूर्वभागे भवति स एव तस्य लग्नराशिः । तदारभ्य परिगण्यन्ते द्वादश राशयः । तत्र तत्र ग्रहाणामवस्थानमपि निर्दिश्यते । चक्रमिदं जन्मकुण्डलीपदेनाभिधीयते । राशयो हि क्रमेण स्वस्वभोगानुसारं पूर्वस्यां भवन्ति सूर्योदयराशित आरभ्य । इत्थं तेषामपि प्रत्यहोरात्रं चक्रं भ्रमति । यदि कश्चिन्मिथुने हि पूर्वस्यां प्राप्ते जन्म लभते तस्य मिथुनमेव लग्नं भवति यत आरभ्य भावगणना क्रियते । यथा—




अत्राङ्कैर्भावा निर्दिष्टा न तु राशिगणना । तदा ग्रहाणामवस्थितिश्च यथा—मेषे सूर्यः चन्द्रः केतुश्च, तुलायां राहुः धनुषि भौमः मीने बुधवृहस्पतिशुक्रशनैश्चरा आसन्निति तस्य कुण्डली इत्थं विलिख्यते ।

अत्राङ्काः क्रमेण मेषादिराशिबोधकाः



कुण्डल्यां लग्नमाद्यं वपुः, द्वितीयं धनस्थानं, तृतीयं सहजभावश्चतुर्थं सुखभावः, पञ्चमं सुतादिभावः, षष्ठं रिपुभावः, सप्तमं कलत्रभावः, अष्टमं मृत्युभावः, नवमं धर्म्यभावः, दशमं कर्मभावः, एकादशमायभावो द्वादशस्थानं तु व्ययभाव इति । तत्र तत्र ग्रहाणामानुकूल्यप्रातिकूल्यं विचार्य शुभाशुभफलं निर्दिश्यते

पण्डितैः। अत्र चत्वारि केन्द्रस्थानानि लग्नं चतुर्थं सप्तमं दशमञ्च क्रमेण शरीरं सुखं जाया कर्म च। शरीरस्यात्मनो वामे व्ययस्थानं दक्षिणे धनस्थानम्। सुखस्य वामे सहजस्थानं दक्षिणे पुत्रस्थानम्। जायायाः वामे रिपुस्थानम्, दक्षिणे मृत्युस्थानम्। कर्मणो वामे भाग्यस्थानं दक्षिणे आयस्थानञ्च। विलोक्यतामत्रत्यं ससारं कौतुकम्—



न केवलं ग्रहा नरस्य कुण्डल्युक्तविषये शुभाशुभफलं वा स्थितिं निर्दिशन्ति अपि तु स्वयमेव नरो ग्रहमयः। यथोक्तं—

'कालात्मा दिनकृन्मनस्तु हिमगुः सत्त्वं कुजो ज्ञो वचो।
जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजः॥' इति।

यथा हि सूर्यादिग्रहाः क्रमेण सूर्याचन्द्रमसौ सर्वतत्त्वमयौ भौमाद्या अग्निभूमिनभस्तोयवायुतत्त्वमण्डिताः। यस्य यदेव तत्त्वं स तस्यैव साधकः।

स्वभावतः क्रूराः सौम्या वा ग्रहा यथाप्रकृतिफलदाः। तत्र सूर्यभौमशनिराहवः क्रूराः सोमबुधबृहस्पतिशुक्रा सौम्याः किन्तु क्षीणश्चन्द्रः सक्रूरग्रहो बुधस्तु क्रूर एव।

राशिभावोदयास्तबालतरुणवृद्धत्वादिवशाद्यदेव शुभाशुभं फलं ग्रहा ददति तदपि भावगताः पूर्णं सन्धिस्थिता न किमपि दिशन्ति ।

यद्यपि फलादेशविषये दैवज्ञा वैमत्यं भजन्ते तथापि तद्विषयकसिद्धान्तेषु तु तेषामैकमत्यमेव । इत्थं हि सुविस्तृतं जातकशास्त्रं कदा विकसितमभूदिति तु न शक्यते इदमित्थन्तया वक्तुं तथापि यथामिलितोपचारैरत्र तद्विषये किञ्चिदुच्यते ।

जातकस्कन्धस्य विकासः

लग्नादिग्रहादिसदाधारेण फलादेशनप्रक्रिया कदाऽऽरम्य प्रवृत्तेति नास्माकं ज्ञातं किन्तु नितान्तप्राचीनेयमिति शास्त्रावलोकनतो ज्ञायते । वाजसनेयीयसंहितायां 'नक्षत्रदर्शस्य (३०।१०) गणकस्य (३०।२०) चोल्लेखो दृश्यते । एवमेव तैत्तिरीयब्राह्मणेऽपि (३।४।४; ३।४।६) । तत्र प्रज्ञानाय नक्षत्रदर्शमालभते गीताय गणकमित्याशयः सायणेन व्याख्यातः । एवमेव छान्दोग्योपनिषद्यपि (७।१।२,७।७।१) नक्षत्रविद्याया उल्लेखो दृश्यते । तदा हि नक्षत्रविद्या प्रज्ञानाय मता किन्तु नक्षत्रविद्यया जीवनं नितान्तमेव गर्हितं मतम् । मनुस्मृतौ नक्षत्रविद्याजीवी अपाङ्क्तेयो मतः । यथा—

'हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति ।
पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥ (३।१६२)
.... ।
कृषिजीवी श्लीपदी च सद्भिर्गर्हित एव च ॥ (३।१६५)
एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् ।
द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् ॥ (३।१६७)
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥' (६।५०)

एवमेव शङ्खलिखितावपि । यथा—

'अनृतवादी तस्करो····नक्षत्रादेशवृत्तिः····अपाङ्क्तेयाः ।'

हारीतोऽपि यथा—

'चिकित्सक··········भृतकाध्यापकः·········नराशंसकापिलकदेवलघाण्टिकनक्षत्रजीविमहोदधिगामि··········पङ्क्तिदूषका भवन्ति ।'

एतेन नैतदवधेयं यन्नक्षत्रविद्यैव तदा निन्दिताऽऽसीदिति । वस्तुतस्तु तदाऽपि नक्षत्रविद्या विशिष्टज्ञानविषयत्वेन मता । केवलं फलादेशेन जीविका तु गर्हिता तदा । सत्यां हि नक्षत्रविद्यायामेव गर्हितायां नारदः स्वयमात्मानं नक्षत्रविद्याकुशलत्वेन सगौरवं नोपस्थापयेत् सनत्कुमारस्य पुरतः यथा छान्दोग्योपनिषदि

(७।२।१) नहि तथा सति याज्ञवल्क्यस्मृतौ 'पुरोहितं प्रकुर्वीत दैवज्ञमुदितोदितम्' इति कथितं स्यात् (१।३।१३)। तथानिन्दनं न केवलं नाक्षत्रिकस्यैवापितु सर्वेषामेव विज्ञानजीविनाम्। यथोक्तं वायुपुराणे—

'सन्ति वेदविरोधेन केचिद्विज्ञानमानिनः।
अयज्ञपतयो नाम ते भुञ्जन्ति यथा रजः॥' इति।

नक्षत्रज्ञाने एव गर्हिते सति पङ्क्तिपावनेषु षडङ्गविदामुल्लेखो न स्याद्यथा मनुस्मृतौ—

'त्रिणाचिकेतः पञ्चाग्निस्त्रिसौपर्णः षडङ्गविद्'। इति। (३।१७५)

वेदानां यथार्थमेव प्रवृत्तिस्ते च कालसाध्या इति कालज्ञानं कथं निन्दितं स्यात् केवलं तदाश्रितजीविकैव गर्हिता तदा। यथा हि देवपूजनं प्रशस्तं किन्तु पूजकवृत्तिर्निन्दिता तथैवात्रापि।

वैखानसस्मार्तसूत्रे जन्मकर्मसाङ्घातिकसामुदायिकवैनाशिकमानसनक्षत्राणामुल्लेखो दृश्यते। तेन हि नरः षण्णक्षत्रः। यथा व्याख्यातं योगयात्रायाम् (९।१।३-१०)। नरो यस्मिन्नक्षत्रे जायते तज्जन्मनक्षत्रमाद्यं ततो दशमं कर्मनक्षत्रम्। आद्यात् षोडशं साङ्घातिकम्। आद्यादष्टादशं समुदायनक्षत्रम्। आद्यात् त्रयोविंशतितमं वैनाशिकम्। आद्यात् पञ्चविंशतितमं मानसमिति। जन्मनक्षत्रे दुष्टे वा दुष्टप्रभाविते नरो रोगी दरिद्रश्च कर्मनक्षत्रे दुष्टे कर्महानिः साङ्घातिके दुष्टे कपटप्रवञ्चनादि सामुदायिके दुष्टे धनक्षयः वैनाशिके वाञ्छितवस्तुनाशः मानसे दुष्टे चित्तवैक्लव्यं शुभे शुभयोगे वा सर्वेषामानुकूल्यमिति। राजा तु नवनक्षत्र-देशजातिराज्याभिषेकनक्षत्रयोगेन। विष्णुधर्मोत्तरेऽपि प्रथमखण्डस्य नवाशीतितमेऽध्याये विषयोऽयं शान्तिविधिसहितो निर्दिष्टः। तत्रोक्तं यत् षट्स्वेव नक्षत्रेषु प्रभावितेषु नरस्य नाशो निश्चितः। एवमेव राज्याभिषेकनक्षत्रे प्रभाविते राज्ञो नाशो ध्रुवः। यदा हि कश्चिद् भरणीनक्षत्रे जायते तदा तत्तस्यादि नक्षत्रम्, पूर्वाफाल्गुनी कर्मनक्षत्रम् अनुराधा हि साङ्घातिकनक्षत्रम्, मूलं हि समुदायनक्षत्रम्, शतभिषा हि वैनाशिकनक्षत्रम् उत्तराभाद्रपदा हि मनोनक्षत्रमिति।

सिद्धान्तस्कन्ध इति ज्योतिषस्य जातकस्कन्धोऽपि मौलिक एवास्माकम्। तत्र तत्र प्राचीनग्रन्थेषु शुभमुहूर्तप्रभृतिविषयस्योल्लेखो दृश्यते फलादेशप्रक्रियायाश्च। स्मर्यन्ते बहवो जातकग्रन्थाः प्राचीनाः बृहज्जातकादौ येषां विषये न विद्यतेऽस्माकं ज्ञानं पर्याप्तम्। कथ्यते हि नारदकश्यपवसिष्ठपराशरभृगुप्रभृतिभिर्मुनिभिर्जातकशास्त्राणि प्रोक्तानि प्रणीतानि वाऽऽसन्। सम्प्रत्यपि पाराशरभृगुजैमिनिप्रणीतत्वेन कतिपये फलितज्योतिषग्रन्था लभ्यन्ते कामं तेषां रचनाशैली विषयाश्चार्वाचीना प्रतिभान्ति। पौरुषेयग्रन्थेषु वराहमिहिरस्य बृहज्जातकं

तस्यैव संक्षिप्तसंस्करणं लघुजातकं योगयात्रा तदात्मजस्य पृथुयशसः षट्-पञ्चाशिका कल्याणवर्मणः सारावली केशवस्य जातकपद्धतिः गणेशदैवज्ञस्य जातकालङ्कारः वैद्यनाथस्य जातकपारिजातः ढुण्ढिराजस्य जातकाभरणम्, जीवनाथस्य भावकुतूहलम्, बलभद्रस्य होरारत्नञ्च केचन प्रसिद्धा जातक-ग्रन्थाः। अथैतेषां संक्षिप्तपरिचयोऽत्रोपस्थाप्यते।

कतिपये जातकग्रन्थाः

बृहत्पाराशरहोराशास्त्रम्

बृहत्पाराशरहोराशास्त्रं हि पराशरमुनिप्रोक्तत्वेन प्रसिद्धो होराग्रन्थः। असौ हि पराशरमैत्रेयसंवादरूपः पश्चाद्वर्तिना केनापि दैवज्ञेन सङ्गृह्य विलिखितः। अस्यापि मोह्मयीतः काशीतश्च प्रकाशितयोः संस्करणयोर्दृश्यते महान् पाठभेदः। तेन कतरच्छुद्धमिति वक्तुमपि न सुकरम्। वयमत्रास्य काशीसंस्करणमेवानु-सरामोऽस्य।

अस्योपसंहाराध्याये प्रोक्तं यच्छास्त्रं यद् ब्रह्मणा नारदाय दत्तं तदेव नारदेन शौनकादिभ्य उक्तम्। ततश्च तच्छास्त्रं पराशरेण प्राप्तं मैत्रेयाय प्रोक्तमिति। ग्रन्थेऽस्मिन् सन्ति अष्टनवतिमिता अध्यायाः। अत्र हि यद्विवेचितं तद्यथोक्त-मुपसंहाराध्याये—

'सृष्टिक्रमोऽवताराश्च गुणा खेटस्य भस्य च।
विशेषलग्नं वर्गाश्च तद्विवेकश्च राशिदृक्॥
अरिष्टं तद्विभङ्गश्च विवेको भावजस्तथा।
भावानाञ्च फलाध्यायो भावेशोत्थफलं तथा॥
अप्रकाशफलं स्पष्टखेटदृष्टिप्रसाधनम्।
ततः स्पष्टबलाध्याय इष्टकष्टप्रसाधनम्॥
पदञ्चोपपदं तद्वदर्गला त्वथ कारकाः।'

इत्यादिः (१०–२५ श्लोका द्रष्टव्याः)। ग्रन्थोऽयं सीतारामाख्येन दैवज्ञेन १८६८ शकाब्दे सम्पाद्य प्राकाश्यं नीतः। अत्र हि सर्वेऽपि जातकसम्बद्धविषया निरूपिताः। शङ्करबालकृष्णानुसारेण सन्त्यत्र बहवः प्रक्षिप्तांशा अपि तथापि ग्रन्थस्यास्य आर्षत्वं तु न तेन हीयते। एषा परम्पराऽस्मासु न सर्वथाऽज्ञाता। वयं हि सौतिप्रोक्तत्वेन सङ्कलितं महाभारतांशमपि (आदिपर्वणि १–६० अध्यायाः) व्यासकृतत्वेन वा सूतप्रोक्तत्वेन सङ्गृहीतं पुराणांशमपि व्यास-प्रणीतत्वेन गृह्णीम एव। स्वयं भट्टोत्पल एव बृहज्जातकस्य सप्तमाध्यायस्य नवमश्लोकव्याख्यायां 'पाराशरीया संहिता केवलमस्माभिर्दृष्टा न जातकम्। श्रूयते स्कन्धत्रयमिति पराशरस्ये'ति कथयति। यदोत्पलकाले एव पाराशरहोरा

दुष्प्रायाऽऽसीत्तदा का वार्ता सम्प्रति मूलभागप्राप्तेः। किन्तु पराशरप्रोक्तं होराशास्त्रमासीदिति तु वराहस्य 'मययवनमणित्थशक्तिपूर्वैः' (७।१) इति वचनाज्ज्ञायते, यत्र शक्तिपूर्वः पराशरः शक्तिस्तदाख्यो वसिष्ठमुनिपुत्रः पूर्वं पिता यस्येति विग्रहात्। एवमेव 'चित्रं प्रोज्झ्य पराशरः कथयते दौर्भाग्यदं योषिताम्' इति मयाचार्य-मणित्थाचार्यप्रणीतहोराशास्त्रवचनाच्च पाराशरहोराशास्त्रस्यावस्थितिस्तु स्पष्टैव यस्य भट्टोत्पलोऽपि श्रुतिसाक्षी कामं न दृष्टिसाक्षी। पाराशरशास्त्रे अत्र यन्नोक्तं तद्गर्गाचार्यशास्त्रतो ज्ञेयमिति वचनादस्य गर्गशास्त्रसंक्षिप्तरूपत्वं प्रतिभाति, किन्तु कथनस्यास्य मौलिकत्वं न संशयबाह्यम्।

पाराशरहोराशास्त्रस्य लघुरूपं मध्यमरूपञ्च प्रकाशितं दृश्यते। लघुरूपं हि लघुपाराशरीति उडुदायप्रदीप इति वा कथ्यते। उडुदायप्रदीपो हि पुनरुक्तं शास्त्रमिति तस्य—

'वयं पाराशरीं होरामनुसृत्य यथामति।
उडुदायप्रदीपाख्यं कुर्मो देवविदां मुदे'॥ २॥

इति कथनादेव सिध्यति। अत्र संज्ञाध्यायो योगाध्यायः, आयुर्विचाराध्यायः, दशाफलाध्यायः मिश्रकाध्यायश्चेति पञ्चाध्यायाः पञ्चचत्वारिंशच्छ्लोकाश्च सन्ति (१३+९+९+८+६=४५)। ग्रन्थोऽयं केन कदा पुनः प्रणीत इति न ज्ञातमस्माकम्। एतावदेवानुमीयते यदसौ भट्टोत्पलादर्वाचीनो यतो हि स न स्मरतीति। मध्यपाराशर्यां सन्त्यष्टौ परिच्छेदाः यस्या अयमादिमः श्लोकः—

'पराशरमुनिं नत्वा तस्य होरां निरीक्ष्य च।
वक्ष्येऽप्युडुदशामार्गं पूर्वशास्त्रानुसारतः॥' इति।

उभयोरपि पाराशर्योः प्रणेता एक एवेति तज्ज्ञाः। ते उभेऽपि न हि बृहत्पाराशरहोराशास्त्रं तथ्यतोऽनुसरतः। तेन ते कस्यचित् प्राचीनग्रन्थस्य सारसङ्क्षेपमादत्त इति निश्चितमेव। पाराशर्याः संहिताया भट्टोत्पलो दृष्टिसाक्षी (बृ० जा० ७।९ व्याख्यायाम्) वयन्तु तस्याः श्रुतिसाक्षिण एव।

वराहाचार्यो हि यवनमयमणित्थजीवशर्मसत्याचार्यप्रभृतीनाचार्यानपि स्मरति। तेन तदा तत्तत् प्रणीतग्रन्थानामस्तित्वं ज्ञायते। भट्टोत्पलस्तु स्फुजिध्वजमयमणित्थजीवशर्मापराशरसत्याचार्याणां ग्रन्थानपि चोद्धरति तदतिरिक्तं बादरायणगार्ग्योरपि। एकतः ये खलु ब्रह्मादयोऽष्टादशज्योतिषाचार्याः स्मृतास्तेषां प्रत्येकं स्कन्धत्रयप्रवचनं सिद्धत्येव। तेषु हि कतिपये तु नैव सङ्गृहीता अप्यासन्। येऽपि खलु सङ्गृहीतास्तेऽपि कतिपये प्रणष्टाः कतिपये विस्मृता अपि। सम्प्रति हि ये खलु ग्रन्थाः श्रूयन्ते तेषु गर्गकश्यपवसिष्ठनारदभृगुव्यासशौनकयवनपराशरप्रोक्ताः। शास्त्रप्रवर्तकत्वेन जैमिनेर्नाम नैव किन्तु तस्य ज्योतिषविषयकः सूत्रग्रन्थो लभ्यते। वराहमिहिरो हि केवलं तेषु यवनपराशर-

ग्रन्थमेव स्मरति । सम्भवति तत्स्मृतौ मयमणित्थौ तेषां मध्ये यस्य कस्य प्रातिनिध्यं भजतः । जीवशर्मसत्याचार्यविषयेऽप्येवमेव । अथैतेषां यथाज्ञातपरिचयः प्रस्तूयते ।

नारदीयहोराशास्त्रम्

नारदेन हि संहिताशास्त्रवद्धोराशास्त्रमपि प्रोक्तमासीदिति—

'उक्त्वा स्कन्धद्वयं पूर्वं संहितास्कन्धमुत्तमम् ।
वक्ष्ये.... .... ॥'

इति कथनाज्ज्ञायते । एतद्विषये नास्माकं तदधिकं ज्ञानम् ।

भृगुसंहिता

भृगुर्हि भगवानृषिर्ज्योतिषस्य स्कन्धत्रयस्यैव प्रवक्ताऽऽसीत् । सम्प्रति तस्य संहितायाः फलितभाग एव लभ्यते । कथ्यते हि तत्र सन्ति ७४६४९६०० जन्मकुण्डल्यः साधिताः । प्रतिकुण्डलि षष्ट्यधिकश्लोकैः फलादेशश्च । तथा हि सति तु ग्रन्थविस्तारस्यानन्त्यमेव स्यात् । कृतेऽपि 'असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी' नाऽस्य कोऽपि पारमियात् । नेपालाधिराज्यान्तर्गतखोटाङ्गमण्डलवर्तिलामीडाडाग्रामवास्तव्यपण्डितवरदेवीप्रसादभट्टराईमहोदयपार्श्वेऽस्माभिः १८८८ मितशकाब्दे भृगुसंहिता दृष्टाऽऽसीत् । पण्डितवरकथनानुसारेण तत्र विभिन्नलग्नघटिता एकसहस्रमितजन्मकुण्डल्य आसन्, फलादेशस्तु श्लोकवैषम्येन । सम्प्रति सामान्यतो या भृगुसंहिता लभ्यते तत्र शतद्वयकुण्डल्य एव दृश्यन्ते । वस्तुतस्तु ग्रन्थोऽयं बृहत्कायः सम्भवति शताब्द्यधिकसमयघटयितः । एतादृशं दिक्षु प्रथितं महाग्रन्थं वराहमिहिरो भट्टोत्पलश्च नैव जानीत इति महदाश्चर्यम् । अनेन तु एतदेव सिध्यति यद् ग्रन्थोऽयं भट्टोत्पलकालादर्वागेव प्रणीत इति किन्त्वस्माकं चेतना न तथा मन्यते । कस्याप्येकस्यास्मरणमेव न तदर्वाग्वर्तित्वे दृढं प्रमाणम् । न च वराहमिहिरस्य स्वल्पज्ञानं वा तदुपेक्षणमपि सम्भवति । न च कल्याणवर्मैव ग्रन्थमिमं स्मरति । तेनात्र वयमसहायाः स्मः । एतादृशस्य बृहत्कायग्रन्थस्य प्रणयनं तु गुरुकुलेष्वेव सम्भवतीति सत्यमेव । न हि काचिद् गुरुकुलपद्धतिरप्येतादृशी साम्प्रतिकयुगे श्रुता । विषयेऽस्मिन्नेतावदेवानुमातुं शक्यते यद् ग्रन्थोऽयमार्षः प्रायो दाक्षिणात्यप्रदेशे प्रचलितो येनौदीच्यैर्बहुकालानन्तरमेव ज्ञात इति ।

गर्गसंहिता

पुराणादिषु गर्गाचार्यः सांवत्सरिकत्वेनाऽपि ज्ञातः । भट्टोत्पलो बृहत्संहिताटीकायां गर्गवचनमुद्धरति । यथा—

'राशितुल्यांशसङ्ख्यानि ग्रहोऽब्दानि प्रयच्छति ।
लग्नश्च सबलोऽन्यानि मुक्तराशिसमानि तु ॥' इत्यादि ।

तेन गर्गहोराशास्त्रस्यास्तित्वं सिद्धमेव ।

मयहोराशास्त्रम्

मयप्रणीतं होराशास्त्रं वराहमिहिरः स्वरूपेण स्मरति—'मययवनमणित्थशक्तिपूर्वैः' (७।१) इति कथनेन । मयो मयनामा दानवः सूर्यलब्धवरप्रसादः । भट्टोत्पलो मयकृतहोराशास्त्रं स्मरति उद्धरति च तत्रत्यम्—

'चित्रं प्रोज्झ्य पराशरः कथयते दौर्भाग्यदं योषिताम् ।' इति ।

'एकोनविंशतिः सूर्यश्चन्द्रमाः पञ्चविंशतिः ।
तिथिसङ्ख्या कुजः सौम्यो द्वादशोच्चगतो गुरुः ॥
कुजवद्दैत्यपूज्यस्य वर्षाणामेकविंशतिः ।
एकोनसूर्यपुत्रस्य परमोच्चगतस्य च ॥
आयुर्दायमिदं प्रोक्तमथ नीचगतस्य तु ।
अन्तरे त्वनुपाताच्च कारयेदायसङ्ग्रहम् ॥' इत्यपि ।

मयाचार्यो हि सूर्यसिद्धान्तेऽपि स्मर्यते । कथ्यते हि सूर्यसिद्धान्तः सूर्यनिर्दिष्टेन पुरुषेण तपस्यते मयाय प्रोक्त इति । स हि सत्ययुगेऽपि स्थित इति स्मर्यते पुराणादौ । त्रेतायुगे तु तस्य बाहुल्येन स्मरणम् । भट्टोत्पलवाक्येन मयस्य यवनाचार्यपूर्ववर्तित्वमप्यनुमीयते ।

यवनहोराशास्त्रम्

वराहमिहिरकल्याणवर्मभट्टोत्पलप्रभृतयो यावनं होराशास्त्रमसकृत्स्मरन्ति । वस्तुतस्तु यत्रापि यवनमतमनूदितं तत्र तत्र बहुवचनान्तशब्दद्वारा तद्विहितं दृश्यते । यथा 'प्राहुर्यवनाः' इत्यादि । भट्टोत्पलो बृहज्जातकस्य 'मययवनमणित्थशक्तिपूर्वैः' (७।१) इति श्लोकस्य व्याख्यायां यवनपदं बहुवचनान्तेन व्याख्याति । यथा 'यवना म्लेच्छजातीया होराविदः' इति । तेन हि यवनजातौ प्रचलितं होराशास्त्रमेव यवनशब्देन स्मर्यते इति स्पष्टमेव । यच्च यवनेश्वरः स्मर्यतेऽसकृद्धोराशास्त्रकृत्त्वेन स हि भट्टोत्पलानुसारेण स्फुजिध्वजाख्यो यवनेश्वर एव । सोऽपि 'यवना ऊचुः' इति पूर्वाचार्यान् स्मरति स्वकीयग्रन्थे । अपरञ्च वराहमिहिरः 'म्लेच्छा हि यवनाः' इति स्पष्टयति बहुवचनान्तत्वेनैव । वस्तुतो यवनशब्देन हिपार्कसटालमीप्रभृतयः आचार्याः स्मृता दृश्यन्ते । सामान्यतो सम्प्रति यवनशब्दः मौसलजात्यर्थं प्रयुक्तो दृश्यते । शिवराजविजयकृदसकृत् मौसलजातीयान् यवनशब्देन कथयति । अस्माकं मते एतच्चिन्त्यमेव । वराहमिहिरादयो यवनशब्देन साम्प्रतिकग्रीसदेशवासिनो गृह्णाति न तु आरबी-

यानपि। तेषां म्लेच्छत्वमपि जात्यन्तरमिश्रणादेव। यौति मिश्रीयवतीति व्युत्पत्तेः। महाभारतमत्स्यपुराणादौ यवनानामुत्पत्तिर्ययातित उक्ता। ययातेर्हि पञ्च पुत्रा आसन्—यदुपुरुतुर्वसुद्रुह्यु-अनुसंज्ञकाः। पुरुवर्जं चत्वारः पितृप्रतिगामित्वात् पित्रा राज्यानर्हाय म्लेच्छत्वाय च शप्ताः। तत्र यदोर्जाता यादवाः। यथोक्तं श्रीमद्भागवते—

'आह चास्मान् महाराज ! प्रजाश्चाज्ञप्तुमर्हसि।
ययातिशापाद्यदुभिर्नोसितव्यं नृपासने॥' इति। (१०।४५।१३)

पुरोः पौरवो वंशः प्रवृत्तो यत्र दुष्यन्तादय आसन् राजानः। तुर्वसोरपत्यानि तुरुष्का यवनादयः द्रुह्योस्तु भोजा अनोस्तु म्लेच्छजातय इति। यथोक्तं मात्स्ये—

'यदोस्तु जाता यदवस्तुर्वस्ते यवनाः सुताः।
द्रुह्योस्तु तनया भोजा अनोस्तु म्लेच्छजातयः॥' (३४।७)

एवमेव—

'तान् देशान् प्राययन्ति स्म म्लेच्छप्रायांश्च सर्वशः।
सप्तैतान् कुकुरान् रौत्रान् वर्वरान् यवनान् खशान्॥' (१२०।४३)

मेदिनीकोशकारस्तु यवनशब्देन वेगाधिकाश्वमपि गृह्णाति। यथा—

'यवनो देशभेदे ना वेगिवेगाधिकाश्वयोः।' इति। (शब्द० ९)

एतेन अश्वारोहिसैनिकनिमित्तमपि यवनशब्दः प्रयुज्यत इति ज्ञायते। कथनमिदं कालिदासोऽपि स्मरति। यथा—

'सङ्ग्रामस्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः।
शार्ङ्गकूजितविज्ञेयप्रतिरोधे रजस्यभूत्॥' इति। (४।६२)

राजनिघण्टुकारस्तु यवनशब्देन गोधूमतुरुष्कावपि निर्दिशति। विष्णुपुराणं तु यवना हि क्षत्रिया येषां सगरराजेन सर्वशिरोमुण्डनं सर्वधर्मराहित्यञ्च कृतं ते च राजधर्मपरित्यागान्म्लेच्छत्वं ययुरिति वदति। कथनमिदं मनुस्मृतेः कथनस्यानुवादः। यथोक्तं तत्र—

'शनकैस्तु क्रियालोपादमी क्षत्रियजातयः।
वृषलत्वं गता लोके ब्राह्मणानापदर्शनात्॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः।
पारदाः पह्लवाश्चीनाः किराता दरदाः खशाः॥' (१०।४३-४४)

हरिवंशे तु—

'सगरस्तां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च।
धर्मं जघान तेषां वै वेषान्यत्वञ्चकार ह॥

अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत् ।
यवनानां शिरः सर्वं काम्बोजानां तथैव च ।।
पारदा मुक्तकेशाश्च पह्लवाः श्मश्रुधारिणः ।
निःस्वाध्यायवषट्काराः कृतास्तेन महात्मना ।।
शका यवनकाम्बोजाः पारदाः पह्लवास्तथा ।
कोलिसर्पाः समहिषा दार्वाश्चोलाः सकेरलाः ।।' इति ।

बौधायनसूत्रेऽपि—

'ते च क्षात्रधर्मपरित्यागान्म्लेच्छत्वं ययुः ।' इति ।

म्लेच्छलक्षणं यथा प्रायश्चित्ततत्त्वे—

'गोमांसखादको यश्च विरुद्धं बहु भाषते ।
धर्माचारविहीनश्च म्लेच्छ इत्यभिधीयते ।।' इति ।

यवनो हि मुनिविशेष इत्यपि यत्र कुत्र कथितं लभ्यते । यथा तिथ्यादि-तत्त्वे—

'जातं दिनं दूषयते वसिष्ठश्चाष्टौ च गर्गो यवनो दशाहम् ।
जन्माख्यमासं किल भागुरिश्च व्रते विवाहे क्षुरकर्णवेधे ।।'

भट्टोत्पलः कथयति यद् वराहमिहिरेण यद्धि यवनमतमनूदितं तत्प्राचीन-यवनमतमेवं यद्धि तेन न दृष्टमिति । यथोक्तम्—

'तदेतज्ज्ञायते यथा वराहमिहिरेण पूर्वयवनाचार्यमतमेवोपन्यस्तमस्मा-भिस्तन्न दृष्टम् ।' इति ।

अनेन सिध्यति यद्यावनहोराशास्त्रं वराहकाले आसीत् किन्तु भट्टोत्पलकाले तन्नोपलभ्यमासीत् । तदस्तित्वं स्फुजिध्वज(यवनेश्वर)वचनादपि ज्ञायते । यथोक्तं तत्र—

'यवना ऊचुः—ये सङ्ग्रहे दिग्जनजातिभेदाः प्रोक्ताः पुराणैः क्रमशो ग्रहस्य' इति ।

यावनं हि शास्त्रं सुविस्तृतं बहुविषयश्चासीत् ।

माणित्थहोराशास्त्रम्

मणित्थाचार्यः कः, कदाऽऽसीदित्यपि ज्ञानाविषय एवास्माकम् । वराहा-चार्यस्तं—'मययवनमणित्थशक्तिपूर्वैः' इति श्लोके (७।१) स्मरति । भट्टो-त्पलस्तस्य शास्त्रमनुवदति । यथा—

'तथा च मणित्थः—

नवरूपाः शरयमलास्तिथयोऽर्काः पञ्चरूपकाः क्रमशः ।
रूपयमाकृतिसङ्ख्याः सूर्यादीनां स्वतुङ्गभेष्वब्दाः ।।

नीचेष्वस्माद् बलमन्यत्रानुपाततः कार्यम् ।
आयुर्दायविधानं होराभक्तांशराशितुल्यमपि ॥' इति ।

एतदतिरिक्तं मणित्थविषये न वयं ज्ञातारः । भट्टोत्पलसमये मणित्थहोराशास्त्रं समग्रमेवासीद्वा खण्डितं वा भट्टोत्पलेनापि क्वचिदनूदितं प्रत्युदितमात्रमित्यपि नास्माकं ज्ञातम् । वराहाचार्यस्तु मणित्थमतमनूद्य दूषयतीति तदा तस्य प्रचलनमासीदेव ।

जैवहोराशास्त्रम्

जीवशर्मणोऽपि होराशास्त्रमासीदिति वराहमिहिरस्य 'स्वमतेन किलाऽऽह जीवशर्मा' (७।९) इति कथनात् सिध्यति । तस्याप्यैतिह्यं नास्माकं ज्ञातम् । भट्टोत्पलोऽपि जीवशर्मवाक्यमुद्धरति । यथा—'तथा च जीवशर्मा—

सप्तदशैको द्वियमौ वसवो वेदाग्नयो ग्रहेन्द्राणाम् ।
वर्षाऽप्युच्चस्थानां नीचस्थानामतोऽर्द्धं स्यात् ॥
मध्येऽनुपाततः स्यादानयनं शेषमत्र यत्किञ्चित् ।
पिण्डायुष इव कार्यं तत्सर्वं गणिततत्त्वज्ञैः ॥' इति ।

सत्यहोराशास्त्रम्

सत्याचार्यं वराहमिहिरो बहुशः स्मरति चान्यविरोधेनापि तमनुसरति च । यथा—

'एकोंऽशं हरति बली तथाऽऽह सत्यः ।' (बृह० ७।३)
'बहुसाम्यं समुपैति सत्यवाक्यम् ।' (७।९)
'सत्योपदेशो वरमत्र किन्तु ।' (९।१३)
'सत्योक्ते ग्रहमिष्टम्··· ···· ···· ···· ।' (९।१८)

भट्टोत्पलोऽपि सत्यवाक्यान्युद्धरति । यथा—
'राश्यंशकसंयोगादायुरिह समासतो ग्रहा दद्युः' । इति ।

विष्णुगुप्तहोराशास्त्रम्

एवमेव वराहमिहिरो विष्णुगुप्तं स्मरति । यथा—
'आयुर्दायं विष्णुगुप्तोऽपि चैवं देवस्वामी सिद्धसेनश्च चक्रे ।' इति । (७।७)
भट्टोत्पलश्च विष्णुगुप्तवाक्यमुद्धरति । यथा—
'यथा च विष्णुगुप्तः—

परमोच्चगतैः सर्वैर्मीने मीनांशसंस्थिते ।
सौम्ये च वृषगे जातः परमायुः स जीवति ॥' इति ।

स हि विष्णुगुप्तं चाणक्यापरनामकं मन्यते । चाणक्यो हि चन्द्रगुप्तगुरुः परमप्रसिद्धः ।

देवस्वामीहोराशास्त्रम्

वराहमिहिरो देवस्वामिनं स्मरति आयुर्दायप्रकरणे। भट्टोत्पलश्च देवस्वामिवाक्यमुद्धरति। यथा—

'यथा च देवस्वामी—

सूर्याद्यैरुच्चगते मीने मीनांशसंस्थिते लग्ने।
सौम्ये वृषभं याते जातः परमायुराप्नोति॥' इति।

देवस्वामी ज्योतिर्विद् विष्णुगुप्तस्य सतीर्थ्यो मित्रञ्चेति मुद्राराक्षसतो ज्ञायते।

सिद्धसेनहोराशास्त्रम्

'सिद्धसेनोऽपि होराचार्यत्वेन वराहमिहिरेण स्मृतः (वृह० ७।७)। भट्टोत्पलस्तद्वाक्यमुद्धरति। यथा—

'यथा च सिद्धसेनः—

मीने परमांशगते सौम्ये गवि पञ्चवर्गलिप्तास्ये।
सर्वैः परमोच्चगतैर्जातः परमायुराप्नोति॥' इति।

यवनेश्वरहोराशास्त्रम्

यद्यपि वराहमिहिरो न स्पष्टं यवनेश्वरस्फुजिध्वजं स्मरति तथापि कल्याणवर्मा भट्टोत्पलश्च तमसकृत्स्मरन्ति तत्कृतशास्त्रञ्च। यथा सारावल्याम्—

'अत एव विस्तरेभ्यो यवननरेन्द्रादिरचितशास्त्रेभ्यः।
सकलमसारं त्यक्त्वा तेभ्यः सारं समुद्ध्रियते॥' (१।४)

भट्टोत्पलस्तु तद्वाक्यमप्युद्धरति वृहज्जातकटीकायाम्। यथा वदति सः—

''अत्राचार्येण परमतमेवोपन्यस्तं 'मययवनमणित्थशक्तिपूर्वैः' इति। न च यवनेश्वरकृते शास्त्रे तथाऽऽयुर्दायो दृष्टः। यस्माद्यवनेश्वरेणोक्तम्—'आयूंषि राश्यंशकराशियोगात्' इति। अत्रोच्यते। यवनेश्वरेण स्फुजिध्वजेनान्यच्छास्त्रं कृतम्। तथा च स्फुजिध्वजः—

गतेन साभ्यर्धशतेन युक्ताप्येकेन केषां न गताब्दसङ्ख्या।
कालः शकानां सविशोध्य तस्मादतीतवर्षाद्युगवर्षजातम्॥'' इति।

एवं स्फुजिध्वजकृतं शककालस्यार्वाग्ज्ञायते। अन्यच्च यवनाचार्यैः पूर्वैः कृतमिति तदर्थं स्फुजिध्वजोऽप्याह—

'यवना ऊचुः—ये सङ्ग्रहे दिग्जनजातिभेदाः प्रोक्ता पुराणैः क्रमशो ग्रहस्य। तदेतज्ज्ञायते यथा वराहेण पूर्वयवनाचार्यमतमेवोपन्यस्तमस्माभिस्तन्न दृष्टम्। स्फुजिध्वजकृतमेव दृष्ट्वा······।'

अनेनैतत्सिध्यति यत्स्फुजिध्वज एव कल्याणवर्मस्मृतो यवनेश्वरः वराहस्मृतपूर्वयवनाचार्याद्भिन्नः शकोदयानन्तरजात इति। सम्भवति तस्य स्थितिकालः १४४ मितशकाब्दमभितः।

बादरायणहोराशास्त्रम्

यद्यपि वराहाचार्यो बादरायणं तत्कृतशास्त्रञ्च न तथा स्मरति तथापि भट्टोत्पलस्तु न केवलं तं स्मरत्यपितु तद्वाक्यमप्युद्धरति बृहज्जातकटीकायाम्। यथा—

'अत्र च व्याख्याने परमग्रहदायसाध्यमानेन वर्षाणि भवन्ति। एतच्च व्याख्यानं बादरायणादिभिरङ्गीकृतम्। तथा च बादरायणः—

'राश्यंशकलागुणिता द्वादशनवभिर्ग्रहस्य भगणेभ्यः।
द्वादशहृतावशेषेन्दमासदिननाडिकाः क्रमशः॥' इति।

एते हि सर्वेऽपि ग्रन्थाः सम्प्रति विलुप्ता इति किमतः परं कष्टकरमस्माकम्।

जैमिनिसूत्रम्

जैमिनिसूत्रं हि सम्प्रत्यपि समुपलभ्यते। गद्यात्मकसूत्ररूपे ग्रन्थेऽस्मिन् सन्ति चत्वारोऽध्यायाः। 'उपदेशं व्याख्यास्यामः' इत्यस्य प्रथमं सूत्रम् अन्तर्भुक्त्यंशयोरेत'दिति चरमम्। अत्र हि राहुकेत्वोरुल्लेखः रिःफआरप्रभृतिशब्दप्रयोगश्च ग्रन्थस्यास्यार्षत्वे बाधकाः। वराहकल्याणभट्टोत्पलप्रभृतयो ग्रन्थमेतं न स्मरन्ति ज्योतिषशास्त्रप्रवर्तकेष्वस्य मुनेर्नामाऽपि नास्ति। किन्त्वस्य शैली सूत्रमयी प्राचीना। ग्रन्थोऽयं शकोदयकालमभितः प्रणीतः सम्भवति। अस्य सन्ति बह्वचष्टीकाः। अस्य हि मलावारारिदाक्षिणात्यप्रदेशे प्रचारः।

ध्रुवनाडीग्रन्थः

ध्रुवनाडीग्रन्थो हि वराहस्मृतसत्याचार्यप्रणीत इति विश्वस्यते। प्रायः कथ्यन्ते दशाधिकनाडीग्रन्थाः, येषु प्रस्तुतः सर्वातिशायीति शङ्करबालकृष्णसाक्ष्येण ज्ञायते। ग्रन्थोऽयमपि भृगुसंहितावत्सुविस्तृतः। अस्य सन्ति प्रायः सप्ततिभागाः श्रुताः। ग्रन्थेऽस्मिन्नपि सर्वविधा एव जन्मकुण्डल्यो लभ्यन्ते इति जनश्रुतिः।

बृहज्जातकम्

भारतीयं हि ज्योतिषशास्त्रं शास्त्रान्तरवत् प्रवचनव्याख्यानसङ्क्षेपणेति त्रिविधक्रमतो विनिर्गतम्। यथा वराहमिहिराचार्यः कथयति—

'भूयोभिः पटुबुद्धिभिः पटुधियां होराफलज्ञप्तये
शब्दन्यायसमन्वितेषु बहुशः शास्त्रेषु दृष्टेष्वपि।

होरातन्त्रमहार्णवप्रतरणे भग्नोद्यमानामहं
स्वल्पं वृत्तिविचित्रमर्थबहुलं शास्त्रप्लवं प्रारभे ॥' इति । (१।२)

वस्तुतस्तु बृहज्जातकं हि शास्त्रप्लव एव । असौ हि पौरुषेयजातकग्रन्थेषु प्रथमः । ग्रन्थवरेऽस्मिन् सन्ति सप्तविंशत्यध्याया उपसंहाराध्यायश्चाष्टाविंशः । तत्र निरूपितविषया यथा उपसंहाराध्याये—

'राशिप्रभेदो ग्रहयोनिभेदो वियोनिजन्माऽथ निषेककालः ।
जन्माऽथ सद्यो मरणं तथाऽऽयुर्दशाविपाकोऽष्टकवर्गसंज्ञः ॥
कर्माजीवो राजयोगाः खयोगाश्चन्द्रायोगा द्विग्रहाद्याश्च योगाः ।
प्रव्रज्याऽथो राशिशीलानि दृष्टिर्भावस्तस्मादाश्रयोऽथ प्रकीर्णः ॥
नेष्टा योगा जातकं कामिनीनां निर्याणं स्यान्नष्टजन्मदृकाणः ।
अध्यायानां विंशतिः पञ्चयुक्ता जन्मन्येतद्यात्रिकं चाभिधास्ये ॥
प्रश्नास्तिथिर्भं दिवसः क्षणश्च चन्द्रो विलग्नं त्वथ लग्नभेदः ।
शुद्धिर्ग्रहाणामथ चापवादो विमिश्रकाऽऽख्यं तनुवेपनञ्च ॥
अतःपरं गुह्यकपूजनं स्यात् स्वप्नं ततः स्नानविधिः प्रदिष्टः ।
यज्ञो ग्रहाणामथ निर्गमश्च क्रमाच्च दिष्टः शकुनोपदेशः ॥
विवाहकालः करणं ग्रहाणां प्रोक्तं पृथक्तद्विपुलाश्च शाखाः ।
स्कन्धैस्त्रिभिर्ज्योतिषसङ्ग्रहोऽयं मया कृतो वेदविदां हिताय ॥' इति ।

ग्रन्थान्ते प्रोक्तम्—

'पृथुविरचितमन्यैः शास्त्रमेतत्समस्तं
तदनु लघु मयेदं तत्प्रदेशार्थमेव ।
कृतमिह हि समर्थं धीविषाणामलत्वे
मम यदिह यदुक्तं सज्जनैः क्षम्यतां तत् ॥' इति । (२८।१-७)

विषयस्य सङ्क्षिप्ततया स्पष्टतया च प्रस्तुतिः सरलत्वं किन्तु काव्यात्मकत्वं समग्रत्वञ्च वराहमिहिरस्य कृतेर्वैशिष्टयानि । निभाल्यतामस्य सङ्घटनावैचित्र्यं यथा—

'कालात्मा दिनकृन्मनस्तुहिनगुः सत्त्वं कुजो ज्ञो वचो
जीवो ज्ञानसुखे सितश्च मदनो दुःखं दिनेशात्मजश्च ।
राजानो रविशीतगू क्षितिसुतो नेता कुमारो बुधः
सूरिर्दानवपूजितश्च सचिवौ प्रेष्यः सहंस्रांशुजः ॥' (२।१)

ग्रहाणां वर्णनिरूपणं यथा—

'रक्तश्यामो भास्करो गौर इन्दुर्नात्युच्चाङ्गो रक्तगौरश्च वक्रः ।
दूर्वाश्यामो ज्ञो गुरुर्गौरगात्रः श्यामः शुक्रो भास्करिः कृष्णदेहा ॥' (२।४)

अभिव्यक्तेः सौष्ठवं यथा—

'सत्योपदेशो वरमत्र किन्तु कुर्वन्त्ययोग्यं बहुवर्गणाभिः ।
आचार्यकत्वञ्च बहुघ्नताया येकं तु यद्भूरि तदेव कार्यम् ॥' (७।१३)

ग्रन्थस्यास्य सन्ति बह्वचष्टीकाग्रन्थाः, यासु भट्टोत्पलस्य विवृतिः प्रामाणिकी प्राचीना च । अस्यैव बलभद्रमहीदासमहीधरादिभिरपि टीकाग्रन्थाः प्रणीताः सन्ति । अस्य हि सुबोधिनीटीकाऽपि स्मर्यते । एतदतिरिक्तमपि सन्त्यन्येऽपि टीकाग्रन्था अस्य ।

लघुजातकम्

लघुजातकं वराहमिहिरस्यैव कृतिर्बृहज्जातकस्य सारसङ्क्षेपः । यथोक्तं तत्र—

'होराशास्त्रं वृत्तैर्मया निबद्धं निरीक्ष्य शास्त्राणि ।
यत्तस्याप्यार्याभिः सारमहं सम्प्रवक्ष्याभिः ॥' (१।२)

ग्रन्थप्रयोजनं यथा—

'यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम् ।
व्यञ्जयति शास्त्रमेतत्तमसि द्रव्याणि दीप इव' ॥ ३ ॥

अत्र राशिप्रभेदः, ग्रहभेदः, ग्रहमैत्रीविवेकः, ग्रहस्वरूपं, गर्भाधानादि सूतिकाप्रकरणम्, अरिष्टविचारः, अरिष्टभङ्गः, आयुर्दायः, दशान्तर्दशा, अष्टकवर्गः, प्रकीर्णकविषयाः, राशिशीलनिरूपणम्, आश्रययोगः, स्त्रीजातकं निर्याणं नष्टजातकञ्चेति निरूपितविषयाः ।

लघुजातकस्य हि भट्टोत्पलप्रणीता टीका प्रसिद्धा । गणेशदैवज्ञानुजस्यानन्तदैवज्ञस्यापि टीकाऽस्य लभ्यते १४५६ शकाब्दे प्रणीता ।

स्वल्पजातकम्

वराहमिहिरस्य स्वल्पजातकमपि भट्टोत्पलः स्मरति किन्तु तत्तदैवालभ्यमासीदिति स एव सूचयति । 'इदमाचार्यवराहमिहिरेण विनष्टे एव **स्वल्पजातकेऽ**भिहितम्' इति (बृह० ७।९ टीकायाम्) । सम्भवति ग्रन्थोऽयं लघुजातकस्याऽपि सारसंक्षेपः स्यात् ।

षट्पञ्चाशिका

षट्पञ्चाशिका हि वराहमिहिरात्मजस्य पृथुयशसः कृतिः । सन्त्यत्र सप्ताध्यायाः—होरा-गमागम-जयपराजय-शुभाशुभ-प्रवासचिन्ता-नष्टप्राप्ति-मिश्रिकाऽऽख्याः । ग्रन्थोऽयं षट्पञ्चाशच्छ्लोकैर्निबद्धः (७ + १४ + ५ + ५ + ५ + ४ + १३ = ५३ + ३ = ५६) । अस्य वर्णनावैशिष्टचं प्रभावोत्पादकं सारविशिष्टञ्च । दिङ्मात्रमुदाहरणं यथा—

'स्वांशे विलग्ने यदि वा त्रिकोणे स्वांशे स्थितः पश्यति धातुचिन्ताम् ।
परांशकस्थश्च करोति जीवं मूलं परांशोपनतः परांशम् ॥' इति । (११६)

अस्यापि भट्टोत्पलेन व्याख्याग्रन्थः प्रणीतोऽस्ति । पृथुयशसः समयः ४६० मितशकाब्दमभितः ।

जातकसारः

जातकसाराऽऽख्यः कश्चित् प्राचीनो ग्रन्थः सारस्वतसुषमायां (२०३१ वै०) मुरलीधरचतुर्वेदेन सम्पाद्य प्रकाशितो दृश्यतेऽज्ञातकर्तृकत्वेन । ग्रन्थोऽयमुमा-महेश्वरसंवादरूपः । प्रमाणान्तराभावेन वयमिमं ग्रन्थं लल्लाचार्यप्रणीतत्वेन गृह्णीमः । तत्रेयं युक्तिः—

"एतत्तु ज्ञातमेव यल्लल्लाचार्येण धीवृद्धिदतन्त्रातिरिक्तमपि संहिताहोरा-ग्रन्थेऽपि प्रणीते आसन् । लल्लस्य संहिताग्रन्थं मुहूर्तचिन्तामणेर्गोविन्दप्रणीत-पीयूषधाराटीकायां समर्थ्यते कथनेनानेन—

यथाऽऽह लल्लः—

'वारर्क्षतिथियोगेषु यात्रायां विवर्जयेत् ।
विवाहादीनि कुर्वीत गर्गादीनामिदं वचः ॥' इति ।

तथैव जातकसारे नृसिंहविपश्चिद् होराशास्त्रप्रणेतृत्वेन वसिष्ठगर्गात्रिपराशर-वराहलल्लाद्याचार्यान् स्मरति कथयति च तेषां ग्रन्थे क्रममाधृत्य फलादेशो नोक्त इति । स एव नृसिंहस्मृत एव ग्रन्थोऽयं सम्भवति इति ।"

राहुकेत्वोरपि स्वगृहनिर्देशोऽस्य वैलक्षण्येष्वन्यतमपक्षः लघुविग्रहोऽपि ग्रन्थः स्वविषये मननीयः ।

सारावली

सारावली कल्याणवर्मणः कृतिः । ग्रन्थोऽयं चतुःपञ्चाशदध्यायेषु गुम्फितः । अत्र हि राशि-कालपुरुष-ग्रह-वरिश-आधान-ग्रहजलज्ञान-अरिष्टनाश-ग्रहयुतिफल-भाग्यभावविचार-राजयोग-दशान्तर्दशा-वियोनिजन्म-प्रस्तारचक्रादिविषया निरू-पिताः । ग्रन्थोपक्रमो यथा—

'विस्तरकृतानि मुनिभिः परिहृत्य पुरातनानि शास्त्राणि ।
होरातन्त्रं रचितं वराहमिहिरेण सङ्क्षेपात् ॥
राशिदशवर्गभूपतियोगायुर्दायतो दशादीनाम् ।
विषयविभागं स्पष्टं कर्तुं न तु शक्यते यतस्तेन ॥
अत एव विस्तरेभ्यो यवननरेन्द्रादिरचितशास्त्रेभ्यः ।
सकलमसारं त्यक्त्वा तेभ्यः सारं समुद्ध्रियते ॥'

अवसानपद्यं यथा—

'इत्थं होराशास्त्रं रचितं कल्याणकोविदेनैव ।
पूर्वाचार्यनिर्मितमवलोक्य मुदं प्रयातु दैवज्ञः ॥
पोलिशवसिष्ठरोमशयवनवादरायणाः शक्तिः ।
अत्रिश्च भरद्वाजो विश्वामित्रो गुणाग्निकेशौ च ॥
गर्गपराशरजीवा एतैरन्यैश्च विस्तरं रचितम् ।
कथयति शास्त्रे पूर्वतं जातकमिति चित्रगुप्तकृतम् ।।'(५४।१०१२)

कल्याणवर्मा हि स्वं व्याघ्रपदीश्वरं कथयति । कल्याणवर्मा वराहमिहिरं स्मरति भट्टोत्पलश्च सारावलीं स्मरतीति कल्याणवर्मणः तदुभयान्तरालवर्तिसमयः स्थितिकाल इति तस्य समयः ५५० मितशकाब्दमभितोऽनुमितः । शङ्करबालकृष्णो हि भट्टोत्पलेन सारावल्युद्धृतवचनानां सम्प्रत्युपलब्ध सारावल्यामभावाद् भट्टोत्पलज्ञातसारावली एतद्भिन्नैवेति समनुमाति । वयन्तथा न मन्यामहे पाठादिभेदादपि तथासम्भवात् । अधिकतरश्लोका भट्टोत्पलोद्धृताः साम्प्रतिकसारावल्यां लभ्यन्ते एव । यथा भट्टोत्पलेन समुद्धृतम् अंशोद्भवं 'विलग्नात्–' इति पद्यं सारावल्याम् एकोनचत्वारिंशदध्यायस्य द्वितीयं पद्यम् । एवमेवान्यविषयेऽपि ।

कल्याणवर्मणः कथनेनैतज्ज्ञायते यद्वराहमिहिराचार्येण मुनिप्रणीतग्रन्थानां सारसङ्क्षेपः कृत आसीद् बृहज्जातके यदा कल्याणवर्मणा यवनेश्वरादिप्रणीतग्रन्थानां सारसङ्क्षेपो गृहीत इति । (१।२-४) ग्रन्थस्य प्रयोजनमादाय तत्रोक्तम्—

'राशिदशवर्गभूपतियोगायुर्दायतो दशादीनाम् ।
विषयविभागं स्पष्टं कर्तुं न तु शक्यते यतस्तेन ॥'

अत एव तत्पूर्त्यै ग्रन्थोऽयं प्रणीत इति । प्रतिज्ञानुसारमेव ग्रन्थोऽयं प्रणीतोऽपि । वस्तुतोऽसौ स्वविषयेऽप्रतिमः । कथ्यते हि कल्याणवर्मा सारावलीमपूर्णमिव त्यक्त्वा पञ्चत्वमाप । तस्या अवशिष्टभागो भट्टोत्पलेन पूरित इति । यथोद्धृतं सुधाकरेण—

'वर्षशतानां मध्ये न केनचित् पूरिता युता चीनैः ।
भट्टोत्पलस्तु पूर्णां चकार सारावलीं सकलाम् ॥' इति ।

किन्तु ग्रन्थावलोकनेन न तथा प्रतिभाति । अत्र हि मन्दिलाचार्यः देवकीर्तिराजः (३७।१) कनकाचार्यश्च स्मृता आचार्यत्वेन वराहास्मृताः ।

कल्याणवर्मणो विषयचयनं प्रस्तुतिसौष्ठवं स्पष्टता च वैशिष्टचानि । वस्तुतस्त्वयं होरातृष्णार्तानां स्फुटतरार्थशिशिरजल एव । दिङ्मात्रमुदाहरणं यथा—

'आद्यन्तवर्णलोपाद्धोराशास्त्रं भवत्यहोरात्रम् ।
तत्प्रतिबद्धश्चायं ग्रहभगणाश्चिन्त्यते यस्मात् ॥
कर्मफललाभहेतुं चतुराः संवर्णयन्त्यन्ये ।
होरेति शास्त्रसंज्ञा लग्नस्य तथार्द्धरात्रेश्च ॥
जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा ।
अथवा देवविमर्शनपर्यायः खल्वयं शब्दः ॥' इति ।

विषयप्रस्तुतिर्यथा—

'जातो न जीवति नरो मातुरपथ्यो भवेत् स्वकुलहन्ता ।
यदि जीवति गण्डान्ते बहुगजतुरगो भवेद् भूपः ॥' इत्यादि ।

प्रश्नज्ञानम्

प्रश्नज्ञानं हि भट्टोत्पलस्य कृतिः । अस्य हि अन्येऽपि ग्रन्था आसन्निति एतत्कृतवृहज्जातकलघुजातकषट्पञ्चाशिकादिग्रन्थटीकाविलोकनतो ज्ञायते । षट्पञ्चाशिकायाः ७।१३ श्लोकव्याख्यानावसरे सः—

'तथा चास्मदीय**प्रश्नज्ञाने**—

मेषवृषकुम्भमीना ह्रस्वा युगकर्किचापधरमकराः ।
मध्या हरियुवतितुलादयः स्मृताः दीर्घा ॥'

इति स्मरति । ग्रन्थोऽयं—

'रविशशिकुजबुधगुरुसितरविजगणेशान् प्रणम्य भक्त्यादौ ।
वक्ष्येऽहं स्पष्टतरं प्रश्नज्ञानं हिताय देवहिताम् ॥'

इति कथनतः प्रारब्धः, समापितश्च—

'भट्टोत्पलेन शिष्यानुकम्पयावलोक्य सर्वशास्त्राणि ।
आर्यासप्तत्यैवं प्रश्नज्ञानं समासतो रचितम् ॥'

इति कथनेन । अस्य प्रणयनञ्च ८९० मितशकाब्दमभितः । ग्रन्थोऽयं बृहज्जातकटीकाप्रणयनादर्वागेव प्रणीत इति तस्य षट्पञ्चाशिकाटीकायामेव प्रश्नज्ञानस्मरणाज्ज्ञायते । बृहज्जातकटीका तु ८८८ मितशकाब्दे सम्पन्नेति—

'फाल्गुनस्य द्वितीयायामसितायां गुरोर्दिने ।
वस्वष्टाष्टमिते शाके कृतेयं विवृतिर्मया ॥'

बृहज्जातकटीकान्तवाक्याज्ज्ञायते । भट्टोत्पलस्य खण्डखाद्यटीकायां ग्रन्थोऽयं स्मृतो न वेति न वयं जानीमो ग्रन्थादर्शनात् ।

श्रीपतिजातकपद्धतिः

जातकपद्धतिरसौ रत्नमालाग्रन्थस्य प्रणेत्रा श्रीपतिना प्रणीत इत्यनुमीयते । अस्यापि रत्नमालाया इव माधवेन टीका प्रणीता । श्रीपतेः स्थितिकालः ९२१

मितशकाब्दमभितः स्थितिमानित्यनुमितः। श्रीपतिर्हि गर्गसंहितां स्मरति विशेषेण वराहं लल्लाचार्यश्च। कथ्यते ह्यस्य ज्योतिषस्य त्रिष्वेव स्कन्धेषु ग्रन्था आसन्निति। अस्य धीकोटिसंज्ञके करणग्रन्थे करणकालः ९६१ मितशकाब्दो गृहीत इति ग्रन्थस्यास्य तत्समकाल एव प्रणयनकाल इति तज्ज्ञाः।

वृद्धजातकम्

माधवाचार्यः (११८५ श०) रत्नमालाटीकायां वृद्धजातकं स्मरति। एतदधिकं तद्विषये न किमपि ज्ञातमस्माकम्।

श्रीधरपद्धतिः, महालुगिपद्धतिः, दामोदरपद्धतिः, रामकृष्णपद्धतिः, केशवपद्धतिः, बल्लयुपद्धतिः, होरामकरन्दः, लघुपद्धतिः।

ग्रन्था इमे केशवीयजातकपद्धतिटीकायां स्मृताः। तत्राद्याश्चत्वारस्तु विश्वनाथ्यामपि। तेन हीमे १४०० मितशकाब्दप्राग्वर्तिनः। इतोऽधिकं न किमपि ज्ञातमस्माभिरेतद्विषये।

भावनिर्णयः

विद्यारण्यप्रणीतत्वेन ग्रन्थोऽयं प्रसिद्धः। अत्र हि भावफलमादिष्टं भवेदिति अनुमामहे।

सर्वार्थचिन्तामणिः

सर्वार्थचिन्तामणिर्हि वेङ्कटाद्रिदैवज्ञप्रणीतो ग्रन्थः। असौ हि जातकपारिजातप्रणेतुर्वैद्यनाथस्य पिता। तेनास्य स्थितिकालः १२५० मितशकाब्दमभितः। वैद्यनाथो हि जातकपारिजाते सर्वार्थचिन्तामणेर्मूलश्लोकानेवानुवदति।

जातकपारिजातः

जातकपारिजातो हि केशवीयजातकस्य प्रणेतुः केशवस्य गुरुणा वैद्यनाथेन प्रणीतः। असौ हि सर्वार्थचिन्तामणिप्रणेतुर्वेङ्कटाद्रेः सुतः। तेनास्य स्थितिकालः १३०० मितशकाब्दमभितः। ग्रन्थादौ प्रोक्तं—

'भारद्वाजकुलोद्भवस्य विदुषः श्रीवेङ्कटाद्रेरिह
ज्योतिश्शास्त्रविशारदस्य तनयः श्रीवैद्यनाथः सुधीः।
होरासारसुधारसज्ञविबुधश्रेणीमनःप्रीतये
राशिस्थाननिरूपणादिसकलं वक्ष्ये यथानुक्रमम् ॥' इति।

ग्रन्थोऽयं पद्धतिविषये गर्गपराशरादिप्रणीतग्रन्थाननुसरतीति तत्रोक्तम् (१।१)। ग्रन्थान्ते प्रोक्तम्—

'श्रीविद्याधिकवेङ्कटाद्रितनयः श्रीवैद्यनाथः सुधी-
रादित्यादिसमस्तखेटकृपया विद्वज्जनप्रीतये।

होरासिन्धुसमुद्धृतामृतमयीमष्टादशाध्यायिनीं
चक्रे जातकपारिजातसरणिं गीतोत्सुकश्लोकिनीम् ।।' इति ।

विषयाश्चात्र राशिशीलग्रहगतिस्थानस्वभावाकृति-आधान-कालारिष्टआयुर्दाय-जातकभङ्गराजयोग-ग्रहयोग-अष्टकवर्ग-भावफल-नारीजातकादयः । ग्रन्थेऽस्मिन् कपिलेश्वरस्य सुधाशालिनी टीका प्रसिद्धा ।

केशवीयजातकपद्धतिः

नन्दिग्रामवास्तव्येन केशवाऽऽख्येन दैवज्ञवरेण प्रणीतो ग्रन्थोऽयं लघुरपि बहुप्रचारः । अत्रोक्तम्—

'नन्दिग्रामे केशवो विप्रवर्यो योऽभूद्धोराशास्त्रसङ्घं विलोक्य ।
तेनोक्तेयं पद्धतिर्जातकीया चत्वारिंशद्वृत्तबद्धा सुबोधा ।।' इति ।

अनेन ज्ञायते यदत्र सन्ति चत्वारिंशच्छ्लोका एव । यद्यपि श्लोकोऽयं प्रक्षिप्त इति स्पष्टमेव तथापि कथनमस्य सत्यम् ।

ग्रन्थेऽस्मिन् भावसाधनभावसन्ध्यानयनायनादिबलसाधनचेष्टाबलेष्टकष्टदशान्तर्दशाऽष्टकवर्गादिविषयाः सारतो निरूपिताः । ग्रन्थेऽस्मिन् केशवस्यैव विश्वनाथस्य नारायणस्य दिवाकरस्य च सन्ति टीकाग्रन्थाः । दृश्यन्तेऽस्य बहूनि संस्करणानि । प्रणेतुरस्य समयः १४१० मितशकाब्दमभितः ।

जातकाभरणम्

जातकाभरणं हि ढुण्ढिराजेन १४६० मितशकाब्दमभितः प्रणीतम् । यथोक्तं तत्र—

'उदारधीमन्दरभूधरेण प्रमथ्य होरागमसिन्धुराजम् ।
श्रीढुण्ढिराजः कुरुते किलार्यामार्यासपर्याममलोक्तिरत्नैः ।।' इति ।

असौ हि ज्ञानराजशिष्य आसीत् नृसिंहाख्यसुतश्च । यथोक्तम्—

'गोदावरीतीरविराजमानं पार्थाभिधानं पुटभेदनं यत् ।
सद्गोलविद्यामलकीर्तिभाजां यत्पूर्वजानां वसतिस्थले यत् ।।
तत्रत्यदैवज्ञनृसिंहसूनुर्गजाननाराधनजाभिमानः ।
श्रीढुण्ढिराजो रचयाम्बभूव होरागमानुक्रममादरेण ।।' इति ।

ग्रन्थेऽस्मिन् रूपनारायणेन मैथिलेन परिशिष्टभागं संयोज्यास्योपयोगिता प्रवर्द्धिताऽस्ति ।

ग्रन्थेऽस्मिन् सर्वोऽपि फलितविषयः क्रमानुसारेण विवेचितो येनादेष्टॄणां प्रियतमोऽयं ग्रन्थः । अत्र संवत्सरादिफलं ग्रहस्वरूपं भावविचारः अरिष्टविचारः गोचरफलाध्यायः भावफलाध्यायः ग्रहयोगाः राजयोगाः दशाफलं नष्टजातकं निर्याणं स्त्रीजातकं चेत्यादिविषया यथाक्रमं निरूपिताः । सरलता स्पष्टता-

चास्य वैशिष्टये यतः सर्वसाधारणोपयोगित्वमस्य सिद्धमेव । नास्य काऽपि प्राचीना टीका दृश्यते वा श्रूयते । लब्धबहुप्रसारस्यास्य ग्रन्थसङ्ख्याश्लोकसहस्रद्वयासन्नेति सुधाकरः ।

अनन्तजातकपद्धतिः

ग्रन्थोऽयमनन्तदैवज्ञप्रणीतः । स हि मुहूर्तचिन्तामणिप्रणेतुः रामदैवज्ञस्य पितेति तस्य स्थितिकालः १४५० मितशकाब्दमभितः ।

जातकोत्तमः

मुहूर्तमार्तण्डटीकायां ग्रन्थोऽयं स्मृतः ।

जातकोत्तमः

ग्रन्थोऽयं शिवदासदैवज्ञप्रणीतत्वेन केशवीयजातकपद्धतेष्टीकायां विश्वनाथेन स्मृतः ।

जातकादेशः

गुणाकराख्यस्य विदुषो जातकादेशः सर्वत्र ख्यातः । विश्वनाथेन होरास्कन्धनिरूपणेऽसौ स्मृतः ।

होरास्कन्धनिरूपणम्

अनन्तपौत्रेण रामसुतेन वीरसिंहाश्रितेन विश्वनाथेन होरास्कन्धनिरूपणाख्यः सुविस्तृतो ग्रन्थः प्रणीतः । अस्य प्रणयनकालः १५०० मितशकाब्दमभितोऽनुमितः । अत्र हि जातकाभरण-शौनकसंहिता-जातकादेश-समुद्रजातक-होराप्रदीप-जन्मप्रदीपप्रभृतिग्रन्थाः स्मृताः ।

जातकसारः

नृहरिदैवज्ञेन प्रणीतोऽयं ग्रन्थः प्रसिद्धः । ग्रन्थोऽयं स्वरूपेण विषयप्रस्तुत्या च सुविस्तृतः । असौ सारावलीमनुसरति स्वसिद्धये ।

जातकालङ्कारः

गणेशदैवज्ञप्रणीतोऽयं ग्रन्थो लघुरपि विस्तृतप्रसरः । सन्त्यत्र षडध्यायाः—संज्ञाभावयोगविषकन्याऽऽयुर्दायव्यत्ययस्थभावफलसंज्ञिताः । प्रणेताऽस्य शिवदासशिष्यो गोपालपुत्रः । असौ हि १५३५ मितशकाब्दमभितः प्रणीतः । अस्य हरभानुप्रणीता टीका लभ्यते । ग्रन्थोऽसौ काव्यमिव सर्वत्र सौश्लोक्येनापि पठ्यते । यथा—

'यावन्तो वा विहङ्गा मदनसदनगाश्चेन्निजाधीशदृष्टाः
तावन्तो वा विवाहास्त्वथ सुमतिमता ज्ञेयमित्थं कुटुम्बे ।
कार्यो होरागमज्ञैरधिकबलवतां खेचराणां हि योगा-
दादेश्यं तत्र वीर्यं रविविधुकुभुवामङ्गदिक्शैलसङ्ख्याम् ॥'

पद्मजातकम्

ग्रन्थोऽयं १५४७ मितशकाब्दमभितो दिवाकराख्येन दैवज्ञेन प्रणीतः। सन्त्यत्र १०४ श्लोकाः ।

पद्धतिभूषणम्

ग्रन्थोऽयं रुद्रभटात्मजेन सोमदैवज्ञेन जलदग्रामवासिना १५५९ मितशकाब्दे प्रणीतः । अस्य हि दिनकरप्रणीता टीकाऽपि लभ्यते ।

होरारत्नम्

सुविस्तृतो ग्रन्थोऽयं दामोदरसुतेन बलभद्रदैवज्ञेन १५५७ मितशकाब्दमभितः प्रणीतः । सन्त्यत्र सुविस्तृता दशाध्यायाः । ग्रन्थोऽयं स्वपूर्ववर्तिग्रन्थानामाकरोऽपि विषयोपस्थितौ मौलिकः । ग्रन्थान्ते उक्तमस्ति—

'वसिष्ठगर्गादिमुनिप्रणीतान् वराहकल्याणकृतान् निरीक्ष्य ।
सज्जातकाज्जन्मफलक्रमार्थं सुसम्प्रदायाद्रचितं मयेदम् ।।' इति ।

सन्त्यत्र नवत्यधिका ग्रन्थकाराः ग्रन्थाश्च स्मृतास्तत्र तत्र । अन्वर्थनामा ग्रन्थोऽयं होराविषयस्य विश्वकोश एव ।

होराकौस्तुभः

ग्रन्थोऽयं नरहरिसुतेन गोविन्दाख्येन विदुषा १६०० मितशकाब्दमभितः प्रणीतः । ग्रन्थेऽस्मिन्नपि पूर्ववर्तिग्रन्थेष्विव क्रमेण फलादेशो निरूपितः ।

होरासारसुधानिधिः

ग्रन्थोऽयं नारायणाऽऽख्येन विपश्चिता प्रणीतः । असावपि जातकविषयं सर्वमेव क्रमशो निरूपयति । अस्य १६०० मितशकाब्दमभितः प्रणयनकालः ।

प्रश्नमाणिक्यमाला

काशीराजाश्रितगणकेन परमानन्दपाठकेन १६७० मितशकाब्दमभितः प्रणीतोऽयं ग्रन्थः । अत्र सन्ति चत्वारो भागाः । सुविस्तृतोऽयं ग्रन्थोऽद्यावधिग्रन्थेषु सर्वोत्तम इति सुधाकरसाक्ष्येण ज्ञायते । ग्रन्थस्यास्य चतुर्थो भागस्तत्तनयेनोमापतिना पूरित इति जनश्रुतिः ।

पद्धतिचन्द्रिका

ग्रन्थोऽयं राघवाख्येन विदुषा प्रणीतः । ग्रन्थोऽयमपि सङ्ग्रहात्मक एव ।

साधनसुबोधः

ग्रन्थोऽयं काशीवासिना गोविन्दाचारिणा प्रणीतः १७८० मितशकाब्दमभितः । कथ्यते हि ग्रन्थोऽसौ स्वप्रकारे विशिष्टः ।

भावकुतूहलम्

ग्रन्थोऽयं १७८० मितशकाब्दमभितः शम्भुनाथात्मजेन नीलाम्बरानुजेन जीवनाथेन प्रणीतः । तत्रोक्तम्—

'आसीच्छ्रीकरुणाकरो बुधवरो वेदाङ्गविद्याकर-
स्तत्सूनुः क्षितिपालवन्दितपदः श्रीशम्भुनाथः कृती ।
विज्ञव्रातकृतादरो गणितविज्ज्योतिर्विदां प्रीतये
चक्रे भावकुतूहलं लघुतरं श्रीजीवनाथः सुधीः ॥' इति ।

ग्रन्थेऽस्मिन् सन्ति सप्तदशाऽध्यायाः । तत्र क्रमेण भावाध्यायः, अरिष्टाध्यायः, जातकाध्यायः, अरिष्टभङ्गयोगाः, सन्तानाध्यायः, राजयोगाः, सामुद्रिकाध्यायः, स्त्रीजातकाध्यायः, अवयवलक्षणाध्यायः, शयनादिद्वादशावस्थाविचारः, अवस्था-फलानि, भावविचारः ग्रहविचारश्चेतिप्रभृतिनिरूपितविषयाः । काव्यात्मकत्वं भावसौष्ठवञ्चास्य समुल्लेखनीयवैशिष्टयम् । यथा—

'गमनागमने भवतो गमने बहुधा वसुधा वसुधाधिपतेः ।
भवनञ्च विचित्रमलं रमया विदिनुश्च जनुः समये नितराम् ॥' इति ।

अनन्तफलदर्पणः

ग्रन्थोऽसौ १७९८ मितशकाब्दे अनन्ताचार्येण प्रणीतः । अत्र हि जातक-ताजिकोभयविषयः प्रपञ्चितः । कथ्यते हि ग्रन्थेऽस्मिन् कतिपये नवीना अपि फलादेशरीतयो निर्दिष्टाः ।

जातकादेशमार्गः

ग्रन्थोऽयं दाक्षिणात्यप्रदेशे बहुप्रचलितानां कतिपयफलितज्योतिषग्रन्थानां सारसङ्क्षेपः । ग्रन्थोऽयं केन कदा सङ्कलित इति तु नैव ज्ञातं किन्त्वेतावदेव निश्चितं यदसौ शकानन्तरपञ्चदशशतकात् प्रागेव प्राप्तस्वरूप इति । अत्र संज्ञा-निषेक-बालारिष्ट-आयुर्दाय-मरणयोग-अष्टकवर्ग-भावविचार-गोचरफल-दशापहा-रच्छिद्र-भार्याविचार-आनुकूल्य-पुत्रचिन्ता-सन्तानचिन्ता-मिश्रक-प्रभृतिसप्तदश-प्रकरणानि सन्ति । अस्य प्रतिज्ञावाक्यं यथा—

'गणेशादीन् नमस्कृत्य मया गुरुमुखाच्छ्रुतः ।
जातकादेशमार्गोऽयमविस्मर्तुं विलिख्यते ॥' इति । (११४)

फलितविचारः

ग्रन्थोऽयं बापूदेवशास्त्रिणा नृसिंहाख्येन १८०० मितशकाब्दमभितः प्रणीतः ।

एते हि कतिपय एव जातकग्रन्थाः समासतो निर्दिष्टाः । जातकग्रन्थानां विवरणं न हि कश्चिद् कात्स्न्र्येनोपस्थापयितुं प्रभवति । श्रूयन्तेऽनेके नवनवा ग्रन्था

उदीयमानाः प्राचीनाश्चाश्रुतपूर्वा जातकग्रन्थाः । आशास्यते भाविविपश्चितो विषयेऽस्मिन् पूर्णतामवाप्तुं प्रभविष्यन्तीति ।

ताजिकशास्त्रम्

यथा हि जातकं होराशास्त्रस्य प्रथमो भागस्तथैव ताजिकमस्यापरो भागः । किं तत्ताजिकमित्यपेक्षायामुच्यते ताजिकं नाम वार्षिकादिनानाविधफलादेशफलक-शास्त्रमेव । यथोक्तं हायनरत्ने—

'यवनाचार्येण पारसीकभाषायां प्रणीतं ज्योतिषशास्त्रैकदेशरूपं वार्षिका-दिनानाविधफलादेशफलकशास्त्रं ताजिकशब्दवाच्यं तदनन्तरभूतैः समरसिंहा-दिभिः.........ब्राह्मणैस्तदेव शास्त्रं संस्कृतशब्दोपनिबद्धं ताजिकशब्दवाच्यम् । अत एव तैस्ता एव इक्कबालादयो यावन्यः संज्ञा उपनिबद्धाः ।'

यथा वा ताजिकभूषणपद्धतौ—

'गर्गाद्यैर्यवनैश्च रोमकमुखैः सत्यादिभिः कीर्तितं
शास्त्रं ताजिकसंज्ञकं............................ ।।'

तदेतत्सिद्धं यत्ताजिकं हि तदेव शास्त्रं यत्र वर्षप्रवेशकालीनलग्नमाश्रित्य फलादेशः क्रियते । ताजिकं हि ताजकशब्देनाप्युच्यते । इदं हि तार्तीयकपदेना-ऽप्युच्यते यत्र कुत्र । तार्तीयकपदं हि ताजिकपदस्य संस्कृतरूपमेव सम्भवति यद्वा होराशास्त्रस्य जातकप्रश्नताजिकाख्यभेदेषु तृतीयत्वेनापि तथोक्तं स्यात् ।

एतत्तु स्पष्टमेव यत्ताजिकशास्त्रं हि यवनागतं यद्वा यवनशास्त्रसम्बद्धं किं वा यवनाचार्यैराविष्कृतम् । किन्त्वेतावता नावधेयं यद्भारतीयपरम्परायां वर्षफलस्य ज्ञानमेव नासीदिति । गणेशाचार्यो हि ताजिकप्रसङ्गे गर्गप्रभृतिमुनीन् सत्य-प्रभृतीनाचार्यांश्च स्मरति । शास्त्रस्यास्य यावनत्वमेतावदेव यदिदं यावनविषये-ऽधिकं प्रचलितं यतो हि पश्चाद्वर्तिग्रन्थेषु संज्ञाद्या यावना एव गृहीता इति । न हि भारताद् बहिरेवाधिकं प्रचलितस्य बौद्धधर्मस्य भारतीयत्वं विहन्यते । यदुच्यते शङ्करबालकृष्णेन शकानन्तरद्वादशशतकमभितः मौसलराज्यस्थापनानन्तरमेव ताजिकशास्त्रमत्र प्रवर्तितमिति तद्गणेशदैवज्ञस्योपर्युक्तकथनेन न संवदते न च परम्परया । गोचरफलादेशोऽस्माकमेव विषयः । मध्यकाले यत्र भारतीयाचार्याणां दृष्टिः सिद्धान्तप्रणयने प्रवृत्ताऽऽसीत्तदा यवनेषु ताजिकविषयं समनोयोगं विकासितम् । तदेव सौकर्यादस्माभिर्यत्र कुत्रानूदितमात्रम् ।

गर्गादिमुनिप्रणीतं ताजिकशास्त्रं सत्याचार्यप्रोक्तताजिकग्रन्थाश्च यद्यपि सम्प्रति स्वरूपेण नैवोपलभ्यन्ते, तथापि ततो गृहीतान्युद्धरणानि तु यत्र तत्र दृश्यन्त एव । सत्याचार्यो हि वराहेणापि सादरं स्मृतः । सोऽपि ताजिकं स्वग्रन्थे निरूपितवानिति कथङ्कारमुच्यते भारते ताजिकशास्त्रं शकानन्तरद्वादशशतक-मभितः प्रविष्टमिति । स्वयमेव ताजिकशब्दः तात्कालिकशब्दस्य विकृतिरिति तेन

विदुषा नैव विचारितम् । ग्रहाणां हि जन्मलग्नवशाद्यत्फलं यच्च तात्कालिकराशिवशात् फलमुभे एव फलितज्योतिषस्य दक्षिणवामलोचने ।

सामान्यतस्ताजिकशास्त्रे संज्ञातन्त्रं वर्षतन्त्रं प्रश्नतन्त्रञ्चेति त्रीणि विषयाणि निरूपितानि दृश्यन्ते । वस्तुतस्तु वार्षिकतन्त्रमेवास्य विषयः प्राधान्येन । संज्ञाप्रश्नतन्त्रे तु पूरके एव ।

सत्याचार्यानन्तरं ये हि ताजिकग्रन्था अस्माभिः श्रुता दृष्टाश्च तेषां सङ्क्षिप्तः परिचयोऽत्रोपस्थाप्यते ।

ताजिकतन्त्रसारः

समरसिंहप्रणीतोऽयं ग्रन्थः । अस्य १३५६ शके लिखिता प्रतिलिपिर्लभ्यते इति तस्य ततोऽपि प्राग्वर्तित्वं सिध्यति । असावेव हायनरत्नकारेण स्मृतः । अतोऽस्य सङ्ग्रहकालः १२५० शकाब्दमभितः ।

दैवज्ञालङ्कृतिः

ग्रन्थोऽयं तेजःसिंहाख्येन दैवज्ञेन १३०० मितशकाब्दमभितः (भाण्डारकरसाक्ष्येण) प्रणीतः । ग्रन्थेऽस्मिन्नपि त एव विषया निरूपिता विशेषेण वार्षिकतन्त्रम् ।

केशवीयताजिकपद्धतिः

ग्रन्थोऽयं केशवाख्येन नन्दिग्रामवास्तव्येन विदुषा १४१५ मितशकाब्दमभितः प्रणीतः । ग्रन्थस्यास्य मल्लारिणा विश्वनाथेन च टीकाः कृताः । ग्रन्थकर्तुरस्यैव जातकपद्धतिरप्यतीव लब्धप्रसरा ।

ताजकसारः

ग्रन्थोऽयं १४४५ मितशकाब्दमभितो हरिभट्टाख्यदैवज्ञेन प्रणीतः । अत्र हि प्राधान्येन वर्षतन्त्रं निरूपितम् ।

ताजिकभूषणपद्धतिः

ग्रन्थोऽयं जातकभरणस्य कर्तुः ढुण्ढिराजस्य सुतेन गणेशेन १४८० मितशकाब्दमभितः प्रणीतः । अत्र हि सर्वाण्यपि ताजिकसम्बद्धतन्त्राणि विवेचितानि ।

सिंहलताजिकम्

सिंहलताजिकस्यास्तित्वं तु ग्रन्थान्तरादपि सिध्यति । 'सिंहलताजिकोक्ताः षोडशयोगाः' इति ग्रन्थः सारस्वतसुषमायां (ज्येष्ठपूर्णिमा २०२१) प्रकाशितः । ग्रन्थेऽस्मिन् ये खलु योगा उक्तास्ते ताजिकनीलकण्ठीवर्णितयोगेभ्यो विलक्षणा एव । यथा षोडशयोगाः सिंहलताजिकोक्ताः—

'गुलाला गुलाली खुशाला खुशाली फलासा फलूसी वदारा वदारी ।
तमाला तमाली तगीतेगतेगा नमीसावसञ्जीरसञ्जीवयोगाः ॥'

ताजिकनीलकण्ठ्यां तु—

'प्रागिक्कवालोऽपर इन्दुवारस्तथेत्थशालोऽपर ईसराफः ।
नक्तं ततः स्याद्यमया मणाऊ कब्बूलतो गैरिकबूलमुक्तम् ॥
खल्लासरं रद्दमथो दुफालिकुत्यञ्च दुत्थोत्थदिवीरनामा ।
तम्बीरकुत्थौ दुरफश्च योगाः स्युः षोडशैषां कथयामि लक्ष्म ॥' इति ।

यवनोक्तास्तु यथा—

'मुकाविल्लकाविल्ललालीललत्ताऽरिहन् दोशनागोशना चीनकोशाः ।
कलावारवारासमाशल्यदिल्ला तथा वादला सन्दला चेति योगाः ॥' इति ।

योगा न केवलं नामत एव भिन्ना अपितु स्वरूपतोऽपि । सिंहलशब्दो देशवाचको व्यक्तिवाचको वेति नाधुनाऽपि निर्णीतः । अस्माकं मते तु सिंहलाख्यः कश्चिदाचार्य एव किन्तु न हि किञ्चिदत्र प्रबलं प्रमाणम् । न चास्य प्रणयनकाल एव ज्ञातः ।

हायनरत्नम्

ग्रन्थोऽयं १५०० मितशकाब्दे दामोदरपुत्रेण कान्यकुब्जवासिना बलभद्रमिश्रेण प्रणीतः ।

यथोक्तं तदारम्भे—

'गणाधिपं रामगुरोः पदाब्जं दामोदराख्यं पितरञ्च नत्वा ।
प्राचीनपद्यैर्बलभद्रनामा करोति सद्धायनरत्नसंज्ञम् ॥'

ग्रन्थमिमं नीलकण्ठो बहुशः स्मरति ।

ताजिकनीलकण्ठी

ग्रन्थोऽयं १५०९ मितशकाब्दमभितः चिन्तामणिपौत्रेण अनन्तपुत्रेण नीलकण्ठेन रामदैवज्ञाग्रजेन प्रणीतः । अत्र हि संज्ञा-वर्ष-प्रश्नभेदेन त्रीणि तन्त्राणि सन्ति । ग्रन्थान्ते यथोक्तम्—

'शाके नन्दाभ्रबाणेन्दुमिते आश्विनमासके ।
शुक्लेऽष्टम्यां समातन्त्रं नीलकण्ठबुधोऽकरोत् ॥' इति ।

अस्य प्रारम्भवाक्यं यथा—

'प्रणम्य हेरम्बमथो दिवाकरं गुरोरनन्तस्य तथा पदाम्बुजम् ।
श्रीनीलकण्ठो विविनक्ति सूक्तिभिस्तत्ताजिकं सूरिमनःप्रसादकृत् ॥' १ ॥ इति ।

ग्रन्थोऽयं समरसिंहग्रन्थं शतशोऽनुवदति । तत्र हायनसुन्दरग्रन्थोऽपि स्मृतो नीलकण्ठेन । तदैतिह्यं नैव ज्ञातमस्माकम् । सत्स्वपि ग्रन्थेष्वन्येषु विषयेऽस्मिन्

ताजिकनीलकण्ठी प्रामाणिको ग्रन्थः। अस्योपरि नीलकण्ठपुत्रस्य गोविन्दस्य रसालाख्या (१५४४ श०) तत्पुत्रस्य माधवस्य (१५५५ श०) विश्वनाथस्य च टीकाः सन्ति।

ताजिककौस्तुभः

ग्रन्थोऽयं बालकृष्णाख्येन विदुषा १५७१ शकाब्दे प्रणीतः।

ताजिकभूषानिधिः

ग्रन्थोऽयं नारायणाख्येन विदुषा १६६० शकाब्दे प्रणीतः। असौ स्वप्रकृतिकग्रन्थान्तरापेक्षया सुविस्तृतो ग्रन्थः।

एते हि कतिपये ताजिकग्रन्थाः समासतो निर्दिष्टाः। जातकग्रन्थानामिव ताजिकग्रन्थानामपि अस्त्यानन्त्यम्। तेषामनुसन्धानं समुल्लेखनञ्च भाविविपश्चितामेव कार्यम्।

प्रश्नतन्त्रम्

प्रश्नतन्त्रं हि होराशास्त्रस्यापरमङ्गम्। प्रश्नलग्नमाधारीकृत्य फलादेशकशास्त्रमेव प्रश्नशास्त्रमित्युच्यते। वस्तुतस्त्वयं तात्कालिकशास्त्रम्।

एकतः प्रश्नतन्त्रं हि जातकशास्त्रे ताजिकशास्त्रे च परिशिष्टरूपेणापि विवेचितं दृश्यतेऽपरतः सन्त्यस्यापि स्वतन्त्रग्रन्था अपि।

प्रश्नशास्त्रं हि वस्तुतो न जातकस्कन्धस्य न वा ताजकस्कन्धस्यैवाङ्गमपितु होराशास्त्रस्य तदुभयविलक्षणमेवाङ्गम्। अस्योत्पत्तिमादाय ताजिकनीलकण्ठ्यामुक्तम्—

'दैवज्ञस्य हि दैवेन सदसत्फलवाञ्छया।
अवश्यं गोचरे मर्त्यः सर्वः समुपनीयते॥
अश्रौषीच्च पुरा विष्णोर्ज्ञानाय समुपस्थितः।
वचनं लोकनाथोऽपि ब्रह्मा प्रश्नादिनिर्णयम्॥' इति।

विषयस्यास्यार्षग्रन्थत्वेन प्रश्ननारदी गृह्यते। अथैतद्विषयस्य कतिपये ग्रन्था अत्र सारतः स्मर्यन्ते।

प्रश्ननारदी

प्रश्ननारदी हि नारदप्रणीतत्वेन ख्याता। सन्त्यत्र द्वात्रिंच्छ्लोकाः। कथ्यते ह्यसौ नारदसंहिताया अङ्गमिति किन्तु तस्य साम्प्रतिकस्वरूपे भागोऽयं न लभ्यते।

प्रश्नज्ञानम्

ग्रन्थोऽयं भट्टोत्पलप्रणीतः। असौ हि विषयस्यास्य ज्ञातेपूपलब्धेषु च पौरुषेयग्रन्थेषु प्रथमः। अत्र हि सन्ति द्विसप्ततिमिता आर्याः। ग्रन्थमिमं षट्पञ्चाशिका टीकायां भट्टोत्पल एवोद्धरति।

प्रश्नसारः

ग्रन्थोऽयं नृसिंहाख्येन विदुषा १५५० मितशकाब्दमभितः प्रणीतः। असौ हि रघुनाथस्य पुत्रः। अत्र हि गर्भविचारः, विद्याविवाहविचारः, गृह-युद्ध-विचारः, जयपराजयविचारः, यात्राविचारः, क्रयविक्रयविचार इत्यादिविषयाः निरूपिताः। ग्रन्थान्ते प्रोक्तम्—

'श्रीमत्समस्तावनिमण्डलायः कृपाकराचार्यनुताङ्घ्रिपद्मः।
श्रीरङ्गनाथस्तनुजेन तस्य नृसिंहनाम्नाऽतिकृतं हि सारम् ॥' इति।

प्रश्नमाणिक्यमाला

ग्रन्थोऽयं परमानन्दपाठकेन प्रणीतः। भागचतुष्टयात्मकः। अस्य हि चरमो भागस्तत्सुतेन उमापतिना पूरितः। अस्य हि १६७० मितशकाब्दमभितः स्थितिकालः।

एतदतिरिक्तमपि सन्त्यन्येऽपि प्रश्नविषयकग्रन्थाः येषामनुसन्धानं प्रचार-श्चापेक्षितः।

केरलमतम्

जातकेषु हि केरलमतं किञ्चिद्विलक्षणमेव वैशिष्टयमावहति जातकान्तरा-पेक्षया। सन्ति बहुशः केरलमतविषयकग्रन्थाः। केरलमतं हि केरलिप्रोक्तम्। यथोक्तं केरलप्रश्नसङ्ग्रहे—

'त्रैलोक्यफलबोधाय येन दिव्येन चक्षुषा।
त्रिकालविषयाः प्रोक्तास्तस्मै केरलये नमः॥' इति।

केरलमतमाश्रित्य प्रणीतेषु ग्रन्थेषु केरलप्रश्नसङ्ग्रहः सर्वत्र लब्धप्रसरो ग्रन्थः। असौ हि पूर्वोत्तरभागात्मकः। तत्र पूर्वभागे ६८ मिता उत्तरार्द्धे ७५ मिताः श्लोकाः सन्ति। केरलमतविषये समधिकं ज्ञानमपेक्षितम्।

सामुद्रिकशास्त्रम्

सामुद्रिकशास्त्रमपि होराशास्त्रस्य प्रसिद्धमङ्गान्तरम्। अस्य हि प्राचीनत्वं वराहमिहिरोऽधिवक्ति कथनेनानेन—

'उन्मानमानगतिसंहतिसारवर्णं स्नेहखरप्रकृतिसत्त्वमनूकमादौ।
क्षेत्रं भुजाश्च विधिवत्कुशलोऽवलोक्य सामुद्रविद्वदति यातमनागतञ्च॥'

(बृहत्संहिता ६७।१)

यत्र हि नराणामङ्गादिवशात् फलादेशः क्रियते तत्सामुद्रिकमिति। समुद्रे प्रोक्तं लक्षणं सामुद्रमिति भट्टोत्पलः। आर्षेषु महाभारते सामुद्रसम्बद्धवचनानि लभ्यन्ते दुर्योधनादिवर्णने। ततश्च विषयोऽयं क्रमेण संहिताऽङ्गत्वेन विकसितः पश्चाद्धोराशास्त्राङ्गतां प्राप्तः। सम्प्रत्युपलब्धस्वतन्त्रग्रन्थेषु मेघाविजयगणिनो

हस्तसञ्जीवनं सर्वतः प्रसिद्धम् । तत्रोक्तं यज्ज्ञानमिदं श्रीमता सामुद्रेण मुनिना प्रवर्तितं नारदगर्गपराशरादिभिर्व्याख्यातं विस्तारितञ्च । यथोक्तम्—

सर्वाङ्गलक्षणप्रेक्षाव्याकुलानां नृणां मुदे ।
श्रीसामुद्रेण मुनिना तेन हस्तः प्रकाशितः ।।' इति ।

तथैव तत्रोक्तम्—

'अङ्गविद्या निमित्तानामष्टानामपि गीयते ।
मुख्या शुभाशुभज्ञाने नारदादिनिवेदिता ।।'

अष्टौ निमित्तानि च यथा—

'अङ्गं स्वप्नः स्वरश्चैव भौमं व्यञ्जनलक्षणे ।
उत्पाता अन्तरिक्षञ्च निमित्तं स्मृतमष्टकम् ।।' इति ।

हस्तसञ्जीवनं हि प्रबोधिनीटीकया समलङ्कृत्य गणेशदत्तेन प्रकाशितम् । ग्रन्थोऽयं १६०२ मितशकाब्दमभितः प्रणीतः ।

रमलशास्त्रम्

रमलशास्त्रं हि पाशकविद्याऽप्युच्यते । निर्दिष्टकोष्ठकेष्वन्यतमस्य स्पर्शे वा वरणे या स्थितिर्घटते तदनुसारेण फलकथनमेव रमलशास्त्रविषयः ।

रमलशास्त्रमपि प्रश्नविद्याङ्गत्वेन, प्राक्काले समुदितं यवनेषु विकसितमिति यावनपरिचयरूपेण रमलशब्देन द्योत्यते । रमते इति रमः पचाद्यच् लाति इति लः ज्ञवत् । रमस्य लः रमलः इत्यप्यपरे ।

रमलशास्त्रस्य सिद्धेऽपि प्राचीनत्वे पौरुषेयग्रन्थेषु भट्टोत्पलस्य रमलग्रन्थ एव प्रथमत्वेन गृह्यते । एतदेवाधिकं सम्भाव्यते यद् भट्टोत्पलस्य प्रश्नज्ञाने एव रमलविषयोऽपि समावेशितः स्यात् । भट्टोत्पलप्रणीतो रमलग्रन्थ आसीदिति आफ्रेचसूच्यां दृश्यते किन्तु सुधाकरस्तदुपेक्षते ।

श्रीपतेरपि रमलविषयकग्रन्थ आसीदिति आफ्रेचसूचीतो ज्ञायते । सम्भवतः सोऽपि रत्नावल्यामेव समावेशितं स्याद्येन हि सुधाकरस्तमप्युपेक्षते ।

चिन्तामणिसंज्ञकेन दैवज्ञेन रमलचिन्तामणिः प्रणीता । अत्र हि श्लोकानां सप्तशती विद्यते । ग्रन्थोऽयं १६०० मितशकाब्दात् प्रागेव प्रणीत इति तस्य १६५३ मितशकाब्दे कृतेन पुनर्लेखनेन ज्ञायते ।

जयरामाख्येन विदुषा १६६७ मितशकाब्दमभितः रमलामृताख्यो ग्रन्थः प्रणीतो यस्य सङ्ख्या अष्टशती श्लोकानाम् ।

परमसुखोपाध्यायस्य रमलनवरत्नमेव सर्वत्र लब्धप्रसरं रमलग्रन्थेषु । ग्रन्थोऽयं १७२२ मितशकाब्दे प्रणीतः । यथोक्तं तत्रावसाने—

'नवरसवसुचन्द्रे वत्सरे वैक्रमीये त्रितयतिथिसुचन्द्रे फाल्गुने शुक्लपक्षे ।' इति ।

ग्रन्थकर्तुः परिचयो यथा ग्रन्थारम्भे—

'सनाढ्योपाध्यायद्विजकुलवरे मे जनिरभू-
पिता सीतारामो वरमतिरनूपा च जननी ।'

ग्रन्थेऽस्मिन् संज्ञा-बलाबल-प्रश्नापकरण-प्रश्नकथन-अवधिकथन-मुष्टिकथन-मूकप्रश्न-चौरनामकथन-वर्षपत्रकथनेति नवरत्नानि निरूपितानि सन्ति ।

इत्थं हि रमलशास्त्रमपि शास्त्रान्तरवत् समृद्धं लोकोपकारि च ।

स्वप्नशास्त्रम्

सुप्तस्य मनसश्चेष्टा स्वप्नः । स्वप्नमादाय फलादेशकं हि स्वप्नशास्त्रम् । स्वप्नशास्त्रं हि शास्त्रान्तराङ्गत्वेन बहुधा विकसितं दृश्यते स्वतन्त्ररूपेण च ।

इत्थं हि होराशास्त्रमनेकभेदेन समृद्धं यदाश्रित्य जना भूतभविष्यज्ज्ञानेन कृतार्थाः भवितुमर्हन्ति ।

विशिष्टज्योतिर्विदां सङ्क्षिप्तः परिचयः

अथाऽत्र परिचाय्यन्ते कतिपये विशिष्टाः ज्योतिषाचार्याः । स्तम्भेऽस्मिन् लगधादारभ्य सुधाकरपर्यन्तं ये हि खलु मूलग्रन्थप्रणेतारो वा विशिष्टव्याख्या-ग्रन्थप्रणेतारस्त एव सादरमुपस्थापिताः ।

लगधाचार्यः

लगधाचार्यो हि वेदाङ्गज्योतिषस्य प्रवक्तृत्वेन स्मृतः । लगधस्य मूलग्रन्थस्तु सम्प्रति नैवोपलभ्यते न च संहितादिग्रन्थेषु स उद्धृतोऽपि तथापि तत्प्रोक्तत्वेन तत्पश्चाद्वर्तिना केनाऽपि प्रणीतो वेदाङ्गज्योतिषाऽऽख्यो ग्रन्थः सम्प्रति लभ्यते । तत्रोक्तम्—

'कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः' । इति ।

तत्रत्यं हि—'प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक् । सार्पार्द्धे दक्षिणार्कस्तु माघश्रावणयोः सदा' ।। इति कथनमाधृत्य वेदाङ्गज्योतिषग्रन्थप्रणयन-कालः शकपूर्वचतुःशताधिकैकसहस्राब्दीमभितोऽनुमितः । लगधस्य तु ततोऽपि पूर्वमेव । तत्रेयं युक्तिः । वेदाङ्गज्योतिषे धनिष्ठार्द्धे सूर्यचन्द्राभ्यामाक्रान्ते उत्तरायणोपक्रमः कथितः, यो हि सम्प्रति यदा तौ पूर्वाषाढामाक्रामतस्तदैव घटते । तद्भोगाय ३३२१ वर्षमितकालोऽपेक्षते यत्र १९११ सङ्ख्यासन्धाने कृते १४१० वर्षमितशकपूर्वकालः सिध्यतीति ।

स्फुजिध्वजः

स्फुजिध्वजस्य यावनहोराशास्त्रमासीदिति बृहज्जातकस्य उत्पलकृतायां

टीकायामुल्लेखाज्ज्ञायते। तत्र स्फुजिध्वजप्रणीतत्वेनोद्धृतं 'कालः शकानां सविशोध्य तस्मात्' इति वाक्यमादाय सामान्यतः स्फुजिध्वजस्य कालः शकानन्तरं १४४ वर्षाण्यभितोऽनुमीयते। स हि यवनेश्वरशब्देनापि ज्ञातः। कल्याणवर्माऽपि तत्कृतशास्त्रस्य वैपुल्यमधिवक्ति सारावल्या उपक्रमे।

आर्यभटः (प्रथमः)

सम्यग्ज्ञातेषु शास्त्रकर्तृज्योतिर्वित्सु आर्यभटः (प्रथमः) प्रथमः। तस्य हि आर्यभटीयं तन्त्रं सम्प्रत्यप्युपलभ्यते, यत्र सन्ति दशगीतिका-गणित-कालक्रिया-गोलाख्याः सन्ति चत्वारः पादाः।

आचार्यस्यास्य स्थानविषये पण्डिता नैकमत्यं भजन्ते। केचित्तं कुसुमपुर-निवासिनं मन्यन्तेऽपरे तु अश्मकवासिनम्। तद्ग्रन्थस्य गणितपादस्य प्रथमपद्य उक्तम्—'आर्यभट्टस्त्विह निगदति कुसुमपुरेऽभ्यर्जितं ज्ञानम्' इति। कथनमिदं द्विधा व्याख्यातं दृश्यते। आर्यभटः अभ्यर्जितं ज्ञानम् इह कुसुमपुरे निगदति इत्येकम्, आर्यभटः कुसुमपुरे अभ्यर्जितं ज्ञानम् इह निगदति इत्यपरम्। परमादीश्वरः प्रथमपक्षधरो यदा नीलकण्ठो द्वितीयपक्षसमर्थकः। तन्मते अश्मक-पुरं हितस्य स्थानमिति। महासिद्धान्तकारः प्रथमभास्करस्तु स्पष्टमेव तमश्मक-पदेन जानाति 'स्फुटतन्त्रमाश्मकम्' इति कथनेन। शङ्करबालकृष्णस्तु तस्य कुसुमपुरमेव दक्षिणप्रदेशवर्ति मत्वा तं दाक्षिणात्यमेव मन्यते। अस्मद्विचारेऽपि स एव पक्षः साधुर्यतो हि आर्यभटीयस्य दाक्षिणात्येष्वेवाधिकं प्रचारः। तस्य स्थितिकालमधिकृत्य स स्वयमेव कथयति—

'षष्टयब्दानां षष्टिर्यदा व्यतीतास्त्रयश्च युगपादाः।
त्र्यधिका विंशतिरब्दास्तदेह मम जन्मतोऽतीताः॥' इति।

यदा कलियुगस्य ३६०० (६०×६०) वर्षाणि व्यतीतानि तदा स त्रयो-विंशवर्षवयस्क आसीदिति ३५७७ कलिगतवर्षे तस्य जन्मेति। कालोऽयं ३९७ मितशकाब्दसंवादी। आर्यभटः कुत्रापि शकोल्लेखं नैव करोति। तदा शककाल-गणना नैव तथा प्रचलिता प्रतिभात्यनेन। आर्यभटो हि प्रथमो गणको येन खेचराणां नैकटयवैप्रकृष्टये निरूपिते भूभ्रमं निरूप्य तद्गणना कृता। अस्यैव प्रयासेन ज्योतिषसिद्धान्तस्य व्यवस्थितो विकाशः प्रारब्धः।

आर्यभटीयतन्त्रे सूर्योदयाद्दिनप्रवृत्तिरुक्ता किन्तु वराहमिहिरः पञ्चसिद्धान्ति-कायामार्यभटस्य अर्द्धरात्राद्दिनप्रवृत्तिसूचकवचनमपि स्मृतमित्यस्य तदुल्लिखित-ग्रन्थान्तरस्यापि समवस्थितिरनुमीयते, यद्धि तस्य करणग्रन्थः सम्भवति।

दर्शितेष्वपि ब्रह्मगुप्तादिना बहुषु दोषेषु सत्स्वपि च कतिपयेषु विद्यमानेषु न कोऽप्यार्यभटस्य ज्योतिषशास्त्रे वर्चस्वमपाकर्तुं प्रभवति।

वराहमिहिरः

वराहमिहिरो ज्योतिषशास्त्रस्य प्रथम आचार्यो येन ज्योतिषशास्त्रं हि सिद्धान्त-संहिता-होरेति त्रिस्कन्धेषु विभज्य व्याख्यातम्। सिद्धान्तपक्षीयाः पञ्चसिद्धान्तिका जातकार्णवश्च, संहितापक्षीया बृहत्संहिता समाससंहिता योगयात्रा चेत्याद्याः, होरापक्षीयाः बृहज्जातकं लघुजातकञ्चेत्याद्यास्तस्य प्रसिद्धाः ग्रन्थाः।

आचार्योऽयं ४२७ मितशकवर्षमभितः स्थितिमान् मतः। कथ्यते यत्स हि शकगत ४०७ मितवर्षे जातः, ५०९ मितशकवर्षे दिवङ्गत इति। स्वयं तेन स्वस्थितिकालविषये न किमप्युक्तम्। स हि पञ्चसिद्धान्तिकायामार्यभटकरणं स्मरतीति ४२१ मितशकाब्द एव तस्य स्थितिकालस्य पूर्वसीमा तथैव मध्यममेषसङ्क्रान्तिगणनाधारेण पञ्चसिद्धान्तिकाप्रणयनं न कथमपि ४३८ मितशकाब्दादर्वागिति तदन्तराल एव तस्य स्थितिकालो मतः। स ह्यावन्तिको मतः। तस्य पिताऽऽदित्यदासो गुरुश्च। तस्य कापित्थग्रामो वासस्थानम्। यथोक्तं बृहज्जातके—

'आदित्यदासतनयस्तदवाप्तबोधः कापित्थके सवितृलब्धवरप्रसादः।
आवन्तिको मुनिमतान्यवलोक्य सम्यग् होरां वराहमिहिरो रुचिरां चकार॥' इति।

भट्टोत्पलानुसारेणायं मगधद्विजोऽन्येषां मते तु भगद्विजः।

आचार्योऽयं धृतविग्रहा सरस्वत्येव। अस्य ज्योतिषस्य त्रिष्वेव स्कन्धेषु लेखनी सममेव धावति साफल्येन। तदतिरिक्तमप्यस्य रचनासौष्ठवं रचनायाः काव्यात्मकत्वञ्च प्रशंसनीयं दृश्यते। सरलता सङ्क्षिप्तता स्पष्टता गूढार्थवत्ता चास्य रचनागतगुणाः। अस्य विषयान्तरेष्वपि पाण्डित्यं प्रगाढं दृश्यते। दिङ्मात्रमुदाहरणं यथा—

'स्वमतेन किलाह जीवशर्मा ग्रहदायं परमायुषः प्रमाणम्।
ग्रहभुक्तनवांशराशितुल्यं बहुसाम्यं समुपैति सत्यवाक्यम्॥
तास्वेव होरास्वपरर्क्षगेषु ज्ञेया नराः पूर्वगुणेषु मध्याः।
व्यत्यस्तहोराभवनस्थितेषु मर्त्या भवन्त्युक्तगुणैर्विहीनाः॥' इत्यादि।

अस्य हि त्रयोदशग्रन्थाः स्मर्यन्ते। यत्र द्वौ सिद्धान्तपक्षीयौ, द्वौ जातकपक्षीयौ, शेषाः संहितापक्षीयाः। सत्स्वपि त्रैस्कन्धेष्वस्य ग्रन्थेषु आचार्योऽयं स्कन्धान्तरापेक्षया फलितस्कन्धे सफलो दृश्यते। बृहज्जातकमस्य सर्वत्र लब्धप्रसरो बहुभिर्व्याख्यातश्च ग्रन्थः। अस्य व्याख्यासु भट्टोत्पलस्य महीधरस्य गोविन्दस्य महादेवस्य च ताः प्रसिद्धाः।

पृथुयशाः

आचार्योऽयं वराहमिहिराचार्यस्य पुत्रः शकानन्तरं ४९० वर्षमभितः स्थितिमान्। असावप्यावन्तिकः काम्पिल्लकग्रामवासी। अस्य षट्पञ्चाशिकेति फलित-

ज्योतिषग्रन्थः प्रसिद्धो यस्य भट्टोत्पलेन टीका प्रणीताऽस्ति । सन्ति ग्रन्थेऽस्मिन् सप्ताध्यायाः ।

कल्याणवर्मा

कल्याणवर्मा हि ५०० मितशकमभितः स्थितिमान् । तस्य सारावली प्रसिद्धो ग्रन्थः । सारावलीं भटोत्पलो बहुशः स्मरतीति तत्प्राग्वर्तित्वमस्य सिद्धमेव । कल्याणवर्मा हि स्वविषये कथयति—

'देवग्रामपुरप्रपोषणबलाद् ब्रह्माण्डसत्पञ्जरे
कीर्तिर्हंसविलासिनीव सहसा यस्येह भात्यातता ।
श्रीमद्व्याघ्रपदीश्वरो रचयति स्पष्टां स हारावलीं
होराशास्त्रविनिर्मलीकृतमनाः कल्याणवर्माकृतिः ।।'

शङ्करबालकृष्णस्त्विमं ८२१ शकवर्षमभितः स्थितिमन्तं मन्यते । केचिदिमं व्याघ्रपदीश्वरशब्दाधारेण नितान्तमर्वाचीनमपि मन्यन्ते । वस्तुतस्त्वसौ देवग्रामवास्तव्यः व्याघ्रपदी (सम्प्रति व्याघ्रपल्ली) देवग्रामसमीपे सम्प्रत्यपि विद्यते गुर्जरप्रदेशे ।

असौ हि सिद्धसरस्वतिर्विपश्चित् । यद्यपि सारावली यावनहोराशास्त्रसारत्वेन प्रतिज्ञाता तथापि आर्षशास्त्रस्य वाराहशास्त्रस्य चात्र पूर्णतः परिपालनं कृतं दृश्यते ।

लल्लाचार्यः

लल्लाचार्यस्य 'शिष्यधीवृद्धिदतन्त्रम्' सर्वत्र प्रसिद्धम् । लल्लाचार्यः कदाऽऽसीदिति विषये पण्डिता नैकमत्यं भजन्ते । सुधाकरो हि तं ४२१ शकवर्षमभितः स्थितिमन्तं मन्यते । तथाकथने तस्य 'लल्लस्य शाके नखाब्धिरहिते' इति कथनमेव साक्षि । तद्विपरीतं शङ्करबालकृष्णस्तं ब्रह्मगुप्तसमकालीनं मत्वा ५६० मितशकाब्दमभितस्तस्य स्थितिकालं मन्यते । परमादीश्वरस्तु तमार्यभटशिष्येष्वन्यतमत्वेन परिचिनोति । अस्माकन्त्वत्र चतुर्थः पन्थाः । न हि लल्लाचार्यः ४२१ शकवर्षमभितः स्थितिमान् तथा हि सति आर्यग्रहगणिते बीजसंस्काराधानस्य प्रश्न एव नोदेति । गणिते बीजसंस्कारो हि दृग्गणितैक्यसाधनायाधीयते यद्धि सिद्धान्तप्रणयनाद् बहुकालानन्तरमेव सम्भवति । ४२३ मितशकवर्षसाधिते गणिते बीजाधायकेन न्यूनमपि ततः शताब्द्यनन्तरवर्तिना भाव्यमेव । न च लल्लाचार्य आर्यभटसमकालिको न वा तच्छिष्य एव सम्भवति । लल्लस्य हि—

'विज्ञाय शास्त्रमलमार्यभटप्रणीतं तन्त्राणि यद्यपि कृतानि तदीयशिष्यैः ।
कार्यक्रमो न खलु सम्यगुदीरितस्तैः कर्म ब्रवीम्यहमतः क्रमशस्तु सूक्तम् ।।'

इति कथनाज्ज्ञायते यल्लल्लाचार्यात् प्रागपि आर्यभटमतमादाय बहूनि

तन्त्राणि प्रणीतान्यासन्निति यद्धि तयोः समकालिकत्वे कथमपि न सम्भवति। यदि नाम लल्लाचार्योऽप्यार्यभटस्य शिष्योऽभविष्यत् तदा तदीयशिष्यैः तैः कार्य-क्रमो न खलु सम्यगुदीरितः, इति स्वसतीर्थ्यनिन्दां नाकरिष्यत्। न हि कश्चि-दपि आर्यशिष्यः—

'यदि वा भ्रमति क्षमा तदा स्वकुलायं कथमाप्नुयुः खगाः।'

इति कथयेत्। न च लल्लो ब्रह्मगुप्तसमकालीनो वा तदर्वाक्तनः। सत्यमेवोभौ परस्परं न स्मरतो नाम्ना किन्तु ब्रह्मगुप्तः सम्भवतः—

'कालान्तरेण दोषा येऽन्यैः प्रोक्ताः न ते मयाऽभिहिताः।' (११।४५)

इति कथनेन—

'शाके नखाब्धिरहिते शशिनोऽक्षदस्रे।' (१४।१८)

इति कथयन्तं लल्लमेव सङ्केतयति। लल्लस्यास्मिन् कथने कालान्तरेणैव दोषो दर्शितो न तु दोषधिया। तेनासौ ब्रह्मगुप्तप्राग्वर्तीति स्पष्टमेव। अतो हि लल्लाचार्यः ५०० मितशकाब्दमभितः स्थितिमानिति स्पष्टमेव। स हि शाम्बाख्यस्य पौत्रः त्रिविक्रमाख्यस्य सुतो ब्राह्मण आसीत्। यथा कथयति सः स्वयमेव—

'आसीदशेषबुधवन्दितपादपद्मस्तल्लब्धजो गुणवदग्रजविंशजन्मा।
शाम्बस्ततोऽजनि जनेक्षणकैरवेन्दुर्भट्टास्त्रिविक्रम इति प्रथितः पृथिव्याम्॥
लल्लेन तस्य तनयेन शशाङ्कमौलेः शैलाधिराजतनयादयितस्य शम्भोः।
सम्पूज्य पादयुगमार्यभटाभिधानं सिद्धान्ततुल्यफलमेतदकारि तन्त्रम्॥' इति।

आचार्योऽयमप्यार्यभट इव दाक्षिणात्यः प्रतिभाति। अस्य हि शिष्यधी-वृद्धिदतन्त्रातिरिक्तं रत्नकोषः जातकसारश्च ग्रन्थान्तरत्वेन गृह्येते। तत्राद्यः सिद्धान्तग्रहः द्वितीयः संहिताग्रन्थोऽन्यस्तु जातकग्रन्थः। आर्यगणिते बीज-संस्काराधानातिरिक्तमपि लल्लस्य सन्ति स्वकीयानीतराणि वैशिष्ट्यान्यपि यानि हि भास्करः खण्डयति मण्डयति च यथायोगम्।

भास्करः प्रथमः

भास्करः यो हि प्रथमभास्कर इति ज्ञातः ५३० मितशकाब्दमभितः स्थितिमानित्यनुमितः। स हि आर्यभटस्य शिष्योऽनुयायी वेति न निश्चितो-ऽधुनापि। तस्य हि ग्रन्थद्वयं सम्प्रति स्मर्यते महाभास्करीयं लघुभास्करीय-ञ्चेति। आर्यभटीयभाष्यमपि अस्यैव कृतित्वेन ख्यातम्।

प्रथमार्यभटस्य स्थानकालादिविषयेऽनुमानमेवाश्रयः। न हि तेन स्वविषये स्वल्पमप्युक्तम्। सामान्यत आचार्योऽयं ब्रह्मगुप्तपूर्ववर्तित्वेन स्मर्यते यद्वा समकालिकत्वेन विप्रकृष्टदेशवर्तित्वेन च। कृपाशङ्करशुक्लाख्येन विपश्चिता

विषयोऽयं समुन्नीतः स्वग्रन्थे। कथ्यते हि भास्कराचार्योऽयमश्मकाभिजनः। आर्यभटीयभाष्यं तेन ४५१ शके प्रणीतमिति।

ब्रह्मगुप्तः

ब्राह्मसिद्धान्तस्योन्नायको ब्रह्मगुप्तः ५२० मितशकाब्दे जात आसीत्। अनेन ५५० मितशकाब्दे ब्राह्मस्फुटसिद्धान्तः ५८७ शकाब्दे खण्डखाद्यकरण-ग्रन्थश्च प्रणीतः। असौ हि जिष्णुसुतः। यथाऽऽह स एव—

'श्रीचापवंशतिलके श्रीव्याघ्रमुखे नृपे शकनृपायात्।
पञ्चाशत्संयुक्तैर्वर्षशतैः पञ्चभिरतीतैः॥
ब्राह्मस्फुटसिद्धान्तः सज्जनगणितज्ञगोलवित्प्रीत्यै।
त्रिंशद्वर्षेण कृत्ये जिष्णुसुतब्रह्मगुप्तेन॥' इति।

एष हि गुर्जरप्रान्तस्थभिन्नमालग्रामवास्तव्य इति। खण्डखाद्यव्याख्यातृ-वरुणाचार्यस्य 'भिन्नमालकाचार्यः' इति कथनाज्ज्ञायते। अनेन हि पञ्चसिद्धान्तिकायां वराहेण दूरविभ्रष्टत्वेन कथितः पैतामहसिद्धान्तः सबीजाधानं व्याख्यातः स्वग्रन्थे। यथाऽऽह स एव—

'ब्रह्मोक्तं ग्रहगणितं महता कालेन यत्खिलीभूतम्।
अभिधीयते स्फुटं तज्जिष्णुसुतब्रह्मगुप्तेन॥
संसाध्य स्पष्टतरं वीजं नलिकादियन्त्रेण।
तत्संस्कृतग्रहेभ्यः कर्तव्यौ निर्णयादेशौ॥' इति।

असौ हि आर्यभटसिद्धान्तो महानालोचकः श्रीषेणविष्णुचन्द्रप्रभृतीनाञ्च। आचार्योऽसौ वराहलाटसिंहलल्लाचार्यादींस्तूपेक्षते, यथोक्तं ब्राह्मस्फुटसिद्धान्ते—

'ब्रह्मोक्तमध्यरविशशितदुच्चतत्परिधिभिः स्फुटीकरणम्।
कृत्वैव स्पष्टतिथिर्दूरभ्रष्टान्यतन्त्रोक्तैः॥' इति।

तथैव—

'स्वयमेव नामय कृतमार्यभटेन स्फुटं स्वगणितस्य।
सिद्धान्ततोऽस्फुटत्वं ग्रहणादीनां विसंवदति॥
श्रीषेणविष्णुचन्द्रप्रद्युम्नार्यभटलार्टसिंहानाम्।
ग्रहणादिविसंवादात् प्रतिदिवसं सिद्धमकृत्वम्॥' इति।

श्रीषेणो ह्याधुनिकपोलिशमतोन्नायको विष्णुचन्द्रस्तु रोमकस्य लाटसिंहः सौरस्य प्रद्युम्नस्तु सम्भवतो वासिष्ठस्य। आर्यभटस्तु स्वकीयस्यैव सिद्धान्तस्य। ब्रह्मगुप्तानुसारेणैतन्निर्दिष्टमतेन न दृग्गणितयोरैक्यं यदि कथञ्चित् तदपि घुणाक्षरन्यायेनैवेति न तेषां व्यवहार उपयोगः। स्वमतस्य वैलक्षण्यसिद्धये स कथयति—

'यदि भिन्नाः सिद्धान्ता भास्करसङ्क्रान्तयोऽपि भेदसमाः ।
सः स्पष्टः पूर्वस्यां विषुवत्यर्कोदयो यस्य ॥' इति ।

वस्तुतस्तु ब्रह्मगुप्तः सुधारक आचार्यः । यदि हि परदोषोन्नयनमपसार्येत तदाऽऽसौ वस्तुतो व्यावहारिको गणकः । अनेन हि दृग्गणितैक्यसाधनाय यः सन्देशो दत्तः स शाश्वत आवश्यकश्च । यथाऽऽह सिद्धान्तशिरोमणिकारः—

'यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तसमानधर्मिण एवोत्पत्स्यन्ते । ते तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि करिष्यन्ति ।' इति ।

यथा ह्यसौ पूर्ववर्त्याचार्यालोचकस्तथैव वटेश्वरेणाऽसावालोचितः किन्तु भास्करेण पुनरुज्जीवितः सबीजसंस्कारम् । एतावत्तु सत्यमेव यत्कामं सिद्धान्तानुसारेण सूर्यसङ्क्रान्तयो भिन्नाः स्युः किन्तु स्पष्टस्तु स यस्य विषुवत्यर्कोदयो भवति । त्रय एव सिद्धान्ताः—आर्यः सौरो ब्राह्मश्च । त्रय एवाचार्याः—आर्यभटो वराहमिहिरो ब्रह्मगुप्तश्चेति सत्यमेव ।

श्रीधराचार्यः

श्रीधराचार्यो हि सैद्धान्तिकज्योतिर्वित्स्वन्यतमः । तं हि महावीरः सारसङ्ग्रहे बहुशः स्मरति, येन तस्य स्थितिकालः ७७५ मितशकाब्दात् प्रागेवेति शङ्करबालकृष्णः । सुधाकरस्त्वमुं न्यायकन्दलीकर्तारं मत्वा तं ९१३ मितशकाब्दमभितः स्थितिमन्तं मन्यते । किन्त्विदं नामसादृश्यमेवेति शङ्करबालकृष्णमतम् । आचार्यस्यास्य त्रिशतिका (पाटीगणितग्रन्थः) बीजगणितम्, जातकपद्धतिः रत्नमाला च प्रसिद्धा ग्रन्थाः । तेनैव स्वप्रणीतपाटीगणितग्रन्थस्य सारसङ्क्षेपोऽपि कृतः । यथोक्तं तदुपक्रमे—

'नत्वा शिवं स्वविरचितपाट्या गणितस्य सारमुद्धृत्य ।
लोकव्यवहाराय प्रवक्ष्यति श्रीधराचार्यः ॥' इति ।

भास्करस्य लीलावत्याः पृष्ठभूमिरसौ ग्रन्थो नितान्तमुपादेयः । अस्य रत्नमाला लल्लाचार्यप्रणीतरत्नकोषानुवर्तिनी संहिता । तेनाऽसौ स्कन्धत्रयस्यैव प्रवीण आचार्यः । परवर्तिनो भास्कराचार्यप्रभृतयः श्रीधराचार्यं बहुशः स्मरन्ति अनुवदन्ति च । सम्भवति बीजगणिते सोऽपि पद्मनाभाचार्यमुपजीवतीति ।

मनुः

आचार्यस्य मनोः बृहन्मानसाख्यं ग्रन्थं भट्टोत्पलो व्याख्यातीत्यस्य स्थितिकालः ८८८ मितशकाब्दपूर्ववर्तीति तस्य कालः ८०० मितशकाब्दमभितः । ८५४ मितशकाब्दमभितः स्थितिमान् मुञ्जालो ग्रन्थस्यास्य सङ्क्षेपणं करोति स स्ववैशिष्ट्यम् । पर्यटको वेरुनिः (वारुणिः) अपि ग्रन्थमिमं स्मरति । असौ करणग्रन्थः ।

वित्तेश्वरो वा वटेश्वरः

वित्तेश्वरस्य करणसारो बहुर्चचितो ग्रन्थः। स हि स्वग्रन्थे ब्रह्मगुप्तमतं दूषयतीति सुधाकरसाक्ष्येण ज्ञायते। करणेऽस्मिन् ८२१ मितशकाब्द उपक्रमवर्ष इति तदभित एव तस्य स्थितिकालोऽनुमितः सामान्यतः। स हि नागपुरमण्डलवासीति कथ्यते किन्तु शङ्करबालकृष्णमतेन स हि काश्मीरको यतो हि काश्मीरप्रदेशस्याक्षांशान् (३४।९) व्यवहरति ग्रन्थे इति। ग्रन्थोऽयमार्यभटानुसारी। कथ्यते हि शकानन्तरदशमशतकेऽस्य ग्रन्थस्य आरब्यभाषाया-मनुवादः सम्पन्न इति। वटेश्वरसिद्धान्तादुद्धृतं यथा—

'समयमितिरशेषा सावनं खेचराणां
गणितमखिलमुक्तं यत्र कुट्टाद्युपेतम्।
ग्रहभगणमहीनां संस्थितिर्यत्र सम्यक्
स खलु मुनिवरिष्ठैः स्पष्टराद्धान्ते उक्तः॥'

मुञ्जालः

८५४ मितशकाब्दमभितः स्थितिमान् मुञ्जालगणको भास्करमुनीश्वरप्रभृतिविपश्चिद्भिः सादरं स्मृतः। अस्य हि मनुप्रणीतबृहन्मानसस्य सारसङ्क्षेपात्मको लघुमानसाऽऽख्यकरणग्रन्थः सुधाकरादिभिः स्मृतः। असौ हि अनुष्टुप्छन्दसि प्रगुम्फितः। सन्त्यत्र षष्टिमिताः श्लोकाः। ग्रन्थान्ते 'इति मुञ्जालभट्टविरचितं लघुमानसम्' इति लिखितमस्ति। अनेन ८५४ शके ग्रहाणां ध्रुवका लिखिता इत्यस्य स्थितिकालनिर्णये प्रमाणम्। यथोक्तम्—

'कृतेष्विभमिते शाके मध्याह्ने रविवासरे।
चैत्रादौ ध्रुवकान् वक्ष्ये रविचन्द्रेन्दुतुङ्गजान्॥' इति।

तथैव—

'मानसाऽऽख्यं ग्रहज्ञानं श्लोकषष्टया मया कृतम्।
भवन्त्यत्रायशोभाजः प्रतिकञ्चुककारिणः॥' इति।

असौ हि भारद्वाजगोत्रीयो ब्राह्मणः।

अयनांशनिरूपणमस्य वैशिष्ट्यम्। ८५४ शकेऽयनांशाः ६।५४ आसन् तद्गतिश्च वार्षिकी विपलैकमाना। भास्कराचार्यो हि मुञ्जालमयनांशोन्नायकत्वेन स्मरति। यच्च मुनीश्वरेण सिद्धान्तसार्वभौमस्य मरीचिटीकायाम्—

'उत्तरतो याम्यदिशं याम्यान्तात् तदनु सौम्यदिग्भागम्।
परिसरतां गगनसदां चलनं किञ्चिद्भवेदयने॥
विषुवदपक्रममण्डलसम्पाते प्राचि मेषादिः।
पश्चात्तुलादिरनयोरपक्रमासम्भवः प्रोक्तः॥

राशित्रयान्तरेऽस्मात् कर्कादिरनुक्रमान्मृगादिश्च ।
तत्र च परमा क्रान्तिर्जिनभागमिताऽथ तत्रैव ।।
निर्दिष्टोऽयनसन्धिश्चलनं तत्रैव सम्भवति ।
तद्भगणाः कल्पे स्युर्गोरसरसगोङ्कचन्द्रमिताः ।।'

इति मुञ्जालप्रणीतत्वेनोद्धृतं तत् षष्टिलोक्यां न दृश्यते । तेनानुमीयते यदेतदतिरिक्तमपि मुञ्जालस्य कृतिः सम्भवतीति । सम्भवति मनुप्रणीतत्वेन स्मृतं बृहन्मानसं मुञ्जालस्यैव कृतिरपि । बृहन्मानसस्य मनुकृतित्वे केवलम् वेरुनिः (वारुणिः) एव प्रमाणं न तु तं सुधाकरादिभिरपि दृष्टमेव । सम्भवति मुञ्जाल एव स्थानान्तरे मनुरित्यभिहितोऽपि स्यात् । यद्वा लघुमानसातिरिक्तं लघुलघुमानसमपि मुञ्जालेन कृतं सम्भवति । विषयोऽयमनुसन्धेय एव ।

समरसिंहः

समरसिंहः ताजिकशास्त्रस्य प्रामाणिकप्रवक्तृत्वेन स्मृतः । नास्य स्थितिकालः कुतोऽपि ज्ञातः स्थानञ्च । अस्य हि ताजिकतन्त्रसारस्ताजिकपरम्परायां प्रामाणिको ग्रन्थः स्मृतः । अनुमानत आचार्योऽसौ ६०० मितशकाब्दमभितः स्थितिमान् ।

आर्यभटो द्वितीयः

आचार्योऽयं ८७५ शकमभितः स्थितिमानित्यनुमितः । अस्य महासिद्धान्ताख्यो ग्रन्थः प्रसिद्धो यो हि लघ्वार्यसिद्धान्तनाम्नाऽपि ज्ञातः । यद्यपि तत्र—

'एतत् सिद्धान्तद्वयमीषद्याते कलौ युगे जातम् ।
स्वस्थाने दृक्तुल्या अनेन खेटाः स्फुटाः कार्याः ।।'

इत्युक्तं तथापि नास्य तथा प्राचीनता यथा तत्रोदिता । प्रथमस्तु ब्रह्मगुप्तेन ये हि खलु दोषा आर्यभटीये दर्शितास्ते आर्यभटीयतन्त्रे एव सत्या न तु आर्यभटीयसिद्धान्ते महासिद्धान्ताख्ये । द्वितीयतस्तु न हि वराहो न वा ब्रह्मगुप्त एव महासिद्धान्तं जानाति । तृतीयस्तु ये हि ब्रह्मगुप्तेन आर्यतन्त्रे दोषा दर्शितास्ते महासिद्धान्ते संशोधिता दृश्यन्ते, यतो हि आचार्यस्यास्य ब्रह्मगुप्तादर्वाचीनत्वं सिध्यति । भास्कराचार्यो हि दृक्काणोदयप्रसङ्गे आर्यभटं स्मरति, किन्तु आर्यभटीयतन्त्रे तद्गणना नैव लभ्यते, किन्तु महासिद्धान्ते दृश्यते । अनेनास्य भास्कराचार्यप्राग्वर्तित्वं सिध्यति । अस्योपक्रमे उक्तम्—

'विविधखगागमपाटीकुट्टकबीजादिदृष्टशास्त्रेण ।
आर्यभटेन क्रियते सिद्धान्तो रुचिर आर्याभिः ।।' इति ।

अत्रत्या गणनापद्धतिरपि आर्यतन्त्रपद्धतितो भिन्ना। यथा—

'वर्गाक्षराणि वर्गेऽवर्गेऽवर्गाक्षराणि कात् ङ्मौ यः।
खद्विनवके स्वरा नव वर्गेऽवर्गे नवान्त्यवर्गे वा॥'

—इति आर्यभटीयतन्त्रे।

'रूपात् कटपयपूर्वा वर्णा वर्णक्रमाद् भवन्त्यङ्काः।
अनौ शून्यं प्रथमाय आ छेटे ऐ तृतीयार्थे॥'

—इति आर्यभटसिद्धान्ते।

पाराशरमताध्यायोऽस्य नवीनं वैशिष्ट्यम्।

पृथूदकः

पृथूदकस्य ब्राह्मस्फुटसिद्धान्तटीका प्रसिद्धा। अमुं हि खण्डखाद्यस्य टीकाकारो वरुणाचार्य (९६२ श०) भास्कराचार्यश्च बहुशः स्मरति। असौ हि ब्राह्मस्फुटसिद्धान्तव्याख्यातृत्वेन बलभद्राचार्यं स्मरति। तेन ८९० शकाब्दमभितोऽस्य स्थितिकालोऽनुमितः। असौ भट्टोत्पलं न जानाति स च तमित्युभयोः समकालिकत्वे विप्रकृष्टदेशवर्तित्वञ्च सिध्यति। वेरुनिर्हि पृथूदकं स्मरति।

स हि ब्राह्मणस्फुटसिद्धान्तस्य सप्तमाध्यायस्याष्टत्रिंशत्कारिकाया यथा लिखति—'यथेह कान्यकुब्जे' इति तेनास्य कान्यकुब्जनिवासित्वं सिध्यति। अयं हि भास्कराचार्यो मधुसूदनसुतत्वेन स्मरतीति पितुरस्य नाम मधुसूदन इति ज्ञायते। वरुणाचार्यसाक्ष्येण ज्ञायते यदनेन खण्डखाद्यस्यापि टीका प्रणीताऽऽसीदिति।

असौ यथार्थवक्ता दृश्यते। अनेन हि ब्राह्मस्फुटसिद्धान्तेऽप्यनेके दोषा अपि प्रदर्शिताः, यद्धि भास्कराचार्यो ग्रन्थदूषणं मन्यते।

भट्टोत्पलः

भट्टोत्पलस्य सन्त्यनेके टीकाग्रन्था मूलग्रन्थाश्च प्रसिद्धाः। सौभाग्यवशादसौ हि स्वस्थितिकालं स्पष्टतया निर्दिशति। यथा बृहज्जातकटीकावसाने—

'चैत्रमासस्य पञ्चम्यां सितायां गुरुवासरे।
वस्वष्टाष्टमिते शाके कृतेयं विवृतिर्मया॥'

तथैव बृहत्संहिताटीकायाम्—

फाल्गुनस्य द्वितीयायामसितायां गुरोर्दिने।
वस्वष्टाष्टमिते शाके कृतेयं विकृतिर्मया॥' इति।

एतेनास्य स्थितिकालः ८८८ मितशकाब्दमभित इति। आचार्योऽयं काश्मीरक इति वरुणाचार्यस्य खण्डखाद्यटीकायां तथा स्मरणाज्ज्ञायते—

सन्त्यस्य बहवष्टीकाग्रन्थाः । अनेन हि वराहमिहिरस्य योगयात्रायाः बृहत्संहितायाः बृहज्जातकलघुजातकयोश्च ब्रह्मगुप्तस्य खण्डखाद्यकरणस्य पृथुयशसः षट्पञ्चाशिकायाः मुञ्जालस्य मनोर्वा बृहन्मानसकरणस्य च टीकाग्रन्थाः प्रणीताः । एतदतिरिक्तं प्रश्नज्ञानं करणपातः शकुनशास्त्रं रमलसारश्चास्य मौलिका ग्रन्थाः स्मृताः । स्मर्यतेऽस्य राहुन्राकरणाख्यो ग्रन्थश्च । सम्भवत्यसौ करणपातस्य बृहद्रूपम् । खण्डखाद्यटीका तत्पणीता सम्प्रति नोपलभ्यते । तस्या अस्तित्वं तस्यैव 'खण्डखाद्यकरणे अस्मदीयवचनम्' इति वचनाज्ज्ञायते । एवमेव योगयात्राटीकाविषयेऽपि ।

भट्टोत्पलो हि ज्योतिषशास्त्रे केवलमेक एवाचार्यो यो ह्यस्मान् प्राचीनकालेन सह संयोजयति । स हि स्वटीकायां बहुशः संहिताः संहिताकारांश्च नामतः स्मरति, समुद्धरति अनुवदति च । सम्प्रति तेषां नामापि न श्रूयते वा स्वरूपं नैव लभ्यते । तस्य हि ज्योतिषस्य त्रिष्वेव स्कन्धेषु प्रावीण्यमस्मान् गौरवयति ।

विजयनन्दी

विजयनन्दिनः करणतिलकं सश्रद्धं स्मर्यते ज्योतिषशास्त्रे । यद्यपि वराहमिहिरोऽपि विजयनन्दिसंज्ञकमाचार्यं स्मरति, तथापि करणतिलकस्य प्रणेता विजयनन्दी तदितर एव, यतो हि स करणे ८८८ मितशकाब्दसम्बद्धक्षेपकमाददाति । अनेन हि अनेके टीकाग्रन्था अपि प्रणीता आसन्निति वेरुनिलेखतो ज्ञायते । करणग्रन्थोऽयं ग्रहलाघवस्य पूर्वरूपमेव ।

भानुभट्टः

आचार्योऽयं ९०० मितशकाब्दमभितः स्थितिमत्त्वेन स्मर्यते । करणतिलकं रसायनतन्त्रञ्चास्य प्रसिद्धौ ग्रन्थौ । खण्डखाद्यटीकायां वरुणाचार्यस्तं स्मरति ।

अनुमीयते यदस्य रसायनतन्त्रं हि सिद्धान्तपक्षीयो ग्रन्थः, सम्प्रति तु एतद्द्वयमेव नैवोपलभ्यम् ।

श्रीपतिः

आचार्योऽयमार्यभटवराहमिहिरलल्लब्रह्मगुप्तेभ्यः पञ्चमत्वेन स्मर्यते । असौ हि वराहमिहिरवत् स्कन्धत्रयस्यैव प्रवक्ता । अस्य हि सिद्धान्तशेखरः धीकोटिकरणञ्च पाटीगणितं बीजगणितञ्च सिद्धान्तप्रक्षीयाः ग्रन्थाः, रत्नमाला संहिताग्रन्थः, जातकपद्धतिः रमलपद्धतिश्च होराग्रन्थौ ।

भास्कराचार्यः सिद्धान्तशिरोमणौ मुनीश्वरो लीलावतीटीकायाञ्चास्य कानिचिद्वचनानि स्मरतोऽनुवदतश्च । अस्य हि गणितारम्भे ९६१ शकाब्दस्योल्लेखादयमेव तस्य स्थितिकालत्वेनाऽनुमितः । असौ केशवाख्यस्य पौत्रो नागदेवा-

ऽऽख्यस्य पुत्र इति रत्नमालाटीकायां महादेववचनाज्ज्ञायते । असौ हि लल्लाचार्यं रत्नमालायां स्मरति, येनास्यार्यभटपक्षीयत्वमनुमीयते । असौ काशीनिवासित्वेन गृहीतः ।

अनेन ज्याखण्डसाधनं विनैव चापद्वारा ज्यासाधनं निर्दिष्टम् । यदनुसृत्य भास्करेण ज्याचापं विनैव द्युतिसाधनं कृतं तथैव ग्रहलाघवप्रणेत्रा गणेशेन ज्याचापमुपेक्ष्यैव समग्रमेव गणितं साधितमिति परम्पराया अस्याः श्रीपतिरुन्नायकः । तद्वचनं यथा—

'दोःकोटिभागरहिताभिहताः खनाग-
चन्द्रास्तदीयचरणोनशरार्कदिग्भिः ।
ते व्यासखण्डगुणिता विहृताः फलं तु
ज्याभिर्विनाऽपि भवतो भुजकोटिदण्डाः ।।' इति ।

वरुणः

वरुणाचार्यस्य खण्डखाद्यकटीका ज्योतिषशास्त्रप्राङ्गणेऽतीव चर्चिता । आचार्योऽयं ९६२ शकमभितः स्थितिमत्वेनानुमितः । अनुमानञ्चेदं तदुपस्थापितोदाहरणे मुख्यवर्षत्वेन ९६२ शकाब्दो गृहीत इत्यनेनैव । अन्ये तन्न मन्यन्ते । तदनुसारेण वरुणाचार्यो हि सिद्धान्तशिरोमणिं स्मरति, समुद्धरति तन्नाम्ना निम्नाङ्कितं वचनम्—

'उक्तञ्च सिद्धान्तशिरोमणौ—

अभीष्टवारार्थमहर्गणश्चेत्सैको निरैकस्तिथयोऽपि तद्वत् ।
तदाधिमासावमशेषके च कल्पाधिमासावमयुक्तहीने ।।'

श्लोकोऽयं भास्कराचार्यप्रणीतसिद्धान्तशिरोमणौ मध्यमाधिकारेऽधिमासादिनिर्णयाध्याये दृश्यते । तेन वरुणाचार्यस्य भास्कराचार्यपरवर्तित्वं सिध्यतीति । अत्रेदमवधेयं यन्न केवलं मुख्यवर्षत्वेन कस्यापि वर्षस्य ग्रहणमेव स्थितिकालनिर्णये पर्याप्तं प्रमाणम् । तथाहि सति आर्यभटसिद्धान्तग्रन्थस्य सर्वप्राचीनत्वं स्याद्यतस्तत्र स्पष्टमेवोक्तम्—

'एतत्सिद्धान्तद्वयमीषद्याते कलौ युगे जातम् ।' इति ।

तत्रत्य ग्रहगणनाऽपि वेधेनापि समीचीना दृश्यते, किन्तु अन्यान्यप्रमाणैस्तस्य ब्रह्मगुप्तार्वाक्त्वमेव सिध्यति । तथैव कतिपये नितान्तमर्वाचीनाः करणग्रन्था अपि उपक्रमवर्षत्वेन प्राचीनमपि वर्षं गृह्णन्ति । अपरञ्च केवलं कस्याप्युद्धरणमेव न कालनिर्णये परं प्रमाणं यतो हि समाननाम्ना बहवो ग्रन्था ग्रन्थकाराश्च दृश्यन्ते । यथा हि आर्यभटभास्करबलभद्रादिविषये । अपरञ्च भास्कराचार्यस्य सिद्धान्तशिरोमणौ सन्त्येतादृशा अपि श्लोका ये हि ग्रन्थान्तरेण नितान्तमेव संवदन्ते । [illegible] ये हि शौनक-

वासिष्ठग्रन्थनाम्ना समुद्धृतास्त एव भास्करग्रन्थे यथायथं ग्रन्थसङ्केतं विनैव गृहीताः। तेन सम्भवति भास्कराचार्येण वरुणस्मृतश्लोकोऽयमपि ग्रन्थान्तराद् गृहीतं स्यात् यद्वा वरुणाचार्यपूर्वमपि सिद्धान्तशिरोमणिसंज्ञकं ग्रन्थान्तरमपि केनापि प्रणीतमपि स्यात्। तेनोभयमेव प्रमाणं न विवादबाह्यम्। सामान्यतस्तु भास्करो वरुणाचार्यं न स्मरति स तु सिद्धान्तशिरोमणिमुद्धरतीति तस्य भास्करपरवर्तित्वमेव सिध्यति। किन्तु तथा सति वरुणाचार्येण राजमृगाङ्कादयः प्रसिद्धा ग्रन्थाः कथं नैव स्मृता इति सन्देहस्तु विद्यत एव तत्रापि। विषयोऽयमधिकानुसन्धानार्हः।

भोजराजो वा भोजदेवः

असौ हि धारानगरीशो भोजराजः स्मृतः। सन्त्यस्य नाम्ना प्रसिद्धाः राजमृगाङ्क-राजमार्तण्ड-आदित्यप्रताप-सिद्धान्त-विद्वज्जनवल्लभ-रमलरत्नप्रभृति-ज्योतिषग्रन्थाः। राजमृगाङ्को हि ब्राह्मस्फुटसिद्धान्तस्य करणग्रन्थो यस्य प्रणयनं ९६४ शके सम्पन्नमिति तस्योपक्रमवर्षत्वेन ग्रहणाज्ज्ञायते। अत्र हि ब्रह्मसिद्धान्तसम्मतग्रहे बीजसंस्कार आहितः। करणारम्भकालीनमन्दोच्चपातादयोऽपि ब्राह्मस्फुटसिद्धान्तानुसारिण एव। ग्रन्थान्ते चोक्तम्—

'इत्युर्वीपतिवृन्दवन्दितपदद्वन्द्वेन सद्बुद्धिना
श्रीभोजेन कृतं मृगाङ्ककरणं ज्योतिर्विदां प्रीतये॥'

एतत्तु विषयान्तरमेव यदिमे ग्रन्थाः स्वयमेव भोजराजेन प्रणीता वा तेन दैवज्ञेभ्यः कारिता अपि। एतदेवास्माकं विषयो यदेते भोजराजनाम्ना ख्याताः स्तत्समये प्रणीताश्चेति।

तत्रादित्यप्रतापसिद्धान्तः सिद्धान्तपक्षीयो ग्रन्थः। ब्राह्मस्फुटसिद्धान्ते बीजसंस्कारमाधाय राजमृगाङ्ककरणस्य प्रणेत्रा कथं पृथगपि सिद्धान्तग्रन्थः प्रणीत इति विषयोऽयं सन्देहमावहति। सम्भवति पश्चाद्वर्तिकाले तेन तथाविधो ग्रन्थः प्रणीतोऽपि स्यात्। राजमार्तण्डोऽस्य मुहूर्तविषयकग्रन्थः। विद्वज्जनवल्लभस्तु फलितज्योतिषे जातकविषयको यदा रमलरत्नं नाम्नैव रमलविषयको ग्रन्थः। अस्य हि ताजिकविषयेऽपि ग्रन्थस्यातिस्त्वं विश्वस्यते।

भोजराजोऽयं सरस्वतीकण्ठाभरण-शृङ्गारप्रकाशादिविविधग्रन्थानां प्रणेता सिन्धुराजस्य पुत्रो मुञ्जभ्रातृव्यः। महादेवसारिण्यां (१२३८ श०) ताजकसारे (१४४५ श०) च राजमृगाङ्कः स्मृतः। यथोक्तं ताजकसारे—

'श्रीसूर्यतुल्यात् करणोत्तमाद्वा स्पष्टा ग्रहाः राजमृगाङ्कतो वा।'

कथ्यते हि द्वावेव नृपौ—भोजराजजयसिंहौ, द्वावेव ग्रन्थौ—राजमृगाङ्कः सिद्धान्तसम्राट् चेति।

दशबलः

दशबलो हि वल्लभवंश्यो राजा। अस्य हि करणकमलमार्तण्डाख्यो ग्रन्थः प्रसिद्धः। असौ हि राजमृगाङ्काश्रित बीजसंस्कारयुक्त ब्राह्मस्फुटसिद्धान्तानुसारी करणग्रन्थः। तत्रोक्तम्—

'वल्लभान्वयसञ्जातो विरोचनसुतः सुधीः।
इदं दशबलः श्रीमान् चक्रे करणमुत्तमम् ॥'

यथा च—

'अन्यैरार्यभटादिभिर्निजगुणैर्दिण्डीरफेनोज्ज्वलै-
राब्रह्माण्डविसारिभिः प्रतिदिनं विस्तारिताः कीर्तयः।
स्मृत्वा तच्चरणाम्बुजानि रचितोऽस्माभिः परप्रार्थितै-
र्ग्रन्थोऽयं तदुपार्जितैश्च सुकृतैः प्रीतिं भजन्तां प्रजाः ॥'

ग्रन्थस्यास्य वैशिष्टचं वर्षगणद्वारा ग्रहानयनमेव। इतः पूर्ववर्तिषु पञ्चसिद्धान्तिका-खण्डखाद्य-राजमृगाङ्कादिषु ग्रन्थेषु अहर्गणमाध्यमेनैव दिनगतिमध्यमग्रहादीनामानयनं साधितमासीद्, यद्धि सुमहान्तं परिश्रममपेक्षते स्म। तदपाकरणाय लघुनैव प्रयासेन ग्रहानयनायात्र वर्षगणस्य प्रयोगः कृतो विरचितानि तत्साधनसावनकोष्ठकान्यपि। अनुष्टुप्छन्दसि निबद्धोऽयं ग्रन्थः ४४४ शकं शून्यायनांशवर्षत्वेन गृह्णाति।

ब्रह्मदेवः

ब्रह्मदेवस्य करणप्रकाशाख्यः करणग्रन्थः प्रसिद्धः। यथोक्तं तत्र—

'नत्वाऽहमार्यभटशास्त्रसमं करोमि
श्रीब्रह्मदेवगणकः करणप्रकाशम्।'

ग्रन्थावसाने च कथितम्—

'आसीत् पार्थिववृन्दवन्दितपदाम्भोजद्वयो माथुरः
श्रीश्रीश्चन्द्रबुधो गुणैकवसतिः ख्यातो द्विजेन्द्रः क्षितौ।
नत्वा तस्य सुतोऽङ्घ्रिपङ्कजयुगं खण्डेन्दुचूडामणेः
वृत्तैः स्पष्टमिदञ्चकार करणं श्रीब्रह्मदेवः सुधीः ॥'

एतेन ज्ञायते यदसौ माथुरो ब्राह्मणश्चन्द्राऽऽख्यपुत्रः। असौ सबीजसंस्कृतमार्यमतमनुसरति स्वग्रन्थे। अत्र १०१४ शकक्षेपकव्यवहारेणास्य स्थितिकालोऽपि १०१४ शकाब्दमभित एवानुमितः। अत्र मध्यमग्रहसाधनमहर्गणद्वारैव कृतं न तु दशबलवद्वर्षगणेन।

शतानन्दः

शतानन्दस्य भास्वतीकरणं प्रसिद्धम्। आचार्योऽसौ जगन्नाथपुरीवास्तव्य इति भास्वत्याः टीकाकृतोऽनिरुद्धस्य वचनाज्ज्ञायते। वस्तुतस्तु प्रायः सर्वे हि

गणकाः क्षेपकाणि उज्जयिन्या एव गृह्णन्ति, किन्त्वसौ जगन्नाथपुर्या इति तस्य तन्निवासित्वे प्रमाणम् । माधवाचार्येण यथोक्तं तथाऽसौ विष्णुभक्त प्रत्येति । यथोक्तं तेनैव—

'नत्वा मुरारेश्चरणारविन्दम्' । इति ।

ग्रन्थोऽसौ वराहमिहिरसंस्कृतसूर्यासिद्धान्तानुयायी । यद्धि माधवाचार्यो भास्वतीमाधुनिकसूर्यसिद्धान्तानुसारित्वेन व्याख्याति (१४४२ श०), तत्तस्यानवधानतैव । भ्रमोऽयम्—

'अथ प्रवक्ष्ये मिहिरोपदेशात् तत्सूर्यसिद्धान्तसमं समासात् ।'

इति वाक्ये मिहिरशब्दस्य सूर्यार्थग्रहणेन समुत्पन्नो दृश्यते । यथार्थस्तु मिहिरशब्दोऽत्र वराहमिहिरपरः । अत्रत्यं हि गणितं वराहमिहिरसंस्कृतसूर्यसिद्धान्तानुकूलम् । अत्र मध्यमग्रहसाधनं वर्षगणद्वारा सम्पादितम् । ग्रहगत्यादीनां शतांशपद्धत्या गुणकभाजकप्रबन्धोऽस्य समुल्लेखनीयं वैशिष्टचम् । बहुलब्धप्रसारकरणग्रन्थेषु भास्वत्यन्यतमः ।

महेश्वरः

महेश्वराचार्यो हि शकानन्तरैकादशशतकपूर्वार्द्धस्थितिमान् । असौ हि सिद्धान्तशिरोमणिप्रणेतुर्भास्कराचार्यस्य पिता । यथोक्तं भास्कराचार्येण गोलाध्याये—

'आसीत् सह्यकुलाचलाश्रितपुरे त्रैविद्यविद्वज्जने
नानासज्जनधाम्नि विज्जडविडे शाण्डिल्यगोत्रो द्विजः ।
श्रौतस्मार्तविचारसारचतुरो निःशेषविद्यानिधिः
साधूनामवधिर्महेश्वरकृती दैवज्ञचूडामणिः ॥'

असौ हि मनोरथस्य पुत्रः प्रभाकरस्य पौत्रः । अस्य हि शेखराऽऽख्यः करणग्रन्थः लघुजातकस्य टीका फलितग्रन्थः कश्चित्, प्रतिष्ठाविधिदीपकः वृत्तशताख्यो मुहूर्तग्रन्थश्च स्मृता ग्रन्थाः ।

सोमेश्वरः

सोमेश्वरो हि १०५१ शकमभितः स्थितिमान् । अस्य हि मानसोल्लासः सुविस्तृतो ग्रन्थो यस्य ज्योतिषमप्यन्यतमो विषयः । अत्र हि ग्रहसाधनार्थं १०५१ शक आरम्भकालत्वेन प्रयुक्त इति सोमेश्वरस्य तदभित एव स्थितिकालो मतः । यथोक्तं तत्र—

'एकपञ्चाशदधिके सहस्रे शरदां गते ।
शकस्य सोमभूपाले सति चालुक्यमण्डने ॥' इति ।

माधवः

माधवस्य सिद्धान्तचूडामणिः सिद्धान्तशिरोमणौ द्विः स्मृतः। तेनासौ तत्प्राग्वर्तीति ज्ञायते। असौ हि सिद्धान्तग्रन्थ आसीदित्यनेनानुमीयते।

भास्कराचार्यः

भास्कराचार्यस्य सिद्धान्तशिरोमणिः करणकुतूहलश्च प्रसिद्धौ ग्रन्थौ। आचार्योऽयं १०३६ शकाब्दमभितः स्थितिमानिति तस्यैव—

'रसगुणपूर्णमही (१०३६) समशकनृपसमयेऽभवन्ममोत्पत्तिः।
रसगुणवर्षेण (३६) मया सिद्धान्तशिरोमणी रचितः॥'

इति वचनाज्ज्ञायते। सिद्धान्तशिरोमणिर्हि १०७२ मितशकाब्दे करणकुतूहलन्तु ११०६ वर्षे यतो हि तत्र ११०५ शकाब्दमुपक्रमवर्षत्वेन गृहीतः। तदा भास्कराचार्यः सप्ततिवर्षवयस्क आसीत्। भास्कराचार्यस्य स्थानं सह्याचलनिकटवर्तिप्रदेशः कथ्यते, यद्यपि स स्वयं न किमपि तद्विषये लिखति। तस्य पिता शेखरकरणस्य प्रणेता महेश्वरः, पितामहो मनोरथः प्रपितामहश्च प्रभाकरः। असौ शाण्डील्यगोत्रीयो द्विजः। स स्वयमेव कथयति—

'आसीत् सह्यकुलाचलाश्रितपुरे त्रैविद्यविद्वज्जने
नानासज्जनधाम्नि विज्जडविडे शाण्डील्यगोत्रो द्विजः।
श्रौतस्मार्तविचारसारचतुरो निःशेषविद्यानिधिः
साधूनामवधिर्महेश्वरकृती दैवज्ञचूडामणिः॥
तज्जस्तच्चरणारविन्दयुगलप्राप्तप्रसादः सुधी-
र्मुग्धोद्बोधकरं विदग्धगणकप्रीतिप्रदं प्रस्फुटम्।
एतद्व्यक्तसदुक्तियुक्तिबहुलं हेलावगम्यं विदां
सिद्धान्तग्रथनं कुबुद्धिमथनं चक्रे कविर्भास्करः॥'

(सि० शि० प्र० ६१, ६२)

सिद्धान्तशिरोमणिर्हि पाटीगणित-बीजगणित-ग्रहगणित-गोलाध्यायेति चतुर्भागेषु विभक्तः। अस्य हि प्रत्येभागः पृथग्ग्रन्थरूपः। पाटीगणितभागो हि लीलावतीसंज्ञया ख्यातः। कथ्यते हि लीलावत्याख्या तस्य दुहिताऽऽसीत्। तस्या अपरिहार्यवैधव्ययोगं दृष्ट्वाऽपरिणीतायास्तस्याः सन्ततित्वेन ग्रन्थोऽयं प्रणीत इति। अपरे तु लीलावती तस्य गृहिणी। निरपत्यायास्तस्या अपत्यत्वेन ग्रन्थोऽयं प्रणीत इति। ग्रन्थस्यास्य पृथक्पृथग्भागानां सन्त्यनेके पृथक्पृथग्व्याख्याग्रन्थाः प्रणीताः। ग्रहगणिदगोलाध्याययोर्ग्रन्थकर्त्रैव प्रणीतं वासनाभाष्यं लभ्यते, यस्योपरि नृसिंहदैवज्ञेन वासनावार्तिकं प्रणीतम्। ग्रन्थेऽस्मिन् ब्रह्मगुप्तव्याख्यातं ब्रह्मसिद्धान्तं राजमृगाङ्कतस्तदुपरि बीजसंस्कारं मुञ्जालतोऽयनांशचलनञ्च

गृहीत्वा प्रणीतोऽपि रचनावैशिष्ट्येन मौलिकग्रन्थतुलामारोहति । यद्यपि कतिपये श्लोकाः पद्मनाभस्य व्यवहारप्रदीपतो यथायथं गृहीता अपि दृश्यन्ते, तथापि नास्य मौलिकता क्षतोपपत्तिवैचित्र्यात् ; ग्रन्थस्यास्य यावत्यष्टीका लभ्यते न तथा कस्यापि ग्रन्थान्तरस्य । करणकुतूहलमस्य करणग्रन्थः । अस्यापि सन्ति बह्वष्टीकाग्रन्थाः । अस्यैवाचार्यस्य विवाहपटलाख्यो ग्रन्थोऽपि प्रथितो दैवज्ञ-समाजे । भास्करग्रन्थानामाख्यादिभाषास्वपि रूपान्तरं कृतमस्ति ।

आचार्येणानेन गणितज्योतिषस्य विस्तारः कृतः उपपत्तिश्च तत्र तत्र साधिता सबुद्धियोगम् । वेधविषयेऽनेन स्वयं न किमप्याचरितमित्यस्य दोष इन्दोः किरणेष्वङ्क इव ।

बल्लालसेनः

बल्लालसेन आचार्यो गौडाधिपतेर्लक्ष्मणसेनात्मजः । स हि निःशङ्कशङ्कर-शब्देनापि ज्ञायते । अस्य कृतिरद्भुतसागरः सर्वत्र लब्धप्रसरः । ग्रन्थोपक्रमे लिखितं यद् ग्रन्थोऽसौ लक्ष्मणसेनेन १०८९ मितशके प्रारब्धः । स तु असमाप्त एव ग्रन्थे दिवमारूढः । ततस्तत्तनयेन बल्लालसेनेन पूरित इति । असौ हि सर्व-सङ्ग्रहग्रन्थः । अत्र हि दिव्यभौमान्तरिक्षाणि त्रिविधान्येवाद्भुतानि तच्छान्ति-विधिश्च निर्दिष्टः साङ्गोपाङ्गम् । अद्भुतोत्पत्तिर्यथा तत्रोक्तम्—

'अतिलोभादसत्याद्वा नास्तिक्याद्वाऽप्यधर्मतः ।
नरापचारान्नियतमुपसर्गः प्रजायते ॥' इति ।

तत्रोक्तम्—

'ग्रन्थेऽत्र वृद्धगर्गगर्गपराशरवसिष्ठगार्गीयान् ।
बार्हस्पत्यबृहस्पतिकठस्थितिब्रह्मसिद्धान्तान् ॥
आथर्वणाद्भुताशितषट्त्रिंशद् ब्रह्मर्षिकृतीः ।
गार्गीयमतौशनसे कालावलिसूर्यसिद्धान्तौ ॥
विन्ध्यवासिबदरायणौशनःशालिहोत्रविधुगुप्तसुश्रुतान् ।
पीलुकार्यनृपपुत्रदेवलान् भार्गवीयविजयायकाश्यपान् ॥
नारदमयूरचित्रे चरकं यवनेश्वरस्य मतम् ।
निखिलं वराहमिहिराचार्यग्रन्थं वसन्तराजकृतिम् ॥
मार्कण्डेयपुराणं स्कान्दं भागवतमाद्यमाग्नेयम् ।
पाद्मं मत्स्यपुराणं रामायणभारताख्याने ॥
हरिवंशविष्णुधर्मोत्तरे निबन्धं चरिष्यमाणश्च ।
वचनं तेषां सारान् बहुशोऽर्थान्वीक्ष्य सोऽद्राक्षीत् ॥' इति ।

नरपतिः

नरपतिर्हि १०९७ मितशकाब्दमभितः स्थितिमत्त्वेनानुमितः । अस्य हि

स्थानत्वेन अनहिलपत्तनं मतम्। आचार्योऽसौ जैनधर्मावलम्बी। अस्य पिता आम्रदेवो धारानगर्यां निवसति स्म।

ग्रन्थेऽस्मिन् स्वरमाध्यमेन विशेषतो राज्ञां शुभाशुभफलं निर्दिष्टम्। तत्रोक्तम्—

'श्रुत्वादौ यामलान् सप्त तथा युद्धजयार्णवम्।
कौमारीकौशलञ्चैव योगिनां योगसम्भवम्॥
रक्ताक्षं तन्त्रमूर्तिञ्च स्वरसिंहस्वरार्णवम्।
भूवलं गारुडं नाम लम्पटं स्वरभैरवम्॥
तन्त्रं रणाङ्गं दाक्षञ्च सिद्धान्तं जयपद्धतिम्।
पुस्तकेन्द्रं पटोकश्रीदर्पणं ज्योतिषार्णवम्॥
सारोद्धारं प्रवक्ष्यामि..............................।' इत्यादि।

अनन्तदेवः

भास्कराचार्यवंश्योऽयमाचार्य इति ११४४ शके उट्टङ्किताच्छिलालेखाज्ज्ञायते। अस्य ह्याचार्यस्य द्वौ ग्रन्थौ प्रथितौ ब्राह्मस्फुटसिद्धान्तस्य छन्दश्चित्युत्तरस्य टीका वृहज्जातकस्य टीका च।

वाविलालकोच्चन्ना

आचार्यस्यास्य १२२० मितशकाब्दमुपक्रम्य प्रणीतः करणग्रन्थो लभ्यत इति शङ्करबालकृष्णसाक्ष्येण ज्ञायते।

ग्रन्थोऽयं सूर्यसिद्धान्तानुसारी। एतदधिकं न किमपि ज्ञायते विषयेऽस्मिन्।

कालिदासदैवज्ञः

कालिदासदैवज्ञस्य ज्योतिर्विदाभरणं प्रसिद्धो ग्रन्थः। यद्यपि स आत्मानं कलिगत ३०६८ वर्षमभितः स्थितिमन्तं रघुवंशादिकाव्यप्रणेतुरभिन्नञ्च कथयति, तथापि वस्तुस्थितिस्तद्भिन्नैव दृश्यते। यथाहि—

'वर्षे सिन्धुरदर्शनाम्बुधिगुणैर्याते कलेः सम्मिते
मासे माधवसंज्ञके च विहितो ग्रन्थक्रियोपक्रमः।
नानाकालविधानशास्त्रगदितं ज्ञानं विलोक्यादरा-
दूर्जे ग्रन्थसमाप्तिरत्र विहिता ज्योतिर्विदां प्रीतये॥' इति।

अनेनास्य कालः २३ विक्रमशकः आयाति, किन्तु तस्यैव प्रथमाध्यायस्याष्टादशश्लोकाशयेन यथा—

'शाकः शराम्भोधियुगोनितो हृतो मानं खतर्कैरयनांशका मताः।'

इत्यनेन तस्य प्रणयनकालः ४४५ शको दृश्यते, यो हि कलिगत ३६२५ वर्षसंवादी। अपरञ्च तत्र ऐन्द्रयोगस्य तृतीयांशे व्यतीते सूर्याचन्द्रमसोः क्रान्ति-

साम्यमुक्तं यद्धि ११६४ शक एव भवति। तेनास्य प्रणयनकालः ११६४ शकमभितो दृश्यते। श्लोकस्त्वित्थम्—

'ऐन्द्रे विभागे च गते भवेत् तयोः शेषे ध्रुवेऽपक्रमसाम्यसम्भवः।
यद्येकरेखास्थितभेशचण्डगू स्यातां तदाऽपक्रमचक्रवालके॥'

तेन हि ग्रन्थेऽस्मिन् विक्रमसम्बद्धश्लोकाः पश्चात् केनाप्युपक्षिप्ता नामसादृश्यात् प्राचीनतासिद्धये वा। वस्तुतस्तु ग्रन्थोऽयं कालिदासनाम्ना केनाऽपि दैवज्ञेन ११६४ मितशकाब्दमभितः प्रणीत इति सुधाकरशङ्करबालकृष्णगोरक्षप्रसादादीनां मतमुपयुक्तमेव। यच्च भाऊदाजीमहोदयेनास्य समयः षट्शतवैक्रमाब्दः स्थिरीकृतस्तद् भ्रमादेवेति गणकतरङ्गिण्यां स्पष्टम्। यदि नाम ग्रन्थोऽयं रघुवंशादिकर्तृकालिदासप्रणीतोऽभविष्यत् तदाऽयं कस्मिंश्चिदपि प्राचीनग्रन्थे स्मृतोऽभविष्यद्वा येन केनापि तदैव व्याख्यातोऽभविष्यत्। किन्तु केवलं १६३४ शके भावरत्नेन प्रणीता सुखबोधिकाख्या टीकैव लभ्यते। अनेनाऽप्यस्यार्वाचीनत्वं सिध्यति। ग्रन्थोऽयं सरलः सुखबोध्यश्च।

केशवार्कः

आचार्योऽसौ केशवनाम्नाऽपि स्मृतः। अस्य हि विवाहवृन्दावनं नाम मुहूर्तग्रन्थः करणकण्ठीरवाख्यः करणग्रन्थश्च प्रसिद्धौ। करणग्रन्थो हि विवाहवृन्दावनटीकायां गणेशदैवज्ञेन स्मृतः। आचार्योऽसौ भारद्वाजीयगोत्रीय औदीच्यो ब्राह्मणः। अस्य पिता राणगः, पितामहो हि श्रियादित्यः प्रपितामहो नारायणः। अस्य स्थितिकालः ११६५ मितशकाब्दमभितोऽनुमितः। विवाहवृन्दावनस्य कल्याणवर्मकृता टीकाऽपि स्मर्यते। टीकाकृद्धि सारावलीकाराद्भिन्नः कश्चिदपर एव सम्भवति, कालवैषम्यात्। असौ हि जातकपद्धतिकारात् केशवाचार्याद्भिन्नः प्राचीनश्च।

महादेवः

महादेवाचार्यस्य ग्रहसिद्धिः प्रसिद्धः करणग्रन्थः। अत्रत्या महादेवी सारणी सर्वैराद्रियते। अस्य हि १२३८ शक उपक्रमवर्षः। तेनाचार्यस्यास्यापि स एव स्थितिकालः। ग्रन्थोऽयं चक्रेश्वराचार्येणोपक्रान्तो महादेवाचार्येण पूरितः। यथोक्तं तत्र—

'चक्रेश्वरारब्धनभश्चराशुसिद्धिं महादेव ऋषींश्च नत्वा'। इति।

महादेवो हि गौतमगोत्रीयो ब्राह्मणस्तस्य पिता पद्मनामः पितामहश्च माधवः। किन्तु पाठान्तरे तु पितृत्वेन परशुरामः स्मृतः। यथोक्तम्—

'पैतामहार्यभटजिष्णुजभास्करादिसिद्धान्तभेदकठिने नितरामगाधे।
सङ्ख्यार्णवे खचरकर्म्मजले निमग्नज्योतिर्विदां प्रतरणाय दृढोरुनावम्॥'

तथैव—

'नागाग्न्यर्कोनशाकघ्ना गुणकाः क्षेपसंयुताः ।
पलान्तावादिमौ कार्यौ विपलान्ताः परे ध्रुवाः ॥' इति ।

स्थानञ्चास्य गोदानिकटवर्तिप्रदेशः । नृसिंहदैवज्ञेन १४५० शके टीका प्रणीताऽस्ति ।

महेन्द्रसूरिः

आचार्योऽसौ भृगुपुरनिवासी मदनसूरिशिष्यः । अनेन हि १२९२ शके यन्त्रराजाख्यकरणग्रन्थः प्रणीतः । यथोक्तम्—

'श्रीसर्वज्ञपदाम्बुजं हृदि परामृश्य प्रभाव्यं परं
श्रीमन्तं मदनाख्यसूरिसुगुरुं कल्याणकल्पद्रुमम् ।
लोकानां हितकाम्यया प्रकुरुते सद्यन्त्रराजागमं
नानाभेदयुतं चमत्कृतिकरं सूरिर्महेन्द्राभिधः ॥'

ग्रन्थराजस्य हि महेन्द्रसूरेः शिष्येण मलयेन्दुसूरिणा टीका प्रणीताऽस्ति । यथा हि तत्रोपक्रमे—

'प्रणम्य सर्वज्ञपदारविन्दं सूरेर्महेन्द्रस्य पदाम्बुजञ्च ।
तनोति तद्गुम्फितयन्त्रराजग्रन्थस्य टीकां मलयेन्दुसूरिः ॥' इति ।

अस्य हि ग्रन्थारम्भशकः १२९२ मित इति महेन्द्रसूरेः स्थितिकालोऽपि स एवानुमितः ।

महादेवः

कौडिन्यगोत्रीयो बोपदेवपुत्रो महादेवः १२८९ शके कामधेनुसंज्ञककरणग्रन्थं प्रणीतवान् । अत्र सन्ति ३५ श्लोकाः सारिण्यश्च । आचार्योऽसौ ग्रहसिद्धिप्रणेतुर्महादेवाद्भिन्नः । ग्रन्थेऽस्मिन् वर्षगतिक्षेपकप्रभृतयोऽपि निरूपिताः । अत्र हि द्वाविंशतिकोष्ठकपटे तिथिसिद्धिः साधिता ।

नार्मदः

नार्मदाचार्येण सूर्यसिद्धान्तस्य टीका कृतासीद्वा तदधिकृत्य कश्चिद् ग्रन्थः प्रणीत आसीदिति दामोदरप्रणीतभटतुल्यकरणतो ज्ञायते । असौ हि दामोदरस्य पितामह इति तस्य स्थितिकालः १३०० मितशकाब्दमभितोऽनुमितः ।

तेजःसिंहः

शकानन्तरं १३०० मितवर्षमभितः स्थितिमता तेजःसिंहाऽऽख्येन विदुषा दैवज्ञालङ्कृतिर्नाम ग्रन्थः प्रणीतः । ग्रन्थोऽयं प्रायेण जातकसम्बद्धः ।

पद्मनाभः

नार्मदस्यात्मजो दामोदरस्य पिता पद्मनाभः प्रसिद्धो ज्योतिर्विदासीत् ।

असौ हि व्यवहारप्रदीपकारात् पद्मनाभाद्भिन्नः । अस्य यन्त्ररत्नावली प्रसिद्धो ग्रन्थः । अस्य हि प्रणेत्रैव विवृतिरपि प्रणीताऽऽसीत् ।

दामोदरः

आचार्योऽसौ पद्मनाभस्य सुतो यस्य भटतुल्यं नाम करणग्रन्थः प्रथितः । अस्य १३३९ शक उपक्रमवर्ष इति दामोदरस्य स्थितिकालोऽपि स एव । ग्रन्थादावुक्तम्—

'दामोदरः श्रीगुरुपद्मनाभपादारविन्दं शिरसा प्रणम्य ।
प्रत्यब्दशुद्धचार्यभटस्य तुल्यां विदां मुदेऽहं करणं करोमि ॥
श्रीनर्मदादेवसुतस्य मत्पितुः श्रीपद्मनाभस्य समस्य भावतः ।
यस्मात् सुसम्पन्नमनुग्रहाद् गुरोर्भूयादिहैतत्पठनात्प्रदं श्रियः ॥'

ग्रन्थोऽसौ आर्यमतानुसारी ।

वैद्यनाथः

वैद्यनाथो हि १३५० मितशकाब्दमभितः स्थितिमत्त्वेनानुमितः । अस्य हि जातकपारिजातः प्रसिद्धो जातकग्रन्थः । ग्रन्थादावुक्तम्—

'भारद्वाजकुलोद्भवस्य विदुषः श्रीवेङ्कटाद्रेरिह
ज्योतिःशास्त्रविशारदस्य तनयः श्रीवैद्यनाथः सुधी ।
होरासारसुधारसज्ञविबुधश्रेणीमनःप्रीतये
राशिस्थाननिरूपणादिसकलं वक्ष्ये यथानुक्रमम् ॥' इति ।

अनेन ज्ञायते यदाचार्योऽसौ भारद्वाजगोत्रीयः श्रीवेङ्कटेशसुतः । आचार्योऽसौ जातकपद्धतिप्रणेतुः केशवस्य गुरुरिति मुहूर्ततत्त्वे 'गुरुवैजनाथचरणद्वन्द्वे रतः केशवः' इति कथनाज्ज्ञायते । केशवस्य स्थितिकालः १४१८ शकमभित इति ग्रहकौतुके उपक्रमवर्षतो ज्ञायते । तेनास्याचार्यस्य समयोऽपि तत्समीपवर्त्येवेति सामान्यतः १३५० शकमभितोऽनुमितः । जातकपारिजातोऽन्वर्थनामा ग्रन्थो यत्र सर्वेऽपि जातकविषयाः साङ्गोपाङ्गं निरूपिताः ।

गङ्गाधरः

गङ्गाधरो हि चन्द्रभट्टस्य सुतः । असौ हि सगरनगरनिवासी । एतस्य सूर्यसिद्धान्तानुसारि चान्द्रमानाभिधानतन्त्रं प्रसिद्धम् । तत्रोक्तम्—

'समभूमध्यरेखायां श्रीशैलात् पश्चिमाश्रिते ।
कृष्णावेणीभीमरथ्योर्मध्ये जगति पावने ॥
सगरं नाम नगरं जगत्यद्यापि विश्रुतम् ।
श्रीमत्सूर्यकुलोत्पन्नसगरेण विनिर्मितम् ॥

तस्मिंस्तु नगरे श्रीमज्जमदग्निकुलोद्भवः ।
लक्ष्मीनृसिंहभक्तोऽभूद् भूसुरो विट्ठलाह्वयः ॥
वेदवेदाङ्गशास्त्राणामागमानाञ्च तत्त्ववित् ।
तस्यात्मजस्तु भट्टार्यो विद्वान् विष्णुपरायणः ॥
तत्पुत्रश्चन्द्रभट्टाख्यो ज्योतिःशास्त्रकलानिधिः ।
गङ्गाधरस्तु तत्पुत्रः सर्वशास्त्रविशारदः ॥
तेन सङ्गृह्य रचितं सूर्यसिद्धान्तसम्मतम् ।
चान्द्रमानाभिधं तन्त्रं कुशलानन्दकारकम् ॥' इति ।

ग्रन्थारम्भसमयश्च यथा तत्रोक्तम्—

'वर्तमाने कलौ पञ्चत्रिपञ्चाब्धिसमाः समाः ।' इति ।

तेन ग्रन्थारम्भशकः १३५६ शकः । अत्र हि मनुमानानन्तरमक्षरासु कालविधिविनाडिकादिमानं साम्प्रतिकसूर्यसिद्धान्ताद्विशिष्टम् । अनेन भास्करीयलीलावत्या अपि टीका प्रणीताऽस्ति ।

मकरन्दः

१३३० मितशकाब्दमभितो जातेन वाराणसीवास्तव्येन मकरन्दाऽऽख्येन विदुषा सूर्यसिद्धान्तानुसारतिथ्यादिसाधनाय सारिणीरूपो मकरन्दाख्यो ग्रन्थः प्रणीतः १४०० मितशकमभितः । तत्रोक्तम्—

'श्रीसूर्यसिद्धान्तमतेन सम्यग् विश्वोपकाराय गुरूपदेशात् ।
तिथ्यादिपत्रं वितनोति काश्यामानन्दकन्दो मकरन्दनामा ॥' इति ।

असौ हि फलितवादिनां ज्योतिर्विदां परमसुहृत् । अस्य हि दिवाकरेण १५४० शके टीका प्रणीता, तथैव १६८८ शके गोकुलनाथदैवज्ञेनास्य सारिणीनामुपपत्तिर्लिखिता । मकरन्देन हि सूर्यसिद्धान्ते बीजसंस्कार आहितः । ज्योतिर्विदसौ काशीनिवासी ।

शार्ङ्गधरः

१४०० शकमभितः स्थितिमता शार्ङ्गधराचार्येण विवाहपटलाख्यो ज्योतिषग्रन्थः प्रणीतः । अस्यैव शार्ङ्गधरसंहिता च प्रसिद्धा । आचार्योऽसौ सर्वतन्त्रस्वतन्त्र आसीदिति तद्ग्रन्थाध्ययनतो ज्ञायते ।

केशवः (द्वितीयः)

केशवाचार्यो नन्दिग्रामवास्तव्यो वैद्यनाथशिष्यो ज्योतिषशास्त्रे प्रसिद्ध आचार्य आसीत् । नन्दिग्रामश्चापरान्तदेशे पश्चिमसमुद्रस्य पूर्वदिशि आसीत् । असौ हि कौशिकगोत्रीयो ब्राह्मणो यस्य पिता कमलाकराख्यः पण्डितः । असौ हि विवाहवृन्दावनप्रणेतुः केशवार्काद्भिन्नः । सन्त्यस्य बहवो ग्रन्थाः, येषां सूचीत्थं तदात्मजेन गणेशदैवज्ञेन मुहूर्ततत्त्वटीकायामुक्ता—

'सोपायं ग्रहकौतुकं खगकृतिं तच्चालनाऽऽख्यं कृतेः
सिद्धिं जातकपद्धतिं सविवृतिं तार्तीयके पद्धतिम् ।
सिद्धान्तेऽप्युपपत्तिपाठनिचयं मौहूर्ततत्त्वाभिधं
कायस्थादिजधर्मपद्धतिमुखं श्रीकेशवार्योऽकरोत् ॥'

ग्रहकौतुकतट्टीकावर्षग्रहसिद्धितिथिसिद्धिग्रहचालनगणितदीपिकाजातकपद्धति-तट्टीकाताजिकपद्धतिसिद्धान्तपाठकावस्याद्याचारपद्धतिकुण्डाष्टलक्षणादिग्रन्थजात-निबन्धानन्तरमहं केशवो मुहूर्ततत्त्वं वक्ष्ये...............।'

अनेन ज्ञायते यदस्य ग्रहकौतुकमाद्यो ग्रन्थो मुहूर्ततत्त्वञ्च चरमः । ग्रहकौतुके १४१८ शक उपक्रमवर्ष इति तदभित एव तस्य स्थितिकालः । अस्य हि जातक-पद्धतिस्ताजिकपद्धतिश्च प्रसिद्धौ सर्वत्र लब्धप्रचारौ ग्रन्थौ ।

असौ हि न केवलं ग्रन्थप्रणेताऽपितु वेधकुशलश्चासीत् । स ग्रहकौतुकस्य स्वोपज्ञटीकायां स्वयमेव कथयति—

'ब्राह्मार्यभटसौराद्येषु ग्रहकरणेषु बुधशुक्रयोर्महदन्तरमङ्कतया दृश्यते । मन्दे आकाशे नक्षत्रग्रहयोगे उदयेऽस्ते च पञ्चभागा अधिकाः प्रत्यक्षमन्तरं दृश्यते । ....एवं क्षेपेष्वन्तरं वर्षभोगेष्वपि अन्तरमस्ति । एवं बहुकाले बह्वन्तरं भविष्यति । यतो ब्राह्माद्येष्वपि भगणादीनां सावनादीनाञ्च बह्वन्तरं दृश्यते । एवं बहुकाले बह्वन्तरं भवत्येव ।'..........इत्यादि ।

मुहूर्ततत्त्वान्त उक्तम्—

'ज्योतिःशास्त्रमहार्णवादुदहरन्मौहूर्ततत्त्वं बहु
व्याप्यल्पं गुरुवैद्यनाथचरणद्वन्द्वे रतः केशवः ।
नन्दिग्रामगतः सुतस्तु कमलज्योतिर्विदग्र्यस्य त-
द्योऽधीते स विराजते सदसि चाऽऽदेशी यशस्वी क्षितौ' ॥' इति ।

अनेनाऽस्य पिता कमलाकर इति ज्ञायते । पुत्रप्रसिद्धया विहितप्रभावोऽप्य-सावाचार्यो ज्योतिर्विदामग्रगण्यः ।

गणेशदैवज्ञः

गणेशदैवज्ञो हि केशवसुतः प्रसिद्धो ज्योतिर्विदासीत् । अस्य हि त्रयो-दशाधिका ग्रन्थाः प्रसिद्धाः । प्राधान्येनास्य ग्रन्था यथा नृसिंहाचार्येण स्वकृत-ग्रहलाघवटीकायामुक्ता—

'कृत्वादौ ग्रहलाघवं लघुबृहत्तिथ्यादिचिन्तामणी
सत्सिद्धान्तशिरोमणौ च विवृतिं लीलावतीव्याकृतिम् ।
श्रीवृन्दावनटीकया च विवृतिं मौहूर्ततत्त्वस्य वै
सच्छ्राद्धादिविनिर्णयं सुविवृतिं छन्दोऽर्णवाख्यस्य वै ॥

सुधीरञ्जनं तर्जनीयन्त्रकञ्च सुकृष्णाष्टमीनिर्णयं होलिकायाः ।
लघूपायपातस्तथान्याः...॥'

विवाहवृन्दावनटीकायां स स्वयमेवापि कथयति—

'कृत्वादौ ग्रहलाघवाख्यकरणं तिथ्यादिसिद्धिद्वयं
श्लोकैः श्राद्धविधिं सवासनतया लीलावतीव्याकृतिम् ।
सप्रक्षेपमुहूर्ततत्त्वविवृतिं पर्वादिसन्निर्णयं
तस्मान्मङ्गलनिर्णयाद्यथ कृता वैवाहसद्दीपिका ॥' इति ।

एतदतिरिक्तं पर्वनिर्णयोऽपि तस्य ग्रन्थत्वेन स्मृतः । ग्रहलाघवमस्याद्यो ग्रन्थः पर्वनिर्णयश्च चरमः । ग्रहलाघवे १४४२ शक उपक्रमवर्षत्वेन गृहीतः । तेन स एव तस्य प्रणयनकालः । लघुचिन्तामणिः १४४७ शके प्रणीतः, लीलावतीटीका तु १४६७ शके, पातसारिणी १४६० शके, विवाहवृन्दावनटीका १५०० शके प्रणीता ।

ग्रहलाघवं हि तस्य सर्वत्र लब्धप्रसरो ग्रन्थः । ज्योतिषविषये तस्य सुविपुलं ज्ञानं तेनात्र निहितम् । ग्रहसाधनविषये तेन तत्रोक्तम्—

'सौरोऽर्कोऽपि विधूच्चमङ्ककलिकोनाब्जो गुरुस्त्वार्यजो-
ऽसृग्राहू च कुजज्ञकेन्द्रकमथार्यः सेषुभागः शनिः ।
शौक्रं केन्द्रमजार्यमध्यगमितोमे यान्ति दृक्तुल्यताम् ॥'

अर्थात् सौरसिद्धान्ततः सूर्याचन्द्रमसौ दृग्गणिततुल्यौ भवतो यदा तत्र चन्द्रमसि नवकलाः शोधिता भवन्ति । आर्यपक्षीयकरणप्रकाशानुसारेण भौमराहू तथैव शनिश्च यदि तत्र पञ्चांशाः संयोजिताः । ब्राह्मपक्षीयकरणकुतूहलतः बुधकेन्द्रं तथैव । असौ हि ग्रहसाधनाय ४०१६ दिनानामेकमहर्गणचक्रं मन्यते, येन गणिते सौकर्यं भवति । स हि ज्याचापं विनैव गणितं साधयति । तथाकरणे स श्रीपतिभास्कराचार्यौ अनुसरति । श्रीपतिर्हि ज्याखण्डसाधनं विनैव चापद्वारा ज्यासाधनं निर्दिष्टवान् । तदनुसृत्य भास्कराचार्येण ज्याचापं विनैव द्युतिसाधनं कृतम् । गणेशदैवज्ञेन तु ज्याचापं विनैव सर्वमेव गणितं साधितम् ।

गणेशाचार्येण हि सरलतमयुक्त्या संसाध्य गणितं सर्वसुलभं तु कृतं किन्तु अनेन हि सिद्धान्तज्योतिषाध्ययनवेधादीनां तु प्रायः लोप एव कृत इति केचिद्वदन्ति । आचार्योऽसौ जातकालङ्कारप्रणेतुर्गणेशदैवज्ञाद्भिन्नः ।

रामचन्द्रः

ब्राह्मपक्षीयकरणकुतूहलस्य १४८२ शकप्रणीतटीकातो ज्ञायते यद्रामचन्द्राऽऽख्येन केनाऽपि विदुषा १४२० शकमभितः कल्पद्रुमाख्यः करणग्रन्थः प्रणीत आसीदिति । तेन हि स्वकरणे करणकुतूहलसाधितग्रहे बीजसंस्कार आहितः । विषयेऽस्मिन्नैतदधिकं ज्ञातमस्माकम् ।

लक्ष्मीदासः

उपमन्युगोत्रेण वाचस्पतिपुत्रेण केशवाख्यपौत्रेण लक्ष्मीदासेन १४२२ शके भास्करीयसिद्धान्तशिरोमणेरुत्तरभागद्वयस्य गणिततत्त्वचिन्तामणिनाम्नी टीका प्रणीताऽस्ति। तत्रोक्तम्—

'शिरोमणिविबोधने सुजननागनाथैरितः
सुहृद्गुणाकरप्रगुणदेवनाथार्पितः ।
हितैरनघराघवैरपि निजानुजोर्बीधर-
....॥' इति।

ज्ञानराजः

ज्ञानराजो हि नागनाथस्य तनयो नृसिंहाख्यस्य प्रपौत्रः। असौ भारद्वाज-गोत्रीयो ब्राह्मणः। अस्य सिद्धान्तसुन्दरं नाम सिद्धान्तग्रन्थो ज्ञानराजजातकञ्च प्रसिद्धौ ग्रन्थौ। सिद्धान्तसुन्दरे हि १४२५ शक उपक्रमवर्षत्वेन गृहीत इति स एवास्य स्थितिकालः।

सिद्धान्तसुन्दरं हि सूर्यसिद्धान्तानुसारी ग्रन्थः। अत्र प्रथमं गोलाध्यायस्ततो गणिताध्यायः। अत्र सिद्धान्ते बहुत्र भास्कराचार्यादीनां मतं खण्डितमस्ति, यद्धि प्रायो युक्तियुक्तं दृश्यते। तत्रोक्तम्—

'इत्थं श्रीमन्नागनाथात्मजेन प्रोक्ते तन्त्रे ज्ञानराजेन रम्ये।
ग्रन्थागाराधारभूते प्रभूते गोलाध्याये लोकसंस्था निरुक्ता॥'

तथैव—

साङ्घ्रिशक्रशतशोधितो भवेच्छालिवाहनशकोऽब्दसञ्चयः।
सङ्गुणः खगगुणेन योजितः क्षेपकेण शरदि ध्रुवो भवेत्॥'

एतत्कृतं बीजगणितं भास्करीयबीजगणितच्छायानुरूपमपि यत्र कुत्र भास्करीयसूत्रमेव पर्यालोचितमपि दृश्यते।

सूर्यः

सूर्यो हि सूर्य इव ज्योतिषपारङ्गत आसीत्। सन्त्यस्य पञ्चदशाधिका ग्रन्थाः प्रसिद्धाः। असौ हि ज्ञानराजात्मजः १४३० शके जातः। अस्य हि सिद्धान्त-संहितासारसमुच्चयः, ग्रहविनोदः (करणग्रन्थः), गणितमालती बीजगणितञ्चेति स्वतन्त्रग्रन्थाः। अनेन भास्करीयलीलावत्या अमृतकूपिकाख्याः बीजगणितस्य सूर्यप्रकाशाख्या, एवमेव अन्या अपि व्याख्याः प्रणीताः। श्रीपतिपद्धतिगणित-मप्यनेन प्रणीतम्। बीजटीकारम्भे उक्तमस्ति—

'यत्पादाम्बुरुहप्रसादकणिकासञ्जातबोधादहं
पाटीकुट्टकबीजतन्त्रगहनाकूपारपारङ्गमः ।

छन्दोऽलङ्कृतिकाव्यनाटकमहःसङ्गीतशास्त्रवित्
तं वन्दे निजतातमुत्तमगुणं श्रीज्ञानराजं गुरुम् ॥'

निभाल्यतामस्य काव्यच्छटाऽपि—

'दुर्ज्ञेया गणितोपपत्तिरथ च ज्ञाताऽपि नो शक्यते
वक्तुं सूक्ष्मतरप्रमेयगहनां यस्मादतः कुत्रचित् ।
गूढार्था प्रमिताक्षराऽपि कुहचित्तच्छोधजातश्रमः
क्षन्तव्यः सुजनैस्तदुक्तिजनितः स्वल्पोऽपराधो मम ॥
आस्वादिताऽपि विबुधैरुपयाति बुद्धि-
व्यक्तादिपक्षयुगलेऽपि तनोति शोभाम् ।
पूर्णा कलाभिरत एव सुधांशुमूर्ते-
राधिक्यमेति गणितामृतकूपिकेऽयम् ॥'

एवमेव—

'अव्यक्तं गणितं सवासनतया व्याख्याय लीलावतीं
व्याख्यातुं विहिताऽऽदरोऽस्म्यहमथ व्यक्तोपपत्तिक्रमैः ।
श्रीमत्सुज्ञविधिज्ञपण्डितवरज्ञानाधिराजात्मजः
स्वप्रज्ञापरिणामतः सुगणकः सूर्याभिधानः कविः ॥' इत्यादि ।

पीताम्बरः

पीताम्बराचार्येण विवाहपटलाख्यो ग्रन्थः प्रणीतः । आचार्योऽयं १४४४ शकमभितः स्थितिमान् । ग्रन्थोऽयं विवाहसम्बद्धान् सर्वानेव विषयान्निरूपयति ।

हरिभट्टः

हरिभट्टाख्येन विदुषा ताजकसाराख्यो ग्रन्थः प्रणीतः, यस्य १४४५ शकमभितः स्थितिकालोऽनुमितः । ग्रन्थोऽयं सर्वविधं ताजकविषयमभिव्यवहरति ।

शिवदासः

शिवदासो हि १४४६ शकमभितः स्थितिमान् कथितः । तस्य ज्योतिर्निबन्धः प्रथितो ग्रन्थः । ग्रन्थोऽयं प्राधान्येन मुहूर्तविषयकः ।

अनन्तः

श्रीकान्तात्मजेन अनन्ताचार्येण अनन्तसुधारसाख्यः पञ्चाङ्गगणितग्रन्थः प्रणीतः । अस्य प्रणयनकालः १४४७ शकः । तत्रोक्तम्—

'ढुण्ढिविनायकचरणद्वन्द्वं मुदमादधन्नत्वा ।
सूक्त्यानन्तरसाख्यं तनुते श्रीकान्तजोऽनन्तः ॥' इति ।

आचार्योऽसौ कौशिकगोत्रः टापरग्रामनिवासी १४४७ शकमभितःस्थितिमान् ।

नृसिंहः

नृसिंहो हि १४४० शकमभितः स्थितिमान् प्रसिद्धो दैवज्ञ आसीदिति 'तत्रत्यदैवज्ञनृसिंहसूनुः' इति ढुण्ढिराजकथनाज्ज्ञायते। सन्त्यनेके नृसिंहाभिधा दैवज्ञाः प्रसिद्धा न च सर्वत्र ग्रन्थे वंशपरिचयोऽस्ति दत्तः। अतः कतमोऽयं नृसिंह इति इदमित्थन्तया वक्तुं दुष्करमेव।

अनन्तदैवज्ञः

चिन्तामणिदैवज्ञस्य तनूजोऽसौ १४४० शकमभितः स्थितिमत्त्वेनानुमितः। असावेव नीलकण्ठरामदैवज्ञयोः पिताऽऽसीत्। अस्य हि जातकपद्धतिः कामधेनुगणितटीका च प्रसिद्धौ ग्रन्थौ। गोविन्ददैवज्ञो हि मुहूर्तचिन्तामणेष्टीकायां पीयूषधाराख्यायां तद्ग्रन्थौ स्मरति। सुधाकर अमुमनन्तदैवज्ञो द्वितीय इत्यभिदधाति। यथोक्तं मुहूर्तचिन्तामणौ—

'आसीद्धर्मपुरे षडङ्गनिगमाध्येतृद्विजैर्मण्डिते
ज्योतिर्वित्तिलकः फणीन्द्ररचिते भाष्ये कृतातिश्रमः।
तत्तज्जातकसंहितातिलककृन्मान्यो महाभूभुजां
तर्कालङ्कृतिवेदवाक्यविलसद्बुद्धिः स चिन्तामणिः॥
ज्योतिर्विद्गणवन्दिताङ्घ्रिकमलस्तत्सूनुरासीत् कृती
नाम्नाऽनन्त इति प्रथामधिगतो भूमण्डलाहस्करः।
यो रम्यां जनिपद्धतिं समकरोद् दुष्टाशयध्वंसिनीं
टीकाञ्चोत्तमकामधेनुगणितेऽकार्षीत् सतां प्रीतये॥' इति।

असौ हि विदर्भदेशाभिजनः काशीवास्तव्यः।

ढुण्ढिराजः

नृसिंहपुत्रः पार्थपुरवास्तव्यो ढुण्ढिराजः १४६३ शकमभितः स्थितिमत्त्वेनानुमितः। जातकाभरणम्, सुधारसकरणचषकः, ग्रहलाघवोदाहरणम्, ग्रहकलोपपत्तिः, पञ्चाङ्गफलम्, कुण्डकल्पलता चेति तत्प्रणीतत्वेन प्रसिद्धा ग्रन्थाः। एतेष्वप्यस्य जातकाभरणं सर्वत्र लब्धप्रसरो बहूपयुक्तश्च ग्रन्थः। यद्यप्यसौ ग्रन्थरचनाकालं नैव निर्दिशति तथाप्यस्य ज्ञानराजशिष्यत्वात् सूर्यदाससमकालिक एवासाविति ज्ञायते। यथोक्तं तत्र—

'ज्ञानराजगुरुपादपङ्कजं मानसे खलु विचिन्त्य भक्तितः।
जातकाभरणनाम जातकं जातकज्ञसुखदं विधीयते॥' इति।

ग्रन्थान्ते च—

'गोदावरीतीरविराजमानं पार्थाभिधानं पुटभेदनं यत्।
सङ्गीतविद्यामलकीर्तिभाजां मत्पूर्वजानां वसतेः स्थलं तत्॥

तत्रत्यदैवज्ञनृसिंहसूनुर्गजाननाराधनताभिमानः ।
श्रीढुण्ढिराजो रचयाम्बभूव होरागमेऽनुक्रममादरेण ।।' इति ।

गणितामृतकूपिकाप्रणयनकालस्तु यथोक्तं तत्र सूर्यदासेन स्वयमेव—
'सदला त्रिसहस्री स्यादनुष्टुभां ग्रन्थसम्मितः शाके ।
त्रिरसपुरन्दर(१४६३)गणिते गणितामृतकूपिका रचिता ।।' इति ।

नृसिंहाचार्यः

ग्रहलाघवप्रणेतुर्गणेशदैवज्ञस्य भ्रातुः रामाख्यस्य पुत्रो नृसिंहदैवज्ञः १४८० शकमभितो महादेवप्रणीतग्रहसिद्धिमनुसृत्य मध्यमग्रहसिद्धिग्रन्थं प्रणीतवानासीत् । कृष्णशास्त्रिसाक्ष्येण शङ्करबालकृष्णो निर्दिशति यदनेन १५१० शके ग्रहकौमुदी-संज्ञकग्रन्थमपि प्रणीतम् । अस्य हि जन्मवर्षत्वेन १४६० शकोऽनुमितस्तज्ज्ञैः ।

गणेशः

पार्थपुराभिजनेन ढुण्ढिराजात्मजेन गणेशदैवज्ञेन ताजिकभूषणपद्धतिः प्रणीता । एतत्प्रणयनकालः १४८० शकमभितोऽनुमितः । तत्रोक्तम्—

गर्गाद्यैर्यवनैश्च रोमकमुखैः सत्यादिभिः कीर्तितं
शास्त्रं ताजिकसंज्ञकं···· ···· ···· ···· ··· ···· ।।' इत्यादि ।

अनेन गर्गाचार्य-यवनाचार्य-रोमकाचार्य-सत्याचार्यादीनां ताजिकग्रन्थप्रणे-तृत्वं ज्ञायते, येन सिध्यति यन्न हि ताजिकं केवलं यवनानामेव मस्तिष्कोत्पादन-मिति ।

कच्चपल्लुः

कच्चपल्लुनाम्ना दैवज्ञेन १४७९ शके ज्योतिषदर्पणो नाम मुहूर्तविषयक-ग्रन्थः प्रणीतोऽस्ति । स हि काण्वशाखीयो वत्सगोत्रीयः कोडपल्लीग्रामाभिजन इति शङ्करबालकृष्णसाक्ष्येण ज्ञायते । स हि पैलुभटीयनामकं पञ्चाङ्गसाधक-ग्रन्थमपि स्मरति ।

रघुनाथः

केनाऽपि रघुनाथनाम्ना दैवज्ञेन सुबोधमञ्जरीसंज्ञको ब्राह्मपक्षीयः करण-ग्रन्थः प्रणीतोऽस्ति । अस्योपक्रमवर्षः १४८४ शक इति रघुनाथस्यापि स एव स्थितिकालोऽनुमितः । अत्र हि ग्रहसाधनमहर्गणद्वारैव कृतं शून्यायनांशवर्षत्वेन ४४४ शकाब्दो गृहीतः ।

रघुनाथः

सोमभट्टात्मजो रघुनाथो मणिप्रदीपाख्यं सौरपक्षीयकरणग्रन्थं प्रणीतवा-निति—

'आलोक्य भास्करकृतानखिलान् प्रबन्धान्
पूर्वैः कृतानपि व सूर्यमतेन खेटान् ।
वक्ष्ये ततः स्फुटतरान् रघुनाथशर्मा
सङ्क्षेपतो ग्रहविदां श्रमनोदनाय ॥' इति ।

सुधाकरसाक्ष्येण ज्ञायते यदत्र नास्ति कश्चिद्विशेष इति ।

कृपारामः

कृपारामाख्यस्य विदुषः सर्वार्थचिन्तामणिः, पञ्चपक्षीटीका, मुहूर्ततत्त्वटीका, वास्तुचन्द्रिका, बीजगणितोदाहरणम्, मकरन्दोदाहरणम्, यन्त्रचिन्तामण्युदाहरणञ्चेति ग्रन्था आसन्निति आफ्रेचसूचीमनुसृत्य शङ्करबालकृष्णः साक्षयति । मुहूर्ततत्त्वं हि १४२० शकमभितः प्रणीतमिति कृपारामस्य स्थितिकालस्तदनन्तरवर्त्येवेति तत्त्वेन १४९० शकमभितोऽनुमितः ।

नारायणः

टापरग्रामनिवासिना हरेः पौत्रेण अनन्तपुत्रेण नारायणाख्येन विदुषा प्रणीतो मुहूर्तमार्तण्डाख्योऽन्वर्थनामा ग्रन्थः । ग्रन्थस्यास्य प्रणयनकालः १४९३ शकः । तत्रोक्तम्—

'श्रीमत्कौशिकपावनो हरिपदद्वन्द्वार्पितात्मा हरि-
स्तज्जोऽनन्त इलासु रोचितगुणो नारायणस्तत्सुतः ।
ख्यातं देवगिरेः शिवालयमुदक्तस्मादुदक्टापरे
ग्रामस्तद्वसतिर्मुहूर्तभुवनं मार्तण्डमत्राकरोत् ।
त्र्यङ्केन्द्रप्रमिते (१४९३) वर्षे शालिवाहनजन्मतः ।
कृतस्तपसि मार्तण्डोऽयमलं जयतूद्गतः ॥' इति ।

अस्य ग्रन्थकर्त्रैव टीकाऽपि प्रणीताऽस्ति । तत्रोक्तम्—

'आसीत् सासमणूरनामनगरे श्रीकौशिकस्यान्वये-
ऽनन्तो वाजसनेयिपूज्यचरणो माध्यन्दिनीयाग्रणीः ।
कृष्णस्तत्तनयः श्रुतिस्मृतिविदामग्रेसरेज्यो हरि-
स्तत्पुत्रः श्रुतिवित्तदात्मजवरोऽनन्तोऽग्निहोत्री गुरुः ॥
तत्पुत्रस्तदनुग्रहात्तधिषणो नारायणष्टापर-
ग्रामे शिष्यगणेच्छया निजकृतग्रन्थस्य टीकां स्फुटाम् ।
चक्रेऽस्यां कृपया परोपकृतये शोध्यं दुरुक्तं बुधै-
र्मादृक्षस्य विलोक्य धाष्टर्यमपि ते कुप्यन्ति नो सज्जनाः ॥
सुखनिधिपुरुषार्थक्ष्मासमाभिः समाभिः
परिमितशककाले जातमार्तण्डटीकाम् ।

लिखति पठति विप्रः सोऽत्र भूयाद्धरित्र्यां
सुखनिधिपुरुषार्थक्ष्मासमावान् क्षमावान् ॥' इति ।

सर्वत्र लब्धप्रसरो ग्रन्थोऽयमतिप्रामाणिकत्वेन जनैः पठ्यते काव्यधियाऽपि ।

दिनकरः

वारेजग्रामवासिना कौशिकगोत्रेण दिनकरेण वृहत्खेटकसिद्धिः, लघुखेटकसिद्धिः चन्द्रार्कौ चेति त्रयो ग्रन्थाः प्रणीताः । आचार्योऽसौ ब्राह्मस्फुटसिद्धान्तानुयायी । तत्रोक्तम्—

'श्रीमद्गोत्रे कौशिके साग्निकोऽभूदुन्दाक्षोऽयं ज्ञातिमोढप्रसूतः ।
जातो ग्रामे साभ्रमत्याः समीपे वारेजाख्ये विप्रवर्याश्रिते च ॥
तत्पुत्रजो दिनकरः सकलानि खेटकर्माणि वीक्ष्य सततं हि सवासनानि ।
चक्रे शके खखतिथिप्रमिते च संवत् पञ्चाग्निभूपतिमिते लघुखेटसिद्धिम् ॥'

एतेन सिध्यति यल्लघुखेटकसिद्धेः प्रणयनकालः १५०० शकः । वृहत्खेटकसिद्धेश्च तत्पूर्वमेव । चन्द्रार्काविस्य चरमा कृतिः । अत्राप्युपक्रमवर्षः १५०० शक एव दत्तः । यच्च महादेवसारिणी टीकायां दिनकरप्रणीतत्वेन श्लोका उद्धृतास्ते लघुखेटकसिद्धौ नैव सन्तीति प्रमाणितमेवास्य वृहद्रूपस्यास्तित्वम् ।

गङ्गाधरः

नारायणदैवज्ञस्य पुत्रेण गङ्गाधरेण १५०८ मितशके ग्रहलाघवस्य मनोरमानाम्नी टीका प्रणीता ।

नीलकण्ठः

अनन्तदैवज्ञसुतेन रामदैवज्ञाग्रजेन नीलकण्ठेन ताजिकनीलकण्ठी तोडरानन्दश्चेति द्वौ ग्रन्थौ प्रणीतौ । ताजिकनीलकण्ठी हि सर्वत्र लब्धप्रसरो बहुसम्मानितश्च ग्रन्थः, यस्य रसालाद्याः सन्त्यनेकाष्टीकाग्रन्थाः । तत्रोक्तम्—

'आसीदसीमगुणमण्डितपण्डिताग्रचो व्याख्यद्भुजङ्गयगवीः श्रुतिवित्सुवृत्तः ।
साहित्यनीतिनिपुणो गणितागमज्ञश्चिन्तामणिर्विपुलगर्गकुलावतंसः ॥
तदात्मजोऽनन्तगणोऽस्त्यनन्तो योऽधोक् सदुक्तीः किल कामधेनुम् ।
सत्तुष्टये जातकपद्धतिश्च न्यरूपयद् दुष्टमतं निरस्य ॥
पद्माऽम्बयाऽसावि ततो विपश्चित् श्रीनीलकण्ठः श्रुतिशास्त्रनिष्ठः ।
विद्वच्छिवप्रीतिकरं व्यधासीत् समाविवेकं मृगयावतंसम् ॥
शाके नन्दाभ्रबाणेन्दुमिते आश्विनमासके ।
शुक्लेऽष्टम्यां समातन्त्रं नीलकण्ठबुधोऽकरोत् ॥'

नीलकण्ठाचार्यो ह्यकबरराजसभायां प्रधानपण्डित आसीदिति सुधाकरसाक्ष्येण ज्ञायते । (तो)टोडरानन्दोऽस्य सुविस्तृतो ग्रन्थ इति शङ्करबालकृष्णसाक्ष्येण ज्ञायते ।

रामभट्टः

रामदैवज्ञो हि अनन्तदैवज्ञस्य सुतो नीलकण्ठस्यानुजः। अस्य मुहूर्तचिन्तामणिः सर्वत्र लब्धप्रसरा कृतिः। तत्रोक्तम्—

'क्रियाकलापप्रतिपत्तिहेतुं सङ्क्षिप्तसारार्थविलासगर्भम्।
अनन्तदैवज्ञसुतः स रामो मुहूर्तचिन्तामणिमातनोति ॥' इति।

ग्रन्थान्ते च—

'आसीद्धर्मपुरे षडङ्गनिगमाध्येतृद्विजैर्मण्डिते
ज्योतिर्वित्तिलकः फणीन्द्ररचिते भाष्ये कृतातिश्रमः।
तत्तज्जातकसंहितागणितकृन्मान्यो महाभूभुजाम्
तर्कालङ्कृतिवेदवाक्यविलसद्बुद्धिः स चिन्तामणिः ॥'
ज्योतिर्विद्गणवन्दिताङ्घ्रिकमलस्तत्सूनुरासीत् कृती
नाम्नाऽनन्त इति प्रथामधिगतो भूमण्डलाहस्करः।
यो रम्यां जनिपद्धतिं समकरोद् दुष्टाशयध्वंसिनीं
टीकाञ्चोत्तमकामधेनुगणितेऽकार्षीत् सतां प्रीतये ॥
तदात्मज उदारधीर्विबुधनीलकण्ठानुजो
गणेशपदपङ्कजं हृदि निधाय रामाभिधः।
गिरीशनगरे वरे भुजभुजेषुचन्द्रैर्मिते
शके विनिरमादिमं खलु मुहूर्तचिन्तामणिम् ॥' इति।

आचार्योऽसौ १५१२ शके ग्रन्थमिमं प्रणिनाय। अनेनैव १५१२ शके रामविनोदाख्यकरणग्रन्थोऽपि प्रणीतः। कथ्यते हि ग्रन्थोऽयं जयपुरशासकरामनृपतेराज्ञया प्रणीत इति। ग्रन्थोऽयं ससारिणिः। अनेन सिद्धान्तोपयोगियन्त्ररचनाविलसितो यन्त्रप्रकाशाख्यो ग्रन्थोऽपि प्रणीत आसीदिति नृसिंहविवरणतो ज्ञायते। अस्यैव तन्त्रवार्तिकग्रन्थोऽपि सुधाकरेण स्मर्यते। सुधाकरस्तु टोडरानन्दमपि अस्यैव ग्रन्थत्वेन वर्णयति, शङ्करबालकृष्णस्तु नीलकण्ठकृतित्वेन।

श्रीनाथः

रामस्य पुत्रेण रघुनाथानुजेन श्रीनाथेन १५१२ शके ग्रहचिन्तामणिसंज्ञकः करणग्रन्थः प्रणीतः। अत्र हि होराविषयोऽपि समावेशितः। शङ्करबालकृष्णसाक्ष्येण ज्ञायते यद् ग्रन्थोऽयमपूर्ण एव प्रतिभाति, यतो हि न सन्ति तत्र सारिण्यादिसामग्र्यः।

गोविन्ददैवज्ञः

नीलकण्ठात्मज १४९१ शके समुत्पन्नो गोविन्ददैवज्ञो मुहूर्तचिन्तामणेः पीयूषधाराख्यां व्याख्यां १५२५ प्रणिनाय। अस्य हि व्याकरणादिशास्त्रप्रावीण्यं

स्वीकृत्यापि सिद्धान्तज्योतिषानभिज्ञत्वं समालोचकैर्निर्दिश्यते । स हि सायनगणनायां राहुरपि सायनः क्रियते इत्यज्ञात्वैव सायनमानेन चन्द्रग्रहणं न संवदते इति यत्कथयति तदेवास्य भित्तिः । किन्तु नैतावन्मात्रं गोविन्दस्य बुधत्वापाकरणे पर्याप्तं प्रमाणम् ।

विष्णुः

तैत्तिरीयशाखाध्यायिनो भारद्वाजगोत्रस्य भट्टाचार्यस्य सुतस्य दिवाकरस्यासन् पञ्च सुता येषु विष्णुर्हि द्वितीयः । शेषाश्च कृष्णमल्लारिकेशवविश्वनाथाख्याः । विष्णुना १५३० शके सौरपक्षीयः कश्चित्करणग्रन्थः प्रणीतः । अनेनैव ग्रहचिन्तामणेः सुबोधिन्याख्या व्याख्याऽपि कृता । तत्रोपपत्तिरपि दत्ता । करणग्रन्थस्योपक्रमवाक्यं यथा—

'यः समस्तजननित्यपूजितस्तं प्रणम्य गणनायकं मुदा ।
सौरपक्षगणितं विरच्यते विश्वनाथविबुधेन साम्प्रतम् ॥'

विश्वनाथकृते एतदुदाहरणे यथा—

'गोदातीरासन्नगोलग्रामवासी द्विजोत्तमः ।
दिवाकराख्यगणकस्तत्पुत्रेण विनिर्मितम् ॥
गणितं विश्वनाथेन दैवज्ञेन सतां मुदे ।
विष्णुभ्रातृकृतग्रन्थे सूर्यपक्षसहोदरे ॥' इति ।

मल्लारिः

दिवाकरसुतेन मल्लारिणा १५२४ शके ग्रहलाघवस्य टीका प्रणीताऽस्ति । अत्र हि ग्रहलाघवस्य विद्वत्तापूर्णोपपत्तिर्दत्ता । अस्य गोले गणिते काव्ये च पाटवं प्रशस्यतमम् । तत्रोक्तम्—

'मल्लारिर्गणकाग्रणीर्गुरुपदद्वन्द्वाब्जभक्तो रतो
लब्ध्वा बोधलवं ततो हि विवृतिं सार्थोपपत्तिं स्फुटाम् ।
वर्षस्य ग्रहलाघवस्य गणकः श्रीमद्गणेशाभिध-
प्रोक्तस्याथ कृपालवो हि सुधियः पश्यन्तु तुष्यन्त्विमाम् ॥' इति ।

रङ्गनाथः

देवरातगोत्रीयेन कृष्णसुतेन रङ्गनाथेन सूर्यसिद्धान्तस्य गूढार्थप्रकाशिका टीका प्रणीता । तत्रोक्तम्—

'शके तत्त्वतिथ्युन्मिते चैत्रमासे सिते शम्भुतिथ्यां बुधेऽर्कोदयान्मे ।
दलाढ्यद्विनाराचनाडीषु जातो मुनीशार्कसिद्धान्तगूढप्रकाशो ॥'

अनेन टीकेयं १५२५ मितशके प्रणीतेति ज्ञायते । टीकेयं काश्यां प्रणीता । तत्र सर्वत्रोपपत्तयो दत्ताः । अनेन ह्यस्य ज्योतिषशास्त्रे पाटवं व्यज्यते ।

गणेशः

तापीतीरवर्तिसूर्यपुरनिवासिना गोपालात्मजेन गणेशदैवज्ञेन १५३५ शके जातकालङ्काराख्यो ग्रन्थः प्रणीतः । सन्त्यत्र स्रग्धरावृत्तगुम्फिताः ११० श्लोकाः । असौ हि गुर्जरब्राह्मणः शिवपण्डिताख्यबुधशिष्यः । तत्रोक्तम्—

'शाके मार्गणरामसायकधरासङ्ख्ये नभस्ये तथा
मासे ब्रह्मपुरे सुजातकमिदं चक्रे गणेशः सुधीः ।
छन्दोऽलङ्कृतिकाव्यनाटककलाभिज्ञः शिवाध्यापकः
तत्र श्रीशिवविन्मुदे गणितभूर्गोपालसूनुः स्वयम् ॥'

दैवज्ञस्यास्य सरला रचना जनेषु प्राप्तबह्वादरा, अस्य रचनायाः काव्यात्मकता निभालनीया दृश्यते । यथा—

'यत्पूर्वं परमं शुकास्यगलितं सज्जातकं फक्किका-
रूपं गूढतमं तदेव विशदं कुर्वे गणेशोऽस्म्यहम् ।
दैवज्ञः सुतरां यशः सुखमतिः श्रीहर्षदस्रग्धरा-
वृत्तैश्चारु नृणां शुभायनपदं श्रीमच्छिवानुज्ञया ॥' इति ।

कृष्णः

बल्लालनाम्नः पुत्रो नृसिंहदैवज्ञशिष्यो भास्करीयबीजगणितस्य बीजनवाङ्कुराख्यां बहुविशेषयुतां टीकां १५४० मितशके प्रणीतवान् । तत्रोक्तम्—

'यद्भास्करेण निजधामगुणातिरेकात् सम्पादितं सगुणवर्गधनं हि बीजम् ।
तत्कृष्णभूमिमधिगम्य विचारवारिसंसिक्तमङ्कुरजनुष्यभवत् समर्थम् ॥'
इत्यादि ।

रङ्गनाथलेखानुसारेण ज्ञायते यदनेन श्रीपतेर्जातकपद्धतेः टीकाऽपि प्रणीताऽऽसीत् । अस्य टीकायां बहुत्र नवीना कल्पनाऽपि दृश्यते ।

नृसिंहः

कृष्णदैवज्ञसुतोऽसौ १५३३ शके सूर्यसिद्धान्तस्य १५४३ शके शिरोमणिग्रन्थस्य वासनावार्तिकञ्च प्रणीतम् । यथोक्तम्—

'निजे तत्त्वमिते वर्षे सौरभाष्यं मया कृतम् ।
पञ्चत्रिंशन्मिते वर्षे वासनावार्तिकं कृतम् ॥' इति ।

एतेनास्य जन्मशकः १५०८ दृश्यते ।

दिवाकरः

नृसिंहतनयेन गोलग्रामनिवासिना १५२८ शके जातेन दिवाकरेण १५४७ शके पद्मजातकम्, १५४८ शके केशवीयजातकपद्धतेः प्रौढमनोरमाख्या टीका, स्वप्रणीतजातकपद्धतेः १५४९ शके गणिततत्त्वचिन्तामण्याख्या सोदाहरणटीका,

मकरन्दस्य मकरन्दविवरणाख्या विवृतिश्च प्रणीता। अस्य दिवाकरजातकपद्धतिश्च प्रसिद्धा।

नारायणः

नारायणाख्येन दैवज्ञेन १५४० शके केशवपद्धतिटीका प्रणीता।

नागेशः

अज्ञातवसतिना केनापि शिवाख्यपुत्रेण तुकेश्वरपौत्रेण नागेशाख्येन ज्योतिर्विदा १५४१ शकमुपक्रम्य ग्रहप्रबोधाख्यः करणग्रन्थः प्रणीतः। तत्रोक्तम्—

'आसीद् गार्ग्यकुलैकभूषणमणिर्विद्वज्जनानन्दकृत्
शिष्याज्ञानतमोनिवारणरविर्भूमीपतिप्रार्थितः।
ज्योतिःशास्त्रमहाभिमानमहिमास्पष्टीकृतब्रह्मधी-
र्धैर्योदार्यनिधिस्तुकेश्वर इति ख्यातो महीमण्डले॥
तदात्मजस्तच्चरणैकभक्तिस्तद्वत्प्रसिद्धः शिवनामधेयः।
तदङ्गजो दृग्गणितानुसारं ग्रहप्रबोधं व्यतनोच्च नागः॥' इति।

गोविन्दः

रामदैवज्ञसुतेन गोविन्देन नीलकण्ठस्य ताजिकनीलकण्ठ्याः रसालाख्या टीका १५४४ मितशकाब्दे प्रणीता।

शिवः

कृष्णात्मजेन शिवेन नृसिंहानुजेन १५४० शके मुहूर्तचूडामणिः प्रणीतः। अनेनैव अनन्तसुधारसस्य टीकाऽपि प्रणीता।

विट्ठलदीक्षितः

१५०९ मितशकाब्दे जात इत्यनुमितो विट्ठलः १५४८ मितशकाब्दमभितः मुहूर्तकल्पद्रुमं तथा १५४९ शके तट्टीकाञ्च प्रणीतवान्। तत्रोक्तम्—

'ग्रन्थाननेकानवलोक्य सम्यक् सन्दर्भिते विट्ठलदीक्षितेन।
मुहूर्तकल्पद्रुमनामधेये विचित्रसंज्ञं कुसुमं समाप्तम्॥'

ग्रन्थे यथा—

'कृष्णात्रिगोत्रे नितरां पवित्रे पवित्रकर्माऽजनि बूबशर्मा।
तत्सूनुना विट्ठलदीक्षितेन मुहूर्तकल्पद्रुम एष चक्रे॥'

तथैव—

'कल्पद्रुमश्चेत् किमु रत्नमाला चिन्तामणिं कर्करमेव मन्ये।
यदेकदेशे किल मञ्जरीयं सारं विचारं कुरु तत्त्ववेदिन्॥'

ग्रन्थोऽयं प्राचीनसङ्ग्रहपर एव।

विश्वनाथः

भट्टाचार्यपौत्रो दिवाकरपुत्रो विश्वनाथो हि द्वितीयभट्टोत्पलः। अनेन हि

१५५१ शके ताजिकनीलकण्ठीटीका प्रणीता। एवमेवानेन सूर्यसिद्धान्तस्य गहनार्थप्रकाशिकाख्या टीका, करणकुतूहलटीका, मकरन्दटीका, ग्रहलाघवटीका, पातसारिणीटीका, अनन्तसुधारसटीका, रामविनोदकरणटीका, विष्णुकरणटीका, केशवीयजातकपद्धतिटीका, सोमसिद्धान्तटीका, तिथिचिन्तामणिटीका, चान्द्रमानयन्त्रटीका, बृहज्जातकटीका, श्रीपतिपद्धतिटीका, वासिष्ठसंहिताटीका बृहत्संहिताटीका च प्रणीता। अनेन होरास्कन्धनिरूपणमपि प्रणीतम्। एतत्प्रणीता सिद्धान्तशिरोमणिटीका च स्मर्यते।

मुनीश्वरः

मुनीश्वरः सूर्यसिद्धान्तस्य गूढार्थप्रकाशिका टिप्पणस्य प्रणेतुः श्रीरङ्गनाथस्य पुत्रः १५२५ मितशके जातः। यथोक्तं गूढार्थप्रकाशिकायाम्—

'शके तत्त्वतिथ्युन्मिते चैत्रमासे सिते शम्भुतिथ्यां बुधेऽर्कोदयान्मे।
दलाढ्यद्विनाराचनाडीषु जातो मुनीशार्कसिद्धान्तगूढप्रकाशौ॥
गूढप्रकाशकं दृष्ट्वा रङ्गनाथभवं भुवि।
मुनीश्वरस्य सहजं लभन्तां गणकाः सुखम्॥' इति।

मुनीश्वरो हि १५६८ शके सूर्यसिद्धान्तोक्तभगणादीन् सङ्गृह्य **सिद्धान्तसार्वभौमं** प्रणीतवान्। ग्रन्थोऽयं सुविस्तृतः प्रायः सर्वेषामेव प्राग्वर्तिसिद्धान्तानां साररूपश्च। सरलया रीत्या विषयप्रस्तुतिरस्य वैशिष्टचम्। अत्र हि चापीयक्षेत्रप्रपञ्चाभावेन क्षेत्रसजातीयविचारशून्यतया च गोलज्ञैर्न तथादृतस्तथाप्यस्य तेन न किमपि वैशिष्टचं हीयते। अस्य हि ग्रन्थकर्त्रैव १५७२ शके स्वाशयप्रकाशिनी व्याख्या प्रणीता। नृसिंहात्मजेन रङ्गनाथेन एतद्ग्रन्थोक्तानां भङ्गीपलभागलोहगोलादिपक्षाणां खण्डनं विहितम्। पुनश्च मुनीश्वरशिष्येण तन्मण्डनमपि कृतं दृश्यते।

मुनीश्वरस्यैतदधिकं निसृष्टार्थदूत्यभिधा लीलावतीटीका सिद्धान्तशिरोमणेः मरीच्यभिधा टीका पाटीसारश्च। सिद्धान्तसार्वभौमान्ते उक्तम्—

'भाद्रे मासे शुक्लपक्षेऽहितिथ्यामिन्दोर्वारे पुष्यभे योऽभवत् तम्।
अष्टाङ्गाक्षक्ष्मामिते शाकयातवर्षेऽकार्षीत् सार्वभौमं मुनीशः॥' इति।

मरीचिटीकारम्भे उक्तम्—

'श्रीरङ्गनाथाभिधतातपादाः कृष्णानुजाः श्रीकमलाधिपास्ते।
त्रिस्कन्धपारङ्गमरङ्गमल्ला बल्लालजा भूमितले जयन्ति॥' इति।

एवमेव तत्र—

'नारायणो गणितशास्त्रकलाकलापः
श्रीसेवितः सकलशास्त्रसरोजभृङ्गः।

दैवज्ञकृष्णगुरुपादरतो गुरुर्मे
क्षमायां जयत्यखिलपण्डितवन्द्यपादः ॥
मुनीश्वरापराख्येन विश्वरूपेण धृष्यते ।
बुद्धिशाणे मरीच्यर्थं तत्सिद्धान्तशिरोमणिः ॥' इति ।

अनेनास्य विश्वरूपाख्यसंज्ञाऽपि ज्ञायते ।

कमलाकरभट्टः

नृसिंहाख्यस्य दैवज्ञस्य पुत्रस्य कमलाकरस्य सिद्धान्ततत्त्वविवेको ज्योतिषे प्राचीनपरम्परायाश्चरमो वाहकः । कमलाकरस्य जन्म १५३८ शकेऽनुमीयते । असौ हि दिवाकराद् दशवर्षैर्लघुः । सिद्धान्ततत्त्वविवेकः काश्यां १५८० शके प्रणीतोऽनेन । असौ हि मुनीश्वरग्रन्थस्य सिद्धान्तसार्वभौमस्य भास्कराचार्यस्य सिद्धान्तशिरोमणेश्च कृतदूषणसङ्कल्पः समालोचक इति कथ्यते । कथ्यते हि क्वचित्तु तेन पक्षापातधिया हठादपि दूषणं प्रोक्तमिति । असौ हि सूर्यसिद्धान्तस्य परमः पोषको यथा स तदतिरिक्तसिद्धान्तान् सुसूक्ष्ममानानपि हेयान् मन्यते ।

सिद्धान्ततत्त्वविवेके सन्ति कतिपये नवीना अपि विषया येषां तत्प्राग्वर्तिग्रन्थे समावेशो नाऽऽसीत् । ते च यथा—सम्पातस्य गत्या ध्रुवनक्षत्रस्याऽप्यस्थिरत्वं पूर्वापररात्रयोस्तस्य भिन्नस्थानत्वमित्यादि ।

कमलाकरस्य एतदतिरिक्तमपि निर्णयसिन्धुः काव्यप्रकाशटीका च प्रसिद्धा । दिवाकरशिष्योऽसौ मुनीश्वरस्य विरोधी चाऽऽसीत् । अस्य पूर्वाचार्यतो ये विशेषास्ते सुधाकरेण समुल्लिखिताः । एष हि स्वतन्त्रो गणको यस्य ज्योतिष-सिद्धान्तेऽलौकिकं पाटवम् । बलदेवमिश्रानुसारेणासौ ज्योतिषसिद्धान्तस्य प्राचीन-परम्परायाश्चरमो बिन्दुः ।

रङ्गनाथः

रङ्गनाथाचार्यो नृसिंहदैवज्ञस्य कनिष्ठतनयः १५४० शकमभितो जातः । अनेन १५६२ शके सिद्धान्तचूडामणिसंज्ञकः करणग्रन्थः प्रणीतः । अत्रासौ गति-फलानयने पूर्णान्तिसाधने च ज्ञानराजमतं दूषयति । अनेन कमलाकराज्ञया भङ्गीविभङ्गीकरणं, लोहगोलखण्डनं पलभागखण्डनञ्चेति त्रयो लघुग्रन्था मुनीश्वरमतखण्डनाय प्रणीताः । वृथाखण्डनं विहाय सन्त्यस्यानेके ग्राह्यपक्षा अपि । सिद्धान्तचूडामणिर्हि सारस्वतसुषमायां भागशः प्रकाशितोऽस्ति, यत्र कथितमस्ति—

'श्रीमानसीमगुणमण्डितपण्डितार्यचूडामणिः सुगणितागमचक्रवर्ती ।
चण्डांशुचण्डविषयः कमलाकरोऽन्यः क्षमायां जयत्यखिलपण्डितवन्द्यपादः ॥
तस्यानुजः पण्डिरङ्गनाथः सिद्धान्तचूडामणिनामधेयम् ।
सौरानुसारं सुगमप्रकारं विनिर्ममे देवविदां हिताय ॥' इत्यादि ।

नित्यानन्दः

देवदत्ताख्यतनुज इन्द्रप्रस्थनिवासी नित्यानन्दगणकः १५६१ शके सर्वसिद्धान्तराजाख्यसिद्धान्तग्रन्थं व्यरचयत्। असौ हि सायनगणनायाः पक्षपाती। एतदनुसारेण निरयनगणना न समीचीना, तत्र गतितुल्यगणनाभावात्। तेन हि न सूर्यसिद्धान्तो वास्तविकः। असौ ह्यात्मानं रोमकमतानुयायिनं कथयति। तद्विचारे रोमको हि सूर्यान्नापरः। मीमांसाध्यायोऽस्य वैशिष्टयं ग्रन्थान्तरापेक्षया। ग्रन्थान्ते तत्रोक्तम्—

'जितेन्द्रियः सत्यतपःसमेतः श्रीदेवदत्तोऽस्ति नरेन्द्रमान्यः।
नित्यानन्दस्तस्य पुत्रो द्विजानामाज्ञाकारी सूर्यलब्धप्रसादः॥
षड्गोभूपैर्विक्रमार्कस्य शाके याते चक्रे सर्वसिद्धान्तराजम्॥' इति।

ग्रन्थोपक्रमे तत्रोक्तम्—

'दृष्ट्वा रोमकसिद्धान्तं सौरञ्च ब्रह्मगुप्तकम्।
पृथक् स्पष्टान् ग्रहान् ज्ञात्वा सिद्धान्तं निर्ममे स्फुटम्॥' इति।

वस्तुत एव ग्रन्थोऽयं तथैव। किन्तु पञ्चसिद्धान्तिकोक्त-रोमकमतेनास्य विसंवादिताऽस्य तृतीयं पक्षमुद्भावयति।

बालकृष्णः

बालकृष्णाख्येन पण्डितेन ताजिककौस्तुभाख्योऽन्वर्थनामा ग्रन्थः प्रणीतः। अस्य हि १५७१ शकः प्रणयनकालः।

कृष्णः

काश्यपगोत्रीयो महादेवात्मजः कृष्णः १५७५ शके करणकौस्तुभं व्यरचयत्। ग्रन्थोऽयं केशवप्रणीतग्रहकौतुकानुसारी। तत्रोक्तम्—

'प्रकुरु तत्करणं ग्रहसिद्धये सुगमदृग्गणितैक्यविधायि यत्।
इति नृपेन्द्रशिवाभिधनोदितः प्रकुरुते कृतिकृष्णविधिज्ञराट्॥' इति।

सम्भवति शिवोऽयं महाराष्ट्रकेशरी शिववीर एव। अपि च—

'कृष्णः कोङ्कणसत्तटाकनगरे देशस्थवर्यो वसन्।' इति।

अत्र मध्यमग्रहसाधनं वर्षगणद्वारा कृतमस्ति शून्यायनांशवर्षत्वेन ४५० शको गृहीतः अयनांशगतिश्च प्रतिवर्षं षष्टिविकलाः। अस्य तन्त्ररत्नाख्यः सुविस्तृतो ग्रन्थः।

बलभद्रः

भारद्वाजगोत्रीयो दामोदरपुत्रो रामदैवज्ञस्य शिष्यो बलभद्रमिश्रः १५६४ शकमभितः हायनरत्नं होरारत्नञ्चेति ग्रन्थद्वयमरचयत्। यथोक्तं हायनरत्ने—

'पृथ्वीपतिमहावीरश्रीमत्साहिसुजान्तिके ।
श्रीराजमहलस्थेन मया ग्रन्थो विनिर्मितः ॥' इति ।

अपि च ग्रन्थादौ—

'दामोदरस्य तनयौ जातौ बलभद्रबलरामौ ।
बलभद्रेण च किञ्चित् प्रकाश्यते ताजिकं गुरोः कृपया ॥' इति ।

आचार्योऽसौ १५१४ शकमभितो जात इत्यनुमीयते ।

रत्नकण्ठः

१५४६ शके जातेन शङ्करपुत्रेण रत्नकण्ठेन शिवकण्ठाख्यपुत्रार्थं पञ्चाङ्गकौतुकाख्यः सारिणीग्रन्थः १५८० शके प्रणीतः । अयमेव तत्रोपक्रमवर्षः । रत्नकण्ठो हि काश्मीर इत्यनुमितः । ग्रन्थेऽस्मिन् सूर्यचन्द्रगतितिथ्यादिभोग्यमानैस्तिथ्यादिघटीपलानयनार्थं कोष्ठकानि प्रणीतानि सन्ति ।

रघुनाथः

रघुनाथदैवज्ञो हि १५८२ शके मुहूर्तमालाख्यग्रन्थं प्रणीतवान् । ग्रन्थोऽयं मुहूर्तविषयकः ।

विद्दणः

मल्लयस्य पुत्रेण विद्दणाचार्येण १५८२ शकमभितो वार्षिकतन्त्रं प्रणीतम् । असौ हि वकापुरवास्तव्यः । ग्रन्थोऽयं सूर्यसिद्धान्तानुसारी । अनेन तत्र बीजसंस्कारोऽप्याहितः । अस्य हि १६३४ शके टीकाऽपि प्रणीता केनचित् । अस्यैव ग्रहणमुकुराख्यो ग्रन्थोऽपि स्मर्यते ।

महादेवः

महादेवाख्येन विदुषा १५८३ शके मुहूर्तदीपिकाख्यो ग्रन्थः प्रणीतः ।

गोविन्दः

१६०० शकमभितः स्थितिमता गोविन्ददैवज्ञेन होराकौस्तुभाख्यो ग्रन्थः प्रणीतो बृहज्जातकटीका च ।

गणपतिः

१६०७ शकमभितः स्थितिमतो गणपतिदैवज्ञस्य मुहूर्तगणपतिः प्रणीतः ।

चिन्तामणिः

चिन्तामणिनाम्ना केनाऽपि विदुषा १६०७ शके रमलचिन्तामणिः प्रणीतः ।

जटाधरः

जटाधराख्येन श्रीनगरवास्तव्येन केनापि विदुषा १६२६ शके फत्तेशाहप्रकाशकरणं प्रणीतम् । असौ हि वनमालिनः पुत्रः । फत्तेशाहो हि तत्कालीनगढवालनरेशः ।

माधवः

माधवाख्येन विदुषा १६२५ शकमभितः सामुद्रिकचिन्तामणिः प्रणीतः ।

दादाभटः

माधवाख्यस्य सामुद्रिकचिन्तामणिप्रणेतुः पुत्रेण दादाभटेन सूर्यसिद्धान्तस्य किरणावल्याख्या व्याख्या १६४१ शके प्रणीता । टीकाऽसौ दादाभटस्य वैदुष्यस्य साक्षिणी ।

नारायणः

नारायणोऽसौ दादाभटात्मजः । असौ हि १६६० मितशकाब्दमभितः स्थितिमान् । अनेन हि होरासारसुधानिधिः, ताजिकसुधानिधिः, गणकप्रिया, स्वरसागरः नरजातकव्याख्या चेति ग्रन्थाः प्रणीताः । गणकप्रिया प्रश्नग्रन्थस्तत्र । स्वरसागरो हि नरपतिजयचर्यामनुसरति ।

परमानन्दः

परमानन्दो हि सारस्वतो ब्राह्मणः काशीराजसभापण्डितः । अनेन १६६० शके प्रश्नमाणिक्यमाला प्रणीता । असौ हि जातकग्रन्थो यस्य सन्ति चत्वारो भागाः । असौ हि ज्योतिषस्कन्धत्रये एव विचक्षण आसीदिति सुधाकरसाक्ष्येण ज्ञायते । काशीनरेशो बलवन्तसिंहोऽस्याश्रयदाताऽऽसीत् ।

जगन्नाथः

जगन्नाथः सम्राट् जयपुरनरेशजयसिंहानुरोधेन सिद्धान्तसम्राट्संज्ञकं सिद्धान्तग्रन्थं प्रणीतवान् । कथ्यते हि ग्रन्थेऽस्मिन् त्रयोदशाध्यायाः, १४१ प्रकरणानि १९१ क्षेत्राणि च सन्तीति । तत्रोक्तम्—

> 'तुष्टयै श्रीजयसिंहस्य जगन्नाथाह्वयः कृती ।
> ग्रन्थं सिद्धान्तसम्राजं सम्राट् रचयति स्फुटम् ॥' इति ।

जगन्नाथोऽसौ दाक्षिणात्यः पेरुभट्टाख्यसुतो रसगङ्गाधराद्यनेकग्रन्थानां प्रणेता । अनेन हि अरबीभाषातो युक्लेदाख्यग्रन्थस्य संस्कृतभाषायां रेखागणितनाम्नाऽनुवादोऽपि कृतः ।

नयनसुखोपाध्यायः

नयनसुखो हि जयसिंहस्यैव सभापण्डित आसीत् । अनेन हि 'कटर'-संज्ञितो बीजगणितग्रन्थः प्रणीतः । ग्रन्थेऽस्मिन् सन्ति त्रयोऽध्यायाः ५९ क्षेत्राणि च । अस्यापि १६७० शकमभितः स्थितिकालः ।

जयसिंहः

जयसिंहोऽसौ मत्स्यदेशाधिपतित्वेन स्मृतः । असौ हि १६१५ शके सिंहासनमारूढः । अयमेव साम्प्रतिक-जयपुरस्य संस्थापकः । असौ ज्योतिषशास्त्रे स्वयमपि

पारङ्गत आसीत् । अनेन कारिताः सिद्धान्तसम्राट्-कटरप्रभृतयो ज्योतिषग्रन्थाः संस्थापिताश्च चतस्रो वेधशालाः काशी-मथुरा-जयपुर-हस्तिनापुरेषु । असौ हि विदुषामाश्रयभूमिरासीत् । जगन्नाथनयनसुखोपाध्यायलोकमणिप्रभृतयो विचक्षणा आसन्नस्य सभायाम् । अनेन संस्थापिता वेधशालाः काश्यादिषु सम्प्रत्यपि वर्तन्ते । जगन्नाथः साक्षयति—

'राजाधिराजो जयसिंहदेवः श्रीमत्स्यदेशाधिपतिश्च सम्राट् ।
श्रीरामपादाम्बुजदत्तचित्तो यज्वा सदा दानरतः सुशीलः ॥
गोलादियन्त्रेषु नवीनयुक्तिप्रचारदक्षो गणितागमज्ञः ।
सत्यप्रियः सत्यरतः कृपालुस्तिग्मप्रतापो जयति क्षमायाम् ॥
स धर्म्मपालो गणितप्रवीणान् ज्योतिर्विदो गोलविचारदक्षान् ।
कारुंस्तथाऽऽहूय चकार वेधं गोलादियन्त्रैर्द्युसदाञ्च भानाम् ॥
श्रीगोविन्दसमाह्वयादिविबुधान् वृन्दाटवीनिर्गतान्
यस्तत्रैव निराकुले शुचिमनोभावः स्वभक्त्याऽनयत् ।
म्लेच्छान् मानसमुन्नतान् स्वतरसा निर्जित्य भूमण्डले
जीयात् श्रीनरसिंहदेवनृपतिः श्रीराजराजेश्वरः ॥' इत्यादि ।

राघवः

राघवाचार्येण १६६२ शकमभितः पद्धतिचन्द्रिकाख्यो जातकग्रन्थः प्रणीत इति शङ्करबालकृष्णः साक्षयति ।

जयरामः

जयरामाऽऽख्येन विदुषा १६६७ मितशकमभितः रमलामृतसंज्ञको ग्रन्थः प्रणीतः । ग्रन्थोऽयं रमलविषये समुल्लेखनीयः ।

लक्ष्मीपतिः

लक्ष्मीपतिर्हि १६७० शकमभितः प्रसिद्धो ज्योतिर्विदासीदिति सुधाकर-साक्ष्येण ज्ञायते । नाऽस्य कश्चिद् ग्रन्थः सम्प्रति समुपलभ्यः ।

बबुआज्योतिषी

असौ स्वसमये प्रसिद्धो ज्योतिर्विदासीदिति सुधाकरो वर्णयति । अस्य स्थितिकालः १६७५ शकमभितः । नास्य कश्चिद् ग्रन्थः सम्प्रति समुपलभ्यः ।

शङ्करः

रैवतकाचलवासी वसिष्ठगोत्रीयः शङ्करः शुक्राख्यस्य पुत्रः १६८८ शके वैष्णवकरणाख्यग्रन्थं प्रणीतवान् । स हि स्वं विष्णुगुप्तमतानुसारिणं कथयति, किन्तु व्यवहारे भास्कराचार्यमनुसरति । अत्र हि शून्यायनांशवर्षत्वेन ४४५ शको गृहीतः । नास्त्यत्र कश्चिद् विशेषः समुल्लेखनीयः । अत्रोक्तम्—

'स्थूलं कृतं भानयनं यदेतज्ज्योतिर्विदां संव्यवहारहेतोः ।
सूक्ष्मं प्रवक्ष्येऽथ मुनिप्रणीतं विवाहयात्रादिफलप्रसिद्धयै ॥' इति ।

ग्रन्थान्ते च—

'आसीद्रैवतकाचले गिरिवरे वासिष्ठगोत्रोद्भव-
ख्यातश्चारुगुणाकरैर्हरिहरो रामाभिधस्तत्सुतः ।
तत्पुत्रो हि धनेश्वरः सुकृतिवान् तज्ज्ञः शुकाख्यः सुधीः
तत्सूनुः करणं हि वैष्णवमिदं चक्रे कविः शङ्करः ॥' इति ।

बालकृष्णः

बालकृष्णो हि प्रसिद्धो ज्यौतिषिक आसीदिति सुधाकरसाक्ष्येण ज्ञायते। अस्य समयः १६९२ मितशकमभित उच्यते । नास्य कश्चिद् ग्रन्थः समुपलभ्यते ।

परमसुखोपाध्यायः

असावपि स्वसमये प्रसिद्धो ज्यौतिषिक आसीत् । अस्य हि समयः १६९० मितशकाब्दमभितः । नास्य कश्चिद् ग्रन्थः स्मर्यते ।

मणिरामः

भारद्वाजगोत्रीयेन यजुर्वेदीयब्राह्मणेन मणिरामेण लालमणिपुत्रेण १६९६ शके ग्रहगणितचिन्तामणिः प्रणीतः । काश्यपगोत्रीयो वत्सराजोऽस्य गुरुः । असौ हि गुर्जरः प्रतीयते । ग्रहलाघवसमानस्तरोऽयं ग्रन्थः । अत्र हि ग्रहानयनं ग्रहलाघवादपि सूक्ष्मतरम् । अत्र मध्यमग्रहे रेखान्तरसंस्कारो दत्तः, सर्वत्र भुजान्तरचरसंस्कारश्च । वस्तुतस्त्वसौ दृग्गणिततुल्यसाधकः । अत्र हि सरलयुक्त्या सारिण्योऽपि प्रणीताः ।

मूला

गार्ग्यगोत्रीयनारायणाख्यपुत्रेण युलाख्येन विदुषा १७०३ शके ब्रह्मसिद्धान्तसारः प्रणीतः । ग्रन्थोऽसौ ब्रह्मपक्षीयः । सन्त्यत्र द्वादशाधिकाराः । असौ हि सिद्धान्तशिरोमणेर्मध्यमाधिकारसङ्क्षेपः । अत्र हि अहर्गणेन ग्रहसाधनं कृतम् ।

मथुरानाथः

मथुरानाथो हि मालवीयब्राह्मणः काशीनिवासी १६८० शकाब्दमभितो जातः । अनेन १७०४ शके यन्त्रराजघटना प्रणीता । तत्रोक्तम्—

'श्रीयन्त्रराजघटनाविधिरेष काश्यामीशप्रयोजितधिया मथुरेश्वरेण ।
श्रीमद्गुरुस्वपदरेणुवराञ्जनेन कालापरोक्षमतिना रुचिरो व्यधायि ॥
तन्त्रान्तरीयबहुलश्रमखेदभाजः सौकर्यतः सकलकालकलावबुद्धयै ।
तन्वन्तु सम्यगवलोक्य तु यन्त्रराजं तोषन्ततः समुपयात्विह कालकालः ॥' इति ।

अस्यैव ज्योतिषसिद्धान्तसाराख्यो ग्रन्थश्च शङ्करबालकृष्णेन स्मर्यते । सन्त्यत्राष्टावध्यायाः । ग्रन्थोऽयं यूरोपीयपद्धतिमाश्रित्य प्रणीतः । मथुरानाथः सदानन्दाख्यपुत्रः पाटलीपुत्राभिजनः ।

चिन्तामणिदीक्षितः

सतारानिवासिना चिन्तामणिदीक्षितेन (१६५८–१७३३ श०) १७१० शकमभितः सूर्यसिद्धान्तस्य सारिणी प्रणीता, तथैव १७१३ शके गोलानन्दसंज्ञकवेधविषयकग्रन्थः प्रणीतः, यस्य यज्ञेश्वरेण टीका प्रणीता । असौ हि वत्सगोत्रो विनायकपुत्रश्चिपलुणाभिजनः ।

सेवारामशर्मा

सेवारामशर्मा हि स्वसमये प्रसिद्धो ज्यौतिषिक आसीत् । अस्य समयः १७१७ शकमभितः । नास्य कश्चिदपि ग्रन्थः समुपलभ्यते ।

लज्जाशङ्करशर्मा

लज्जाशङ्करशर्मा गौडजातीयो मोरब्राह्मणः १७२६ मितशकाब्दमभितः स्थितिमान् । असौ हि स्वसमये प्रसिद्धो ज्यौतिषिक आसीत् । एवं हि सुधाकरो भूरिशः प्रशंसते । नास्य कश्चिद् ग्रन्थः समुपलभ्यते ।

नन्दलालशर्मा

नन्दलालाख्यः सरयूपारीणब्राह्मणः स्वसमये प्रसिद्धो ज्यौतिषिक आसीत् । अस्य समयः १७२६ शकमभितः । नास्य कश्चिद् ग्रन्थः समुपलभ्यते ।

राघवः

आपापन्तात्मजेन खाँडेकरोपनामकेन राघवाचार्येण पुणताम्बेग्रामनिवासिना १७३२ शकमभितः **खेटकृतिः** प्रणीता । ग्रन्थोऽयं ग्रहलाघवानुसारी । अनेन १७४० शके जातकपद्धतिचन्द्रिका प्रणीता । अस्य १७४१ शके आद्यागोस्वामिना ललिताख्या टीका प्रणीता । एतदतिरिक्तमनेन पञ्चाङ्गार्कग्रन्थोऽपि प्रणीतः ।

शिवः

विश्वामित्रगोत्रीयेन महादेवात्मजेन लक्ष्मेश्वरवासिना शिवज्योतिर्विदा १७३७ शके ग्रहलाघवानुसारी तिथिपारिजातग्रन्थः प्रणीतः ।

दिनकरः

शाण्डिल्यगोत्रेण अनन्ताख्यपुत्रेण दिनकरेण १७३४ मितशके यन्त्रचिन्तामणिटीका प्रणीता । अस्य हि ग्रहविज्ञानसारिणी (१७३४ श०), मासप्रवेशसारिणी (१७४४ श०), लग्नसारिणी, क्रान्तिसारिणी (१७५३ श०), चन्द्रोदयाङ्कजालः (१७५७ श०), दृक्कर्मसारिणी (१७५८ श०), ग्रहणाङ्कजालः (१७५५–१७६१) गणेशस्य पातसारिण्याः टीका (१४४४ श०) च तज्ज्ञैः स्मर्यन्ते ।

सुवाजी बापू

मालवाप्रान्तवर्तिना सुवाजीबापूसंज्ञकेन सिहोरसंस्कृतपाठशालाप्रधानाध्यापकेन सिद्धान्तशिरोमणिप्रकाशाख्यो ग्रन्थः प्रणीतः। ग्रन्थोऽसौ स्वल्पकायः। १७५० शकमभितोऽस्य स्थितिः।

यज्ञेश्वरः

शाण्डिल्यगोत्रो हि सदाशिवात्मजो यज्ञेश्वरः १७४० शकमभितः स्थितिमान्। अनेन प्रणीता अनेके ग्रन्थाः। अनेन हि सुवाजीबापूप्रणीतसिद्धान्तशिरोमणिप्रकाशस्य खण्डनार्थं ज्योतिषपुराणविरोधमर्दनं नाम ग्रन्थः प्रणीतः १७५० शकमभितः। १७६४ शकेऽनेन यन्त्रराजस्य यन्त्रराजवासनाऽऽख्या टीका, चिन्तामणिप्रणीतगोलानन्दस्य अनुभाविकानाम्नी टीका चिन्तामणेर्मणिकान्तिटीका च प्रणीताः। प्रश्नोत्तरमालिकाऽस्यापरो ग्रन्थः।

नृसिंहः (बापूदेवः)

बलदेवमिश्रो हि नृसिंहनीलाम्बरप्रभृतीन् आधुनिकज्योतिर्विदान् मन्यते। तदनुसारेण विंशतिशताब्द्यां नीलाम्बरबापूदेवसुधाकरशङ्करबालकृष्णदीक्षितयोगेशचन्द्ररायकेतकरआप्टेप्रभृतयो विद्वांसोऽभवन्। ये चाङ्गलभाषामधीत्य तत्रत्यनवीनगणितज्ञानं सम्पाद्य तद्बलेनैवानेकग्रन्थान् रचयामासुः। तेषु बापूदेवो मूर्द्धन्यः। असौ हि १७४३ शके कार्तिकशुक्लषष्ठ्यां ऋग्वेदीयचितयावनब्राह्मणात् सीतारामात् सत्यभामायां जातः। असौ १८१२ शके दिवङ्गतः। बहुसम्मानितोऽयं विचक्षणो महामहोपाध्याय इत्यपि स्मर्यते जनैः (१८८७ श०)। अस्य प्रसिद्धिर्न केवलं भारतेऽपितु यूरोपीयदेशेष्वपि आसील्लब्धप्रसरा। अनेन भास्करीयसिद्धान्तशिरोमणिः संशोध्य स्वटिप्पणीभिर्विभूष्य सम्पादितः लीलावत्याष्टिप्पणी सम्पादिता। रेखागणितं (प्रथमाध्यायः), सरलत्रिकोणमितिः, सायनवादः, प्राचीनज्योतिषाचार्यवंशवर्णनम्, अष्टादशविचित्रप्रश्नसङ्ग्रहः, सोत्तरः तत्त्वविवेकपरीक्षा, मानमन्दिरस्थयन्त्रवर्णनम्, अङ्कगणितं फलितविचारश्चास्य कतिपये ग्रन्थाः। नीलाम्बराचार्य एतद्विषये साक्षयति—

'यद्गोलपाण्डित्यविशेषरङ्गे सिद्धान्तकर्तुः पटुताविभङ्गः।
सम्भूषयन् शङ्करराजधानीं विद्याप्रदाता जगतामिदानीम् ॥' इति।

देवकृष्णः

देवकृष्णो हि स्वसमये प्रसिद्धो ज्योतिर्विदासीत्। असौ हि गौडब्राह्मणो रामधनमिश्रतनयो लज्जाशङ्करशिष्यः सुधाकरगुरुश्च। अमुं सुधाकरो जगद्गुरुरिति सम्मानयति। असौ हि १७४० शके जातः। नास्य कश्चिद् ग्रन्थः समुपलभ्यते।

जीवनाथः

जीवनाथो हि शम्भुनाथात्मजो मैथिलः पाटलिपुत्रनिवासी । असौ हि सुप्रसिद्धो ज्योतिर्विदासीत् । अनेन भास्करीयबीजगणितस्य टीका प्रणीता । अस्य हि भावप्रकाशः फलितज्योतिषग्रन्थः सर्वत्र लब्धप्रसरः । अस्य स्थितिकालः १७४४ शकमभितः ।

नीलाम्बरः

जीवनाथस्यानुजोऽयं बहुसमादृतो ज्यौतिषिकः । असौ हि १७४५ शके जातः १८०५ शके दिवङ्गतश्च । अनेन गोलप्रकाशाख्यश्चतुष्पाद् ग्रन्थः प्रणीतः । तत्रोक्तम्—

'गङ्गागण्डकिसङ्गमे हरिहरक्षेत्रं क्षितौ विश्रुतं
तस्मात् क्रोशयुगान्तरे सुरनदीतीरे परे दक्षिणे ।
ख्याते पाटलिपुत्रसंज्ञनगरे विद्वज्जनैर्मण्डिते
ज्योतिर्दर्शनसर्वदर्शनयशाः मान्यो वदान्यो विदाम् ॥
श्रीशम्भुनाथः सुकृतैकगाथः कृपैकपाथः पतिरीशनाथः ।
अभूद् द्विजेन्द्रः सुचकोरचन्द्रः क्षितावुपेन्द्रः स्मरणे वितन्द्रः ॥
तदङ्गजः सर्वविदा समानः त्रिस्कन्धपारङ्गमताऽभिधानः ।
चकास्ति शिष्यादिविराजमानः श्रीजीवनाथः कविलब्धमानः ॥
नीलाम्बराख्योऽकृत तत्कनिष्ठस्तल्लब्धबोधः परमैकनिष्ठः ।
गोलप्रकाशाभिधमाशुबोधं निरस्तसन्देहमनोऽनुरोधम् ॥' इति ।

विनायकः (केरो लक्ष्मण छत्रे)

काश्यपगोत्रीयस्य ऋग्वेदीयब्राह्मणस्य विनायकस्य जन्म महाराष्ट्रस्य अष्टागरप्रान्ते १७४६ शकेऽभूद् दिवङ्गतश्च स १८०६ शके । अनेन १७७२ शके पाश्चात्यज्योतिषग्रन्थाधारेण ग्रहसाधनकोष्ठकसंज्ञकग्रन्थः प्रणीतः । अत्र हि वर्षमानं सूर्यसिद्धान्तानुसारि ग्रहगतिस्थितिश्च सायना गृहीता । अत्र ४९६ शकः शून्यायनांशवर्षः अयनगतिश्च प्रतिवर्षं ५०·२ विकला गृहीता ।

रघुनाथलेलेः

रघुनाथो हि १७४९ शके जात आसीत् । असौ हि काश्यपगोत्रीयो हिरण्यकेशीयशाखाध्यायी महाराष्ट्रीयचितयावनब्राह्मणः । असौ हि ज्योतिर्विद्यायां पारङ्गत आसीत्, सायनपञ्चाङ्गस्य पक्षधरश्च । एतदनुसारेण सायनपञ्चाङ्गमेव धर्मशास्त्रानुकूलं न तु निरयनम् । यद्यपि केरोपन्तप्रकाशेन नासौ समर्थोऽभूत् स्वप्रयासे तथाऽप्यस्य वैदुष्यं सदैव स्मर्यते । भारतशासनतः १८७४ शके या पञ्चाङ्गसुधारसमितिः सङ्घटिता तस्याश्च परामर्शोऽनेन संवादी यल्लौकिकपञ्चाङ्गं कामं निरयनमेवास्तु किन्तु धार्मिकपञ्चाङ्गेन तु सायनेनैव भाव्यमिति ।

रघुनाथाचार्यः

चिन्तामणिरघुनाथाचार्यस्य जन्म १७५० शके द्रविडदेशेऽभूत् । यथा हि काश्यां बापूदेवस्य यथा वा महाराष्ट्रे केरोपन्तस्य तथैवास्य मद्रदेशे प्रसिद्धिः । १८०१ शकेऽसौ दिवङ्गतः । अस्य हि ज्योतिषचिन्तामणिग्रन्थः प्रसिद्धः ।

कृष्णशास्त्री

कौशिकगोत्रीयो हिरण्यकेशीयशाखाध्यायी महाराष्ट्रब्राह्मणोऽसौ १७५३ शके जातः । असौ हि प्रवीणो ज्योतिर्विदासीत् । अस्य ज्योतिषशास्त्रेतिहासः (महाराष्ट्रचाम्) ज्योतिषशास्त्रं च शङ्करबालकृष्णेन सादरं स्मर्येते ।

कृष्णदेवः

कृष्णदेवो हि कदा जात इत्यज्ञातेऽप्यसौ १७५६ शकं यावत् स्थितिमानासीदिति ज्ञायते सुधाकरसाक्ष्येण । असौ ज्योतिषशास्त्रे पारङ्गतः पण्डित आसीत् । नास्य कापि कृतिः श्रूयते लभ्यते वा ।

गङ्गाधरः

गङ्गाधराख्येन ज्योतिर्विदा १८०५ शकमभितो मुहूर्तसिन्धुः प्रणीतः । असौ हि १७४४ शके जातः, १८१० शके शिवसायुज्यमाप्तः । असौ हि पुण्यनगरनिवासी ।

वेङ्कटेशः केतकरः

१७७५ शके जातः केतकरो गार्ग्यगोत्रीय ऋग्वेदी महाराष्ट्रब्राह्मणः । अनेन १८१२ शकमभितः ज्योतिर्गणितं नाम ग्रन्थः प्रणीतो यो हि सम्प्रति बहुलब्धप्रसरो बहूपयुक्तश्च । अत्र हि १८०० शक उपक्रमवर्षः । वर्षमानं हि ३६५।१५।२२।५३ अयनांशाश्च १८।१०।२५ । सारिणीग्रन्थोऽयं तदात्मजेन बहुविधटिप्पणीभिः समलङ्कृत्य प्रकाशितः ।

वामनकृष्णः

वामनकृष्णाख्येन विदुषा १८०३ शके बृहत्पञ्चाङ्गसाधनोदाहरणं प्रणीतम् । अत्र सङ्कलिता एतदुपयोगिबहुविधसारिण्यः ।

बालगङ्गाधरतिलकः

महाविचक्षणोऽसौ १७७८ शके जातः । असौ हि परमप्रसिद्धो विपश्चित् । अनेन १८१५ शके इङ्गलीशभाषायां ओरिअन(ORION)संज्ञको ग्रन्थः प्रणीतः, यो हि भारतीयज्योतिषस्य बहुविधं पक्षमन्नाययति याथार्थ्यतः । तदनुसारेण ऋग्वेदस्य सङ्ग्रहकालः स एव यदा वसन्तसम्पातो मृगशीर्षनक्षत्रे आसीत् । स्थितिश्चायं शकपूर्वं ४००० वर्षमभित आयातीति ।

विनायकः पाण्डुरङ्गः

१७८० शकमभितो जातो जामदग्न्यगोत्रीय ऋग्वेदी महाराष्ट्रब्राह्मणो विनायकपाण्डुरङ्गो ज्योतिषे पारङ्गतः पण्डित आसीत् । वैनायकी, द्वादशाध्यायी, कुण्डसारः, अर्घकाण्डम्, सिद्धान्तसारश्चास्य ग्रन्थाः । द्वादशाध्यायी वर्षफलोपयोगी ताजिकग्रन्थः । सिद्धान्तसारे आधुनिकमतानुसारेण भूभ्रमो निरूपितः ।

सुधाकरः

महामहोपाध्यायः सुधाकरो द्विवेदी १७८२ शके जात आसीत् । महापण्डितस्यास्य सन्ति प्रायश्चत्वारिंशद् ग्रन्थाः ज्योतिषविषये । तत्र दीर्घवृत्तलक्षणं, विचित्रप्रश्नः, वास्तवचन्द्रशृङ्गोन्नतिसाधनम्, द्युचरचारः, पिण्डप्रभाकरः, भाभ्रमरेखानिरूपणम्, धराभ्रमः, ग्रहणकरणम्, गोलीयरेखागणितम्, युक्लिडानुवादः, गणकतरङ्गिणी, प्रतिभाबोधकम्, ब्राह्मस्फुटसिद्धान्त-सूर्यसिद्धान्त-ग्रहलाघव-महासिद्धान्त-पञ्चसिद्धान्तिकादिग्रन्थानां सोपपत्तिका टीकाश्च प्रणीताः । लल्लसिद्धान्त-करणप्रकाश-करणकुतूहलप्रभृतिग्रन्थाश्च स्वोपपत्तिपुरस्सरं मुद्रापिता अनेन । आचार्योऽसौ प्राचीननव्यसिद्धान्तयोः सङ्गम आसीत् । गणकतरङ्गिणी तस्य अत्यन्तोपयोगी ग्रन्थः । तत्रावसानवाक्ये स कथयति—

'श्रीमद्भारतवर्षवर्षविलसत्सद्गोलविद्याविदां
वृत्तं न क्वचिदन्यथा शिथलया विद्यामया वामया ।
युक्त्याऽवोचमशिष्टवाक्यमखिलं सन्त्यज्य नूनं खिलं
बालानन्ददयत्र किन्तु सुधियः प्रादर्शयं स्वाशयम् ॥' इति ।

एतद्विषये वस्तुतः प्रामाणिको ग्रन्थोऽयं यं शङ्करबालकृष्णोऽपि शतशोऽनुसरति निर्दिशति च तस्य त्रुटयोऽपि यत्र कुत्र । गच्छतः स्खलनं स्वाभाविकमेव, किन्तु आर्यभटभास्कराचार्यादौ यावनप्रभावाकलनं तादृशविदुषां कृतेऽशोभनीयमेव ।

शङ्करबालकृष्णः

शङ्करबालकृष्णो हि सिद्धसरस्वतिर्ज्योतिर्विद् । अस्य हि 'भारतीयज्योतिषम्' मूलतो मराठीभाषायां निबद्धमपि विषयस्य विश्वकोष एव । ग्रन्थोऽयं १८१० शकमभितो लिखितः ।

हरिकृष्णः

हरिकृष्णाख्येन विदुषा १८६६ शकमभितः स्थितिमता बृहज्ज्योतिषार्णवः प्रणीतः ।

एषा हि ज्योतिर्विदां सङ्क्षिप्ता सूची एव । नास्माकमेतदभिमतं यदेतावन्त एव विद्वांसो ज्योतिषशास्त्रज्ञा इति । वस्तुतस्तु सन्त्यसङ्ख्येया विपश्चित एतद्विषयपारङ्गताः, किन्त्वस्माकं दुर्भाग्यवशान्नास्माभिर्ज्ञाताः । तेभ्योऽपि श्रद्धाञ्जलयः ।

कतिपयेषां ज्योतिषग्रन्थकाराणां तत्प्रणीतग्रन्थानाञ्च सूची

आधारभित्तयः

१. तत्तद्ग्रन्थाः ।
२. श्रीसुधाकरस्य गणकतरङ्गिणी (सं०) ।
३. श्रीशङ्करबालकृष्णदीक्षितस्य भारतीयज्योतिषम् (हि०) ।
४. गोरक्षप्रसादस्य भारतीयज्योतिषेतिहासः (हि०) ।
५. नेमिचन्द्रशास्त्रिणः भारतीयज्योतिषम् (हि०) ।
६. काणेमहोदयस्य धर्मशास्त्रेतिहासः (हि०) ।
७. धर्मकोशः (सं०) ।
८. तत्तद्ग्रन्थानां भूमिकापरिशिष्टभागाः ।
९. बलदेवमिश्रस्य ज्योतिषशास्त्रसिंहावलोकनम् ।
१०. केदारदत्तस्य ग्रहलाघवभूमिका ।

अनन्तरोक्ताधारेण सूचीयं प्रणीताऽस्ति । इयं हि नितान्तमेव शुद्धा समीचीना वेति नास्माकं सम्मतिः । एषा तु ग्रन्थग्रन्थकारसामान्यपरिचयमात्रोपस्थापिका । ग्रन्थकाराणां स्थितिकालश्च यथामति यथाप्राप्ति क्वचिद् ग्रन्थकारजन्माधृत्य क्वचिद् ग्रन्थप्रणयनशकमिति सामान्येन शताब्दीमात्रसूचकः ।

ग्रन्थकाराः	स्थितिकालः	ग्रन्थाः
पितामहः		पितामहसंहिता
सूर्यः		सौरसंहिता
लगधः	१४०० श० पू०	वेदाङ्गज्योतिषम्
नारदः	श० पू०	नारदसंहिता
अत्रिः		अत्रिसंहिता
भृगुः		भृगुसंहिता
वसिष्ठः		वसिष्ठसंहिता
कश्यपः		कश्यपसंहिता
पौलस्त्यः		पौलस्त्यसंहिता
लोमशः		लोमशसंहिता
बादरायणः		व्याससंहिता
शौनकः		शौनकसंहिता
गर्गः		गर्गसंहिता

पराशरः		पराशरसंहिता
मयः		मयसंहिता
यवनः		यावनसंहिता
विष्णुगुप्तः		—
देवस्वामी		—
सिद्धसेनः		—
पोलिशः		पोलिशसंहिता
रोमकः		रोमकसंहिता
जीवशर्मा		
सत्याचार्यः		ध्रुवनाडीग्रन्थः
स्फुजिध्वजः	शककालानन्तरम्	यावनहोराशास्त्रम्
लाटदेवः		१. पोलिशरोमकव्याख्या
आर्यभटः	३९७ श०	१. आर्यभटीयम्
		२. (आर्यभटीयकरणम्)
वराहमिहिरः	४२७ श०	१. पञ्चसिद्धान्तिका
		२. बृहत्संहिता
		३. जातकार्णवः
		४. समाससंहिता
		५. योगयात्रा
		६. बृहज्जातकम्
		७. लघुजातकम्
		८. विवाहपटलः
		९. विवाहखण्डः
		१०. ढिकनिकयात्रा
		११. ग्रहणमण्डलफलम्
		१२. पञ्चपक्षी
		१३. दिक्किनीयात्रा
		१४. स्वल्पजातकम्
लाटसिंहः	४६०	१. सूर्यसिद्धान्तः
पृथुयशाः	४९०	१. षट्पञ्चाशिका
कल्याणवर्मा	५००	१. सारावली
लल्लाचार्यः	५२५	१. शिष्यधीवृद्धिदतन्त्रम्
		२. रत्नकोषः

		३. जातकसारः
भास्करः (प्रथमः)	५३०	१. महाभास्करीयम्
		२. लघुभास्करीयम्
		३. आर्यभटीयभाष्यम्
ब्रह्मगुप्तः	५५०	१. ब्राह्मस्फुटसिद्धान्तः
		२. खण्डखाद्यककरणम्
समरसिंहः	६००	१. ताजिकतन्त्रसारः
पद्मनाभः	७००	१. व्यवहारप्रदीपः
		२. बीजगणितम्
श्रीधराचार्यः	७२५	१. त्रिशतिका
		२. व्यक्तगणितम्
		३. जातकपद्धतिः
महावीरः	७७५	१. सारसङ्ग्रहः
मनुः	७८०	१. बृहन्मानसकरणम्
बलभद्रः	८००	१. ग्रहगणितम्
		२. बलभद्रसंहिता
		३. बलभद्रहोराशास्त्रम्
		४. खण्डखाद्यटीका
		५. बृहन्मानसम्
		६. बृहज्जातकटीका
		७. ब्राह्मस्फुटसिद्धान्तटीका
वित्तेश्वरः	८२१	१. करणसारः
मुञ्जालः	८५४	१. लघुमानसम्
आर्यभटः (द्वितीयः)	८७५	१. महासिद्धान्तः (लघु-आर्यसिद्धान्तः)
पृथूदकः	८८०	१. ब्राह्मस्फुटसिद्धान्तटीका
		२. खण्डखाद्यटीका
भट्टोत्पलः	८८८	१. बृहज्जातकटीका
		२. लघुजातकटीका
		३. षट्पञ्चाशिकाटीका
		४. प्रश्नज्ञानम्
		५. राहुन्नाकरणम्
		६. करणपातः

		७. बृहन्मानसटीका
		८. श्रूषवः (शकुनशास्त्रम्)
		९. रमलसारः
		१०. बृहत्संहिताटीका
		११. खण्डखाद्यटीका
		१२. योगयात्राटीका
विजयनन्दी	८८८	१. करणतिलकम्
भानुभट्टः	९००	१. तिलककरणम्
		२. रसायनतन्त्रम्
श्रीपतिः	९६१	१. सिद्धान्तशेखरः
		२. धीकोटिककरणम्
		३. रत्नमाला
		४. जातकपद्धतिः
		५. पाटीगणितम्
		६. बीजगणितम्
		७. रमलपद्धतिः
वरुणः	९६२	१. खण्डखाद्यटीका
भोजदेवः	९६४	१. राजमृगाङ्कः
		२. राजमार्तण्डः
		३. आदित्यप्रतापसिद्धान्तः
		४. विद्वज्जनवल्लभः
		५. रमलरत्नम्
दशबलः	९८०	१. करणकमलमार्तण्डः
ब्रह्मदेवः	१०१४	१. करणप्रकाशः
शतानन्दः	१०२१	१. भास्वतोकरणम्
उत्तमः ?	१०३८	१. करणोत्तमः
महेश्वरः	१०४०	१. शेखरः
		२. लघुजातकटीका
		३. फलितज्योतिषम्
		४. प्रतिष्ठाविधिदीपकः
		५. वृत्तशतम् (मुहूर्तग्रन्थः)
सोमेश्वरः	१०४१	१. अभिलषितार्थचिन्तामणिः
माधवः	१०६०	१. सिद्धान्तचूडामणिः

विष्णुदेवः	१०७५	१. बीजगणितम्
भास्कराचार्यः	१०८२	१. सिद्धान्तशिरोमणिः
		२. करणकुतूहलम्
		३. विवाहपटलः
बल्लालसेनः	१०९०	१. अद्भुतसागरः
नरपतिः	१०९०	१. नरपतिजयचर्या
अनन्तदेवः	११२०	१. बृहज्जातकटीका
		२. ब्रह्मसिद्धान्तटीका
कालिदासदैवज्ञः	११३५	१. ज्योतिर्विदाभरणम्
केशवार्कः	१२००	१. करणकण्ठीरवः
		२. विवाहवृन्दावनम्
महादेवः	१२३८	१. ग्रहसिद्धिः (महादेवी सारणी)
महेन्द्रसूरिः	१२६०	१. यन्त्रराजः
महादेवः	१२८९	१. कामधेनुकरणम्
नार्मदः	१३००	१. सूर्यसिद्धान्तटीका
तेजःसिंहः	१३००	१. दैवज्ञालङ्कृतिः
पद्मनाभः	१३२०	१. यन्त्ररत्नावली
दामोदरः	१३३९	१. भटतुल्यकरणम्
वैद्यनाथः	१३५०	१. जातकपारिजातः
गङ्गाधरः	१३५६	१. चान्द्रमानतन्त्रम्
		२. लीलावतीटीका
मकरन्दः	१४००	१. मकरन्दकरणम्
		२. मकरन्दसारिणी
शार्ङ्गधरः	१४००	१. विवाहपटलः
केशवः (द्वितीयः)	१४१८	१. ग्रहकौतुकम्
		२. मुहूर्ततत्त्वम्
		३. केशवीयजातकपद्धतिः
		४. केशवीयताजिकपद्धतिः
		५. ग्रहकौतुकटीका
		६. वर्षग्रहसिद्धिः
		७. तिथिसिद्धिः
		८. ग्रहचालनम्
		९. गणितदीपिका

		१०. जातकपद्धतिटीका
		११. सिद्धान्तपाठकायसी
		१२. आचारपद्धतिः
		१३. कुण्डाष्टलक्षणम्
गणेशदैवज्ञः	१४४२	१. ग्रहलाघवम्
		२. बृहत्तिथिचिन्तामणिः
		३. लघुतिथिचिन्तामणिः
		४. लीलावतीटीका
		५. सिद्धान्तशिरोमणिविवृतिः
		६. विवाहवृन्दावनटीका
		७. मुहूर्ततत्त्वटीका
		८. कृष्णाष्टमीनिर्णयः
		९. होलिकानिर्णयः
		१०. तर्जनीमन्त्रकम्
		११. श्राद्धविधिः
		१२. पर्वनिर्णयः
		१३. लघुचिन्तामणिः
रामचन्द्रः	१४२०	१. कल्पद्रुमकरणम्
लक्ष्मीदासः	१४२२	१. गणिततत्त्वचिन्तामणिः
ज्ञानराजः	१४२५	१. बीजगणितम्
		२. सिद्धान्तसुन्दरम्
		३. ज्ञानराजजातकम्
सूर्यः	१४६३	१. सूर्यप्रकाशः
		२. लीलावतीटीका (गणितामृतकूपिका)
		३. श्रीपतिपद्धतिगणितम्
		४. बीजगणितम्
		५. ताजिकालङ्कारः
		६. सिद्धान्तशिरोमणिटीका
		७. गणितमालती
		८. सिद्धान्तसंहितासारसमुच्चयः
		९. ग्रहविनोदः
		१०. कविकल्पलता

		११. परमार्थप्रभा (गीता) टीका
		१२. भक्तिशतकम्
		१३. वेदान्तशतश्लोकी
		१४. शृङ्गारतरङ्गिणी (अमरुटीका)
हरिभट्टः	१४४५	१. ताजकसारः
पीताम्बरः	१४४४	१. विवाहपटलः
शिवदासः	१४४६	१. ज्योतिर्निबन्धः
अनन्तः	१४४७	१. अनन्तसुधारसः
नृसिंहः	१४२०	
अनन्तः	१४४०	१. जातकपद्धतिः
		२. कामधेनुटीका
ढुण्ढिराजः	१४६०	१. जातकाभरणम्
		२. सुधारसकरणचषकः
		३. ग्रहलाघवोदाहरणम्
		४. ग्रहकलोपपत्तिः
		५. पञ्चाङ्गफलम्
		६. कुण्डकल्पलता
नृसिंहः	१४८०	१. मध्यमग्रहसिद्धिः
गणेशः	१४८०	१. ताजिकभूषणपद्धतिः
कञ्चपल्लूः	१४७९	१. ज्योतिषदर्पणः
रघुनाथः	१४८४	१. सुबोधमञ्जरी
रघुनाथः	१४८७	१. मणिप्रदीपः
कृपारामः	१४९०	१. सर्वार्थचिन्तामणिः
		२. पञ्चपक्षीटीका
		३. मुहूर्ततत्त्वटीका
		४. वास्तुचन्द्रिका
		५. बीजगणितोदाहरणम्
		६. मकरन्दोदाहरणम्
		७. यन्त्रचिन्तामण्युदाहरणम्
नारायणः	१४९३	१. मुहूर्तमार्तण्डः
दिनकरः	१५००	१. खेटकसिद्धिः
नृहरिः	१५०५	१. जातकसारः
गङ्गाधरः	१५०८	१. ग्रहलाघवटीका

नीलकण्ठः	१५०९	१. तोडरानन्दः
		२. ताजिकनीलकण्ठी
रामभट्टः	१५२२	१. रामविनोदकरणम्
		२. मुहूर्तचिन्तामणिः
		३. यन्त्रप्रकाशः
श्रीनाथः	१५१२	१. ग्रहचिन्तामणिः
गोविन्ददैवज्ञः	१५२५	१. पीयूषधाराटीका (मुहूर्तचिन्तामणिटीका)
विष्णुः	१५३०	१. विष्णुकरणम्
मल्लारिः	१५२४	१. ग्रहलाघवटीका
रङ्गनाथः	१५२५	१. गूढार्थप्रकाशिका
गणेशः	१५२५	१. जातकालङ्कारः
कृष्णः	१५४०	१. बीजनवाङ्कुरः
		२. जातकपद्धतिटीका
नृसिंहः	१५२३	१. सौरभाष्यम्
		२. वासनावार्तिकम्
दिवाकरः	१५२८	१. पद्मजातकम्
		२. प्रौढमनोरमा
		३. जातकपद्धतिः
		४. गणिततत्त्वचिन्तामणिः
		५. मकरन्दविवरणम्
नारायणः	१५४०	१. केशवपद्धतिटीका
नागेशः	१५४१	१. ग्रहप्रबोधः
गोविन्दः	१५४४	१. रसालाटीका (नीलकण्ठी)
शिवः	१५४०	१. मुहूर्तचूडामणिः
		२. अनन्तसुधारसटीका
विश्वनाथः	१५५०	१. ताजिकनीलकण्ठीटीका
		२. गहनार्थप्रकाशिका (सूर्यसिद्धान्त) टीका
		३. सिद्धान्तशिरोमणिटीका
		४. करणकुतूहलटीका
		५. मकरन्दटीका
		६. ग्रहलाघवटीका

		७. पातसारिणी टीका
		८. अनन्तसुधारसटीका
		९. रामविनोदकरणटीका
		१०. होरास्कन्धनिरूपणम्
		११. विष्णुकरणटीका
		१२. केशवीयजातकपद्धतिटीका
		१३. सोमसिद्धान्तटीका
		१४. तिथिचिन्तामणिटीका
		१५. चन्द्रमानतन्त्रटीका
		१६. बृहज्जातकटीका
		१७. श्रीपतिपद्धतिटीका
		१८. वासिष्ठसंहिताटीका
		१९. बृहत्संहिताटीका
शिवः	१५४०	१. अनन्तसुधारसटीका
		२. मुहूर्तचूडामणिः
विठ्ठलदीक्षितः	१५४९	१. मुहूर्तकल्पद्रुमः
मुनीश्वरः	१५५०	१. सिद्धान्तसार्वभौमः
		२. सिद्धान्तसार्वभौमटीका
		३. पाटीसारः
		४. लीलावत्याः निसृष्टार्थदूतीटीका
		५. सिद्धान्तसार्वभौमस्य मरीचिटीका
कमलाकरभट्टः	१५५०	१. सिद्धान्ततत्त्वविवेकः
माधवः	१५५५	१. शिशुबोधिनीटीका (नीलकण्ठी)
सोमदैवज्ञः	१५५९	१. पद्धतिभूषणम्
		२. कल्पलता
रङ्गनाथः	१५६०	१. सिद्धान्तचूडामणिः
		२. भङ्गीविभङ्गीकरणम्
		३. लोहगोलखण्डनम्
		४. पलभागखण्डनम्
नित्यानन्दः	१५६१	१. सर्वसिद्धान्तराजः
बालकृष्णः	१५७१	१. ताजिककौस्तुभः
बलभद्रः	१५६४	१. होरारत्नम्
		२. हायनरत्नम्

कृष्णः	१५७५	१. करणकौस्तुभः
		२. तन्त्ररत्नम्
रत्नकण्ठः	१५८०	१. पञ्चाङ्गकौतुकम्
रघुनाथः	१५८२	१. मुहूर्तमाला
विद्दणः	१५८२	१. वार्षिकतन्त्रम्
महादेवः	१५८३	१. मुहूर्तदीपकः
गोविन्दः	१६००	१. होराकौस्तुभः
		२. बृहज्जातकटीका
गणपतिः	१६०७	१. मुहूर्तगणपतिः
चिन्तामणिः	१६०७	१. रमलचिन्तामणिः
जटाधरः	१६२६	१. फत्तेशाहप्रकाशः
दादाभटः	१६४१	१. किरणावलीटीका
नारायणः	१६६०	१. होरासारसुधानिधिः
		२. नरजातकव्याख्या
		३. ताजिकसुधानिधिः
		४. गणकप्रिया (प्रश्नग्रन्थः)
		५. स्वरसागरः
परमानन्दः	१६६०	१. प्रश्नमाणिक्यमाला
जगन्नाथः	१६६०	१. सिद्धान्तसम्राट्
नयनसुखोपाध्यायः	१६६०	१. कटरः
जयसिंहः	१६६०	—
राघवः	१६६२	१. पद्धतिचन्द्रिका
जयरामः	१६६७	१. रमलामृतम्
लक्ष्मीपतिः	१६७०	—
बबुआज्योतिषी	१६७८	—
शङ्करः	१६८८	१. वैष्णवकरणम्
बालकृष्णः	१६९२	—
परमसुखोपाध्यायः	१६९०	—
मणिरामः	१६९६	१. ग्रहगणितचिन्तामणिः
मूला	१७०३	१. ब्रह्मसिद्धान्तसारः
मथुरानाथः	१७०४	१. यन्त्रराजघटनम्
चिन्तामणिदीक्षितः	१७०५	१. सूर्यसिद्धान्तसारिणी
		२. गोलानन्दः

सेवारामशर्मा	१७१७	—
लज्जाशङ्करशर्मा	१७२६	—
नन्दलालशर्मा	१७२६	—
राघवः	१७३२	१. खेटकृतिः
		२. पञ्चाङ्गार्कः
		३. पद्धतिचन्द्रिका
शिवः	१७३७	१. तिथिपारिजातः
दिनकरः	१७३४	१. ग्रहविज्ञानसारिणी
		२. मासप्रवेशसारिणी
		३. लग्नसारिणी
		४. क्रान्तिसारिणी
		५. चन्द्रोदयाङ्कजालः
		६. दृक्कर्मसारिणी
		७. ग्रहषट्कजालः
		८. पातसारिणीटीका
		९. यन्त्रचिन्तामणिटीका
सुवाजी बापू	१७४०	१. सिद्धान्तशिरोमणिप्रकाशः
यज्ञेश्वरः	१७४०	१. ज्योतिषपुराणविरोधमर्दनम्
		२. अविरोधप्रकाशविवेकमण्डनम्
		३. यन्त्रराजवासना
		४. अनुभाविका
		५. मणिकान्तिः
		६. प्रश्नोत्तरमालिका
नृसिंहः (बापूदेवः)	१७४३	१. रेखागणितम्
		२. त्रिकोणमितिः
		३. सायनवादः
		४. ज्योतिषाचार्याशयवर्णनम्
		५. अष्टादशविचित्रप्रश्नसङ्ग्रहः
		६. तत्त्वविवेकपरीक्षा
		७. मानमन्दिरस्थयन्त्रवर्णनम्
		८. अङ्कगणितम्
		९. फलितज्योतिषम्
देवकृष्णः	१७४०	—

जीवनाथः	१७४४	१. भास्करीयबीजटीका
		२. भावप्रकाशः
नीलाम्बरः	१७४५	१. गोलप्रकाशः
रघुनाथलेले:	१७४९	१. सायनपञ्चाङ्गम्
रघुनाथाचार्यः	१७५०	१. ज्योतिषचिन्तामणिः
कृष्णशास्त्री	१७५३	१. ज्योतिषशास्त्रेतिहासः
		२. ज्योतिषशास्त्रम्
कृष्णदेवः	१७५३	—
विनायकः (कैरोलक्ष्मणछत्रे)	१७७६	१. ग्रहसाधनकोष्ठकम्
गङ्गाधरः	१७८०	१. मुहूर्तसिन्धुः
वेङ्कटेशकेतकरः	१८००	१. ज्योतिर्गणितम्
वामनकृष्णः	१८०३	१. बृहत्पञ्चाङ्गसाधनोदाहरणम्
वालगङ्गाधर-तिलकः	१८१०	१. आर्यायणम् (Orion)
विनायकपाण्डुरङ्गः	१८२०	१. वैनायकी द्वादशाध्यायी
		२. कुण्डसारः
		३. अर्धकाण्डम्
		४. सिद्धान्तसारः
सुधाकरः	१८२०	१. दीर्घवृत्तलक्षणम्
		२. विचित्रप्रश्नः
		३. वास्तवचन्द्रशृङ्गोन्नतिसाधनम्
		४. द्युचरचारः
		५. पिण्डप्रभाकरः
		६. भाभ्रमरेखानिरूपणम्
		७. धराभ्रमः
		८. ग्रहणकरणम्
		९. गोलीयरेखागणितम्
		१०. यूक्लिडस्यानुवादः
		११. गणकतरङ्गिणी
		१२. प्रतिभाबोधकम्
		१३. अनेकाष्टीकाग्रन्थाः
शङ्करबालकृष्णः	१८३०	१. भारतीयज्यौतिषम्
हरिकृष्णः	१८६६	१. बृहज्ज्योतिषार्णवः

कतिपये अर्वाचीना व्याख्याकाराः

		व्याख्यातग्रन्थाः (हिन्दीभाषायाम्)
सीताराम झा	१८६६	गोलपरिभाषा, रेखागणितम्, बृहत्पाराशरहोराशास्त्रम्, ग्रहलाघवम्, लघुपाराशरी, केरलप्रश्नसङ्ग्रहः, अहिबलचक्रम्, केशवीयजातकपद्धतिः, खेटकौतुकम्, गर्गमनोरमा, जातकालङ्कारः, जैमिनिसूत्रम्, ताजिकनीलकण्ठी, धराचक्रम्, नाह्लिदत्तपञ्चविंशतिका, भावप्रकाशः, मुहूर्तचिन्तामणिः, मुहूर्तमार्तण्डः, लग्नवाराही, लघुजातकम्, विवाहवृन्दावनम्, शीघ्रबोधः, षट्पञ्चाशिका, सारावली, बृहज्जातकम्, सूर्यसिद्धान्तः, स्त्रीजातकम्, लीलावती च ।
अच्युतानन्दः झा	१८६७	बृहज्जातकम्, चापीयत्रिकोणगणितम्, रमलनवरत्नम्, लघुमध्यपाराशरी, मानसागरी, जातकाभरणम्, जैमिनिसूत्रम्, बृहत्संहिता, वास्तुरत्नावली, ज्योतिषप्रश्नफलगणना च ।
मुरलीधरचतुर्वेदी	१८९९	सारावली, होरारत्नम् ।
कपिलेश्वरः	१८६९	मुहूर्तमार्तण्डः, जातकपारिजातः, सूर्यसिद्धान्तः, मुहूर्तचिन्तामणिश्च ।
गणेशदत्तः	१८९४	जातकालङ्कारः, हस्तसञ्जीवनम्, नरपतिजयचर्या च ।
गङ्गाधरमिश्रः	१८६१	ताजिकनीलकण्ठी, प्रतिभाबोधकम्, वास्तवचन्द्रश्रृङ्गोन्नतिसाधनम्, सिद्धान्ततत्त्वविवेकः ।

लषणलालः	१९०५	लीलावती, जातकालङ्कारः, लघुजातकम्, जैमिनिसूत्रम्, जन्मपत्रविधानम् (मौलिकम्), अतिचारतत्त्वम् (मौ०), क्षयाधिमासतत्त्वम् (मौ०)।
केदारदत्तजोशी		ग्रहलाघवम्, मुहूर्तचिन्तामणिः, चमत्कारचिन्तामणिः।
रामजन्ममिश्रः		केशवीयजातकपद्धतिः, शीघ्रबोधः, नारदसंहिता, भास्वती, समरसारः, प्रश्नचण्डेश्वरः।
देवचन्द्रझाः		बृहत्पाराशरहोरा, बीजगणितम्।
रामचन्द्रपाण्डेयः		मानसागरी, मुहूर्तचिन्तामणिः, ग्रहगणितविकासः (ग्रन्थो हिन्दीभाषायाम्)।

[सहकारेण श्रीहरेकान्तझामहोदयस्य]

उपसंहारः

अथात्रोपसंह्रियते ज्योतिषशास्त्रेतिहासग्रन्थः । यथोच्यते—

'न मया धारिता शङ्कुर्घटिका नैव शोधिता ।
परोपदेशवेलायां लिखिता जन्मपत्रिका ॥' इति ।

तथैवात्रापि—

'मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ।'

इतिवत् यथा यथा हि पूर्वाचार्यैरुक्तं तथा तथाऽत्र सङ्गृहीतम् ।

एतावत्पर्यन्तं हि भारतीयज्योतिषशास्त्रस्य सङ्क्षिप्तं विवेचनं कृतम् । अस्य हि विस्तृतविवेचनाय सुविपुलमध्ययनमपेक्षितं यद्धि नास्मादृशानां कृते सम्भवि । सुविपुलं साधनं सुदीर्घकालः सुविपुलं मस्तिष्कश्च येषां नियत्या संयोजितमेकत्र त एवास्य विस्तृताध्ययने समर्थाः । अत्र तु केवलमन्यत्र ग्रन्थेषु व्याकीर्णत्वेन स्थिता सामग्री समस्तत्वेनोपस्थापिता ।

ते हि नो दिवसा गताः । उपह्वरे गिरीणां सङ्गमे च नदीनां धिया विप्रो अजायत । काश्मीरोपत्यकायां लगधाचार्य्यः, कुसुमपुरे आर्यभटः, गुर्जरेषु लाटदेवः, उज्जयिन्यां वराहमिहिरः, गुर्जरेषु लल्लाचार्यः, श्रीमाले ब्रह्मगुप्तः, काश्मीरेषु मुञ्जालः, धारानगर्यां भोजदेवः जयपुरे जयसिंहश्च यदा वेधमाश्रित्य दृग्गणितैक्यसाधनाय सततमुद्यमपरा आसन् । तेषां स्मरणायापि वयमधिकृता न वेति संशय एव ।

ज्योतिषशास्त्रं हि शास्त्रान्तरवद्भारतीयानां स्वकीयस्यैव मौलिकचिन्तनस्य परिणतिरिति स्पष्टमेवास्य वेदाङ्गत्वेन । यज्ञाङ्गभूतमिदं शास्त्रं यदि हि पश्चिमत आयातितमित्युच्यते तदा कथं नोच्यते भारतभूरेव तत एवागतेति । यदि कूपस्थो मण्डूकः स्वाधिष्ठितकूपमेव ब्रह्माण्डत्वेन गृह्णाति चेत्तत्र गगनविहारिणो भास्करस्य का हानिः । यो यद्यावज्जानाति स तत्तावदेव कथयति । तत्र सत्यासत्यविवेचनं तु पण्डितानामेव कार्यम् ।

सुमेरोरारभ्य क्षीरसागरपर्यन्तं भारतीयैर्यद्यदुपार्जितं ज्योतिषज्ञानं तत्सर्वमेव ग्रन्थरूपेणास्मान् शास्ति; कामं तत्र यदा कदा कश्चिद्विषयः परानुभूतोऽपि गृहीतः स्यात् । यदि तथा तत्र का हानिः । 'आ नो भद्राः क्रतवो यन्तु विश्वतः' । यदि हि गृहाद् गतो बालः कमपि कालं प्रवासे उषित्वा प्राप्तवयाः प्रत्यागच्छति चेत् किं स वैदेशिको भवति ? वस्तुतो नैव । यदि हि हुट्टिको दीर्घपात्त्वेन मयैव गगनमिदं धारितमिति मन्यते चेत्तदुपहासायैव भवति । उच्चपातप्रभृतिकठिनविषयज्ञानसम्पादनं गृहीतमपि तदन्यतः कालान्तरमानानुसारेण तत्र संशोधनं

भारतीयज्ञानबाह्यमिति ह्विटनेपण्डितो यथा कथयति तत्तस्य भारतीयशास्त्राज्ञतैवेति वराहमिहिरस्य नूनं कदाचिदासीद्यत्प्रोक्तं पूर्वशास्त्रेषु इति कथनेन तथैव भास्कराचार्यस्य 'यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तसमानधर्मिण एवोत्पत्स्यन्ते। ते तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि करिष्यन्ति' इति कथनेन सिद्धमेव। भारतीयविचक्षणा न केवलं भग्रहावस्थितिमेव जानन्ति स्म अपि तु तेषां गतिविषये गतेरपि गतिविषये च प्रकामं जानन्ति स्म। यच्चोच्यते भारतीया हि परम्पराया अन्धानुगा न हि तेषु गतिरस्तीति तदपि निर्मूलमेव। यदि तथाऽभविष्यत्तदा लल्लाचार्येण आर्यभटस्य भूभ्रमसिद्धान्तं लक्ष्यीकृत्य 'यदि वा भ्रमति क्षमा तदा स्वकुलायं कथमाप्नुयुः खगाः' इति कथमपि नोक्तमभविष्यत्। काले काले वेधमाश्रित्य प्रणीताः करणग्रन्था अपि भारतीयानां सामयिकावस्थितिपरायणत्वमेव सूचयन्ति।

भारतीयं ज्योतिषशास्त्रं पञ्चार्षसिद्धान्तानार्यभटसिद्धान्तञ्चादाय तत्र तत्र तात्कालिकपरिवर्तनमपि संयोज्य चलतीति स्पष्टमेव सलोचनानाम्। ते चार्षसिद्धान्ताः पैतामह-वासिष्ठ-पौलिश-रोमश-सौरसंज्ञिताः। क्रमोऽयं वराहमिहिरेण निर्दिष्टः। तत्र पैतामहसिद्धान्तो ब्रह्मगुप्तेन व्याख्यातः, वासिष्ठो हि विष्णुचन्द्रेण, रोमको हि प्रथमं लाटदेवेन ततश्च श्रीषेणेन, पौलिशो हि लाटदेवेन, सौरो हि प्रथमं वराहेण ततश्च लाटसिंहेन व्याख्यातः। आर्यभटसिद्धान्तश्च लल्लाचार्येण प्रथमं पुनरीक्षितः पुनः पुनः पश्चाद्वर्तिभिस्ततः। प्राधान्येन त्रय एव सिद्धान्ताः—आर्यः, सौरो ब्राह्मश्च। त्रय एवाचार्याश्च—आर्यभटः, लाटसिंहः ब्रह्मगुप्तश्च। अन्ये तदनुगामिनः। तत्रापि ब्रह्मगुप्तमवाप्य शास्त्रमिदं पूर्णतामभजत्। पश्चात्तु तत्र तत्र सामयिकगतिसंयोजनाय बीजसंस्कार एवाहितः। अयनगतिं विहाय ज्योतिषसिद्धान्तस्य सर्वोऽपि पक्षो ब्रह्मगुप्तमुपतिष्ठति। अयनगतेरुन्नायको मुञ्जालो यद्यपि विषयोऽयं वराहेणापि सङ्केतितपूर्वो ब्रह्मगुप्तेनाऽपि निरीक्षित एव। तेनैव तेनोक्तं स्यात्—

'यदि भिन्नाः सिद्धान्ताः भास्करसङ्क्रान्तयोऽपि भेदसमाः।
स स्पष्टः पूर्वस्यां विषुवत्यर्कोदयो यस्य॥' इति।

अपि च—

'संसाध्य स्पष्टतरं बीजं नलिकादियन्त्रेण।
तत्संस्कृतग्रहेभ्यः कर्तव्यौ निर्णयादेशौ॥' इति।

भारतीयज्योतिषे द्विविधं मानं प्रचलति—सायनं निरयणञ्च। स्पष्टग्रहे अयनांशसमायोजनेन सायनमानं भवति तस्यैव यथावत्स्वीकरणे निरयणमिति। वस्तुतस्तु नोभयोः कश्चन भेदः। यदि हि पूर्वसाधितग्रहा एव गृह्यन्ते तदा तत्रायनांशाः संयोज्या एव; यदि हि तदैव ग्रहाः साध्यन्ते वेधद्वारा तदा स एव कालः

शून्यायनांशो भवति इति। तत्रायनांशसंयोजनस्य वार्तैव नोदेति । तेनैव मुञ्जाल-प्राग्वर्तिभिरयनांशा उपेक्षिताः । यस्मिन् बिन्दौ सूर्याचन्द्रमसोर्दक्षिणोत्तरायण-क्रान्तिवृत्तं सम्पद्यते तत्प्रदेशस्थतारका नैव सदा तत्रैव नियताऽपि तु किञ्चित् कालानन्तरं सा ततः पूर्वस्यां सरति यद्वाऽयनबिन्दुरेव पश्चिमस्यां ततः सरति। वेदाङ्गज्योतिषकाले धनिष्ठारम्भे उत्तरायणारम्भो हि सम्पद्यते स्म किन्तु अयन-गतिवशाच्छकारम्भमभितस्तदेव श्रवणारम्भे सञ्जायते स्म; वराहकाले तु उत्तराषाढाया द्वितीयपादे, सम्प्रति तु तत्पूर्वाषाढारम्भमभित एव। एवमेव नाडीक्रान्तिवृत्तानां सम्पातबिन्दवोऽपि पूर्वपूर्वतः पश्चिमं प्रति सरन्ति क्रमशः किञ्च वृत्त एकस्या अपि बिन्दोश्चलनेन सर्वा अपि बिन्दवश्चलितुमारभन्ते । इयं गतिरेव अयनचलनशब्देन ज्ञायते । द्वितीयार्यभटो हीदं ग्रहत्वेन गृह्णाति, आकलयत्यप्यस्य भगणानपि । भास्कराचार्य इदं सम्पातचलनं कथयति । केचिदाधुनिकास्तु विषुवचलनमपि । यथोक्तं भास्करीये गोलबन्धाधिकारे—

'तस्याऽपि चलनमस्ति । येऽयनचलनभागाः प्रसिद्धास्त एव विलोमगस्य क्रान्तिपातस्य भागः ।'

अयनचलनमानमाश्रित्याचार्या नैकमत्यं भजन्ते । तदानयनपद्धतिरपि बहुधैव निर्दिष्टाः । यथा लघुवासिष्ठे—

'अब्दाः खखर्तुभिर्भाज्यास्तद्दोस्त्रिघ्ना दशोद्धृताः ।
अयनांशा ग्रहे युक्ताः.............................. ।।' इति ।

पद्धत्याऽनयाऽस्य युगे ६०० भगणा भवन्ति । शङ्करबालकृष्णानुसारेण १८१० शकमभितो वार्षिकी अयनांशगतिः ६० विकला मताः । पृथूदकानुसारेण कल्पे १८९४११ अयनभगणा भवन्ति । सूर्यसिद्धान्तानुसारेण अयनबिन्दुर्हि पूर्व-पश्चिमगतिमाश्रित्य चलति । नासौ ग्रहादिरिव सम्पातो नैव सम्पूर्णनक्षत्रमण्डलं परिभ्रमत्यपि तु असौ सम्पातादेकवारम् २७ अंशपर्यन्तं पूर्वस्यां चलति ततश्च मूलस्थानं प्रत्यागच्छति पुनश्च तेनैव विधिना पश्चिमं सरति पुनश्च मूलस्थानं प्रत्यागच्छतीति अस्य भगणे १०८ अंशा भवन्तीति । विष्णुचन्द्रस्तु अस्य गतिं पूर्वाभिमुखीमेव मन्यते, एवमेव मुञ्जालोऽपि । यथोक्तम्—

'उत्तरतो याम्यदिशं याम्यान्तात्तदनु सौम्यदिग्भागम् ।
परिसरतां गगनसदां चलनं किञ्चिद्भवेदपभे ।।
विषुवदपक्रममण्डलसम्पाते प्राचि मेषादिः ।
पश्चात्तुलादिरनयोरपक्रमासम्भवः प्रोक्तः ।।' इत्यादि ।

'तेन सोऽस्य वार्षिकीं गतिं ५६-८२१३३ मन्यते । वस्तुतस्तु विषयेऽस्मिन् विष्णुचन्द्र एव समीचीनः प्रतिभाति । भास्कराचार्यः कथयति यत्तस्य तदानीं स्वल्पत्वाद् ब्रह्मगुप्तादिभिर्नोपलब्धः, इदानीं बहुत्वादाधुनिकैरुपलब्धः । अत एव

तस्य गतिरस्तीति अवगतमिति। न केवलमयनबिन्दोर्गतिरस्ति अपि तु तस्य गतेरपि गतिरस्ति । द्वितीयार्यभटस्तु—

'अयनग्रहदोः क्रान्तिज्याचापं केन्द्रवद्धनर्णं स्यात् ।
अयनलवास्तत्संस्कृतखेटादयनचरापमलग्नानि ॥'

इति कथयति । एतदनुसारेण सम्पातस्य प्रदक्षिणा ९६ एव भवति न तु १०८ । तन्मतेऽयनचलनस्य कल्पे ५८१७०९ भगणा भवन्ति । क्रान्तितुल्यत्वेन अयनगतिरपि सदा समाना न भवति । अस्य मध्यममानं हि ४६.५ विकलाः । अयनगतिमादाय पण्डितानां वैमत्यं विलोक्य खिन्नचेता भास्कराचार्यः कथयति—

'अथ च ये वा ते वा भगणा भवन्तु । यदा येंऽशा निपुणैरुपलभ्यन्ते तदा स एव क्रान्तिपातः' । इति ।

स हि ११०५ शके ११ कलामिताऽयनगतिरिति मन्यते ।

इत्थं हि वार्षिकायनगतिः सूर्यसिद्धान्तानुसारेण ५४ विकलाः, मुञ्जालमते ५९.९, पाराशरमते ४६.५, द्वितीयार्यभटमते ४६.३ विकलाः ।

मुञ्जालमतेनासौ विलोमगत्या सम्पूर्णमेव नक्षत्रमण्डलं भ्रमति विष्णुचन्द्रानुसारेण तु पूर्वप्रदक्षिणामेव मन्यते सूर्यसिद्धान्तान्तस्तु आवर्तिप्रदक्षिणामेव । वस्तुतस्तु सम्पातस्यापि पूर्णैव प्रदक्षिणा भवति यथा सम्मतं मुञ्जालस्य । तेनैव वैदिकसंहितायां यदि चैत्रवैशाखयोर्वसन्त उक्तस्तदा सम्प्रति फाल्गुनचैत्रयोरेव ।

वस्तुतस्तु वर्षे हि सूर्य एकवारं सम्पाताच्चलित्वा पुनः सम्पाता गमनानन्तरं यावान् समयोऽन्तरितो भवति तावन्मिताऽयनांशगतिर्भवति । यथा यथा हि गतिरस्य दूरं चलति तथा तथा दिनमानमपि ह्रासोन्मुखं भवति ।

धार्मिकपञ्चाङ्गेन सदा सायनमानाञ्चितेन भाव्यमिति पञ्चाङ्गसुधारसमितेः परामर्शः सर्वमान्यः । ४२१ शकापेक्षया सम्प्रति [illegible] विंशतिदिनानि पश्चाद् गच्छति । तेन हि निरयणसूर्ये धनुष [illegible] प्राप्ते सायनसूर्यस्य मकरसङ्क्रान्तिर्भवति । वस्तुतोऽयमेव मकरपुण्यकालः । विषयोऽयं सुधीभिः समनोयोगं विचारणीयः ।

इत्थं हि यथामिति निरूपितं भारतीयज्योतिषशास्त्रम्
